CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

117
Bull Library
2616

सारस्वती सुषमा

सम्पूर्णानन्दसंस्कृतविश्वविद्यालयानुसन्धानपत्रिका

[त्रैमासिकी]

EXCHANGE

सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयः

श्रुतम् मे गोपाय

३२ वर्षे
३-४ अङ्कौ

मार्गशीर्ष-फाल्गुनपूर्णिमे, वै० सं० २०३४
दिसम्बर, मार्च, १९७७-७८ ई०

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

सुसङ्ग्राह्याः तन्त्रशास्त्रीयाः पालिभाषामयाश्च ग्रन्थाः

क्रमसं० ग्रन्थनाम मूल्यम्

१. **नित्याषोडशिकार्णवः**—ग्रन्थरत्नमिदम् ऋजुविमर्शिन्या अर्थरत्नावल्या च व्याख्यया विभूष्य विदुषा सम्पादकेन बहुपरिश्रम्य, अनुसन्धाय च सम्पादितम्। ग्रन्थोऽयं म० म० गोपीनाथकविराजमहोदयानाम् आङ्ग्लभाषालिखितोपोद्घातेन समलङ्कृतः— २५-००

२. **तन्त्रसङ्ग्रहः** – [प्रथमद्वितीयभागात्मकः] योगतन्त्रग्रन्थमालायाश्चतुर्थपुष्परूपमिदं ग्रन्थरत्नं निर्वाणतन्त्र-तोडलतन्त्र-कामधेनुतन्त्र-फेत्कारिणीतन्त्र-ज्ञानसङ्कलिनीतन्त्र-सवृत्तिकदेवीकालोत्तरागमेति षड्ग्रन्थसङ्ग्रहरूपम्। विमर्शप्रधानया भूमिकया पाठान्तरेण च विभूषितोऽयं ग्रन्थो म० म० गोपीनाथकविराजमहोदयैः सम्पादितः—

प्रथमभागस्य—१६-००

द्वितीयभागस्य—१७-००

३. **महार्थमञ्जरी**– [श्रीमहेश्वरानन्दप्रणीता] परिमलाख्यस्वोपज्ञव्याख्याविभूषितमिदं ग्रन्थरत्नं विदुषा सम्पादकेनानुसन्धानिकैः भूमिकाटिप्पणीपरिशिष्टादिभिः सनाथितम्— १७-५०

४. **त्रिपुरारहस्यम्**–ज्ञानखण्डमात्रम्। तन्त्रशास्त्रसर्वस्वभूतमिदं ग्रन्थरत्नं श्रीनिवासभट्टविरचिततात्पर्यदीपिकाख्यया व्याख्यया परिमण्डितम्, अथ च म० म० गोपीनाथकविराजमहोदयानां सम्पादनेन सनाथितम्— ९-००

५. **लुप्तागमसङ्ग्रहः**–[प्रथमो भागः] ग्रन्थोऽयं तत्तत्तन्त्रशास्त्रग्रन्थेषु तत्तद्ग्रन्थनाम्ना उद्धृतानां वचसां सङ्ग्रहरूपः, अथ च विदुषा सम्पादकेन म० म० गोपीनाथकविराजमहोदयेन विनिर्मितया टिप्पण्या, भूमिकया तत्तत्परिशिष्टैश्च परिमण्डितः— १२-००

६. **विसुद्धिमग्गो** – [बुद्धघोषाचार्यविरचितः] भागत्रयात्मकोऽयं ग्रन्थो भदन्ताचारियधम्मपालत्थेरकृतपरमत्थमञ्जूषानाम — विसुद्धिमग्गमहाटीकासमेधितः, अथ च विदुषा सम्पादकेन गवेषणागर्भभूमिकया विभूषितः— प्रथमभागस्य —३६-००

द्वितीयभागस्य—३२-००

तृतीयभागस्य—२७-००

७. **अभिधम्मत्थसंगहो**–[अनिरुद्धाचार्यप्रणीतः] पालिभाषामयोऽयं ग्रन्थः अभिधर्मप्रकाशिन्या व्याख्यया हिन्दीभाषानुवादेन च समलङ्कृतः, अथ च पाठभेद-पादटिप्पणीभावार्थ-तुलनात्मकटिप्पणीसन्निवेशेन गवेषणामूलकभूमिकाऽनुक्रमण्यादिभिश्च सुसमेधितः— प्रथमभागस्य —१५-००

द्वितीयभागस्य—२०-००

प्रकाशकः-निदेशकः, अनुसन्धानसंस्थानम् सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी-२२१००२

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सारस्वती सुषमा

सम्पूर्णानन्दसंस्कृतविश्वविद्यालयानुसन्धानपत्रिका

[त्रैमासिकी]

मुख्यसम्पादकः

डॉ० भागीरथप्रसादत्रिपाठी 'वागीशः शास्त्री'

उपसम्पादकः

डॉ० हरिश्चन्द्रमणित्रिपाठी

4958

सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयः
श्रुतम् मे गोपाय

३२ वर्षे
३-४ अङ्कौ

वार्षिकमूल्यम् १० रूप्यकाणि
संयुक्ताङ्कयोः ६ रूप्यकाणि

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

4958

State Museum Library • Lucknow •

तारा प्रिंटिंग वर्क्स, वाराणसी

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

विषयानुक्रमणी

१. पाणिनिपरवर्तिनः शाकटायनव्याकरणस्य कश्चिद् विशेषः—
डॉ० भागीरथप्रसादत्रिपाठी 'वागीशः शास्त्री' १३३-१३८

२. मानसामयेषु यौगिक्याश्चिकित्साया अभ्युपगमः—
डॉ० विद्याधरशुक्लः कविराजः १३९-१५६

३. पौराणिकसर्गतत्त्वविमर्शः—डॉ० रामाभिलाषत्रिपाठी १५७-१६५

४. प्राचीनभारतीयध्वनिवित्सम्मतवर्णस्वरूपभेदकगुणस्वरूपविमर्शः—
श्रीनारायणमिश्रः १६६-१७२

५. ब्रह्मवैवर्ते अवतारसङ्ख्या—डॉ० वैकुण्ठनाथशास्त्री १७३-१७४

६. वैदिकवाङ्मये दिग्ज्ञानम्—डॉ० नागेन्द्रपाण्डेयः १७५-१७९

७. अलौकिकसन्निकर्षविमर्शः—डॉ० स्वामी आत्मानन्दपरमहंसः १८०-१८७

८. हेत्वलङ्कारविमर्शः—डॉ० वायुनन्दनपाण्डेयः १८८-१९९

९. प्रदीपप्रभयोर्वैमत्यविशेषे तत्त्वगवेषणम्—श्रीशशिधरशर्मा वाचस्पतिः २००-२०६

१०. धर्मस्वरूपविमर्शः—श्रीबैरिस्टरतिवारी २०७-२१९

११. साहित्यस्य भूमापृष्ठम्—श्रीगिरीशदत्तपाण्डेयः २२०-२२५

१२. प्राकृतशब्दस्यार्थस्तद्व्याप्तिश्च—डॉ० गङ्गारामपाण्डेयः २२६-२२९

१३. एकावली—कवेर्विद्याधरस्यासाधारणी कृतिः—डॉ०भृगुनाथपाण्डेयः २३०-२३५

१४. वाल्मीकीयरामायणसमीक्षा—डॉ० श्रीकृष्णमणित्रिपाठी २३६-२६६

लघुग्रन्थमाला

१. उषारागोदया नाटिका—सम्पादकः—डॉ० गौरीनाथशास्त्री १-४४

२. स्तोत्रावलिः—लेखकः—प० रघुनाथशर्मा

सूर्यस्तवः १-१२

शनिस्तवः १-८

निर्वेदनिवेदनम् १-१०

अनुभूतिप्रकाशः १-३

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सारस्वती सुषमा

सम्पूर्णानन्दसंस्कृतविश्वविद्यालयानुसन्धानपत्रिका

३२ वर्षः	मार्गशीर्ष-फाल्गुनपूर्णिमे, वि० सं० २०३४	३-४ अङ्कौ

पाणिनिपरवर्तिनः शाकटायनव्याकरणस्य कश्चिद् विशेषः

डॉ० भागीरथप्रसादत्रिपाठी 'वागीशः शास्त्री'

अनुसन्धानसंस्थाननिदेशकः,

सम्पूर्णानन्दसंस्कृतविश्वविद्यालये, वाराणस्याम् ।

संक्षिप्तशैलीकत्वात् सर्वाङ्गपूर्णत्वाच्च लोके प्रतिष्ठामभजत् पाणिनीयं व्याकरणम् । अल्पधियश्छात्राः सुविस्तीर्णमैन्द्रादिकं व्याकरणं कण्ठस्थीकर्तुं नाशकन् । तदानीं कानिचन तादृशान्यपि व्याकरणान्यासन्, यानि केषाञ्चन विशिष्टानां प्रकरणानामेव नियमान् आख्यान्ति स्म । अतः सर्वाङ्गपूर्णताया विरहात् तदध्ययनेन च्छात्रा व्याकरणस्य सकलान् नियमान् बोद्धुं न पारयन्ते स्म । इदं सर्वमालक्ष्य ख्रीस्ताब्दात् पूर्वं पञ्चमशताब्दभवेन महामुनिना पाणिनिना पूर्ववर्तीनि सर्वाणि व्याकरणान्यनुशील्य संक्षिप्तमप्यविकलमनवद्यं वेदलोकोभयात्मकं व्याकरणम् ३९७९ सूत्रेषु निबद्धम् । धातुगणोणादिपाठादयः पाणिनेरष्टाध्याय्याः खिलपाठतया अङ्गीक्रियन्ते । उपलब्ध उणादिपाठः खलु पाणिनीयो नास्ति ।

पाणिनिना भूतभविष्यद्वर्तमानादिकालानां नोपन्यस्तं किमपि लक्षणम् । लोकविज्ञातशब्दानां परिभाषाभिर्लक्षणैर्वा स्वग्रन्थकलेवरसमेधनं नासीदभीष्टं पाणिनेः । 'तदशिष्यं संज्ञाप्रमाणत्वात्' (१, २, ५३) इत्यभिधाय शास्त्रेण लिङ्गसंख्यादिप्रतिपादनं नोचितं मेने पाणिनिः । अतस्तन्नाम्नोपलब्धं लिङ्गानुशासनं तदीयं वान्यदीयं वेति विद्वद्भिर्विवेक्तव्यम् । सूक्ष्मेक्षिकासमेतस्यापि पाणिनेरष्टाध्यायी सकलानेव नियमानन्तर्भावयितुं नाशकत् । अतो व्यपवृक्तनियमावबोधाय कात्यायनेन रचितानि तत्र वार्त्तिकानि । किन्तु वार्त्तिकरचनामात्रेणापि यथेष्टं तदीयं लोकोपयोगित्वमनालक्ष्य पतञ्जलिना महाभाष्यं जग्रन्थे प्रश्नोत्तरात्मकशैलीकम् । जिज्ञासुजनानामल्पीयसा कालेन व्याकरणज्ञानं सम्पद्येतेति धिया यद्यपि पाणिनिना सूत्रेषु समाश्रितः संक्षेपः, तथापि त्रिमुनिव्याकरणं तथा पृथुलं संवृत्तं यदध्येता द्वादशभिर्वर्षैः संस्कृतवाङ्मयद्वारभूतं व्याकरणमेवाध्येतुं प्रभवति ।

अल्पीयसा कालेन लौकिकमनूनकं व्याकरणं कथं हस्तामलकं भवेदित्यवदधे जैनसम्प्रदायः परतश्चन्द्रगोमिनः । तत्र सर्वतः प्रथमं षष्ठे ख्रीस्तशताब्दे त्रिमुनिव्याकरणमाधारीकृत्य

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

पूज्यपाददेवनन्दिना व्यरचि जैनेन्द्रव्याकरणम् । यद्यपि तत्र पाणिनेरपि प्राक्तनानां व्याकरणानां तत्त्वानि विलोक्यन्ते, तथापि पाणिनीयव्याकरणस्य प्रभावस्तत्र निर्विवादः । यदुद्दिश्य देवनन्दिना स्वकीयं व्याकरणं ग्रथितम्, तन्न सिद्धम् । सरलया संक्षिप्तया च प्रक्रियया समन्वितं व्याकरणं तदानीमपि जिज्ञासवः प्रतीक्षन्ते स्म । यद्यपि शर्ववर्मणा प्रथमे खीस्तशताब्दे प्रकरण-पद्याऽऽत्मकं व्याकरणं विरचय्य निरदेशि पन्थाः, तथापि त्रिमुनिव्याकरणनिकषकषितस्य तस्या-वरत्वमेव सिद्धमभूत् । इत्थं तदपि नावाप सार्वभौमं प्रचारम् ।

जैनेन्द्राद् शतत्रयवर्षेषु श्वेताम्बरीयजैनकोविदेन महाश्रमणसङ्घाधिपतिना पाल्य-कीर्तिना शाकटायनव्याकरणं प्रणीय पूर्ववर्तिनां सर्वेषां लौकिकव्याकरणानां नैयून्यानि व्यपनेतुं प्रयेते । संक्षेपेण सारल्येन साकल्येन च लौकिकसंस्कृतभाषानियमान् जिज्ञासवो बोद्धुं शक्नुयुरिति धिया तेनेदं व्याकरणं तेने ।

सरलीकरणदृशा पाल्यकीर्तिना स्वकीये व्याकरणे पाणिनीयव्याकरणस्य बहूनि सूत्राणि संक्षेपीकृतानि । तत्र खलु सूत्रद्वयादारभ्य नवसंख्याकान्यपि पाणिनीयानि सूत्राणि स एकेनैव सूत्रेण निपुणतया संक्षेपितवान् । तत् सर्वमित्थं शक्यते वर्गीकर्तुम्—

१. पाणिनेः सूत्रद्वयस्थाने सूत्रमेकम्

१– पाणि०—'वृद्धस्य च पूजायाम्' (४,१,१६६); 'यूनश्च कुत्सायाम्' (४,१,१६७)।
शाक०—'युवं वृद्धं कुत्सार्चे' (१,१,१६)।

२– पाणि०—'पुरोऽव्ययम्' (१,४,६७), 'अस्तं च' (१,४,६८)।
शाक०—'अस्तं पुरोऽव्ययम्' (१,१,२९)।

३– पाणि०—'षष्ठी स्थानेयोगा' (१,१,४९), 'अलोऽन्त्यस्य' (१,१,५२)।
शाक०—'षष्ठ्याः स्थानेऽन्ते लः' (१,१,४७)।

४– पाणि०—'ढो ढे लोपः' (८,३,१३), 'रो रि' (८,३,१४)।
शाक०—'ढ्रो ढ्रि' (१,१,१३१)।

२. पाणिनेः सूत्रद्वयस्थाने मिश्रितं सूत्रद्वयम्

१– पाणि०—'पूरणगुणसुहितार्थसदव्ययतव्यसमानाधिकरणेन' (२,२,११), 'क्तेन च पूजायाम्' (२,२,११)।
शाक०—'तृप्तार्थाव्ययनिर्धार्यडच्छश्रानशमतिपूजाधारक्तैः' (२,१,५०), 'गुणै-रस्वस्थैः' (२,१,५१)।

२– पाणि०—'घरूपकल्पचेलड्ब्रुवगोत्रमतहतेषु ङ्योऽनेकाचो ह्रस्वः' (६,३,४३), 'उगितश्च' (६,३,४५)।
शाक०—'रूपकल्पङ्गोत्रमतहतचेलड्ब्रुवे ह्रस्वश्च वोगितः' (२,२,५२); 'ङ्योऽ-नेकाचः' (२,२,५३)।

३. पाणिनेः सूत्रत्रयस्थाने सूत्रमेकम्

१– पाणि०—'मनः' (४,१,११), 'अनो बहुव्रीहेः' (४,१;१२) 'डाबुभाभ्यामन्य-तरस्याम्' (४,१,१३)
शाक०—'मन्नन्बहुव्रीहेर्न्न च' (१,३,१२)

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

२– पाणि॰—'संबोधने च' (२,३,४७), 'सामन्त्रितम्' (२,३,४८), 'एकवचनं संबुद्धि' (२,३,४९)।
शाक॰—'आमन्त्र्ये' (१,३,९९)।

३– पाणि॰—'नदीपौर्णमास्याग्रहायणीभ्यः' (५,४,११०), 'झयः' (५,४,१११), 'गिरेश्च सेनकस्य' (५,४,११२)!
शाक॰—'गिरिनदीपौर्णमास्याग्रहायणीजयः' (२,१,५५)।

४. पाणिनेः सूत्रत्रयस्थाने सूत्रद्वयम्

१– पाणि॰—'तस्मै प्रभवति संतापादिभ्यः' (५,१,१०१), 'योगाद्यच्च' (५,१,१०२), 'कर्मण उकञ्' (५,१,१०३)।
शाक॰—'योगादये शक्ते' (३,२,९१), 'योग्यकार्मुके' (३,२,९२)।

५. पाणिनेः सूत्रचतुष्टयस्थाने सूत्रमेकम्

पाणि॰—'शूलोखाद्यत्' (४,२,१७), 'दध्नष्ठक्' (४,२,१८), 'उदश्वितोऽन्यतरस्याम्' (४,२,१९), 'क्षीराड्ढञ्' (४,२,२०)।
शाक॰—'शूल्योख्यक्षैरेयदाधिकौदश्वित्कौदश्वितम्' (२,४, २३८)।

६. पाणिनेः सूत्रपञ्चकस्थाने सूत्रमेकम्

१– पाणि॰—'इदमोर्हिल्' (५,३,१६); 'अधुना' (५,३,१७) 'दानीं च' (५,३,१८); 'सद्यः.....' (५,३,२२); 'समानस्य सभावः' (वा॰)।
शाक॰—'सदैतर्ह्यधुनेदानीन्तदानीं सद्यः' (३,४,१९) अत्रैकं वार्त्तिकमपि परिगृहीतम्।

२– पाणि॰—'समयाच्च यापनायाम्' (५,४,६०); दुःखात् प्रातिलोम्ये' (५,४,६४), 'निष्कुलान्निष्कोषणे' (५,४,६२); 'शूलात् पाके' (५,४,६५); 'सत्यादशपथे' (५,४,६६)।
शाक॰—'दुःखनिष्कूलशूलसमयसत्यात् प्रातिकूल्यनिष्कोषपाकयापनाशपथे' (३,४,३५)।

७. पाणिनेः सूत्रषट्कस्थाने सूत्रमेकम्

पाणि॰—'मूर्तौ घनः' (३,३,७७), 'उद्घनोऽत्याधानम्' (३,३,८०), 'अपघनोऽङ्गम्' (३,३,८१), 'उपघ्न आश्रये' (३,३,८५), 'संघोद्घौ गणप्रशंसयोः' (३,३,८६); 'निघो निमित्तम्' (३,३,८७)।
शाक॰—'घनोद्घनापघनोपघ्ननिघोद्घसंघा मूर्त्यत्याधानाङ्गासन्ननिमित्तप्रशस्तगणाः' (४,४,२०)।

८. पाणिनेः सूत्राष्टकस्थाने सूत्रमेकम्

पाणि॰—'वेः शालच्छङ्कटचौ' (५,२,२८); 'सम्प्रोदश्च कटच्' (५,२,२९); 'अवात् कुटारच्च' (५,२,३०); 'नते नासिकायाः संज्ञायां टीटञ्नाटज्भ्रटचः' (५,२,३१) नेर्विडज्विरीसचौ' (५,२,३२); 'इनच् पिटच्चिकचि च' (५,२,३३); 'क्लिन्नस्य चिल् पिल्' (वा॰); 'उपाधिभ्यां त्यकन्नासन्नारूढयोः' (५,२,३४)।
शाक॰—'विशालविशङ्कटविकटसंकटोत्कटप्रकटनिकटावकटावकुटारावटीटावनाटावभ्रटनिबिडनिबिरीसचिक्कचिकिनचिपिटचिल्लपिल्लचुल्लोपत्यकाधित्यकाः' (३,३,१०६)।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

९. पाणिनेः सूत्रनवकस्थाने सूत्रमेकम्

पाणि०—'वशं गतः' (४,४,८६), 'धर्मपथ्यर्थन्यायादनपेते' (४,४,९२); 'मूलमस्याबर्हि' (४,४,८८); 'संज्ञायां धेनुष्या' (४,४,८९); 'संज्ञायां जन्याः' (४,४,८२); 'गृहपतिना संयुक्ते ञ्यः' (४,४,९०); 'नौवयोधर्मविषमूलसीतातुलाभ्यस्तार्यतुल्यप्राप्यवध्यानाम्यसमसमितसंमितेषु' (४,४,९१); 'हृदयस्य प्रियः' (४,४,९५); 'बन्धने चर्षौ' (४,४,९६)।
शाक०—'वश्यपथ्यवयस्यधेनुष्यागार्हपत्यजन्यधर्म्यहृद्यमूल्यम्' (३,२,११५)।

इत्थमेकतः शाकटायनेन यत्र पाणिनीयानां समाननियमानां लघुलघूनां बहूनां सूत्राणां स्थाने दण्डायमानस्य सूत्रस्य रचनया व्याकरणं सरलीकृतम्, तत्रैवापरतस्तेन लघुलघूनां दण्डायमानानां वा पाणिनीयसूत्राणां स्थाने बहूनि लघुलघूनि सूत्राणि विरचितानि। तानीत्थं शक्यन्ते वर्गीकर्तुम्—

१. पाणिनेरेकसूत्रस्थाने सूत्रद्वयम्

१– पाणि०—'राजाहःसखिभ्यष्टच्' (५,४,९१)।
शाक०—'राजन् सखेः' (२,१,१६९); 'अह्नः' (२,१,१७९)।

२– पाणि०—'नित्यमसिच् प्रजामेधयोः' (५,४,१२२)।
शाक०—'अस्प्रजायाः' (२,१,१९७); 'अल्पाच्च मेधायाः' (२,१,१९८)।

३– पाणि०—'दृतिकुक्षिकलशिवस्त्यस्त्यहेर्ढञ्' (४,३,५६)।
शाक०—'दृतिकुक्षिकलशिवस्त्यहेर्ढन्' (३,१,११८); 'आस्तेयम्' (३,१,११९)

४– पाणि०—'यत्तदेतेभ्यः परिमाणे वतुप्' (५,२,३९)।
शाक०—'एतदो वो घः' (३,३,६९); 'यत्तदः' (३,३,७०)।

५– पाणि०—'बहुगणवतुडति संख्या' (१,१,२३)।
शाक०—'वड्डति संख्या' (१,१,९); 'बहुगणं भेदे' (१,१,१०)।

६– पाणि०—'आद्यन्तौ टकितौ' (१,१,४६)।
शाक०—'टिदादिः' (१,१,५३); 'किदन्तः' (१,१,५४)।

७– पाणि०—'नाव्ययीभावादतोऽम्त्वपञ्चम्याः' (२,४,८३)।
शाक०—'नातः' (१,२,१५६); 'अमपञ्चम्याः' (१,२,१५७)।

८– पाणि०—'तृतीयासप्तम्योर्बहुलम्' (२,४,८४)।
शाक०—'तृतीया वा' (१,२,१५८); 'सप्तम्याः' (१,२,१५९)।

९– पाणि०—'पृथग्विनानानाभिस्तृतीयाऽन्यतरस्याम्' (२,३,३२)।
शाक०—'पृथग्नाना तृतीया च' (१,३,१९२); 'विनेमास्तिस्रः' (१,३,१९३)।

१०– पाणि०—'निसमुपविभ्यो ह्वः' (१,३,३०)।
शाक०—'सन्निवेः' (१,४,३०); 'उपात्' (१,४,३१)।

११– पाणि०—ऋक्पूरब्धेः पथामानक्षेः' (५,४,७४)।
शाक०—'ऋक्पूः पथ्यपोत्' (२,१,१३९); 'धुरोऽनक्षस्य' (२,१,१४०)।

२. पाणिनेरेकस्य सूत्रस्य स्थाने त्रीणि सूत्राणि

१– पाणि०—'विभाषावृक्षमृगतृणधान्यव्यञ्जनपशुशकुन्यश्ववडवपूर्वापराधरोत्तराणाम्' (२,४,१२)।
शाक०—'अश्ववडवपूर्वापराधरोत्तराः' (२,१,९५); 'पशुव्यञ्जनानि' (२,१,९६); 'तरुतृणधान्यमृगपक्षिबह्वर्थाशः' (२,१,९७)।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

२– पाणि०—दाण्डिनायनहास्तिनायनाथर्वणिकजैह्माशिनेयवाशिनायनिभ्रौणहत्य-धैवत्यसारवैक्ष्वाकमैत्रेयहिरण्मयानि' (६,४,१७४)।
शाक० —'दण्डिहस्तिनः फे' (२,३,५९); 'वाशिजिह्माश्यथ्वाथर्वयूनः फिढरवठाके' (२,३,६०); 'भ्रौणहत्यधैवत्यसारवैक्ष्वाकमैत्रेयहिरण्मयम्' (२,३,११२)।

३. पाणिनेरेकस्य सूत्रस्य स्थाने सूत्रचतुष्टयम्

पाणि०—'अचतुरविचतुरसुचतुरस्त्रीपुंसधेन्वनडुहर्क्सामवाङ्मनसाक्षिभ्रुवदारगवोर्वष्ठीवपदष्ठीवनक्तन्दिवरात्रिन्दिवाहर्दिवसरजसनिःश्रेयसपुरुषायुषद्व्यायुषत्र्यायुषर्ग्यजुषजातोक्षमहोक्षवृद्धोक्षोपशुनगोष्ठश्वाः' (५,४,७७)।
शाक०—'जातमहद्वृद्धादुक्ष्णः कर्मधारयात्' (२,१,१५८); 'स्त्रियाः पुंसो द्वन्द्वाच्च' (२,१,१५९); 'धेन्वनडुहर्ग्यजुषाहोरात्रनक्तन्दिवरात्रिन्दिवाहर्दिवोर्वष्ठीवपदष्ठीवाक्षिभ्रुवदारगवम्' (२,१,१६०)।

४. पाणिनेः सूत्रद्वयस्थाने सूत्रपञ्चकम्

पाणि०—'शमित्यष्टाभ्यो घिनुण्' (३,२,१४१); 'सम्पृचानुरुधाङ्यमाङ्यसपरिसृसंसृजपरिदेविसंज्वरपरिक्षिपपरिरटपरिवदपरिदहपरिमुहदुषद्विषद्रुहदुहयुजाक्रीडविविचत्यजरजभजातिचरापचरामुषाभ्याहनश्च' (३,२,१४२)।
शाक०—'शमष्टकदुषद्विषद्रुहदुहयुजत्यजरजभजाभ्याहनानुरुधो घिनञ्' (४,३,२४२); 'आङः क्रीड्यं यसमुषः' (४,३,२४३); 'समः पृच्सृजज्वरोऽकर्मकात्' (४,३,२४४); 'चरोऽतौ च' (४,३,२४७); 'परेः सृवदहमुहः' (४,३,२४९)।

अनुवृत्तीनां विकल्पानामर्थविशेषाणां निपातनानां च दृष्ट्या शाकटायनीया इमे प्रयासा नूनं पर्यालोचनीयतामर्हन्ति। शाकटायनव्याकरणे षष्ट्युत्तरशतसंख्याकानि सूत्राणि खलु पाणिनीयसूत्रतुल्यवर्तनीकानि सन्ति। तत्र कानिचित् सूत्राणि दण्डायमानान्यपि सन्ति। शाकटायनेन यां प्रक्रियामाश्रित्य पाणिनीयानि सूत्राणि बहुषु सूत्रेषु विभक्तानि, किं तां प्रक्रियामाधारीकृत्य समानवर्तनीकानि दण्डायमानानीमानि सूत्राण्यपि विभाजयितुं शक्यन्ते ? इह विद्वद्भिरनुसन्धाय तथ्यानि गवेषणीयानि।

व्याकरणे गौरवं मा भूदिति धिया शाकटायनेन पाणिनीयव्याकरणवद् वार्त्तिकानि पार्थक्यशो न पठितानि। कात्यायनीयवार्त्तिकैः प्रकटिताः सर्वे नियमाः शाकटायनेन सूत्ररूपतया ग्रथिताः। वार्त्तिकनियमात्मकानि सूत्राणि वार्त्तिकवत् स्वतन्त्राणि न सन्ति। सम्बद्धसूत्रेष्वेव वार्त्तिकनियमाः संनिवेशिताः। शतत्रयसंख्याकानि तादृशानि सूत्राणि सन्ति, यानि केवलं वार्त्तिकानां स्थाने रचितानि।

शाकटायनव्याकरणे बाहुल्यं तेषां सूत्राणां वर्तते, येषु पाणिनीयानि दण्डायमानानि सूत्राणि महता कौशलेन संक्षेपीकृतानि। एवं सत्यपि विषयाभिव्यञ्जने किमप्यान्तर्यं न भासते। एतादृशानि सूत्राणि प्रायः सार्द्धसहस्रसंख्याकानि विराजन्ते।

पाणिनीयव्याकरणस्यानूनकं तत्त्वं पातञ्जले महाभाष्ये संनिहितमस्ति। पाल्यकीर्तिना महाभाष्यस्य तलस्पर्शि ज्ञानमवाप्तमासीदिति शाकटायनव्याकरणस्यानुशीलनेन विज्ञायते।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

महाभाष्यनदीष्णेन तेन महाभाष्यस्य सर्वा इष्टयः, सर्वाणि वचनानि तदीयानि वार्त्तिकानि वा सूत्रतया स्वकीये व्याकरणे पठितानि । इष्टीनां संख्या नाधिका वर्तते तत्र। भाष्यवचनानि तु प्रायः पञ्चत्रिंशत्संख्याकानि संनिवेशितानि स्वसूत्रेषु ।

पाणिनीयव्याकरणे खिलपाठतया विद्यमानानि गणसूत्राणि जिज्ञासुभिः पृथगध्येतव्यानि भवन्ति । पाल्यकीर्तिना स्वकीये शाकटायनव्याकरणे तानि यथास्थानं सूत्ररूपतया संदृब्धानि ।

पाणिनिना यथा पूर्ववर्तीनि व्याकरणानि परिशील्य स्वोपज्ञं व्याकरणं प्राणायि, तथैव काशिकाकारेणापि पूर्ववर्तिनीः सर्वा वृत्तीरनुशील्य काशिकावृत्तिर्विरचिता । अतो महाभाष्यात् परतः काशिकावृत्तेर्महिमा न केनापि वैयाकरणतल्लजेनाविज्ञातः । व्याकरणनियमानां परिपूरणाय सा पुष्परूपा व्याकरणमालायाः । तस्या महिमानं विभाव्य पाल्यकीर्तिना तदीयानि-चत्वारिंशत्संख्याकानि विशिष्टानि वचनान्यपि सूत्ररूपतया स्वकीये व्याकरणे परिगृहीतानि ।

पाणिनीयव्याकरणमपेक्ष्य पाल्यकीर्तिना धातुपाठे गणपाठे च वैशिष्ट्यमाश्रितम् । तत्र पाणिनिसाधितशब्दातिरिक्तानामपि शब्दानां साधुत्वं प्रदर्शितम् (द्रष्ट० गोचरसंचरेति सूत्रे 'खल' 'भग' इति शब्दौ) ।

एवं प्रभूतायाः सामग्र्याः शाकटायनव्याकरणे ३२३६ सूत्रैः संनिवेशस्य चामत्कारिकः प्रयत्नः संजातः । सम्यगेव व्याञ्जीद् यक्षवर्मा स्वकीयव्याख्यायाम्—'यन्नेहास्ति न तत् क्वचित्' इति । जिज्ञासुनाऽनुदिनं नवसंख्याकेषु सूत्रेषु स्मृतेषु हायनैकेन सम्पूर्णस्य व्याकरणस्य ज्ञानं कर्तुं शक्यम् ।

लक्ष्यलक्षणे व्याकरणम् । त्रिमुनिव्याकरणानन्तरं पाल्यकीर्तिसमयं यावत् संस्कृतभाषाप्रवाहे गुरूणि परिवर्तनानि नूनमभूवन् । बौद्धैर्जैनैश्च विरचितानां संस्कृतग्रन्थानां संस्कृतभाषा किमपि वैचित्र्यमाधत्ते स्म । शिष्टजनैः संभाष्यमाणायामपि तस्यां प्रभूतानि परिवर्तनानि सम्भाव्यन्ते । शाकटायनव्याकरणस्य परिशीलनेन विज्ञायन्ते तानि सुस्फुटम् ।

इत्थं शाकटायनव्याकरणेन संस्कृतभाषाध्ययनविधौ गुरुतरं साहायकं समर्पितमित्यस्माभिरालोचितम् । परवर्तिनो वैयाकरणास्तेन प्रेरिताः । हेमचन्द्रेण स्वकीये व्याकरणे शाकटायनव्याकरणस्य कतिपयानि सूत्राण्यविकलं गृहीतानि । सूत्राध्यायानुसारिषु व्याकरणेषु प्रक्रियापद्धतिप्रवर्तनोपक्रमस्य श्रेयोभाग् शाकटायन एव विराजते । यद्यप्यध्यायेषु विभक्तत्वादस्य व्याकरणस्याध्यायानुसारित्वमेव समास्थीयते, तथापि विषयानुसारिण्येव व्यवस्था अध्यायानां समाश्रिता शाकटायनेन । समासान्तानि सूत्राणि तत्पुरुषसमासनियमप्रदर्शनानन्तरं पठितानि । प्रक्रियाकौमुदीकारेण रामचन्द्रेण तदनुगामिना वैयाकरणसिद्धान्तकौमुदीकारेण भट्टोजिदीक्षितेन च स्वस्वग्रन्थे शाकटायनोपज्ञाता प्रक्रियैव समवलम्बिता । द्वाभ्यामनुक्तं शाकटायनं व्याकरणमिति सिध्यति 'अन्तिकबाढयोर्नेदसाधौ' (५,३,६३) प्रभृतीनां सूत्राणामुदाहरणपरीक्षयापि। एवं खलु भृशमुपयोगिनोऽप्यस्य व्याकरणस्य लोके प्रचारभूयिष्ठतावैकल्यकारणं दार्शनिकपीठिकाविरह एव । तदर्थं शाकटायनव्याकरणपरम्परायामपेक्ष्यते स्म भर्तृहरिरिव कश्चिद् व्याकरणदर्शनधुरन्धरः ।

● ● ●

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

मानसामयेषु यौगिक्याश्चिकित्साया अभ्युपगमः

डॉ० विद्याधरशुक्लः कविराजः
जी० ए० एम्० एस्०, आयुर्वेदाचार्यः, एम्० ए०, विद्यावारिधिः (Ph. d.)
कायचिकित्साविभागाध्यक्षः—आयुर्वेदमहाविद्यालये
सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी

रजस्तमोगुणात्मिकयाऽविद्यया मायया स्वीयैरसाधारणधर्मात्मिकदुःखमोहबन्धनफलविशेषैराबद्धानामाध्यात्मिकाऽऽधिभौतिकाऽऽधिदैविकाभिधामयत्रयेण संताप्यमानानामविद्याऽस्मितारागद्वेषाभिनिवेशात्मकपञ्चक्लेशैरापीडचमानानां प्राणिनामभ्युदयसम्पादनसमर्थं सर्वविधाधिव्याधिविनिवर्तकं तत्त्वज्ञानसमन्वितमष्टाङ्गयोगमेवेत्याकलय्य यौगिकी चिकित्सा प्रस्तूयते ।

योगशब्दार्थावगमनमन्तरा न शक्यते यौगिकीचिकित्सायाः क्षेत्रविज्ञानमिति कृत्वाऽऽदौ योगशब्दार्थश्चिन्त्यते 'युज् समाधौ' (दिवादिः) 'युजिर् योगे' (रुधादिः) 'युज् संयमने' (चुरादिः) । एभ्यो धातुभ्यो योगशब्दो निष्पद्यते, तेन योगशब्दाभिधेयतामर्हन्त्यर्था इमे—समाधिः, संयोगः, संयमः । तथा हि-योगपदस्य बाहुल्येन चित्तवृत्तिनिरोधार्थत्वाद् यत्र यत्र चित्तवृत्तिनिरोधसत्ताऽनुभूयते तत्सर्वमपि योगात्मकम् । तथा च – यम-नियम-आसन-प्राणायाम-प्रत्याहार-धारणा-ध्यान-समाधयो योगात्मकाः, भक्तिज्ञानवैराग्याणि च तदङ्गानि ।

एवञ्च 'योगः' समाधिरिति यावत् । समाधिश्च चित्तवृत्तिनिरोध इत्याख्यायते । तत्र चित्तस्य वृत्तयः (भूमिकाः) अवस्थाविशेषाः पञ्च । तद्यथा—(१) क्षिप्तम्, (२) मूढम्, (३) विक्षिप्तम्, (४) एकाग्रम्, (५) निरुद्धमिति च ।

(१) **क्षिप्तम्**—रजोगुणस्य समुद्रेकात् तत्तद्विषयेषु क्षिप्यमाणमस्थिरं सततप्रवृत्तिमच्चित्तं राक्षस[1]-आसुर-पैशाच-सार्प-प्रैत-शाकुनभेदेनोपेतं क्षिप्तं बोध्यम् ।

---

१. (क) अमर्षिणमनुबन्धकोपं छिद्रप्रहारिणं क्रूरमाहारातिमात्ररुचिमामिषप्रियं स्वप्नायासबहुलमीर्ष्युं राक्षसं विद्यात् ।

(ख) शूरं चण्डमसूयकमैश्वर्यवन्तमौपधिकं रौद्रमननुक्रोशमात्मपूजकमासुरं विद्यात् ।

(ग) महाशनं स्त्रैणं स्त्रीरहस्कामशुचिं शुचिद्वेषिणं भीरुं भीषयितारं विकृतविहाराहारशीलं पैशाचं विद्यात् ।

(घ) क्रुद्धशूरमक्रुद्धभीरुं तीक्ष्णमायासबहुलं संत्रस्तगोचरमाहारविहारपरं सार्पं विद्यात् ।

(ङ) आहारकाममतिदुःखशीलाचारोपचारमसूयकमसंविभागिनमतिलोलुपमकर्मशीलं प्रैतं विद्यात् ।

(च) अनुषक्तकाममजस्रमाहारविहारपरमनवस्थितममर्षणमसञ्चयं शाकुनं विद्यात् ।

इत्येवं खलु राजसस्य सत्त्वस्य षड्विधं भेदांशं विद्यात्, रोषांशत्वात् ।

(चरक० शारीर० ४।३८) ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

(२) **मूढम्**—तमोगुणस्य समुद्रेकात् तत्तद्विषयेषु [1]पाशव-मात्स्य-वानस्पत्यभावेन प्रवृत्तिमदालस्यनिद्रातन्द्रादिवृत्तिमच्चित्तं मूढं विद्यात् ।

(३) **विक्षिप्तम्**—ब्राह्म-आर्ष-ऐन्द्र-याम्य-वारुण-कौबेर-[2]गान्धर्वभावेन सत्त्वगुणसमुद्रेकेऽपि रजसाऽनुविद्धत्वात् प्रायशोऽस्थिरं चित्तं विक्षिप्तं बोध्यम् । अत्र हि व्याधि-स्त्यान-संशय-प्रमाद-आलस्य-अविरति-भ्रान्तिदर्शन-अलब्धभूमिकत्व-अनवस्थितत्वादयश्चित्तविक्षेपा अनुवर्तन्ते[3] ।

तत्र व्याधिर्नाम—गद-आतङ्क-आमय-विकार-यक्ष्मा-ज्वरादिपर्यायशब्दैरभिधीयमाना वातपित्तश्लेष्मणां वैषम्यवेदना, अशितपीताहारपरिणामात्मकरसवैषम्यवेदना, इन्द्रियाणां वैषम्यवेदना चेति ।

स्त्यानं नाम—चित्तस्य योगानुष्ठानाऽनर्हता ।

संशयः—मुक्तिफलजनकत्वसंशयः ।

प्रमादः—समाधिसाधनेष्वप्रयत्नः ।

आलस्यम्—शरीरगौरवात् प्रयुक्तचित्तगुरुत्वाद्वा समाधिसाधनालस्यम् ।

अविरतिः—चित्तस्य विषयाभिलाषा ।

भ्रान्तिदर्शनम्—योगस्य समाधिसाधनत्वं नास्तीत्याकारकं विपरीतज्ञानम् ।

---

१. (क) निरलङ्करिष्णुममेधसञ्जुगुप्सिताहाराचारं मैथुनपरं स्वप्नशीलं पाशवं विद्यात् ।
(ख) भीरुमबुधमाहारलुब्धमनवस्थितमनुषक्तकामक्रोधं सरणशीलं तोयकामं मात्स्यं विद्यात् ।
(ग) अलसं केवलमभिनिविष्टमाहारे सर्वबुद्ध्यङ्गहीनं वानस्पत्यं विद्यात् ।
(चरक० शारीर० ४।३८)

२. (क) शुचिं सत्याभिसन्धं जितात्मानं संविभागिनं ज्ञानविज्ञानवचनप्रतिवचनसंपन्नं स्मृतिमन्तं कामक्रोधलोभमोहमानेर्ष्याहर्षामर्षापेतं समं सर्वभूतेषु ब्राह्मं विद्यात् ।
(ख) इज्याध्ययनव्रतहोमब्रह्मचर्यपरमतिथिव्रतमुपशान्तमदमानरागद्वेषमोहलोभरोषं प्रतिभा-वचनविज्ञानोपधारणशक्तिसंपन्नमार्षं विद्यात् ।
(ग) ऐश्वर्यवन्तमादेयवाक्यं यज्वानं शूरमोजस्विनं तेजसोपेतमक्लिष्टकर्माणं दीर्घदर्शिनं धर्मार्थकामाभिरतमैन्द्रं विद्यात् ।
(घ) लेखास्थवृत्तं प्राप्तकारिणमसंप्रहार्यमुत्थानवन्तं स्मृतिमन्तमैश्वर्यावलम्बिनं व्यपगत-रागेर्ष्याद्वेषमोहं याम्यं विद्यात् ।
(ङ) शूरं धीरं शुचिमशुचिद्वेषिणं यज्वानमम्भोविहाररतिमक्लिष्टकर्माणं स्थानकोपप्रसादं वारुणं विद्यात् ।
(च) स्थानमानोपभोगपरिवारसंपन्नं धर्मार्थकामनित्यं शुचिं सुखविहारं व्यक्तकोपप्रसादं कौबेरं विद्यात् ।
(छ) प्रियनृत्यगीतवादित्रोल्लापकश्लोकाख्यायिकेतिहासपुराणेषु कुशलं गन्धमाल्यानुलेपन-वसनस्त्रीविहारकामनित्यमनसूयकं गान्धर्वं विद्यात् ।
इत्येवं शुद्धस्य सत्त्वस्य सप्तविधं भेदांशं विद्यात् कल्याणांशत्वात् ।
(चरक० शा० ४।३७) ।

३. योगदर्शनम्, पादः १।३० ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अलब्धभूमिकत्वम्—मधुमती-मधुप्रतिका-विशोका-संस्कारशेषाख्यभूमिकालाभाभावः ।

अनवस्थितत्वम्—एकस्या मधुमत्या द्वयोर्वा तिसॄणां वा लाभे सति तावतैव परिपूर्णतां मन्यमानस्य तत्र तत्रापि चित्तस्यानास्था ।

एवञ्च प्रतिकूलवेदनीयतयाऽऽध्यात्मिकाधिदैविकाधिभौतिकरूपेण त्रिविधं दुःखम् । तत्राऽऽत्मानमधिकृत्य यद्भवति तदाध्यात्मिकं द्विविधं वातपित्तश्लेष्मवैषम्यजन्यं ज्वरादिकं शारीरम्, कामक्रोधादिजनकरजस्तमोदोषजं मानसम् । भूतान्यधिकृत्य जायमानमाधिभौतिकम् । आधिदैविकञ्च यक्षराक्षसपिशाचभूतग्रहादिजन्यं दुःखं निगद्यते । चित्तविक्षेपाच्च दौर्मनस्यादिकमुपजायतेऽतितराम् ।

एताश्च क्षिप्तमूढविक्षिप्तावस्था अन्तरायभूता विघ्नात्मिका भवन्ति मनः समाधौ मानसस्वास्थ्यसंयमने च ।

(४) एकाग्रम्—रजस्तमोवृत्त्यभावे सत्त्वस्यातीव समुद्रेके सति सत्त्वमात्रवृत्तिकमत्यन्तं स्थिरमेकतानं मन एकाग्रं चित्तमिति बोध्यम् । अत्र हि रजस्तमोवृत्तीनां विरहाद् दुःखादयो तिरोभूताः सन्तो विप्लुता भवन्ति, न तु पदमादधते मनागपि । एतस्मिन् काले यत्र विषये मनो भवति प्रयुक्तम्, तत्र द्रागेव संलग्नमविचलञ्च जायते । अतश्च कालेऽस्मिन् **"यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधिसंज्ञकानि योगाङ्गानि"** साफल्येन सम्यगनुष्ठेयानि भवन्ति । अत्र चैकाग्रे चेतसि शुद्धसत्त्वमय्या वृत्तेः सद्भावात् सम्प्रज्ञायते । मनाक् सत्त्ववृत्तिर्यत्रेति व्युत्पत्तिमान्—**"सम्प्रज्ञातयोगः"** इति ख्यायते । तस्य चत्वारो भेदा एकाग्र एव चित्ते सम्भाव्यन्ते, यथा—(१) सवितर्कसम्प्रज्ञातः, (२) सविचारसम्प्रज्ञातः, (३) सानन्दसम्प्रज्ञातः (४) सास्मितसम्प्रज्ञातश्चेति । तत्र चाऽयं चतुर्विधोऽपि सम्प्रज्ञातयोगो विनाऽऽलम्बनं न भवति, अतः **"सालम्बनसमाधिः"** इति ख्यायते । अत्रैवैकाग्रे चित्ते चित्तस्य तिस्रो भूमिका अन्या अपि भवन्ति, ताश्च—मधुमती-मधुप्रतिका-विशोका इत्यभिधाना विद्यन्ते ।

तत्र स्थूलालम्बनमादाय चित्तस्यैकाग्रतायां मधुमती भूमिका । सूक्ष्मालम्बनमादाय चित्तैकाग्रतायां मधुप्रतिका भूमिका । सत्त्वगुणांशसुखमात्रां चालम्बनीकृत्य चित्तैकाग्रतायां विशोका भूमिका बोध्या ।

(५) निरुद्धम्—सत्त्वरजस्तमोमयीनां यावतीनां वृत्तीनां स्वकारणे बुद्धावत्यन्तलयो निरुद्धमित्याख्यायते । तादृशं चित्तं केवला बुद्धिरुच्यते, सा चातीव स्थिरतमा । अत्रैव वशीकारसंज्ञं परमं वैराग्यमुपपन्नं भवति । शुद्धसत्त्वस्य[1] च शुद्धा सत्या[2] बुद्धिः प्रवर्तते, यया सर्वं सन्यस्यते ।

१, गुहाम्बुदरजोधूमनीहारैरसमावृतम् ।
यथार्कमण्डलं भाति भाति सत्त्वं तथाऽमलम् ॥
ज्वलत्यात्मनि संरुद्धं तत् सत्त्वं संवृतायने ।
शुद्धः स्थिरः प्रदीपार्चिर्दीप्तो दीपाशये यथा ॥ (चरक० शारीर० ५।१४-१५)

२. शुद्धसत्त्वस्य या शुद्धा सत्या बुद्धिः प्रवर्तते ।
यया भिनत्यतिबलं महामोहमयं तमः ॥
सर्वभावस्वभावज्ञो यया भवति निःस्पृहः ।
योगं यया साधयते साङ्ख्यः संपद्यते यया ॥
यया नोपैत्यहङ्कारं नोपास्ते कारणं यया ।
यया नालम्बते किञ्चित् सर्वं संन्यस्यते यया ॥ (चरक० शारीर० ५ १६-१८) ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

परमवैराग्ये सति लौकिकवैदिक-दिव्यादिव्याद्यनेकविधविषयेषु स्वसन्निधावुपस्थितेऽष्वपि तृष्णालेशोऽपि न स्यात् । अस्यामवस्थायां बुद्धौ क्षयङ्गतानामस्मिता-राग-द्वेष-अभिनिवेशानां क्लेशानां बीजभावस्य दग्धता भवति । एवञ्च बुद्धौ कारणात्मकतयाऽवस्थितानामन्तरायाणां स्वरूपाण्यपि दग्धानि भवन्ति, अतः **"निर्बीजसमाधिः"** इत्युच्यते (असम्प्रज्ञातसमाधिरिति यावत्) । तथा च सोऽयं योगो समुपवर्णितदिशा एकाग्रे निरुद्धे च चेतसि समापन्नो भवति । एतदालम्ब्य तत्साधनानि, तत्प्रतिबन्धकानि, तत्फलानि च योगशास्त्रे विस्तरेणोपवर्णितानि समुपलभ्यन्ते । एतन्मार्गपथिकैश्च तत्रैव कर्णेहस्य मार्गणीयानि तानि ।

चित्तस्य निर्मलीकरणम्—चित्तस्य स्थैर्यार्थं चित्तप्रसादात्मकमुपायमाचरेत्, यतो हि चेतसि प्रसन्ने सत्येव चित्तस्य प्रसादनं बुद्धेश्च स्थिरीकरणं जायते । तथा च—

रागद्वेषवियुक्तैस्तु विषयानिन्द्रियैश्चरन् ।
आत्मवश्यैर्विधेयात्मा प्रसादमधिगच्छति ॥
प्रसादे सर्वदुःखानां हानिरस्योपजायते ।
प्रसन्नचेतसो ह्याशु बुद्धिः पर्यवतिष्ठते ॥

(श्रीमद्भगवद्गीता अ० २।६४–६५)

अथ च **"मैत्री-करुणा-मुदितोपेक्षाणां सुखदुःखपुण्यापुण्यविषयाणां भावनातश्चित्तप्रसादनम्"** (योगद० १।३३) ।

मैत्री—सत्त्वगुणाधिकेषु सुखितेषु ज्ञान-विज्ञानवत्सु महापुरुषेषु मैत्रीं भावयतः पुरुषस्य चित्तस्येर्ष्याकालुष्यं निवर्तते ।

करुणा—रजोऽधिकेषु दुःखितेषु करुणां स्वस्मिन्निव परत्रदुःखप्रहराणाभिलाषां भावयतः पुरुषस्य परापकारचिकीर्षाकालुष्यं निवर्त्तते चित्तस्य ।

मुदिता—पुण्यशीलपुरुषेषु मुदितां हर्षं भावयतः पुरुषस्य असूयाकालुष्यं निवर्तते चित्तस्य ।

उपेक्षा—अपुण्यशीलेषु पुरुषेषु चोपेक्षां माध्यस्थ्यं भावयतः पुरुषस्य अमर्षकालुष्यं निवर्तते चित्तस्य । एवञ्च प्रसन्नममलञ्च सञ्जायते चित्तम् । प्रसन्नं सदेकाग्रं मनः स्थिरतामालम्बते । तत्त्वस्मृतेरुपस्थानाच्च मनोऽमलतां भजते ।[1]

---

१. सतामुपासनं सम्यगसतां परिवर्जनम् ।
व्रतचर्योपवासौ च नियमाश्च पृथग्विधाः ॥
धारणं धर्मशास्त्राणां विज्ञानं विजने रतिः ।
विषयेष्वरतिर्मोक्षे व्यवसायः पराधृतिः ॥
कर्मणामसमारम्भः कृतानां च परिक्षयः ।
नैष्कर्म्यमनहङ्कारः संयोगे भयदर्शनम् ॥
मनोबुद्धिसमाधानमर्थतत्त्वपरीक्षणम् ।
तत्त्वस्मृतेरुपस्थानात् सर्वमेतत् प्रवर्तते ॥ (चरक० शारीर० १।१४३–४६)

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

प्रज्ञापराधनिरोधाय मनःसंयमोपायाः

यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधिरूपाष्टाङ्गयोगोपासनया मनसः संयमनान्निवर्तन्ते प्रज्ञापराधा इति। एभिश्चोपायैर्दिव्यमुन्नतमादर्शमास्थाप्य मनोव्याधिमपनेतुं शक्यते।

तत्र **यमः** – आत्मनियन्त्रणम् (Self Control) "शरीरसाधनापेक्षं नित्यं यत् कर्म तद् यमः"[1]। दुःखनाशाय मनोनिग्रहणाय च संयमयोगस्यानुशीलनं परममावश्यकम्।

तथा च—

युक्ताहारविहारस्य युक्तचेष्टस्य कर्मसु।
युक्तस्वप्नावबोधस्य योगो भवति दुःखहा[2]॥

(१) "अहिंसासत्यास्तेयब्रह्मचर्यापरिग्रहा यमाः"[3]।

हिंसा खलु प्राणिनां प्राणवर्धनानामुत्कृष्टतमा समाख्याता[4]। अहिंसा नाम देहवाङ्मनोभिः परपीडनेऽनादरः। परस्त्रीभोगपरद्रव्यहरण-प्राणिपीडाविरामः। परुषसूचकानृताकालवचनाप्रयोगः। ईर्ष्या-शोक-भय-क्रोध-द्वेषत्यागः। वृद्धसिद्धजनेष्वादरः। प्राणिषु बन्धुभावः। आत्मनीव सर्वप्राणिष्ववेक्षा। परपरुषवचनसहिष्णुता। अक्रोधनत्वमनिष्ठुरत्वमनृशंसवादित्वममानित्वं मनसाऽपि परपीडनविरतिः। क्षमा-दम-तितिक्षाशीलनम्।[5] एवमादिगुणैः कायेन, वचसा, मनसा वा कस्यचनाप्यनिष्टकरणेऽप्रवर्तनम् कस्मैचन कष्टाप्रदानमहिंसेत्युच्यते। तथा च—

"न हिंस्यात् सर्वभूतानि मैत्रायणगतश्चरेत्[6]।"

---

१. अमरको० २।७।४८। २. श्रीमद्भगवद्गीता ६।१७। ३. पा० यो० सू०।
४. चरकसू० ३०।१५। तथाहि—

अभयं सर्वभूतेभ्यो दत्वा यश्चरते मुनिः।
न तस्य सर्वभूतेभ्यो भयमुत्पद्यते क्वचित्॥
(म० भा० शा० प० १९२।४)

५. इमांस्तु धारयेद्वेगान् हितार्थी प्रेत्य चेह च।
साहसानाशस्तानां मनोवाक्कायकर्मणाम्॥
लोभशोकभयक्रोधमानवेगान् विधारयेत्।
नैर्लज्ज्येर्ष्यातिरागाणामभिध्यायाश्च बुद्धिमान्॥
परुषस्यातिमात्रस्य सूचकस्यानृतस्य च।
वाक्यस्याकालयुक्तस्य धारयेद्वेगमुत्थितम्॥
देहप्रवृत्तिर्या काचिद् विद्यते परपीडया।
स्त्रीभोगस्तेयहिंसाद्या तस्या वेगान् विधारयेत्॥
पुण्यशब्दो विपापत्वान्मनोवाक्कायकर्मणाम्।
धर्मार्थकामान् पुरुषः सुखी भुङ्क्ते चिनोति च॥ (चरकसू० ७।२६–३०)

६. महाभारतशा० प० २२९।१८।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

एवञ्च अहिंसाचरणे कायेन स्वपरदुःखानाचरणम्, वाचा स्वपरदुःखोत्पादकशब्दाप्रयोगः, मनसा स्वपरद्रोहसङ्कल्पाभावः। तथा च—

अद्वेष्टा सर्वभूतानां मैत्रः करुण एव च।
निर्ममो निरहङ्कारः समदुःखसुखः क्षमी[1] ॥

इत्येवमाचारसोपानसांयात्रिकभावाभिपन्नतयाऽहिंसा सर्वविधमानसव्याधीनां परिहारहेतुः समाम्नाता।

सत्यम्—सत्यं हि परमं तप उच्यते। सत्यस्य वचनं श्रेयसे प्रभवति। तथा च—

सत्यस्य वचनं श्रेयः सत्यादपि हितं वदेत्।
यद्भूतहितमत्यन्तमेतत् सत्यं मतं मम[2] ॥

एतच्च भूतहितभावं तदैवोदेतुमर्हति यदा सत्या बुद्धिरुदेति। यदा पुरुष आत्मावश्यैरिन्द्रियैर्जाति-रूप-वित्त-बुद्धि-विद्याद्यहङ्कृतः कर्मस्वासज्जते भौतिकेषु, तदा शरीरेन्द्रियादिविशेषराशिमेव सर्वस्वं मन्यते, कार्याकार्यहिताहितशुभाशुभज्ञानरहितश्च भवति, तदा हि स खलु विविधाभिराधिभिरभिपीड्यतेतराम्।

एवञ्च धी-धृति-स्मृतिविभ्रष्टोऽहङ्कारादिभिरभिनिविष्टः, सक्तः, ससंशयोऽभिसंप्लुतबुद्धिरन्यथादृष्टिर्विमार्गगो भवत्यायतनं मानसानामयानाम्। तैश्चाहङ्काराधिभिर्वम्भ्राम्यमाणो नातिवर्तते सत्त्वदोषान् (मानसविकारानिति यावत्)।

यदा च पुरुष आत्मवश्यैरिन्द्रियैरिन्द्रियार्थानसज्जमानः सन्नुपभुङ्क्ते, प्रशान्तचित्तः समाहितोऽचपलो जितात्माऽपरिग्रहः, दान्तश्च भवति, तदा किल सत्त्वं निर्मलं जायते। शुद्धे च मनसि सत्या बुद्धिरुदेति, शुद्ध्या च बुद्ध्याऽहङ्कारादिकं मोहजालं नश्यति। तदा हि सांसारिकेषु विषयेष्वरतिर्जायते। तदा च नियतैरिन्द्रियैर्धारावर्षैरिव तृप्तिमधिगच्छति साधकः[3]।

सत्या च बुद्धिः विद्या, सिद्धिर्मेधा, प्रज्ञा चाप्युच्यते। तथा सति विवेको वर्धते, निर्मला मतिरुदेति, अज्ञाननिशा नश्यति नवाभ्युदयो भवति, रजस्तमोऽभावाच्च विमुच्यते कर्मबन्धनैरिति[4]।

---

१. गीता १२।१३। २. म० भा० शा० प० ३२९।१३। ३. चरक० शा० ५।१०।
४. बुद्ध्या विशुद्धया युक्तो धृत्यात्मानं नियम्य च।
शब्दादीन् विषयांस्त्यक्त्वा रागद्वेषौ व्युदस्य च ॥
विविक्तसेवी लघ्वाशी यतवाक्कायमानसः।
ध्यानयोगपरो नित्यं वैराग्यं समुपाश्रितः ॥
अहङ्कारं बलं दर्पं कामं क्रोधं परिग्रहम्।
विमुच्य निर्ममः शान्तो ब्रह्मभूयाय कल्पते ॥
ब्रह्मभूतः प्रशान्तात्मा न शोचति न काङ्क्षति।
(श्रीमद्भगवद्गीता १८।५१–५४)

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

एवञ्च मन्यते यत्—

भैषज्यमेतद् दुःखस्य यदेतन्नातिचिन्तयेत् ।
चिन्त्यमानं हि न व्येति भूयश्चापि प्रवर्धते ॥

सत्यया बुद्धचा मानसं दुःखं हीयते । सन्तोषं परमं धनं मत्वा भौतिकेषु भावेष्वनासक्तः समनस्कानामिन्द्रियाणामनुपतापाय सात्म्येन्द्रियार्थसंयोगेन, बुद्ध्या सम्यगवेक्ष्यावेक्ष्यकर्मणां प्रतिपादनेन, स्मृतिं सत्यां बुद्धिश्चास्थाय मनसो प्रकृतिभावे सत्त्वोत्कर्षाय च प्रवर्तमानो मुच्यते मानसामयैरिति । एवञ्च स्वपरहितकामनया [1]सत्यप्रयोगेण वियुज्यते रजस्तमोभ्याम् ।

अस्तेयम्—(अचौर्यम्) अदत्तस्य धनस्य स्वाम्यनुज्ञां विनैव ग्रहणं स्तेयमुच्यते । परद्रव्यापहरणेनापहर्तुर्मनः संक्षोभो जायते, स्तेनश्चाहितायुर्भवति । यश्च परस्वादुपरतो भवति स किल हितायुर्भवति[2] । अज्ञानवशात्तमोऽभिभूतो जन आकृष्यते लोभेन, लोभाभिभूतश्च कामनापूर्तये चौर्यमाचरति । अभ्यासवशाच्च मोहाभिभूतस्तमेव पापमाचरति । चौर्यप्रसङ्गेन कामक्रोधावपि सहैव प्रवर्धेते । एवञ्च [3]त्रिविधमिदं द्वारं निरयस्य व्रजन्ति मूढधियः परस्परानुसङ्गात् । तथा च—

क्रोधाद् भवति संमोहः संमोहात् स्मृतिविभ्रमः ।
स्स्मृतिभ्रंशाद् बुद्धिनाशो बुद्धिनाशात् प्रणस्यति[4] ॥

यथा चाह चरकः—काम–क्रोध-लोभ-हर्ष-भय–मोहायास–शोक–चिन्तोद्वेगादिभिर्मनस्युपहते बुद्धौ प्रचलितायामभ्युदीर्णा दोषाः प्रकुपिता हृदयमुपसृत्य मनोवहानि स्रोतांसि चावृत्य जनयन्त्युन्मादम्[5] ।

तथा हि कामादिपरित्यागान्निवर्तते चौर्यादिर्मनोविकारकरैर्भावैरिति । [6]अस्तेयभावाच्च विमुच्यते मानसामयैः । अस्तेयस्य सिद्धौ सत्यां साधको यदेवेच्छति तदेव प्राप्नोति । अस्तेयाचरणे मनः प्रवरं भवति । न च भयोद्वेगचिन्तादयो मानसविकाराः पदमादधते । तथा हि अस्तेये सत्त्वगुणोदयान्मुच्यते जन्तुर्मानसैर्विविधैरामयैरिति ।

---

१. "अप्रियानृतवर्जितं यथाभूतार्थवचनं सत्यम्" (गीता–१८ शाङ्करभाष्यम्) ।
तथा— दृष्टं श्रुतं चानुमितं स्वानुभूतं यथार्थतः ।
कथनं सत्यमित्युक्तं परपीडाविवर्जितम् ॥ (लिङ्गपुराणम्)

२. 'हितैषिणः पुनर्भूतानां परस्वादुपरतस्य हितमायुरुच्यते ।' (चरकसू० ३०।२४) ।

३. त्रिविधं नरकस्येदं द्वारं नाशनमात्मनः ।
कामः क्रोधस्तथा लोभस्तस्मादेतत् त्रयं त्यजेत् ॥ (गीता–१७।२१)

४. गीता २।६३, ५. चरक० निदान० ७।४ ।

६. अनादानं परस्वानामापद्यपि विचारतः ।
मनसा कर्मणा वाचा तदस्तेयं समासतः ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

ब्रह्मचर्यम्—ब्रह्मणे ज्ञानाय यदाचर्य्यते तद् ब्रह्मचर्यम् । ब्रह्मचर्यं हि तपः । ब्रह्मचर्यमेव श्रेयसः पन्थाः[1], यदाश्रित्य सत्याबुद्धिरुदेति । ब्रह्मचर्येण च मनोविकाराः शान्ति व्रजन्ति । ब्रह्मचर्यपरिचर्यायाञ्चेर्ष्याक्रोधकामादीनामुपशमनार्थं दिवास्वापाभ्यङ्गालस्य-निद्रा–तन्द्रादि-परिहारविधय उपदिष्टाः । ब्रह्मचर्येण तपसा बुद्धिः प्रस्फुरति, स्मृतिर्वर्धते, धैर्याविष्टम्भश्च भवति । एवञ्च धी-धृति-स्मृतिसम्पत्तौ न मानसा आधयः पदमादधते । ब्रह्मचर्यप्रतिष्ठायां[2] वीर्यस्य शक्तिविशेषस्य च लाभो भवति । ब्रह्मचारी पुरुषस्तु कर्मकालादीनपि स्ववशतां नयति । स्वयं ज्ञानी भूत्वा शिष्येषु ज्ञानाऽऽधानसमर्थश्च भवति ।[3] तथाहि—

भोगश्च मोक्षश्च पराक्रमश्च शौर्यञ्च वीर्यञ्च धृतिः क्षमा च ।
यत्किञ्चिदुत्कर्षविशेषशालि तद्ब्रह्मचर्याश्रयकं वदन्ति ॥

अपरिग्रहः—परिग्रहस्तावन्ममत्वमुच्यते । परिग्रहस्तु खलु सर्वेषामेव शारीर-मानसामयानां पृष्ठभूमिः । सत्ये युगे पुरुषाः किल व्यपगतभय-राग-द्वेष-मोह-लोभ-क्रोध-शोक-मान-निद्रा-तन्द्रा-श्रम-क्लमालस्य-परिग्रहा अभूवन् । समाप्तप्राये च सत्ययुगे केषाञ्चन प्राणिनामतितर्पणाद् गौरवमासीच्छरीराणाम् । गौरवाच्चायासः, आयासच्चालस्यम्, आलस्याच्च ते सञ्चयं कर्तुमैच्छन् । प्राणयात्रोपयुक्तानां सम्भाराणां सञ्चयाच्च तेषु सम्भारेषु ममत्वमजायत । ततश्च लोभ उद्भूतः । ततश्चेतायां लोभादभिद्रोहः, अभिद्रोहादनृतवचनम्, अनृतवचनाच्च कामक्रोधचिन्तोद्वेगादयः प्रवृत्ताः । ततश्च नानाविधाश्शारीरमानसा व्याधयोऽभवन् ।

एवञ्च भौतिकेषु वस्तुजातेषु परिग्रहवशादेव मानसविकारनिकरा अवर्धन्त । तथा च अपरिग्रहो भोगसाधनानामसङ्ग्रह उच्यते । परिग्रहपरित्याग एव मनश्शान्तिकरमयनम् । अपरिग्रहाच्च मनः संयतं जायते । तथा च निवर्तन्ते मानसामया इति ।

(२) **नियमाः**—"शौचसन्तोषतपःस्वाध्यायेश्वरप्रणिधानानि नियमाः" ।

तत्र **शौचम्**—बाह्याभ्यन्तरभेदेन द्विविधं शौचम् ।

बाह्यं यथा—मृदादिना शरीरावयवशुद्धिः, जलस्नानेन शरीरशुद्धिः, मार्जनादिना स्थलशुद्धिस्तथा पञ्चभिर्वमन-विरेचन-निरूह-अनुवासन-नस्यकर्मभिः शरीरशोधनम् ।

आभ्यन्तरं यथा—मैत्र्यादिभिश्चित्तमलानां प्रक्षालनम् ।[4] अविद्याऽस्मिता-राग-द्वेषाभिनिवेशानां कामक्रोधलोभमोहमदमानमात्सर्याहङ्कारेर्ष्याऽसूयादीनां मानसमलानाञ्च प्रक्षालनम् । एवञ्च प्रज्ञापराधानां त्यागः, इन्द्रियोपशमः, स्मृतिः, देशकालात्मात्मविज्ञानेनात्म-

---

१. ब्रह्मचर्यमयनानामित्यायुर्वेदविदो मन्यन्ते । (चरकसू० ३०।१५) ।

२. ब्रह्मचर्यज्ञानदानमैत्रीकारुण्यहर्षोपेक्षाप्रशमपरश्च स्यादिति । (चरकसू० ८।२८) ।

३. "शौचसंस्कारनियमव्रतविनियतात्मा उभे सन्ध्ये भास्कराग्निदैवतान्युपस्थाय विहाय तन्द्रालस्ये, गुरोरभिवादनवेदाभ्यासश्रवणपवित्रीकृतात्मा, त्रिषवणमुपस्पृश्य, ब्रह्मचर्याग्नि-परिचरण-गुरुसुश्रूषा-नित्यभिक्षा-भैक्ष्यादिसर्वनिवेदितान्तरात्मा, गुरुवचननिर्देशानुष्ठानाप्रतिकूलो गुरुप्रसादलब्धस्वाध्यायतत्परः स्यात्" (महाभा० शा० प० १९।१।८) ।

४. "मैत्रीकरुणामुदितोपेक्षाणां सुखदुःखपुण्यापुण्यविषयाणां भावनातश्चित्तप्रसादनम् ।" (यो० द० १।३३) ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

हिताचरणम्, सद्वृत्तस्य चाचरणमाभ्यन्तरं शौचमुच्यते।[1] तथा च कायेन वाचा मनसा सर्वतोभावेन शौचाचरणं शौचमित्युच्यते। लोभ-शोक-भय-क्रोध-निर्लज्जताऽतिराग-सूचकानृत-परुषवचनत्यागपूर्वकं वाचः शौचद्वारा वाचो मलप्रक्षालनं विधीयते।

सन्तोषः— सन्तुष्टिः सन्तोषः। यथा च स्वापेक्षितेभ्यः स्वधर्माविरुद्धेभ्योऽत्यावश्यक-प्राणनिर्वाहकेभ्यः सन्निहितसाधनेभ्योऽतिरिक्तस्याधिकस्यानुपादानात्मिका वृत्तिः सन्तोषः।

सन्तोषस्य सिद्धौ सत्यां सर्वातिशायिसुखोपलब्धिर्जायते किल।[2] तृष्णा[3] हि सुखस्य दुःखस्य च कारणमुच्यते। सैव तृष्णा कालबुद्धीन्द्रियार्थानां हीन-मिथ्यातियोगेभ्यः कारणी-भवति दुःखानाम्। तृष्णाक्षये सति सत्त्वगुणाधिक्यनिमित्तकसुखस्वभावता भवति। यथा चोक्तम्—

यच्च कामसुखं लोके यच्च दिव्यं महत्सुखम्।
तृष्णाक्षयसुखस्यैते नार्हतः षोडशीं कलाम्॥

सति च सन्तोषे मनोविकारा विनिवर्तन्ते, कामक्रोध-मोह-लोभनिवृत्तिपुरःसरं रजस्तमसी च विलीयेते। तथा सति न च मानसव्याधिरुद्वेजयति।

तपः—तपः किल शरीरधातुवैषम्यानापादकं मानसदोषापहं चित्तप्रसादसम्पादक-माचरणम्।

देहेन्द्रियान्तःकरणदमनफलं हि तपोऽनेकविधम्, यथा सान्तपन-कृच्छ्रचान्द्रायण-उपोषण-धारणा-पारणा-पवनाहारमात्रादिरूपाणि शरीरकृशकराणि। ग्रीष्मे पञ्चाग्नितपनं वने निवासोऽनिकेतः, एकपादावस्थानादिमिन्द्रियस्य मनसश्च प्रसादनम्। एवञ्च त्रिविधेषु सात्त्विक-राजस-तामसेषु तपःसु सात्त्विकं तप एव मनोभेषजम्। राजसतामसे सु तपसी

---

१. त्यागः प्रज्ञापराधानामिन्द्रियोपशमः स्मृतिः।
देशकालात्मविज्ञानं सद्वृत्तस्यानुवर्तनम्॥
आगन्तूनामनुत्पत्तावेष मार्गो निर्दशितः।
प्राज्ञः प्रागेव तत्कुर्याद्धितं विद्याद्य आत्मनः॥
आप्तोपदेशप्रज्ञानं प्रतिपत्तिश्च कारणम्।
विकाराणामनुत्पत्तावुत्पन्नानाञ्च शान्तये॥
बुद्धिविद्यावयःशीलधैर्यस्मृतिसमाधिभिः।
वृद्धोपसेविनो वृद्धाः स्वभावज्ञा गतव्यथाः॥
सुमुखाः सर्वभूतानां प्रशान्ताः शंसितव्रताः।
सेव्याः सन्मार्गवक्तारः पुण्यश्रवणदर्शनाः॥ (चरकसू० ७।५३-५५, ५८-५९)

२. "सन्तोषादनुत्तमसुखलाभः" (यो० द० २।४२)।

३. इच्छाद्वेषात्मिका तृष्णा सुखदुःखात् प्रवर्तते।
तृष्णा च सर्वदुःखानां कारणं पुनरुच्यते॥
उपादत्ते हि सा भावान् वेदनाश्रयसंज्ञकान्। (चरक० शा० १।१३४-३५)

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

योगप्रतिरोधके, न तु योगसाधके, अतश्च ते खलूपेक्ष्ये । सात्त्विकं तु तपः श्रद्धापूर्वकमनुष्ठेयम्[1] । तच्च राजस-तामसभोगाद्यनुकूलेच्छाविरहितैर्युक्ताहारविहारैरनुशीलनीयम्[2] ।

सात्त्विकं तपस्त्रिविधम्—कायिकं वाचिकं मानसञ्चेति ।

तत्र **कायिकम्**[3]—स्वेष्टदेवतानाम्, सात्त्विकानामाप्तानां धार्मिकाणां द्विजानाम्, ज्ञान-विज्ञानधैर्यादिमतो गुरोः, विवेकशालिनः प्राज्ञस्य च पूजनम् । मृज्जलादिभिर्देहशुद्धिः शास्त्रविहितेषु कर्मसु प्रवृत्तिरविहितेषु निवृत्तिः । उपस्थनिग्रहः, प्राणिनां कथमप्यपीडनं व्रतप्रायोपवेशनाद्याचरणं हि शारीरं तपः । एतेन च शारीरतपसा मनोदोषौ प्रशान्तौ भवतः,तथा हि मनसा विकाराः प्रशमं व्रजन्ति ।

वाचिकम्[4]—प्राणिनां हितकरं श्रेयःसम्पादनपरम्, प्रियम्, मनोहरं यच्चात्यन्तिकरूपेण भूतमात्रार्हितं तादृशं सत्यमनुद्वेजकं वचनम्, मनःसमाधिसाधनानां शास्त्राणां मुहुर्मुहुरभ्यसनमेतत्सर्वं वाङ्मयं तप उच्यते । वाङ्मयेन तपसा चित्तप्रसादनेन मनः शान्तिमाप्नोति । तथा सति द्वेषाभिद्रोहादयो मानसविकारा निवर्तन्ते ।

मानसिकं[5] **तपः**—मनसः सङ्कल्पप्रवणत्वम्, विषयेभ्यो मनोऽव्यावर्तनम्, रजस्तमोलेशराहित्येन सात्त्विकभावेनावस्थानं, मनःसंयमपूर्वकं वाक्संयमः, मनसा वाक्प्रवृत्तिनियमनम्, मनोवृत्तेर्ध्येये स्वात्मरूपे स्थिरता, मनोभावानां सात्त्विकवृत्तिमत्त्वं सर्वमेतन्मानसं तप उच्यते । मानसञ्च तपो रजस्तमोवृत्तिनिरोधात् साक्षादेव मनोदोषौषधायते ।

तदेतत्त्रिविधं सात्त्विकं तपो यौगिकीचिकित्सायां मनोविकारनिकराणां भेषजत्वेन व्याप्रियते ।

स्वाध्यायः—अध्यात्मप्रतिपादनपरायणानां वेदब्राह्मणोपनिषत्पुराणायुर्वेदशास्त्रार्थानामनवरतं पुनः पुनः परिशीलनं स्वाध्यायः । एषां शास्त्राणामभ्यासो मनःक्षोभकराणां भावानामनुदये हेतुर्भवति । शास्त्रस्वाध्यायबलेन धी-धृति-स्मृत्यादीनां यथास्थितौ सत्यां नहि प्रज्ञापराधानामुद्भवः । शास्त्रस्वाध्यायप्रबला मेधा चित्तशुद्धिपूर्वकं तत्त्वज्ञानाय प्रभवति । एवञ्च मनो नानुरज्यते तादात्विकेषु परिणामदुःखेषु सुखेष्विति ।

---

१. श्रद्धया परया तप्तं तपस्तत्त्रिविधं नरैः ।
अफलाकांक्षिभिर्युक्तैः सात्त्विकं परिचक्षते ।। (गीता १७।१७)

२. युक्ताहारविहारस्य युक्तचेष्टस्य कर्मसु ।
युक्तस्वप्नावबोधस्य योगो भवति दुःखहा ।। (गीता ६।१७)

३. देवद्विजगुरुप्राज्ञपूजनं शौचमार्जवम् ।
ब्रह्मचर्यमहिंसा च शारीरं तप उच्यते ।। (गीता १७।१६)

४. अनुद्वेगकरं वाक्यं सत्यं प्रियहितं च यत् ।
स्वाध्यायाभ्यसनं चैव वाङ्मयं तप उच्यते ।। (गीता १७।१५)

५. मनःप्रसादः सौम्यत्वं स्थैर्यमात्मविनिग्रहः ।
भावसंशुद्धिरित्येतत् तपो मानसमुच्यते ।। (गीता १७।१६)

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

ईश्वरप्रणिधानम्—परमेश्वरे सर्वक्रियाणां समर्पणं हि प्रणिधानमुच्यते। परमेश्वराश्रयणेन हि सर्वमेवाधिव्याधिभयं त्रिनिवर्तते। श्रीमद्भगवद्गीतायाञ्चैव प्रतिपादितं यत्—

यत्करोषि यदश्नासि यज्जुहोषि ददासि यत्।
यत्तपस्यसि कौन्तेय तत्कुरुष्व मदर्पणम्[1]॥

कूर्मपुराणे च—

नाहं कर्ता सर्वमेतद् ब्रह्मैव कुरुते तथा।
एतद्ब्रह्मार्पणं प्रोक्तमृषिभिस्तत्त्वदर्शिभिः॥

तथा हि योगयुक्तेन जितेन्द्रियेण विशुद्धात्मना जनेन किल मन्तव्यं यत् परमेश्वर एव निखिलकर्माणि विदधाति, नाहं करोमीति। अथ च सर्वेषामेव कर्मणां फलाशां त्यक्त्वा तानि कर्माणि परमेश्वरार्पणमेव कुर्यात्। उक्तञ्च—

नैव किञ्चित् करोमीति युक्तो मन्येत तत्त्ववित्।
पश्यन् श‍ृण्वन् स्पृशन् जिघ्रन्नश्नन् गच्छन् स्वपन् श्वसन्॥
प्रलपन् विसृजन् गृह्णन्नुन्मिषन् निमिषन्नपि।
इन्द्रियाणीन्द्रियार्थेषु वर्तन्त इति धारयन्॥
ब्रह्मण्याधाय कर्माणि सङ्गं त्यक्त्वा करोति यः।
लिप्यते न स पापेन पद्मपत्रमिवाम्भसा[2]॥

एवञ्च परमेश्वरशरणागतो हि जनः परमेश्वरेण समुद्धार्यते। अतश्च भगवन्तमाश्रित्य प्रणिधानात्मके भक्तियोगे विशेषतो यतनीयम्। यत्ने कृते सति परमकारुणिको परमेश्वरस्तमनुगृह्णाति। तथा चात्मनिवेदिनो जनस्य देहयात्रानिर्वहणे सर्वाणि जाग्रत्स्वप्नावस्थाकृतानि कर्माणि परमेश्वराराधनतयैव सम्पाद्यानि भवन्ति। यानि च जाति-धर्म-वर्णाश्रमानुवृत्तीनि कर्माणि तान्यपि परमेश्वराज्ञापालनरूपाणि भगवदाराधनात्मकतयैव प्रसक्तानि भवन्तीति। शयनासनादिषु सर्वत्रैव सर्वदैव परमेश्वरस्य सप्रेमस्मरणं विधेयम्, तेन च मनो निर्मलं भवति। निर्मले च मनसि परमेश्वरानुचिन्तनमनुवर्तते सततम्। तथा च सर्वाणि ज्ञानकर्मेन्द्रियाणि परमेश्वरार्थमेव विनियोज्यानि भवन्ति।

यथा च शिवमानसपूजास्तोत्रे—

आत्मा त्वं गिरिजामतिः सहचराः प्राणाः शरीरं गृहं
पूजा ते विषयोपभोगरचना निद्रासमाधिस्थितिः।
सञ्चारः पदयोः प्रदक्षिणविधिः स्तोत्राणि सर्वा गिरो
यद्यत् कर्म करोमि तत्तदखिलं शम्भो तवाराधनम्॥

---

१. गीता—९।२७।   २. गीता—५।८-१०।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

एवमात्महितं चिकीर्षता जनेन सकलदुरितक्षयसाधने परमकल्याणमये भगवति परमेश्वरे मनः प्रणिधातव्यम् । तदेवं यदा भक्तेन क्रियमाणाः सर्वाः क्रिया निस्त्रैगुण्ये परमेश्वरे सम्बद्धास्तदर्थमेवाचरितास्तदा मुच्यते कर्मबन्धनैः । न च युज्यते मानसैराधिभिर्नितरामिति ।

(३) आसनम्[1]—अस्यते अनेनेत्यासनम् । स्थिरसुखमासनं, सुखयतीति सुखं सुखं सद् यत् स्थिरं तदासनम् । तथा च सुखप्रदत्वे सति शरीरवृत्तिस्थिरत्वमासनत्वम् । आसनानि च यथा स्वशास्त्रेषु त्र्यधिकनवतिसंख्याकानि समुपलभ्यन्ते, तानि हि नेह स्वरूपतो निर्दिश्यन्ते विस्तरभयात् । प्रपञ्चस्त्वेषामाकरग्रन्थेषु (शिवसंहिता-घेरण्डसंहिताप्रभृतिषु) द्रष्टव्यः ।

आसनस्य दार्ढ्यम्— यदा किल [2]प्रयत्नस्य = बहुविधव्यापारस्य प्रयासस्य शैथिल्यं भवति, यदा च अनन्ते पृथिवीधारिणि स्थिरतरे शेषनागे समापत्तिः=चित्तस्य तदात्मतापन्नत्वं भवति, तदा शेषनारायणसमापन्नेन चित्तेन सताऽऽसनानि दृढीभवन्ति । तथा चासनदृढतां प्रति प्रयत्नविरामस्य शेषनारायणे संयमस्य च प्रयोजकत्वम् ।

आसनानां फलम्—आसनानुशीलनेन शरीरमानसदोषौ निवर्तेते । तथा हि नाभिभूयते शीतोष्णादिभिः कामक्रोधादिभिर्वा । आसनसिद्धौ च प्राणायामकरणसामर्थ्यमप्याविर्भवति । विनाऽऽसनसामर्थ्यं न प्राणायामादिः स्थितिपदं लभते । एतच्च श्रीमद्भगवद्गीतायां साङ्गोपाङ्गं वर्णितचरमुपलभ्यते[3] । एवञ्चासनजये वातपित्तश्लेष्मवैषम्यजनितज्वरादिभिर्नाभिभूयते । इन्द्रियान्तःकरणवैकल्यजविभ्रमैरपि नाभिभूयते । प्रमादालस्यतन्द्रादयः प्रशमं व्रजन्ति । रजस्तमोदोषजैर्विकारैः कामादिभिर्निद्रादिवृत्तिविशेषैरपि नाभिभूयते । आसनेभ्यश्च शरीरमिन्द्रियाणि मनश्च सुसंयतं प्रबलञ्च भवति । आसनजयाच्च सर्वाकारैश्च शारीरमानसविकारा दूरीभवन्ति ।

(४) प्राणायामः—आसनसिद्धौ सत्यां प्राणायामः सिद्ध्यति । श्वासप्रश्वासयोर्गतिविच्छेदश्च "प्राणायामः"[4] उच्यते । बाह्यस्य वायोर्ग्रहणं श्वासः, कोष्ठस्थस्य वायोर्बहिर्निःसारणं

---

१. "स्थिरसुखमासनम्" (यो० द० २।४६) ।

२. "प्रयत्नशैथिल्यानन्तसमापत्तिभ्याम्" (यो० द० २।४६) ।

३. शुचौ देशे प्रतिष्ठाप्य स्थिरमासनमात्मनः ।
नात्युच्छ्रितं नातिनीचं चैलाजिनकुशोत्तरम् ॥
तत्रैकाग्रं मनः कृत्वा यतचित्तेन्द्रियक्रियः ।
उपविश्यासने युञ्ज्याद् योगमात्मविशुद्धये ॥
समं कायशिरोग्रीवं धारयन्नचलं स्थिरः ।
संप्रेक्ष्य नासिकाग्रं स्वं दिशश्चानवलोकयन् ॥
प्रशान्तात्मा विगतभीर्ब्रह्मचारिव्रते स्थितः ।
मनः संयम्य मच्चित्तो युक्त आसीत मत्परः ॥
युञ्जन्नेवं सदात्मानं योगी नियतमानसः ।
शान्तिं निर्वाणपरमां मत्संस्थामधिगच्छति ॥ (गीता–६।११–१५)

४. "तस्मिन् सति श्वासप्रश्वासयोर्गतिविच्छेदः प्राणायामः" (पात० यो० सू०) ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

प्रश्वासः, तयोश्च प्रचलनप्रतिबन्धः प्राणायामः । स तु रेचकपूरककुम्भकभेदेन त्रिविधः[1] । तत्र **रेचकः** प्रश्वासपूर्वको गत्यभावो बाह्यवृत्तिः । **पूरकः** श्वासपूर्वको गत्यभाव आभ्यन्तरवृत्तिः । कुम्भकः स्तम्भवृत्तिर्यत्र श्वासप्रश्वासयोरभावो भवति । यथा तप्ते लोष्ठे निहितं जलं परिशुष्यन् सर्वतः परिशुष्यते, तथा कुम्भके वायुर्बलवद्विधारकप्रयत्नरुद्धक्रियः सन्नुदरेऽवतिष्ठते । कुम्भकाभ्यासाच्च सिद्धिर्भवति । तथा च—

विधिवत् प्राणयमनैर्नाडीचक्रे विशोधिते ।
सुषुम्नावदनं भित्वा सुखाद् विशति मारुतः ॥
मारुते मध्यसञ्चारे मनःस्थैर्यं प्रजायते ।
यो मनः सुस्थिरीभावः सैवावस्था मनोन्मनी ॥
तत्सिद्धये विधानज्ञाश्चित्रान् कुर्वन्ति कुम्भकान् ।
विचित्रकुम्भकाभ्यासाद् विचित्रां सिद्धिमाप्नुयुः ॥

कुम्भकभेदाः—

सूर्यभेदन-मुज्जायी-सीत्करी-शीतली तथा ।
भस्त्रिका-भ्रामरी-मूर्च्छा-प्लावनीत्यष्ट कुम्भकाः ॥

त्रिविधस्य प्राणायामस्य स्वरूपाणि

निष्क्राम्य नासाविवरादशेषं प्राणं बहिः शून्यमिवाऽनिलेन ।
निरुद्धच संतिष्ठति रुद्धवायुः स रेचको नाम महानिरोधः ॥
बाह्यस्थितं प्राणपुटेन वायुमाकृष्य तेनैव शनैः समन्तात् ।
नाडीश्च सर्वाः परिपूरयेद् यः स पूरको नाम महानिरोधः ॥
न रेचको नैव च पूरकोऽत्र नासापुटे संस्थितमेव वायुम् ।
सुनिश्चलं धारयते क्रमेण कुम्भाख्यमेतत् प्रवदन्ति तज्ज्ञाः ॥

[2]**केवलकुम्भकः**—यः किल बाह्यविषयकं पूरकम्, आभ्यन्तरविषयकं च पूरकम् एतावुभावप्यतिक्रम्य-त्यक्त्वा स्वयमेव केवलो वर्तते स प्राणायामः **केवलकुम्भसंज्ञ**को भवति ।

प्राणायामस्य फलम्—प्राणायामाद्विवेकज्ञानावरणमधर्मादिकं नश्यति ।[3] तथा च मनुः—

दह्यन्ते ध्यायमानानां धातूनां हि यथा मलाः ।
तथेन्द्रियाणां दह्यन्ते दोषाः प्राणस्य निग्रहात् ॥

प्राणायामाभ्यासाच्च मनसो धारणासु योग्यता भवति ।[4] प्राणायामस्थैर्ये सति "ईश्वरी" इत्यभिधां कुण्डलीमुन्निद्रां विधातुं महामुद्रादीनामभ्यासः कर्तव्यः । एताश्च मुद्राः मनश्शरीरशुद्धिप्रदा अनेकैश्वर्यप्रदाश्च वर्णिताः । (मुद्राणां विस्तरस्तु योगतन्त्रग्रन्थेषु द्रष्टव्यः) ।

---

१. "बाह्याभ्यन्तरस्तम्भवृत्तिर्देशकालसंख्याभिः परिदृष्टो दीर्घसूक्ष्मः" (यो० द० २।५०) ।
२. "बाह्याभ्यन्तरविषयाऽऽक्षेपी चतुर्थः" (यो० द० २।५१) ।
३. "ततः क्षीयते प्रकाशावरणम्" (यो० द० २।५२) ।
४. "धारणासु च योग्यतामनसः" (यो० द० २।५३) ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

यथा च—

तस्मात् सर्वप्रयत्नेन प्रबोधयितुमीश्वरीम् ।
ब्रह्मद्वारमुखे सुप्तां मुद्राभ्यासं समाचरेत् ॥

महामुद्रा महाबन्धो महावेधश्च खेचरी ।
उड्यानं मूलबन्धश्च बन्धो जालन्धराभिधः ॥

करणी विपरीताख्या वज्रोली शक्तिचालनम् ।
इदं हि मुद्रादशकं जरामरणनाशनम् ॥

तत्र महामुद्राभ्यासेन वातादयो दोषाः शाम्यन्ति, रजस्तमसी च विलीयेते । महाबन्धो हि सिद्धिप्रदो भवति । महावेधमुद्रा तु जरामृत्युहरा वह्निवृद्धिकरा अणिमादिसिद्धिदात्री च समाख्याता । खेचरीमुद्रासिद्धौ व्याधिजरामृत्यवोऽपयान्ति । तथा च—

न रोगो मरणं तन्द्रा न निद्रा न क्षुधा तृषा ।
न च मूर्च्छा भवेत् तस्य यो मुद्रां वेत्ति खेचरीम् ॥

एकं सृष्टिमयं बीजमेका मुद्रा च खेचरी ।
एको देवो निरालम्बो ह्येकावस्था मनोन्मनी ॥

एवमेवापरा अपि मुद्राः शारीरमानसमलप्रक्षालनपरा आधिव्याधिप्रशमनपराश्च व्याख्याताः ।

(५) प्रत्याहारः—प्रत्याह्रियन्ते विषयेभ्य इन्द्रियाणि यस्मिन् कर्मणि स प्रत्याहारः[1] । विषयेषु विचरतामिन्द्रियाणां विषयेभ्यस्तेषां बलादाहरणं[2] प्रत्याहारः ।

विषयानुषक्तानीन्द्रियाणि निगृह्य[3] चित्तेऽभिनिवेशयेत्, तथा सति चेन्द्रियाणाञ्चित्तस्वरूपाकारत्वं भवति, स चायं प्रत्याहारः । इन्द्रियाणां विषयेषु चरतामनु यदा मनोऽनुधावति,[4] तदा हि प्रज्ञाऽपराद्ध्यति । प्रज्ञापराधाच्च मानसविकाराणामुद्भवः । अतश्च मानसामयप्रतिषेधार्थं प्रत्याहारस्य विशिष्टं पदमामनन्ति सुधियः ।

प्रत्याहारस्य फलम्—प्रत्याहारादिन्द्रियाणां परमो विजयो भवति[5] । इन्द्रियाणि किल हठान्मनो विषयेषु हरन्ति । यदा च तानि संयम्य जितेन्द्रियत्वमुपलभ्यते, तदैव निर्मला प्रज्ञा समुदेति । इन्द्रियजयिनश्च विवेकज्ञानं प्रतिष्ठितं भवति ।

---

१. "स्वविषयाऽसम्प्रयोगे चित्तस्वरूपानुकार इवेन्द्रियाणां प्रत्याहारः" (यो० द० २।५४) ।

२. इन्द्रियाणां विचरतां विषयेषु स्वभावतः ।
बलादाहरणं तेषां प्रत्याहारः स उच्यते ॥ (याज्ञ० स्मृ०)

३. शब्दादिष्वनुषक्तानि विगृह्याक्षाणि योगवित् ।
कुर्याच्चित्तानुकारीणि प्रत्याहारपरायणः ॥ (विष्णुपु०)

४. इन्द्रियाणां हि चरतां यन्मनोऽनुविधीयते ।
तदस्य हरति प्रज्ञां वायुर्नावमिवाम्भसि ॥

५. "ततः परमावश्यतेन्द्रियाणाम्" (यो० द० २।५५) ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

(६) **धारणा**—यत्र देशे ध्येयं चिन्तनीयं तत्र ध्यानाधारविषये चित्तस्य यो बन्धः स एव **"धारणा[1]"** इत्युच्यते । सा च धारणा क्व कीदृशी विधेयेति **षट्चक्रनिरूपणे** वैशद्येन वर्णितम् । मूलाधारे, स्वाधिष्ठाने, मणिपूरे, अनाहते, विशुद्धे, आज्ञाचक्रे च धारणा विधेयेति । मूलाधारादारभ्याज्ञाचक्रसत्ताक्रमखिलं ध्यात्वा योगी वाचामधीशो भवति । सर्वविद्याविनोदी नित्यानन्दमयो विशिष्टात्मा च भवति । एवञ्च धारणया मनोविकाराः प्रशमं यान्तीति । तथा च स्वाधिष्ठानचक्रध्यानफलम्—

स्वाधिष्ठानाख्यमेतत् सरसिजममलं चिन्तयेद् यो मनुष्य-
स्तस्याहङ्कारदोषादिकसकलरिपुः क्षीयते तत्क्षणेन ।
योगीशः सोऽपि मोहाद्भुततिमिरचये भानुतुल्यप्रकाशो
गद्यैः पद्यैः प्रबन्धैर्विरचयति सुधावाक्यसन्दोहलक्ष्मीः[2] ॥

एवञ्चानाहतचक्रं ध्यात्वा योगीशो ज्ञानीशो जितेन्द्रियः काव्याम्बुवारिधरश्च भवति । विशुद्धचक्रे चित्तधारणात् त्रिकालदर्शी चिरञ्जीवी च भवति । आज्ञाचक्रे चित्ते लीने सति अष्टसिद्धीनवाप्नोति ।

एवञ्चाभ्यन्तरे तत्तत्स्थानस्थचक्रेषु **धारणा** योगेन मानसविकारोद्भवभूमिर्विलीयते ।

(७) **ध्यानम्**—यत्र धारणा भवेत् तत्र विषये चित्तवृत्तेरेकाग्रता **'ध्यानम्[3]'** । स्थूल-सूक्ष्मादि यत् किमपि वस्तु यत्र चित्तवृत्तौ ध्यायते तद् ध्यानम् । यत्र प्रदेशे चित्तं धृतं तत्र ज्ञानस्य या एकतानता, यदेव च धारणायालम्बीकृतं तदालम्बनतयैव निरन्तरं चिन्तनं तद् ध्यानम् ।

(८) **समाधिः**—सम्यगाधीयते ध्येयं यत्र वृत्तिविषये सः **'समाधिः'[4]** । यदा च मन एकाग्रीक्रियते, यदा च पूर्वोक्तलक्षणं ध्यानं ध्येयविषयाकारेणैकतानं भवति, न च ज्ञानान्त-रस्योदयो भवति, वृत्त्यन्तररहिता साऽवस्था समाधिः । ध्येयस्वरूपाकारमात्रवृत्तिचित्तसमाधानं समाधिः ।

एवञ्चाष्टाङ्गयोगाचरणेन मनो निर्मलं स्थिरञ्च जायते । यथेच्छञ्च मनः समाधीयते समीहितेऽर्थे । योगाभ्यासान्मनसो निर्दोषतया नाक्रमन्ति मानसामयाः ।

अतिप्राक्तनकालादेव महर्षिभिर्मनःसंयमोपाया निर्दिष्टाः सन्ति, यद्बलेन प्रवृद्धसत्त्वा महर्षयो परां सिद्धिमधिजग्मुः ।

अधुनातने वैज्ञानिके युगे तु विविधै रासायनिकप्रयोगैर्विद्युदुद्दीपनैश्च मानवमस्तिष्कस्य विभिन्नान् केन्द्रान् दमयन्ति समुत्तेजयन्ति वा तज्ज्ञाः । मस्तिष्कञ्च मानवचेष्टानां नियामकं यन्त्रम् । अत्र च स्थितं मनो जन्मजन्मार्जितभावनाप्रवणं समस्तानाञ्च क्रियाणां प्रवर्तकम् । अहर्निशमनवरतं मस्तिष्कस्थाः शतखर्वसंख्याकास्तन्त्रिकाः सक्रियाः सन्ति । प्रत्येकस्मिंश्च

---

१. "देशबन्धश्चित्तस्य धारणा" (यो० द० ३।१, २—षट्च० निरू०) ।
३. "तत्र प्रत्ययैकतानता ध्यानम्" (यो० द० ३।२) ।
४. "तदेवार्थमात्रनिर्भासकं स्वरूपशून्यमिव समाधिः" (यो० द० ३।३) ।
तस्यैव कल्पनाहीनं स्वरूपग्रहणं हि यत् ।
मनसा ध्याननिष्पाद्यं समाधिः सोऽभिधीयते ॥ (विष्णुपु०) ।

4958

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

शरीरभागे तन्त्रिकाः प्रसृताः सन्ति । तासाञ्च केन्द्रं मस्तिष्कम् । यथा च — समस्तनगरतन्तु-(तार)नियन्त्रकमेकम् "टेलीफोन एक्सचेञ्ज" संस्थानं भवति । यच्चाखिलस्य नगरस्य संवादसम्प्रेषणव्यवस्थामभिनिर्वर्तयति, तथैवाखिलदेहविसृतास्तन्त्रिकाः शरीरभागेभ्यो मस्तिष्काभिमुखमानयन्ति सन्देशराशिम्, ताश्च **'अभिवाहिन्यः'** उच्यन्ते । **'अपवाहिन्यश्च'** मस्तिष्काच्छरीरभागेषु सन्देशमभिवहन्ति । तन्त्रिकातन्तुमिलनकेन्द्रस्थमन्तर्ग्रथनम् (Synopses) सन्देशानां समन्वयं विधत्ते ।

मनसो निवासभूमिर्मस्तिष्कम्— विविधैरुन्नतैरनवतैरावर्तैर्निर्मितं किलास्ति मस्तिष्कम् । अत्र च विविधानि संवेदनाकेन्द्राणि सन्ति । वेदनाऽऽवेदकं चेतककेन्द्रम् (Thalamus), सुखानुभूतिकरमधश्चेतकम् (Hypothalamus), क्रोधभयमूलककेन्द्र-(Amigdala) प्रभृतीनि । मस्तिष्कं मेरुरज्जुश्च मानवानां तन्त्रिकातन्त्र-(Nervous system) निर्माणे प्रभवतः ।

मस्तिष्कयन्त्रं हि विद्युदूर्जयैव तासु तासु जाग्रत्स्वप्नाद्यवस्थासु सक्रियं भवति । विद्युत्स्रोतांसि च तन्त्रिका(Nerv)कोशिका एव । ताश्च सूक्ष्मडाइनेमो(Dynamo)सदृशं कार्याणि कुर्वन्ति । विद्युदावेशश्च (Electrical charge) तन्त्रिकास्पन्दनहेतुः । तन्त्रिकास्पन्दनश्च अन्तर्ग्रथनं गच्छति । ततश्च स्वेष्टदेशे प्रेष्यते । तत्र च गत्वा तादृशमुद्दीपनं विदधाति येन सुखं दुःखं क्रोधं दयां वा प्रतीमः ।

कस्यचन वस्तुनः परिचये च मस्तिष्कं श्रमं विधत्ते । स्मृतिकेन्द्रं तन्त्रिकाभिर्वस्तुवर्णगन्धरसस्पर्शादिविषये सूचनामवाप्य तद्वस्तु परिचेतुं क्षमं भवति, ततश्च तदभिव्यक्ततां याति, अनन्तरं संज्ञास्वरूपादिपरिचयपूर्वकं तज्ज्ञानं सञ्जायते ।

शारीरविदः शरीरक्रियाविदश्च जीवात्मविषये, मनोविषये, मस्तिष्कविषये चाधिकाधिकं ज्ञानमर्जयितुं कृतश्रमाः परिलक्ष्यन्ते सम्प्रति । मस्तिष्कस्यागाधे रहस्यमये खाते यत्किमपि ज्ञानमौक्तिकमन्तर्निहितमास्ते तदन्वेषणलालसमानसा वैज्ञानिकाः प्रयतमाना दृश्यन्ते ।

प्राक्तने काले रसायनौषधैर्मस्तिष्कस्योद्बोधनार्थं प्रयोगकृता आसन् । यथा सोमरसपानम् । आयुर्वेदीयासु च संहितासु (चरक-सुश्रुताष्टाङ्गहृदयादिषु) विशेषतश्च—चरकसंहितायाश्चिकित्सास्थानस्य चतुर्विंशतितमेऽध्याये मद्यपानस्य गुणा वैशद्येन वर्णितचराः[1] ।

---

१. हर्षमूर्जं मदं पुष्टिमारोग्यं पौरुषं परम् ।
युक्त्या पीतं करोत्याशु मद्यं मदसुखावहम् ॥
रोचनं दीपनं हृद्यं स्वरवर्णप्रसादनम् ।
प्रीणनं बृंहणं बल्यं भयशोकश्रमापहम् ॥
स्वापनं नष्टनिद्राणां मूकानां वाग्विबोधनम् ।
बोधनं चातिनिद्राणां विबद्धानां विबन्धनम् ॥
वधबन्धपरिक्लेशदुःखानां चाप्यबोधनम् ।
मद्योत्थानां च रोगाणां मद्यमेव प्रबाधकम् ॥
रतिर्विषयसंयोगे प्रीतिसंयोगवर्धनम् ।
अपि प्रवयसां मद्यमुत्सवामोदकारकम् ॥ (चरकचिकित्सा० २४।६१–६५) ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

गंजा-भङ्गा-धुस्तूर-अहिफेनादिकमादकद्रव्याणि मस्तिष्कमुत्तेजयन्ति, जनाश्च विषादशोकाद्यपनयनार्थमासेवन्ते तानि किल। कृत्रिमरूपेण च तादृशानि भेषजानि निर्मीयन्तेऽधुनातनैराचार्यैर्यानि किल मस्तिष्कशान्तिं विदधति। रसायनौषधप्रभावान्मस्तिष्कनियामिका विद्युदुत्पद्यते। याश्च भावनाः, यश्च विचारः, या चानुभूतिः सञ्जायते, तत्र सर्वत्र रासायनिकी कापि क्रिया भवति। यत्र च तन्त्रिकाणां स्पन्दनं कारणीभूतमवतिष्ठते।

तादृशाश्च यान्त्रिका विद्युत्प्रयोगा विधीयन्ते, यैश्च मस्तिष्कमुद्दीप्तं भवति। कश्चन शान्तस्वभावोऽपि प्राणी विद्युत्प्रवाहकाले क्रोधपरवशो भवति। अपसारिते च विद्युद्वेगे पुनरपि शान्तो भवति। अथ च मस्तिष्कस्य प्रदेशविशेषे विद्युत्प्रयोगेण तस्मिन् पुरुषे प्रेमोद्रेको भवति, वात्सल्यं वा जागर्ति, येन स खलु प्रेमपरवशः पार्श्ववर्तिजन्तुना सह क्रीडति, आमोदमातनोति परस्परमालिङ्गनेन। तथा च प्रेमोत्पादकम्, क्रोधोत्पादकं यद्वा तेषां तेषां संवेगानामुत्पादकं केन्द्रमस्ति मस्तिष्के, यत्र च विद्युदावेशेन ते ते भावाः समुद्भवन्ति।

एवञ्च सुखस्य वेदनायाश्च मुख्यं केन्द्रमधश्चेतकमुच्यते (हाइपोथैलेमस इति यावत्)। क्षुधा, पिपासा, निद्रा, कामपिपासादिकञ्चाधश्चेतकाधीनमेव। प्रयोगाश्च दृष्टचरास्तादृशाः, यैश्च कस्यचन जन्तोः क्षुधा तीव्रतरा सम्पन्ना यद्वा क्षुधामन्दाग्नित्वमधिगता स्यात्। एतद्विषये जिज्ञासुभिर्ग्रहणीरोगचिकित्सा भस्मकरोगचिकित्सा च द्रष्टव्या (चरकसंहिता-चिकित्सास्थानस्य पञ्चदशोऽध्यायः)।

सन्ति हि विद्युत्प्रयोगा इव रसायनप्रयोगा अपि, यत्प्रयोगेण मूकोऽपि वाचालतां याति। आशाहीनेऽपि जने तीव्राऽऽशा जागर्ति। एतद्वैपरीत्येन चाशावन्तोऽपि नैराश्यभावापन्ना भवन्ति मेधा-धृति-स्मृतिध्वंसकद्रव्योपसेवनैरिति। संसारेऽस्मिन् विभिन्नेषु देशेषु सन्ति विज्ञानविदोऽन्वेषणतत्परास्तादृशौषधान्वेषणाय, यत्प्रयोगेण शत्रुदेशवासिजनशेमुषीपक्षतिशातनं विधातुं प्रभवेयुः। भारतीयाश्च गवेषकाराशीराशिभिरभिप्रीणयन्ति मित्रपक्षान् "शत्रूणां बुद्धिनाशोऽस्तु मित्राणामुदयस्तव" इत्यादिभिः। इदं हि विज्ञानं 'साइको·केमिष्ट्री' इत्याख्यम्।

भारतवर्षेऽतिप्राक्तनकालादेवैतद्विद्याविदो विद्वांस आसन्निति न तिरोहितं प्रेक्षावताम्। संमोहन-वशीकरण-उच्चाटनादिप्रयोगदक्षास्तान्त्रिका परम्परया तद्विद्यान्तेवसित्वमधिगम्याधुनापि विविधाभिमर्षणाऽभिचारकर्मनिरता नासुलभाः। तादृशैश्च प्रयोगैः पुरा सम्प्रति च यथेप्सितसम्भारसमाहरणे तज्ज्ञानां साफल्यं निश्चप्रचम्।

आसीत् पुरा तादृशो प्रयोगो यत्समारम्भेण प्रतिपक्षाणां बुद्धिजाड्यं जायते स्म।

यथा च—

संमोहनं नाम सखे ममास्त्रं प्रयोगसंहारविभक्तमन्त्रम्।
गान्धर्वमादत्स्व यतः प्रयोक्तुर्न चारिहिंसा विजयश्च हस्ते॥

(रघुवंशे–५ मे सर्गे ५७)

एवञ्च मस्तिष्कानुभूतिकेन्द्रे च यदैव व्यत्यासो भवति, तदैव नानाविधा आधयो पदमादधते। मानसदोषोद्रेकाच्च विभिन्ना उन्मादा जायन्ते–वातोन्माद-पित्तोन्माद-कफोन्माद-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

त्रिदोषोन्माद–शोकोन्माद–विषोन्माद–कामोन्माद-गर्भोन्माद–प्रसवोन्माद-रजोऽवरोधोन्माद-मद्योन्माद-चौर्योन्माद-हत्योन्माद-नैतिकोन्माद-आघातोन्माद-ज्वरितोन्मादप्रभृतयः । अन्ये च अपतानक-अपतन्त्रक-भ्रम-मद-मूर्च्छा-संन्यास-तन्द्रा-ध्वंसक-विक्षय-योषापस्मार-अतत्त्वाभिनिवेश–प्रभृतयो भवन्ति रोगा मानसदोषाभ्यामिति ।

एवंविधेष्वामयेषु प्रचलिताया विद्युत्प्रवाहसम्प्रेषणचिकित्सा विधीयते, सा तु तावदेव लाभकरी भवति यावच्च विद्युत्प्रभावस्तिष्ठति, गते च विद्युत्प्रवाहप्रभावे पूर्वा व्याध्यवस्था पुनरापद्यते ।

अद्यप्रभृत्याधुनिकविज्ञानसम्मता याश्चौषधयो दृष्टिपथमानीताश्चिकित्साविधौ ताः सर्वा अपि तावदेव सफलाः, यावत्कालं तत्प्रभावमदोऽवतिष्ठते, शान्ते च मदे महच्छैथिल्यमनुभूयतेऽङ्गेषु, अनेके च विषायन्ते रोगाभिसरणे ।

तथा हि मानसामयप्रतीकारविषये यदपि शान्तिप्रदमौषधम् (Tranguillizer) समुपलभ्यते तदाखिलमेव नैकान्तेन हितकरम् अपि तु स्वल्पेनापि प्रमादेन प्राणहरं भवति । अन्यतश्च योगशास्त्रनिर्दिष्टपथा(पूर्वसन्दर्भेषु वर्णितदिशा)अभ्यासदार्ढ्येन मानसरोगा एकान्तेन विजिता भवन्ति, न च पुनराक्रमणभयमुपद्रवभयं वा भवति । दृष्टचरमेतद् यद् योगिनः कतिपयमासमनाहाराः सन्तोऽपि स्वस्था दृश्यन्ते । ते हि योगाभ्यासबलात् क्षुधाकेन्द्रम् (मस्तिष्कगतम्) दमयन्ति ।

योगबलेन च विजित्य मानसामयानवाप्यते किलैश्वरं बलम् । तथा च—

आवेशश्चेतसो ज्ञानमर्थानां छन्दतः क्रियाः ।
दृष्टिः श्रोत्रं स्मृतिः कान्तिरिष्टतश्चाप्यदर्शनम् ॥
इत्यष्टविधमाख्यातं योगिनां बलमैश्वरम् ।
शुद्धसत्त्वसमाधानात् तत्सर्वमुपजायते ॥

एवञ्च पूर्वोक्तैरष्टाङ्गयोगैश्चित्तममलं विधीयते, तथा सति द्विसप्ततिसहस्रसंख्याकाश्च नाड्यो निर्मलाः सत्यः स्वस्वव्यापारेषु यथावद् व्यापृता भवन्ति, मानसाश्चाधयो व्यावर्तन्ते । प्रज्ञायाश्चोदयान्नाभिभूयते रजस्तमोभ्याम् । तथा हि ''नास्ति योगसमं बलम्'' इति मनसि सर्वाकारेण दृढं निधाय सुधियो विरमन्ति विकारनिकरप्रवर्तकेभ्यो भावेभ्यो नितराम्, विचिन्वन्ति चाष्टाङ्गयोगपदवीमाप्तजनपूजिताम् । इत्थञ्च सर्वोपधात्यागपूर्विका यौगिकी चिकित्सा प्रशस्यतेतरां मानसामयप्रतीकारविधाने । एवञ्च यौगिकी चिकित्सा समाख्याता भवति ।

॥ ॐ शान्तिः ॥

• • •

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

पौराणिकसर्गतत्त्वविमर्शः

डॉ० रामाभिलाषत्रिपाठी, विद्यावारिधिः (पी-एच्. डी.)
महाविद्यालयः, मलिकपूरा, गाधिपुरम् (गाजीपुर)

सर्गश्च प्रतिसर्गश्च वंशो मन्वन्तराणि च।
वंशानुचरितं चेति पुराणं पञ्च लक्षणम्॥

इत्युक्तेः पुराणानां मुख्या वर्ण्यविषयाः—सर्ग-प्रतिसर्ग-वंश-मन्वन्तर-वंशानुचरितानि चेति। लक्षणानामेषां पुराणज्ञानाय स्वरूपसमीक्षणमत्यावश्यकम्।

विष्णुभागवतपुराणयोः सृष्टिप्रक्रियाया वैशद्येन वर्णनमुपलभ्यते। सर्गस्तत्र पञ्च लक्षणेष्वाद्यं लक्षणम्। अत्र सर्गनिरूपणे सांख्यदर्शननिर्दिष्टायाः सृष्टिप्रक्रियाया मुख्येनावलम्बन-माश्रयणं च कृतम्। पुराणेषु विशेषेण सांख्यप्रभावः परिकथ्यते। परन्तु ध्यातव्यमेतद् यत् पुराणेषु सांख्यस्य विपुले प्रभावे सत्यपि पौराणिकं सृष्टितत्त्वं केवलं सांख्यीयानुवादमात्रं नास्ति। पौराणिकसृष्टिप्रक्रियाया एतद् वैशिष्टचम्। वैदिकसर्गतत्त्वस्यापि प्रभावः पर्याप्तरूपेणात्र दृश्यते। सांख्यवेदान्तयोः कीदृगपि वैषम्यमथवा विरोधः पुराणकाले न प्रतीयते, यथाऽवान्तर-काले। अत्र तु सांख्यवेदान्तयोर्मञ्जुलं सामरस्यम्। प्रकृतिपुरुषौ भिन्नौ नास्तः, अपि तु द्वावपि ब्रह्मप्रेरितौ स्वकार्यसम्पादनसमर्थौ भवतः। ब्रह्म द्वयोरप्यध्यक्षः, तथेदमेव ब्रह्म वैष्णवा विष्णुना तादात्म्यं स्थापयन्ति, शैवाः शिवेन, शाक्ताः शक्त्या च।

सांख्यमते सर्गतत्त्वविकासः प्रधानपुरुषयोः पारस्परिकप्रभावस्य संयोगस्य च परिणतं फलम्[1]। सांख्ये एतेऽपि अनादिनित्यत्वे स्तः। परन्तु विष्णुभागवतपुराणयोर्द्वे अप्येते विष्णोर्द्वे रूपे स्वीकृते। अर्थाद् एषामुत्पत्तिर्विष्णोः(उपाधिरहितात्)परमस्वरूपात् प्रधान-पुरुषादेवेति। तृतीयेन रूपेण च कालात्मकेन सृष्टौ संयुक्ते प्रलये च वियुक्ते भवतः। भगवान् विष्णुरेव कालशक्त्या विश्वं सृजति[2]। विषयस्वरूपपरिवर्तनमेव कालस्वरूपम्[3]। कालस्तु एवमेवानाद्यनन्तस्तथा निर्विशेषः। तमेव निमित्तीकृत्य भगवान् क्रीडाविलासेनैव स्वस्यैव सर्जनं करोति। पूर्वमिदं निखिलं जगद् भगवन्मायायां लीनत्वाद् ब्रह्मरूपे स्थितम्। तदेवाव्यक्तमूर्त्या कालेन भगवान् पुनः प्रकटयति[4]।

---

१. सांख्यकारिका—२१।

२. विष्णोः स्वरूपात् परतो हि ते द्वे रूपे प्रधानं पुरुषश्च विप्र।
तस्यैव तेऽन्येन धृते वियुक्ते रूपान्तरं यद् द्विजकालसंज्ञम्॥ (वि० पु० १।२)

३. वि० पु० १।२।२४, २६। ४. श्रीमद्भा० ३।१०।११-१२।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

श्रीमद्भागवतमतेनेदं विश्वमनाद्यनन्तम् । यथेदानीं पूर्वमपि तथैवासीत् पश्चादपि तथैव स्थास्यति[1] । एवं सति प्रलयसंभावना कथम् ? इदं जगत् काले विलीनं नष्टं च प्रतिभाति, अत्र किं रहस्यम् ? प्रवाहनित्यता । यथा गङ्गायां निमज्जनशीलः पुनस्तस्मिन्नेवोदके न निमज्जति, यत्र क्षणात् पूर्वं स निमज्जितः । तदुदकं तु सततप्रवहणशीलं परिवर्तनशीलं च । लेशमपि तत्र विरामो नास्ति, तर्हि तज्जले निमज्जनाभिप्रायः कः ? जलं प्रतिक्षणमवश्यं परिवर्तनशीलम्, किञ्च तत्प्रवाहः सा धारा यस्यास्तदविभाज्यमङ्गं कदाप्युच्छिन्ना न भवति । सा तु नित्या । सृष्टिविषयेऽप्ययमेव प्रवाहनित्यतासिद्धान्तः कार्यशीलो मन्तव्यः ।

प्रकृति-पुरुष-व्यक्त-कालादि विष्णोः स्वरूपाणि, परन्तु स एतेष्वेव न सीमितः । एभ्यः परमपि स स्थितः । जगतः सृष्टिर्विष्णोर्लीलैव ज्ञातव्या । अन्यथाऽऽप्तकामाय तस्यै विचित्रस्यास्य विश्वस्योपादानप्रयोजनमेव किमिति विष्णुभागवतयोरपीदं मतम् ।

नवसर्गाः

पुराणेषु सृष्टेर्नवभेदाः प्रोक्ताः । सर्गो मुख्यतया त्रिधा—प्राकृतः, वैकृतः, प्राकृतवैकृत इति । प्राकृतवैकृतसर्गपार्थक्यविषये विष्णुपुराणीयं मतं यत् प्राकृतः सर्गोऽबुद्धिपूर्वको भवति, अर्थात् सा सृष्टिर्नैसर्गिकी भवति । वैकृतसर्गस्तु बुद्धिपूर्वको भवति[2] । प्राकृतसर्गस्त्रिधा प्रोक्तः, वैकृतिकः पञ्चधा, तथा प्राकृतवैकृतसर्ग एकः । इत्थं विष्णुपुराणं नवसर्गान् प्रतिपादयति । भागवते तु दश सर्गाः प्रोक्ताः ।[3] मार्कण्डेयकूर्मवायुपुराणेषु नवविधानां सर्गाणामुल्लेखोऽस्ति[4] । विष्णुपुराणोक्ताः सर्गा अधस्तान्निर्दिश्यन्ते ।

प्राकृतः सर्गः

ब्रह्मसर्गः—(महत्तत्त्वम्) महत्तत्त्वमेव ब्रह्मणः प्रथमः सर्गः । सांख्यमतानुसारेण महत्तत्त्वमथवा बुद्धिरेव प्रकृतिपुरुषयोः संयोगस्य प्रथमः[5] परिणामः । तदेव मतमत्रापि स्वीकृतम् ।

भूतसर्गः—पञ्चतन्मात्राणां सृष्टेरयमभिधानः । तन्मात्राणि पृथिव्यादिपञ्चभूतानामत्यन्तसूक्ष्मावस्थाद्योतकानि, सांख्ये त्वेतान्यविशेषनाम्ना ख्यातानि ।

वैकारिकसर्गः—सेन्द्रियसृष्टेरिदं नाम । सांख्यशास्त्राभिमतप्रक्रिया एवात्र विष्णुपुराणस्याभिमता । अहङ्कारस्य तामसरूपात् पञ्चतन्मात्राणां जन्म, सात्त्विकरूपाच्चेन्द्रियाणां जन्म, अत एव तद्रूपात् कस्यचिदप्युदयो न भवति । एते प्राकृतसर्गाः ।

---

१. "यथेदानीं तथाग्रे च पश्चादप्येतदीदृशम्" (भा० ३।१०।१३) ।

२. "इत्येष प्राकृतः सर्गः सम्भूतो बुद्धिपूर्वकः" (वि० पु० १।५।२१) ।

३. भा० ३।१०।३८ ।

४. मार्कं० ४७।४६, कूर्म १।७।१८, वायु० पूर्वा० ६।६५ ।

५. सांख्यकारिका–२२ ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

वैकृतसर्गः

मुख्यसर्गः—सर्गादौ ब्रह्मणः पूर्ववत् सृष्टिचिन्तनेन प्रथमबुद्धिपूर्वकस्तमोमयः सर्गः प्रादुर्भूतः[1], पञ्चपर्वाऽविद्यारूपेण। तमः-मोह-महामोह-तामिस्र-अन्धतामिस्रेति पञ्चपर्वा अविद्या। पुनर्ब्रह्मणश्चिन्तनेन ज्ञानशून्या तमोमयी जडनगादि(वृक्ष-गुल्म-लता-वीरुध-तृणम्) पञ्चधा सृष्टिर्जाता। मुख्यसर्गनाम्नेयं सृष्टिरभिधीयते।

तिर्यक्सर्गः—तं सर्गं पुरुषार्थासाधकं मत्वा ब्रह्मणोऽभिध्यायतस्तिर्यक्स्रोतोऽभ्यवर्तत। तिर्यक्सर्गजातानां प्राणिनां वायुवत् तिर्यक्प्रवृत्तिः। पशु-पक्ष्यादयोऽस्मिन् सर्गे उद्भूताः। प्रायेणैते तमोमया विवेकरहिताः, असन्मार्गावलम्बिनो विपरीतज्ञानमेव याथार्थ्येन स्वीकर्तारश्च भवन्ति। एतेऽहङ्कारिणोऽष्टाविंशतिवधयुक्ताश्च[2] भवन्ति। स्थावरसृष्ट्यनन्तरं जङ्गमसृष्टेरिदं प्रथमं रूपम्।

देवसर्गः—तिर्यक्सर्गतोऽसन्तुष्टो ब्रह्मा पुनः पुरुषार्थसाधकान् प्राणिनः ससर्ज। अयमूर्ध्वलोके निवसनशीलः सात्त्विकवर्गः। सर्गस्यास्य जीवा विषयसुखप्रीतिसम्पन्ना बाह्यान्तरदृष्टियुक्ताः प्रकाशयुक्ताश्च भवन्ति।

अर्वाक्स्रोतः—(मानुषसर्गः) देवसर्गोऽपि पुरुषार्थसाधक एवेति मत्वा ब्रह्मा पुनर्ध्यानेनापरं प्राणिवर्गं ससर्ज। अयं सर्गस्तु पृथिव्यामेव भ्रमणशीलः। सर्गस्यास्य प्राणिषु सत्त्व-रजस्तम इति त्रिगुणानामाधिक्यम्, अत एव ते दुःखबहुलाः, अत्यन्तक्रियाशीलाः, बाह्याभ्यन्तरज्ञानयुक्ताश्चासन्। अस्य सर्गस्य प्राणिनो मानवाः सन्ति।

अनुग्रहसर्गः—सात्त्विक-तामसभेदेनायं सर्गो द्विविधो भवति[3]।

प्राकृत-वैकृतसर्गः—कौमारसर्गः—अयमन्तिमः प्राकृतवैकृतोभयात्मकः सर्गः।

अष्टमोऽनुग्रहसर्गो विष्णुपुराणे संक्षेपत उक्तः। अस्य सर्गस्य स्वरूपनिर्देशो मार्कण्डेयपुराणे विशदतया प्रतिपादितः। तत्रायं सर्गो विपर्यय-सिद्ध-शान्ति-तुष्टिभेदैश्चतुर्धा[4]स्वीकृतः।

---

१. विष्णुपुराणे 'संभूतो बुद्धिपूर्वकः' इति पाठ उपलभ्यते, किन्तु मार्कण्डेयपुराणे (४७।३२) अयमेव श्लोकः 'सम्भूतोऽबुद्धिपूर्वकः' इत्थं प्राप्यते। तथा शिवपुराणे वायवीयसंहितायाम्—

प्राकृताश्च त्रयः पूर्वे सर्गास्तेऽबुद्धिपूर्वकाः।
बुद्धिपूर्वं प्रवर्तन्ते मुख्याद्याः पञ्च वैकृताः॥
(१।४२।४८)

इति प्राप्यते। शैवोक्तोऽयमश्लोकः कौर्मेऽपि तथैवोपलभ्यते (१।७।१८।१९)। वायुपुराणेऽपि पूर्वोक्तमतस्यैव समर्थनं प्राप्यते (३।९०)।

२. वधस्यार्थः शक्तिः। सांख्यकारिकायामेतेषां वधानां रूपम् (४९-५१) कारिकासु प्रतिपादितम्।

३. वि० पु० १।२।३३–५० तथा १।५।३–२६।

४. पञ्चमोऽनुग्रहः सर्गश्चतुर्धा स व्यवस्थितः।
विपर्ययेण शक्त्या च तुष्ट्या सिद्ध्या तथैव च॥ (मार्कं० ४८।२८)

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

वायुपुराणानुसारं स्थावरेषु विपर्यासः, तिर्यग्योनौ शक्तिः, मानवेषु सिद्धिः, देवेषु तुष्टिः[१]। अत्र भावसृष्टिरेवाभिप्रेता। सांख्येऽयं प्रत्ययसर्गनाम्नाऽभिधीयते। तत्रापि विपर्ययशक्तिः तुष्टि-सिद्धिभेदेन चतुर्धा ख्याता[२]। वायुपुराणीयं विवरणमत्र भिन्नमेव। समस्तः प्राकृतः सर्गः प्रकृतेरनुग्रहाज्जायमानत्वादेवानुग्रहसर्गः प्रोच्यते। वायुपुराणस्येदं वर्णनमतीव रोचकं साहित्यिकचमत्कृतियुक्तं चापि। तदनुसारं संसाररूपवृक्षस्य बीजं प्रकृतिः, स्कन्धो बुद्धिः, अङ्कुराणीन्द्रियाणि, शाखा महाभूतानि, पत्राणि पञ्चविषयाणि, पुष्पाणि धर्माधर्मौ, फले सुख-दुःखे, पक्षिणः प्राणिनः [३]सर्वे।

श्रीमद्भागवते सर्गाणां गणना निम्नप्रकारेण कृता। प्राकृतसर्गेषु षट् सर्गाः परिगणिताः- महत्तत्त्वम्, अहङ्कारः, भूतसर्गः, इन्द्रियसर्गः, वैकारिक(देवसर्गः)सर्गः, तमोमयः सर्गः, षडिमे प्राकृताः सर्गाः [४]प्रोक्ताः। विष्णुपुराणेऽपि महत्तत्त्वादहङ्कारोत्पत्तिर्भवतीति स्वीकृतः। किन्तु पृथक् सर्गेऽहङ्कारस्य गणना नास्ति, महत्तत्त्व एव तस्य निवेशः स्वीकृतः। एवं च भागवतोक्ताहङ्कारसर्गस्य निवेशो महत्तत्त्व एव। विष्णुपुराणे द्वितीयस्तन्मात्राऽथवा भूतसर्ग इत्थं प्रदर्शितः—अहङ्कारस्त्रिधा विभक्तः–सात्त्विक-राजस-तामसभेदेन। तत्र तामसाहङ्कारात् पञ्चमहाभूतानि, राजसाहङ्कारादिन्द्रियाणि, सात्विकाहङ्कारात् तदधिष्ठातृदशदेवताः[५]। एवं च विष्णुपुराणोक्तः प्रथमः सर्गो भागवतेऽपि महत्तत्त्वमेव। द्वितीये तन्मात्राऽथवा भूतसर्गे भागवते भूतेन्द्रियसर्गः समाविष्टः। तृतीयो वैकारिकसर्गस्तु विष्णुभागवतयोः समान एव। एतत् पर्यन्तमेव प्राकृतसर्गो विष्णुपुराणे स्वीकृतः, किन्तु भागवते पञ्चपर्वाऽविद्यापि प्राकृतसर्गे परिगणिता। वैकृतसर्गो भागवते चतुर्धा प्रोक्तः, सप्तमो मुख्यसर्गोऽष्टमः तिर्यक्स्रोतसां सर्गः, नवमो मानवसर्गः, दशमो देवसर्गः, कौमारसर्गस्तूभयात्मकः। तदेवात्र स्पष्टीक्रियते—

विष्णुपुराणे		श्रीमद्भागवते
१. महत्तत्त्वम्		१. महत्तत्त्वम् २. अहङ्कारः
२. तन्मात्रसर्गः (भूतसर्गः)	प्राकृतः	३. भूतसर्गः
३. वैकारिकसर्गः (इन्द्रियसर्गः)		४. इन्द्रियसर्गस्तथा ५. इन्द्रियाधिष्ठातृदेवानाम्
		६. अविद्यासर्गः
४. मुख्यसर्गः		७. मुख्यसर्गः

---

१. विस्तरानुग्रहं सर्गं कीर्त्यमानं निबोधत।
चतुर्धाऽवस्थितः सोऽथ सर्वभूतेषु कृत्स्नशः।
विपर्ययेण शक्त्या च तुष्टया सिद्धया तथैव च।
स्थावरेषु विपर्यासस्तिर्यग्योनिषु शक्तिता॥
सिद्धयात्मानौ मनुष्यास्तु तुष्टिर्देवेषु कृत्स्नशः। (वायु० ६।६७–६९)

२. एष प्रत्ययसर्गो विपर्ययाऽऽशक्तितुष्टिसिद्धयाख्यः।
गुणवैषम्यविमर्दात् तस्य च भेदास्तु पञ्चाशत्॥ (सां० का० ४६)

३. वायुपु० पूर्वार्धम् ९।११४–११७। ४. श्रीमद्भाग०–३।१०।१४–१७।

५. वि० पु० १।२।३३–४६।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

५. तिर्यक्सर्गः	८. तिर्यक्सर्गः
६. ऊर्ध्वस्रोतसां सर्गः (देवसर्गः) वैकृतः	९. देवसर्गः
७. अर्वाक्स्रोतससर्गः (मनुष्यसर्गः)	१०. मनुष्यसर्गः
८. अनुग्रहसर्गः	
९. कौमारसर्गः (प्राकृतवैकृतः)	११. कौमारसर्गः

श्रीमद्भागवते प्रोक्ताः पञ्च प्राकृतसर्गा विष्णुपुराणेऽपि तथैव । किन्त्वेषां पृथग् गणना न कृता, अपि तु महत्तत्त्व-तन्मात्रावैकारिकेति तिसृणामन्तर्गत एव स्वीकृतः । अत एव श्रीमद्भागवतेऽपि त्रिधैव गणनीयः । भागवते षष्ठोऽविद्यासर्गस्तथा सप्तमः स्थावरसर्गः पृथग् गणितः । विष्णुपुराणे केवलं मुख्यसर्गस्यैव गणना कृता । यद्यपि पञ्चपर्वा अविद्या पूर्वमेव ब्रह्मणा सृष्टिचिन्तनेनोद्भूता, किन्तु पञ्चपर्वाऽविद्याया एव नगादिपञ्चभेदयुक्तानामुत्पत्तिक्रमः । अत एव गणना एकैव स्वीकृता । अतो भागवतेऽप्यविद्याया पृथग् गणनाऽनर्हा एव । विष्णुपुराणीयाश्चतुर्थतः प्रारभ्य सप्तमक्रमाङ्कपर्यन्ताः, भागवतेऽपि सप्तमाङ्कात प्रारभ्य दशमक्रमाङ्कं यावत् तथैव । अष्टमस्यानुग्रहसर्गस्य भागवते चर्चा नास्ति । कौमारसर्गस्तु द्वयोरपि पुराणयोः समान एव । वायु-मार्कण्डेयपुराणयोरपि विष्णुपुराणीय एव क्रमः प्राप्यते[1] । तथा प्राकृतसर्गेऽपि तथैव विष्णुपुराणानुसरणं कृतम् । एवं च भागवतोक्ताः षट् प्राकृतसर्गाः, वस्तुतस्तु त्रय एव । विष्णुपुराणोक्तेषु पञ्चवैकृतसर्गेष्वपि भागवते चतुर्णामेव चर्चा दृश्यते । अनुग्रहसर्गस्यात्र प्रसङ्गो नास्ति । एवं विष्णुपुराणसादृश्ये भागवतीयसर्गस्याष्ट एव संख्या भवति ।

कौमारसर्गः प्राकृतवैकृतोभयात्मकः स्वीकृतः । अत्र सनत्कुमाराणामुदयश्चर्चितः । यतो भागवते 'कौमारसर्ग'शब्दप्रयोगोऽस्मिन्नेवार्थे कृतः—

स एव प्रथमं देवं कौमारं सर्गमास्थितः ।
चचार दुश्चरं ब्रह्मा ब्रह्मचर्यमखण्डितम् ॥[2]

श्रीमद्भागवते सनत्कुमारो भगवतो विष्णोरेवान्यतमोऽवतारः [3]स्वीकृतः । किन्त्वस्य सर्गस्य विषये भागवतटीकाकृतामैकमत्यं नास्ति । विश्वनाथचक्रवर्तिन इदं मतं यत्—ध्यानपूतमनसा एवान्यप्राणिनां सृष्टिः—इदं कथनमेव प्रमाणं यत् कुमाराणां सृष्टिर्भगवद्ध्यानजन्या तथा भगवज्जन्यापि । अत एवैते प्राकृतवैकृता उक्ताः[4] । शुकदेवाचार्येण स्वटीकायामेवमुक्तम्—एते सनन्दनादयो ज्ञान-भक्तिसम्प्रदायप्रवर्तकाः । एषामुत्पत्तिस्तु ब्रह्मणः, तथा प्रत्यहं प्रादुर्भावाच्चैते चिरस्थायिष्वन्यतमाः परिगणिताः । अत एवैते द्विविधरूपेणाङ्गीकृताः[5] । वस्तुतस्तु विष्णुभागवतोक्तयोः सर्गयोः क्रमभेदे सत्यपि सादृश्यमेव । यथा महत्तत्त्वाद्यविद्यापर्यन्तं विष्णुभागवतयोः सादृश्यम् । मुख्यसर्गतो मनुष्यसर्गपर्यन्तमपि सादृश्यमेव । कौमारसर्गोऽपि समान

---

१. वायुपु० पूर्वार्द्धम् ६।३६-६६ । मार्क० ४७।१५-३६ । २. भाग० १।३।६ ।
३. भा० २।७।५ ।
४. तेषां भगवद्ध्यानपूतेन मनसाऽन्यास्ततोऽसृजदित्यग्रिमोक्तेर्भगवद्ध्यानजन्यत्वेन भगवज्जन्यत्वाच्च प्राकृतो वैकृतश्चेति—(विश्वनाथचक्रवर्तिकृता व्याख्या—भा० ३–१०।२६) ।
५. श्रीमद्भा० ३।१०।२६ शुकदेवाचार्यकृता टीका ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

एव। अनुग्रहसर्गो भागवतेनोक्तः, विष्णुपुराणेऽपि गणनैव कृताऽनुग्रहसर्गस्य, वैशिष्ट्यं न किञ्चित् प्रतिपादितम्। तत्तु वायु-मार्कण्डेयपुराणयोः प्रपञ्चितम्।

प्राणिसर्गे विविधप्राणिनां सृष्टिः कथमित्यस्य समाधानं विष्णुभागवतयोः समानमेव प्राप्यते। प्राणिषु सुरासुरपितृमनुष्याणां मुख्यत्वम्। एषामुत्पत्तिप्रकारोऽतीव रमणीयः। सृष्टिकामनया दत्तचित्तेन ब्रह्मणा प्रथमतस्तमोगुणाधिक्यमङ्गीकृतम्। तदा प्रथममसुराणामुत्पत्तिः। ततो ब्रह्मणा त्यक्तस्तामसिको देहो रात्रिरूपे परिणतः। पुनः सात्त्विकदेहाश्रयणेन ब्रह्मणः सुराणामुत्पत्तिर्जाता। तदपि शरीरं ब्रह्मणा परित्यक्तं दिवसरूपे परिणतम्। ततो रजोमयदेहाश्रयणेन रजःप्रधानानां मानवानां सृष्टिरभूत्। सोऽपि परित्यक्तो देहः प्रभातकालात्मना परिणतः[1]।

सृष्टेर्विषये विष्णुपुराणे एकस्य तथ्यस्योद्घाटनं भवति, यस्य मनुस्मृतावप्युल्लेखः प्राप्यते[2]। तस्य प्रामाण्यं शारीरकभाष्येऽपि प्रपञ्चितम्[3]। यावत् स्थावरजङ्गमानां सृष्टिर्ब्रह्मणा भवति। एषामिदं वैशिष्ट्यं यत् प्राक्कल्पे यथा स्वभावः प्रवृत्तिरस्मिन्नपि सर्गे तथैव भवति। हिंसा-अहिंसा-मृदुता-कठोरता-धर्माधर्म-सत्यानृतादिभावाः पूर्ववदेव प्राप्यन्ते। तथा हि—

येषां ये यानि कर्माणि प्राक्सृष्ट्यां प्रतिपेदिरे।
तान्येव ते प्रपद्यन्ते सृज्यमानाः पुनः पुनः॥
हिंस्राहिंस्रे मृदुक्रूरे धर्माधर्मावृतानृते।
तद्भाविताः प्रपद्यन्ते तस्मात् तत् तस्य रोचते[4]॥

एवं च विष्णुपुराणदृष्ट्या सृष्टिः कर्मानुसारिणी। पूर्वजन्मकारणादेवास्मिन् जन्मनि जीवानां विभिन्नाः प्रवृत्तयो दृश्यन्ते। इदं तथ्यकथनं भारतीयदर्शनस्य सुचिन्तितपरम्परायामेवान्तर्भुक्तं भवति।

सर्गक्रमः

सर्गक्रमस्तु विष्णुभागवतपुराणयोः समान एव। मायापतिर्भगवान् 'एकोऽहं बहु स्याम' इतीच्छया स्वमाययैव स्वरूपे स्वयं प्राप्तान् काल-कर्म-स्वभावान् स्वीकृतवान्। भगवच्छक्त्यैव कालेन क्षुब्धास्त्रिगुणाः स्वभावेन रूपान्तरिताः। कर्मणा महत्तत्त्वं जातम्। रजस्तमोगुणवृद्ध्या विकृतेन महत्तत्त्वेन ज्ञान-क्रिया-द्रव्यरूपस्तमःप्रधानोऽहङ्कारोऽभूत्। विकृतस्तु त्रिधा वैकारिक-तैजस-तामसभेदेन। तामसाहङ्काराद् विकृतादाकाशोत्पत्तिः, विकृतादाकाशाद् वायुर्जातः, काल-कर्म-स्वभावाद् विकृताद् वायोरपि तेजस उत्पत्तिः। तेजसस्तु विकुर्वाणाज्जलोत्पत्तिः, जलाद् विकृताद् भूः। वैकारिकाहङ्कारान्मनस्तथा दशेन्द्रियाधिष्ठातृदेवानामुत्पत्तिः। तेषां नामानि—दिग्वायुसूर्यवरुणाश्विनीकुमाराग्नीन्द्रविष्णुमित्रप्रजापतयः। तैजसाहङ्काराद् विकृतात्

---

१. वि० पु० १।५।३०–४०, श्रीमद्भा० ३।२०।१७–५१।
२. मनुस्मृतिः १।२९। ३. शारीरकभाष्यम् १।३।३०।
४. वि० पु० १।५।६१-६२।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

श्रोत्र-त्वग्-नेत्र-जिह्वा-घ्राणेति पञ्च ज्ञानेन्द्रियाणि, वाक्-हस्त-पाद-गुद-जननेन्द्रियेति पञ्च कर्मेन्द्रियाणि जातानि। सहैव ज्ञानशक्तिरूपा बुद्धिस्तथा क्रियाशक्तिरूपः प्राणोऽपि तैजसाहङ्काराज्जातः। पृथक् पृथगेतेऽसङ्घटिताः शरीररचनायामसमर्था भगवच्छक्त्या प्रेरिताः। अन्योऽन्यं सम्मिलिताः कार्यकारणभावं स्वीकृत्य समष्टिव्यष्टिरूपं ब्रह्माण्डं पिण्डं च सृष्टवन्तः। इदमेव विराड्रूपेण सर्वत्र पुराणेषु बोध्यते। भागवतीयं मतं च विष्णुपुराणमपि एवमेव स्वीकरोति[1]। विराड्रूपविषये विष्णुपुराणे संक्षिप्तमेव वर्णनम्, किन्तु श्रीमद्भागवते विशिष्टया कल्पनया नितान्तं सुरुचिपूर्णं वर्णनमुपलभ्यते। भागवते पूर्वोक्तानां महत्तत्त्वादीनामभिमानिनो विकारा भगवच्चेतनांशविशिष्टा देवगणाः प्रोक्ताः। एते पृथक् पृथग् रचनायामसमर्था स्वसाफल्याय भगवन्तं स्तुन्वन्ति। त्रयोदशेभ्यः श्लोकेभ्योऽतिसरसा मधुरा च स्तुतिर्निरूपिता[2]।

ततो भगवान् कार्यसाफल्याय त्रयोविंशतितत्त्वसमुदायेषु स्वशक्त्या प्रविष्टः। शरीरस्य विभिन्नावयवानां तथाऽवयवकार्याणां सञ्चालनं च कथमित्यत्र श्रीमद्भागवते निरूपितम्— चेतनरूपपुरुषाधिष्ठानाद् विराट् पुरुषः प्रकाशितः। तत्र पूर्वं मुखच्छिद्रं जातम्। तदधिष्ठातृदेवता लोकपालाग्निस्तत्र स्वांशेन वागिन्द्रियसहितः प्रविष्टः। तत एवोच्चारणशक्तिरभूत्। ततस्तालूत्पत्तिस्तत्र रसनेन्द्रियसहितो वरुणः स्थितः। ततो नासाछिद्रे जाते, तत्राश्विनीकुमारौ घ्राणेन्द्रियसहितौ प्रविष्टौ। ततो नेत्रयोरुद्भवः, तत्र नेत्रेन्द्रियसहितः सूर्यः प्रविष्टः। ततस्त्वगुत्पत्तिः तत्र त्वगिन्द्रियाधिष्ठाता वायुः प्रविष्टः। पुनः कर्णच्छिद्रयोरुद्भूतयोः श्रवणेन्द्रियसहिताः दिशः प्रविष्टाः। ततस्तु चर्मण उत्पत्तिः, तत्र रोमसहितान्योषधयः स्थिताः। ततो जननेन्द्रियोत्पत्तिः, तत्र प्रजापतिः स्थितः स्वांशेन। पश्चाद् गुदोत्पत्तिः, तत्र तदधिष्ठाता मित्रो देवता पाय्विन्द्रियसहितः प्रविष्टः। ततो हस्तयोर्निर्माणम्, तत्रेन्द्रः प्रविष्टः। पुनश्चरणयोर्निर्मितिः, तत्र विष्णुः स्थितः। ततो बुद्धेरुत्पत्तिः, तत्र ब्रह्मा स्थितः। ततो हृदयम्, तत्र चन्द्रमा स्थितः। ततोऽहङ्कारो जातः, तत्राभिमानः स्थितः। पुनश्चित्तमुद्भूतम्, तत्र महत्तत्त्वम् (ब्रह्मा) स्थितम्। विराड्रूपस्य शिरोभागे स्वर्गलोकस्य, पादयोः पृथिव्याः, नाभिप्रदेशेऽन्तरिक्षलोकस्य कल्पनं कृतम्[3]। एवं भागवते विराड्रूपस्यातिसरसं वर्णनं विद्यते। देहरचनायामतिसूक्ष्मा निरूपणप्रणाली तत्र व्यवहृता। इदं भागवतस्य वैशिष्ट्यम्।

महत्तत्त्वादिविशेषान्तपर्यन्तं विराडुत्पत्तिपर्यन्तं च सृष्टिर्वायुमार्कण्डेयपुराणयोरपि विष्णुपुराणानुसारिण्येव प्राप्यते[4]। कूर्म-पद्म-मत्स्यपुराणेषु महदादिविशेषान्ततत्त्वानामुत्पत्तिरपि तथैव निरूपिता[5]। सर्गपर्यन्तं प्राकृतसर्गः प्रोच्यते विष्णुपुराणे। उपर्युक्तपुराणेष्वपीयमेवोक्तिः। तदनन्तरमेव ब्रह्मण उत्पत्तिर्भवति। ब्रह्मणा वैकृतसर्गाणां रचना भवतीति तु विष्णुभागवतयोः समानमेव स्वीकृतम्; किन्तु भागवते पाद्मकल्पीया ब्रह्मोत्पत्तिकथा निर्दिष्टा; यतो विष्णोर्नाभिकमलाद् ब्रह्मा जायते। विष्णुपुराणे वाराहकल्पस्यैव ब्रह्मोत्पत्ति-

---

१. श्रीमद्भा० २।५।२१-३५; ३।५।२५-३५; ३।६।१-४, १२-२९; ३।२०।१२-१५; ३।२६।१९-६१; ११।२४।३-१०; वि० पु० १।२।३३-६०।

२. श्रीमद्भा० ३।५।३८-५०।   ३. श्रीमद्भा० ३।६।१०-२९।

४. वायु० पु० ४।२३-२४, ४६-७८; मार्क० ४५।३२-७३।

५. मत्स्य० ३।१४-१८; कूर्म० १।४।१५-३७; पद्म० १।२।८९-१०६।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

रुक्ता[१]। विष्णुपुराणे वाराहावतारे पृथिव्युद्धरणे कृते सति भगवानेव रजोगुणयुक्तश्चतुर्मुखो ब्रह्मा भूत्वा सर्गरचनायां प्रवृत्तः[२]। पद्ममार्कण्डेययोरप्ययं क्रमो विष्णुपुराणवत् प्राप्यते[३]। ततो ब्रह्मणः पूर्वं सृष्टिचिन्तनेन तमः-मोह-महामोह-तामिस्र-अन्धतामिस्राख्या पञ्चपर्वाऽविद्या उत्पद्यते। अत्र सर्वेषूपर्युक्तेषु पुराणेष्वैकमत्यं विद्यते। ततो मुख्यः सर्गो गुल्मौषधिवृक्षलतादीनां भवति। ततस्तिर्यग्देव-मनुष्यानुग्रह-कौमारसर्गादीनां क्रमशो निर्माणं भवति। अत्रापि वायु-मार्कण्डेय-पद्मपुराणेषु विष्णुपुराणवदेव साम्यमुपलभ्यते[४]। भागवते अष्टमस्यानुग्रहसर्गस्य गणना नास्ति। कूर्मपुराणे अनुग्रहसर्गस्थाने एवमुक्तम्–'अष्टमो भौतिकः सर्गो भूतादीनां प्रकीर्तितः।' अन्ये सर्गा अत्रापि विष्णुपुराणवदेव[५]। इत्थं च नवविधाः सर्गाः, अथवा श्रीमद्भागवतानुसारि दशविधाः सर्गाः।

ब्राह्मी सृष्टिः

विष्णोर्भगवतः प्रेरणया नाभिकमलस्थितो ब्रह्मा दिव्यशतवर्षाणि तपोऽतप्यत। ततो ब्रह्मा अपश्यत्–जलमाधारभूतं कमलं च वायुवेगेन कम्प्यमानमभवत्। तपसा अध्यात्मज्ञानेन च विज्ञानशक्तिप्राबल्येन ब्रह्मा महद्भिर्जलराशिभिः समं वायुमपिबत्। अवशिष्टं वियद्व्यापिनं कमलं दृष्ट्वा अचिन्तयद् ब्रह्मा यदहमेतद्द्वारैव पूर्वकाले प्रकृतौ लीनान् लोकान् सर्जयिष्यामि। अत एवाकाशव्यापि कमले स्वयमेव प्रविश्य तत् 'भूः, भुवः, स्वः' इति त्रिधा व्यभज्यत। एत एव लोकाः कर्मानुसारिफलदायकाः[६]। इयं ब्राह्मीसृष्टिर्भागवते प्रोक्ता। विष्णुपुराणेऽस्याः सृष्टेर्वर्णनं नास्ति। अयमेव ब्रह्मा देवादिस्थावरान्तं सर्गमरचयत्। परन्तु सर्गवृद्धिमदृष्ट्वा स्वाभिप्रायेऽसिद्धे सति मानसपुत्रान् ससर्ज स्वसदृशानेवाध्यात्ममण्डितान् शक्तिसम्पन्नांश्च। इमे नवसंख्याकास्तथा च–भृगु-पुलस्त्य-पुलह-क्रतु-अङ्गिरस-मरीचि-दक्षात्रि-वसिष्ठेत्यादयः। एते नव ब्रह्मेति नाम्ना पुराणेषु ख्याताः[७]। भागवते चात्र दशपुत्राणां वर्णनं प्राप्यते। उपर्युक्तैर्नवभिः सह नारदस्य दशमं [८]नाम।

रौद्री सृष्टिः

रौद्रसृष्टेरपि वर्णनं विष्णुभागवतपुराणयोरुपलभ्यते। मरीच्यादिमानसपुत्राणामुत्पत्तेः प्रागेव सनन्दनादिचतुर्णां कुमाराणां सृष्टिर्ब्रह्मणा सर्गाभिवृद्ध्यर्थं कृता। परन्तु संसारं सन्तानादिकं प्रति च तेषां निरपेक्षभावमवलोक्य ब्रह्माऽतिक्रुद्धो जातः। तदैव क्रोधदीप्ताद् भ्रुकुटिकुटिलललाटात् प्रचण्डसूर्यसदृशो रुद्रः प्रादुरभवत्। रुद्रशरीरस्यैतद् वैशिष्ट्यं यदर्धं नररूपमर्धं नारीरूपं च। ब्रह्मा नर-नारीरूपं पृथक्कृत्य पुरुषमेकादशसु भागेषु पुनर्विभाजयामास। तथा च स्त्रीभागमपि सौम्यासौम्य-शान्ताशान्त-श्यामगौरादिभेदेषु विभक्तः। इयं विष्णुपुराणोक्तिः[९]। मार्कण्डेयपुराणेऽप्येवमेवोल्लेखः[१०]। भागवते रुद्रसर्गस्य विस्तरेण वर्णनं विद्यते।

---

१. श्रीमद्भा० ३।८।१३-२३। २. वि० पु० १।४।४९।
३. पद्म० १।३।२५-२८; मार्क० ४७।३-१३।
४. वायु० पु० ६।३५।७०; मार्क० ४७-१४-३७; पद्म० १।३।६०-८२।
५. कूर्म० १।७।१३।१८। ६. श्रीमद्भा० ३।१०।४-९। ७. वि० पु० १।७।१-६।
८. श्रीमद्भा० ३।१२।२२। ९. वि० पु० १।७।८-१५। १०. मार्क० ५२।२-१०।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

रुद्रनामनिरुक्तिरपि तत्र कृता। जन्मकाल एव रोदनाद् रुद्रनाम्नाऽभिहितः। पुनः स्वनिवासार्थं पृष्टे सति ब्रह्मणा एकादशानां स्थानानां निर्देशः कृतः। एकादशनामान्यपि च निरूपितानि। हृदय-इन्द्रिय-प्राण-आकाश-वायु-अग्नि-जल-पृथिवी-सूर्य-चन्द्रमा तप एतानि निवासस्थानानि। मन्यु-मनु-महिनस्-महत्-शिव-ऋतध्वज-उग्ररेतस्-भव-काल-वामदेव-धृतव्रतेत्यादीनि नामानि च। धी-वृत्ति-उशना-उमा-नियुत-सर्पि-इला-अम्बिका-इरावती-सुधा-दीक्षा इत्याद्याः पत्न्यः प्रोक्ताः। ब्रह्मणा सर्गाभिवृद्ध्यर्थमाज्ञप्तो रुद्रः स्वसदृशीः प्रजाः ससर्ज। रुद्रसदृशानेवोत्पन्नान् रुद्रान् संसारविनाशायोद्यतान् दृष्ट्वा ब्रह्मा चिन्तितो रुद्रं प्रजासर्गादवर्जयत्। पश्चाद् दश मानसपुत्राणां सर्गः[1]।

भारतीयदर्शनेषु सांख्यस्य विपुलः प्रभावः सृष्टिप्रक्रियोपरि दृश्यते। पौराणिकसृष्टिवादे एतस्य पर्याप्तप्रभावः, तथापि पौराणिकं वैशिष्ट्यमिदमपरमपि। सांख्यमते प्रकृतिपुरुषावेव मूलतत्त्वम्। विष्णुपुराणस्य स्पष्टोक्तिर्यत्—

प्रकृतिर्या मयाख्या व्यक्ताव्यक्तस्वरूपिणी।
परमात्मा च सर्वेषामाधारः परमेश्वरः॥
विष्णुनामा स वेदेषु वेदान्तेषु च गीयते[2]॥

निष्कर्षतस्तु सांख्यमतस्य बहुश आधारे स्वीकृतेऽपि विष्णुभागवतयोः सर्गविवेचनं मौलिकतामण्डितं प्रतिभाति। सृष्टिरपि त्रिधा विभक्ता। प्रथमा सृष्टिर्महत्तत्त्वादीनां सृष्टिः। अवान्तरप्रलयानन्तरं ब्रह्मणा रचिता सृष्टिर्दैनन्दिनी सृष्टिरित्युच्यते। तथा च दिनं दिनं प्राणिनामुत्पत्तिर्नित्यसृष्टिरित्युच्यते[3]। भागवतेऽपीदं विवेचितम्। प्राकृतसृष्टिः प्रथमे कल्पे भवति। ततोऽवान्तरकल्पेषु ब्रह्मनिर्मितायाः सृष्टेर्विस्तारो भवति। प्रत्येकस्मिन् कल्पे समान एव सृष्टिक्रमः। अवान्तरकल्पेषु प्राकृततत्त्वानां विलयो न भवति[4]। भागवते प्रथमं महाकल्पसर्गं प्रतिपाद्य पद्मकल्पान्तर्गतसर्गाणां वर्णनं[5] कृतम्।

● ● ●

---

१. श्रीमद्भा० ३।१२।४-१९।
२. वि० पु० ६।४।३९-४०।
३. वि० पु० १।७।४४-४५।
४. श्रीमद्भा० २।१०।४६।
५. श्रीमद्भा० २।१०।४७।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

प्राचीनभारतीयध्वनिवित्सम्मतवर्णस्वरूप-भेदकगुणस्वरूपविमर्शः

श्रीनारायणमिश्रः

संस्कृत-पालिविभागः, काशीहिन्दूविश्वविद्यालयः

'शरीरैकदेशे मुखे प्राप्तो वायुस्ताल्वादिस्थानेषु निषक्तः करणेन विशेषव्यक्तिरूपेण वर्णत्वमापद्यते[1]' इति तैत्तिरीयादौ सुप्रसिद्धमेव[2]। अत्रेदं जिज्ञास्यते यत् कथमेक एव वायुर्वर्णत्वमापद्यमानो विरूपताम् (श्रुतिभेदम्) प्रतिपद्यत इति। तत्र ऋक्प्रातिशाख्ये समाहितम्--"**प्रयोक्तुरीहागुणसन्निपाते वर्णीभवन् गुणविशेषयोगात्। एकः श्रुतीः कर्मणाप्नोति बह्वीः[3]**" इति। प्रयोक्तुरीहास्वरूपगुणयोगे जायमाने वर्णत्वमापद्यमान एको वायुः कर्मणा (क्रियया = प्रयत्नेन) गुणविशेषयोगाद् बह्वीः श्रुतीराप्नोति। तथा च गुणविशेषप्रयुक्त एव वर्णश्रुतिभेद इत्यायाति।

गुणविशेषस्वरूपपरिगणनं तु तैत्तिरीयप्रातिशाख्ये विहितमेवंरूपेण—

अनुप्रदानात् संसर्गात् स्थानात् करणविन्ययात्।

जायते वर्णवैशेष्यं परिमाणाच्च पञ्चमात्[4] ॥ इति।

इदमेव पद्यमुव्वटेनापि पूर्वोद्धृतऋक्प्रातिशाख्यभाष्येऽपि निर्दिष्टम्, परं तत्र द्वितीयपादान्ते 'करणविभ्रमात्' इति पाठो दृश्यते। स चायं विभ्रमादेवेति प्रतीमः। पाणिनीयशिक्षायां परिगणिता गुणविशेषा इमे—

"... ... ... तेषां विभागः पञ्चधा मतः।

स्वरतः कालतः स्थानात् प्रयत्नानुप्रदानतः[5]" ॥ इति।

"एतद्वर्णात्मगुणशास्त्रमाहुः" इति सूत्रभाष्ये पुनरुव्वटः परिगणयति वर्णात्मगुणान्--"एतावन्तो वर्णात्मगुणाः—श्वासता, नादता, उभयता, स्पृष्टता, दुःस्पृष्टता, अस्पृष्टता, कण्ठबिलस्य विवृतता, संवृतता, अघोषता, घोषता, सोष्मता, अनुनासिकतेति[6]।"

---

१. वाजसनेयिप्रातिशाख्योव्वटभाष्यम्—१।१४।

२. वाजसनेयिप्रातिशाख्यम्—१।६–१४।
अत्र विषये विप्रतिपत्तिसत्त्वेऽपि प्रकृते न सर्वेषां मतानां समाहारः समालोचनं वा विधीयते, तस्य स्वतन्त्रनिबन्धविषययोग्यत्वात्।

३. ऋक्प्रातिशाख्यम्—१३।१३।

४ तैत्तिरीयप्रातिशाख्यम्— २३।२।

५. पाणिनीयशिक्षा—९–१०।

६. ऋक्प्रातिशाख्यभाष्यम्—१३।२१।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

एषु प्रथमद्वितीयतृतीयनवमदशमानां बाह्यप्रयत्नस्वरूपत्वं प्रसिद्धमेव व्याकरणादि-शास्त्रेऽपि[1]। सोष्मताया अपि तथात्वमेवेति **"ऊष्माख्यबाह्यप्रयत्नयोगादूष्माण इत्याख्या[2]"** इत्यादि तैत्तिरीयभाष्यात् प्रमीयते। **"यथा तृतीयास्तथा पञ्चमाः, आनुनासिक्यमेषामधिको गुणः"** इति **"तुल्यास्य॰[3]"** सूत्रस्थभाष्यप्रामाण्यात् पूर्वोक्तमानुनासिक्यमपि बाह्यत्नान्तर्गतमेव। अत एवैतदुपक्रम्य पाणिनीयशिक्षायामपि **"ञमोऽनुनासिका** (अमोऽनुनासिका)**न ह्रौ[4]"** इत्युक्तम्। अत एव प्रक्रियाप्रसादेऽपि बाह्यत्नविवरणोपक्रमे **"आनुनासिक्यमेषामधिको गुणः। एते बाह्याः प्रयत्नाः[5]"** इत्युपसंहारोऽपि दृश्यते। **"तुल्यास्य॰"** सूत्रस्थन्यासपदमञ्जरीस्वरसोऽप्येव-मेव। लघुशब्देन्दुशेखरे तु स्पष्टमेवोक्तम्—**"आनुनासिक्यमेषामधिको गुण इति भाष्येण तस्य बाह्यप्रयत्नत्वोक्त्या[6]...."** इत्यादि। अइउण्सूत्रभाष्ये **"बाह्यश्च पुनरास्यात् कालः"** इत्युक्तेः तत्रत्यप्रदीपोद्द्योतादिविवरणाच्च ह्रस्वत्वादीनामपि बाह्यप्रयत्नविशेषत्वमेवावसीयते। अत एव छायाकृता वर्णितम्—**"यद्यप्यत्र भाष्येऽष्टावेवोक्तास्तथापीतिनाऽन्येषामप्युदात्तत्वादीनां सप्तानां संग्रहो बोध्यः[7]"** इति। उदात्तत्वादीनां बाह्यप्रयत्नत्वे कैयटादयोऽप्यनुकूला एवेति नाविदितं शाब्दिकानाम्।

तथा च पूर्वोद्धृततैत्तिरीयवाक्येऽनुप्रदानाद् बाह्यप्रयत्नापरपर्यायात् पृथक् परिमाणस्य पाणिनीयशिक्षायां चानुप्रदानात् पृथक् स्वरस्य कालस्य च भेदकत्वेनोपदेशो महाभाष्ये **"सन्ति ह्यास्याद्बाह्याः प्रयत्नाः।...के पुनस्ते? विवारसंवारौ श्वासनादौ घोषवदघोषता, अल्पप्राणता, महाप्राणता चेति[8]"** निर्दिष्टानामेव बाह्यत्वमभिप्रेत्य। तथा चैतदनुसारेणानुप्रदानसंसर्गस्थान-करणपरिमाणस्वराणां वर्णभेदकगुणत्वं स्पष्टतः प्रतीयते। तत्रापि परिमाणस्याज्मात्रस्वरूपभेद-कत्वं सुस्पष्टमेव, व्यञ्जनानां तदसम्भवात्। किञ्चोदात्तादीनां स्वराणामपि न स्वरूपभेदकत्वम्, अपि तु स्वरविशेषहेतुत्वमेव। अत एव तैत्तरीयप्रातिशाख्योदाहृतपद्ये नोदात्तादीनां भेदक-गुणत्वेनोपन्यासः, तत्परिगणनस्य स्वरूपभेदकगुणमात्रविषयकत्वादिति युक्तं प्रतीमः। अत एव च भाष्यकृतोव्वटेनापि ऋक्प्रातिशाख्यव्याख्यायामेत एव गुणविशेषाः परिगणिताः, नेतरे। तथा च वर्णस्वरूपभेदकगुणमात्रविवेचनप्रवृत्तानामस्माकं तैत्तिरीयप्रातिशाख्योक्तगुण-विशेषविवरणमेव कृत्यमिति त एव विव्रियन्ते।

(क) अनुप्रदानम्

अनुप्रदानशब्दोऽयं सामान्यतो बाह्यप्रयत्नार्थे प्रयुज्यत इत्यवोचाम। बाह्यप्रयत्नस्य च वर्णोत्पत्तिप्राक्कालभावित्वं तदूर्ध्वकालभावित्वं चेति मतद्वयं दृश्यते भारतीयेषु ध्वनिवित्सु। अनयोर्युक्तायुक्तत्वविचारस्तु निबन्धान्तरे करिष्यते। सम्प्रति तत्तन्मतसमर्थकानां वचनमाश्रि-त्यानुप्रदानशब्दार्थो निर्धार्यते। तत्र **"अनुप्रदीयते वर्णोऽनेनेत्यनुप्रदानं मूलकारणम्। अनुप्रदीयते**

---

१. महाभाष्यम्—१।१।९।
२. वैदिकाभरणम्—१।९।
३. अष्टाध्यायी—१।१।९।
४. पाणिनीयशिक्षा—३९।
५. प्रक्रियाप्रसादः, पृ॰ २९।
६. लघुशब्देन्दुशेखरः, पृ॰ ३६।
७. छाया (महाभाष्यम्—नवाह्निकभागात्मकम्), पृ॰ २१७ (नि॰ सागर मु॰)।
८. महाभाष्यम्—१।१।९।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

उपादीयते जन्यत इत्यर्थः" इति तैत्तिरीयप्रातिशाख्यवैदिकाभरणम्[1] । "अनुप्रदीयन्ते स्थानेषु निवेश्यन्ते वर्णा एभिरित्यनुप्रदानम्" इति तत्त्रिभाष्यरत्नम्[2] । "वायुमनुप्रदीयत इत्यनुप्रदानम्[3]" इति ऋक्प्रातिशाख्यभाष्यकृदुव्वटोऽपि । इयं व्याख्याऽनुप्रदानस्य वर्णजनकत्ववादिनाम् । ये पुनरनुप्रदानशब्दं बाह्यप्रयत्नार्थकं मत्वाऽस्य वर्णोत्पत्त्यनन्तरभावित्वमिच्छन्ति न्यासकृदादयः, तेषां[4] मते "अनु पश्चात् प्रदीयते[5]" इत्यनुप्रदानम्, 'अनु वर्णोत्पत्त्यनन्तरं प्रदीयते जन्यत इत्यनुप्रदानम्[6]" इति रीत्या व्युत्पाद्योऽयं शब्दः ।

अत्र पूर्वोदाहृतप्रातिशाख्यतद्भाष्याद्यनुरोधात् स्पष्टमिदं प्रतीयते यदयमनुप्रदानशब्दो नादश्वासैतदुभयम्[7] इति प्रयत्नत्रयमेवाभिधत्ते, नेतरान् बाह्यप्रयत्नान् । तृतीयस्यैवोभयात्मकस्य "हकारः" इत्यभिधानमिति "हकार इति शब्दसंज्ञैव । स खलु हकारः संवृतविवृतयोर्मध्येन कण्ठेन कार्यो भवति[8]" इति माहिषेयभाष्यप्रामाण्यात् स्पष्टमेव प्रतीयते । महाभाष्ये पुनः 'तत्र वर्णाणां प्रथमद्वितीयविवृतकण्ठाः, श्वासानुप्रदाना अघोषाश्च ।......तृतीयचतुर्थाः संवृतकण्ठा नादानुप्रदाना घोषवन्तः[9]" इत्युक्तेः "संवृते गलबिले अव्यक्तशब्दो नादः, विवृते श्वासः,...... तौ श्वासानुप्रदानावनुप्रदानमित्याहुः[10]" इति प्रसादकृदुक्तेश्च द्वावेवानुप्रदानौ नादश्वासाविति प्रतिभाति, न पुनरेतद्द्वयमध्यगतत्वात् तृतीयमपि । अत एव Whitney महाशयोऽप्युभयान्तर्गतस्यास्य नौचित्यं मन्यते[11] । परन्तु W. S. Allen महाशयः समर्थयत्येव[12] तृतीयं प्रकारमपि प्रातिशाख्यप्रसिद्धं प्रकृतस्यानुप्रदानस्य ।

एतावतेदं प्रतिफलति यद् वर्णस्वरूपभेदकतया बाह्यप्रयत्नमात्रस्याङ्गीकाराभावेऽपि केवलमनुप्रदानस्य तत्त्वे स्वीकृते सुतरामेवेष्टसिद्धिर्भवति । घोषवत्त्वाघोषवत्त्वप्रयुक्तभेदस्य नादश्वासानुप्रदानमूलकतयैव संग्रहः । योऽपि प्रथमद्वितीययोरल्पप्राणमहाप्राणकृतस्य भेदस्य तृतीयचतुर्थयोश्च व्यञ्जनयोस्तथाभेदस्य विचारः कृतो भाष्यादौ पतञ्जल्यादिभिः शाब्दिकैस्तस्य तैत्तिरीयप्रातिशाख्योक्तसंसर्गकृते भेदे समावेशः सम्भवत्येव । व्याख्यातमप्येवं प्रातिशाख्यभाष्यकृद्भिरिति संसर्गस्वरूपनिरूपणावसरेऽचिरादेवोपपादयिष्यते ।

तदित्थमनुप्रदानस्य नादश्वासोभयात्मकत्वमात्रस्वीकारे न कापि क्षतिः । अत एवोव्वटेन समुपसंहृतम्—',एवं श्वासादीनि त्रीण्यनुप्रदानानि वर्णकालस्थानानि भवन्ति । नाधिकानि

---

१. वैदिकाभरणम्—तै० प्रा०–२३।२ । २. त्रिभाष्यरत्नम्—तै० प्रा० २३।२ ।
३. ऋक्प्रातिशाख्यभाष्यम्—१३।१ ।
४. न्यासः—१।१।९; पदमञ्जरी —१।१।९; लघुशब्देन्दुशेखरः, पृ० ३६ ।
५. प्रक्रियाप्रसादः, पृ० २८ । ६. सिद्धान्तकौमुदीलक्ष्मीटीका, पृ० ४३ ।
७. ऋक्प्रातिशाख्यम्—१३।१–२ ।
८. तैत्तिरीयप्रातिशाख्यमाहिषेयभाष्यम्—२।६ । ९. महाभाष्यम्—१।१।९ ।
१०. प्रक्रियाप्रसादः, पृ० २८ ।
११. तैत्तिरीयप्रातिशाख्यम्—२।६; चतुरध्यायिका–१।१३ (Whitney सम्पादिते) ।
१२. Phonetics in Ancient India, P. 35.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

न न्यूनस्थानानि"[1] इति। तस्मादनुप्रदानशब्दस्य बाह्यप्रयत्नसामान्यार्थकत्वेऽनपेक्षिते परिमाणस्य बाह्यप्रयत्नत्वेऽप्यनुप्रदानान्तर्भावाभावाद् युक्तं तैत्तिरीये तस्य पृथगुपादानमिति युक्तमुत्पश्यामः।

वर्गे वर्गे प्रथमतृतीयानां व्यञ्जनानां तुल्यस्थानाभ्यन्तरप्रयत्नानामपि परस्परं स्वरूपभेदोऽनुप्रदानकृत एव, प्रथमस्य श्वासानुप्रदानत्वात्, तृतीयस्य च नादानुप्रदानत्वात्।

(ख) संसर्गः

यद्यपि संसर्गशब्दोऽयं सम्बन्धवाची, तथापि कस्य केन सम्बन्धोऽत्र वर्णभेदकत्वेन विवक्षित इत्यत्राचार्याणां न मतैक्यम्। अत्रैके प्रवदन्ति—**"संसर्गो वायोः स्थानेष्वभिघातः। स च वायुस्त्रिप्रकारः—अयःपिण्डनिभः, दारुपिण्डसंकाशः, ऊर्णापिण्डसदृशश्चेति। स्पर्शानां यमानां चाभिव्यञ्जको वायुरयःपिण्डवत्, अन्तःस्थानामुद्भावकोऽसौ दारुपिण्डवत्, ऊष्मणां स्वराणां च व्यञ्जक ऊर्णापिण्डवत् स्थानान्यभिहन्ति"**[2] इति। वर्णेनानुप्रदानसंसर्ग इत्यपरः पक्षः। यथाह प्रसादकृत्—**"यदा स्थानाभिघातजे ध्वनौ नादोऽनुप्रदीयते, यदा नादध्वनिसंसर्गाद् घोषो (अत्र '...संसर्गादघोषो....' इति मुद्रितः पाठोऽयुक्त एव) जायते, यदा श्वासोऽनुप्रदीयते, तदा श्वासध्वनिसंसर्गादघोषः**[3]" इति। ध्वन्योरेव परस्परं संसर्ग इति तु ऋक्प्रातिशाख्ये **"आहुर्घोषं घोषवतामकारमेकेऽनुस्वारमनुनासिकानाम्", "सोष्मतां च सोष्मणामूष्मणाहुः सस्थानेन", "घोषिणां घोषिणैव**[4]" इत्यादिवचनात् स्पष्टमेव। व्याख्यातमप्येवमेव भाष्यकृतोव्वटेन -**"घोषवत्स्वकारः स्वस्थानादागत्य घोषत्वं जनयति—ग, ज, ड, द, ब, य, र, ल, व, ह इति। तथा...अनुस्वारः स्वस्थानादागत्य घोषत्वं जनयति—ङ, ञ, ण, न, म**[5] **इति।"** एतच्चोक्तसूत्राणां प्रथमसूत्रस्य विवरणम् अन्त्ययोरपि प्रोक्तमर्थं प्रमाणयत्येव। तथा च तुल्यस्थानप्रयत्नानुप्रदानानामपि प्रथमद्वितीयानां तथा तृतीयचतुर्थानां तथा तृतीयपञ्चमानां च व्यञ्जनानां संसर्गकृत एव स्वरूपभेद इत्यागतम्। अत एव हकारसंसर्गहीनस्य ककारस्यानुष्मणः, तत्संसर्गसहितात् खकाराद् (क्+ह=ख) भेदः। एवमेवान्येष्वपि स्थलेषु संसर्ग उदाहर्त्तव्यो भेदकत्वेन।

(ग) स्थानम्

स्थानशब्दश्चायं वृत्तौ[6] (=वर्णावस्थाविशेषे) वर्णोच्चारणस्थाने[7] च प्रयुज्यते। तत्र ऋक्प्रातिशाख्यादौ विलम्बिता, मध्यमा द्रुता चेति तिस्रो [8]वृत्तय उक्ताः। तैत्तिरीयप्रातिशाख्ये तु सप्त[9] वृत्तयो निर्दिष्टाः। तत्र शाखाभेदाद् व्यवस्थाभेदोऽपि वर्णितः। अत्रार्थेऽपि तिष्ठन्ति

---

१. ऋक्प्रातिशाख्यभाष्यम्–१३।७।

२. वैदिकाभरणम्–२३।२।

३. प्रक्रियाप्रसादः, पृ० २८।

४. ऋक्प्रातिशाख्यम्–१३।१५–१७।

५. ऋक्प्रातिशाख्यभाष्यम्–१३।१५।

६. तैत्तिरीयप्रातिशाख्यम्—२३।४।

७. ऋक्प्रातिशाख्यम्–१।४९; वाजसनेयिप्रातिशाख्यम्–१।६२; तैत्तिरीयप्रातिशाख्यम्–२।३१; चतुरध्यायिका-१।१८।

८. ऋक्प्रातिशाख्यम्–१३।४६; महाभाष्यम्–१।१।६९।

९. तैत्तिरीयप्रातिशाख्यम्–२३।४–२१।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

वर्णा अस्मिन्नित्येव व्युत्पत्तिः[१] । वर्णोच्चारणस्थानार्थकस्यापि व्युत्पत्तिरेषैव [२]न्यासादौ प्रदर्शिता । अधिकरणं वर्णानां स्थानशब्देनोच्यत इत्यपि प्रकृतार्थमभिप्रेत्यैवोव्वटादिभिरभिहितम्[3] । अत्र चैतावान् विशेषोऽवगन्तव्यः—यद्यप्याकाशदेशः शब्द इति महाभाष्योक्तेः[४] कण्ठादीनां न वर्णाधिकरणत्वं मुख्यम्, तथापि वर्णाभिव्यञ्जकत्वं वायोरिति नये तद्वायुसंयोगाधारतया वर्णाधारभूताकाशावच्छेदकतया वा कण्ठादिषु वर्णाधिकरणत्वव्यवहार[५] औपचारिकः । ये पुनर्वायुरेव शब्द[६] इत्यभिदधते, तेषामपि **"तस्मादेतस्माद्वा आत्मन आकाशः सम्भूतः, आकाशाद् वायुः[७]"** इत्यादिश्रुत्यनुरोधेन वायोराकाशजन्यत्वस्येष्टतयाऽऽकाशस्यैव[८] शब्दात्मकवाय्वधिकरणत्वमिति कण्ठादावधिकरणतावच्छेदकतयैव वर्णाधिकरणत्वव्यवहार उपपादनीयः ।

अत्रेदमप्यवधेयम्—स्वरोच्चारणकाले जिह्वाग्रादीनां करणानामुपसंहारः कण्ठादिस्थानेषु इति **"स्वराणां यत्रोपसंहारः तत् स्थानम्[९]"** इति तैत्तिरीयप्रातिशाख्योक्तेः स्पष्टमेव । अनुभवोऽप्येवंविध एव । अत्रोपसंहारो नामातिसंश्लेषः, करणं क्रियच्चिरं स्पृशदेव स्थानमवतिष्ठते । व्यञ्जनोच्चारणावसरे तु करणस्य क्षणं स्पर्शमात्रं कण्ठादिस्थाने । अत एव **"अन्येषां तु यत्र स्पर्शनं तत् स्थानम्[१०]"** इत्युक्तम् । अत एव च माहिषेयभाष्ये **"उपसंहारो नाम संस्पर्शनमतिसंश्लेषः[११]"**, **"स्पर्शनं संश्लेषः"** इत्युदितम् । चतुरध्यायिकायां तु निर्विशेषेणैव **"यदुपक्रम्यते तत् स्थानम्"**, **"येनोपक्रम्यते तत् करणम्[१२]"** इत्युक्तम् । परमत्र स्वरव्यञ्जनोच्चारणविषये तैत्तिरीयोक्त इयान् विशेषोऽवश्यमेवावधार्यः, अन्यथाऽनुभवविरोधः स्यादेव ।

सम्प्रतीदं विवेचनीयम्—किं वृत्तिरूपं स्थानं वर्णस्वरूपभेदकम्, उच्चारणाधिकरणरूपं वा, उभयं वेति । तत्र **"अनुप्रदानात् संसर्गात्"** इत्यादिपूर्वोदाहृतवक्तव्यादनन्तरमेव सप्तवृत्तीनां तैत्तिरीयप्रातिशाख्य उपक्रमात् प्रतीयते यद् वृत्तीनां स्वरूपभेदकत्वाभिप्रायेणैव तत्र स्थानग्रहणं कृतमास्ते । **"द्रुतायां तपरकरणे मध्यमविलम्बितयोरुपसंख्यानं कर्त्तव्यम्, कालभेदात्[13]"** इति **"तपरस्तत्कालस्य"** इति सूत्रे पूर्वपक्षभाष्योक्तेः, अइउण्सूत्रस्थाणुदित्सूत्रस्थभाष्याच्च वृत्तीनामपि भेकत्वं कैश्चिन्मन्यते स्मेत्युपस्थितमेव भवति चेतसि । नैतावतेदं भ्रमितव्यं यदुच्चारणस्थानकृतो भेदो नेतैषामभिमत इति, एतस्यैव भृशमुपलब्धेः, वृत्तिकृतस्वरूपभेदस्य भाष्यकाराद्यसम्मतत्वाच्च । यद्यपि वृत्तीनां स्फोटाभेदकत्वमेवोक्तं तपरसूत्रमहाभाष्ये, तथापि क-ख इत्येवं वर्णस्वरूपभेदकत्वं त्वासां न विद्यत एव सत्यप्युच्चारणगतशैघ्रचादिप्रयुक्तयत्किञ्चिद्भेदप्रयोजकत्वे इति नास्पष्टं तपरसूत्रभाष्यप्रदीपोद्द्योतपरिशीलनजुषां विदुषामिति ।

---

१. त्रिभाष्यरत्नम्, माहिषेयभाष्यञ्च—तै० प्रा०—२३।४ ।

२. न्यासः, पदमञ्जरी च—१।१।९ ।

३. ऋक्प्रातिशाख्यभाष्यम्—१।४९; वाजसनेयिप्रातिशाख्यानिरुद्धभाष्यम्—१।६२ ।

४. महाभाष्यम् १।१।९ । ५. महाभाष्यप्रदीपोद्द्योतः १।१।९ ।

६. वाजसनेयिप्रातिशाख्यम्—१।७; ऋक्प्रातिशाख्यम्—१३।१३ ।

७. तैत्तिरीयोपनिषद्—२।१।१ । ८. वाजसनेयिप्रातिशाख्यम्—१।६ ।

९. तदेव—२।३१ । १०. तदेव—२।३३ ।

११. अत्र 'संस्पर्शनातिसंश्लेषः' इति मुद्रितः पाठः प्रामादिकः ।

१२. तदेव—१।१८—१९ । १३. महाभाष्यम्—१।१।६९ ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तथा चोच्चारणस्थानकृतभेदकत्वाभिप्रायेणैव स्थाननिर्देश इति वयं प्रतीमः प्रकृतप्रसङ्गे। अत एवोव्वटेनापि व्याख्यातम्—"**तुल्यप्रयत्नानुप्रदानानामपि स्थानकृतः श्रुतिविशेषः—अ, ऋ, इ, उ; क, च, ट, त, प; य, र, ल, व; ह, श, ष, स**"[१] इति। सवर्णसंज्ञाविधायकसूत्रेऽपि[२] स्थानशब्देनोच्चारणस्थानस्यैव ग्रहणम्। अत एव पाणिनीयशिक्षायामप्येतदर्थकतयैव स्थान-शब्दो व्याख्यातः—"**अष्टौ स्थानानि**" इत्यादिना। माहिषेयभाष्येऽप्युक्तम्—"**तस्य प्रातिश्रुत्कानि भवन्त्युरः कण्ठः शिरो मुखं नासिके इति**"[३] इति सूत्रव्याख्यानावसरे—"**स्थानान्यत्वात् शब्दान्यत्वं भवति**" इति। सर्वथैव न भेदकत्वं वृत्तीनामित्यत्र तु नास्माकं सम्प्रतिपत्तिरित्यवोचाम।

(घ) करणम्

करणशब्दोऽपि क्वचित् [४]सक्रियावयवसाधनपरः [५]क्वचिच्चाभ्यन्तरप्रयत्नपरो दृश्यते। अत एव सूक्तं भर्तृहरिणा—"करणं केषाञ्चित् स्पृष्टतादि, केषाञ्चित् जिह्वाया अग्रोपाग्र**मध्यमूलानि**" इति। कैयटोऽप्येनमर्थमनुवदति सवर्णसंज्ञासूत्रभाष्यव्याख्यानावसरे।

तत्रेदं विवेचनीयम्—कीदृशं करणं वर्णस्वरूपभेदकत्वेन विवक्षितमिति। पाणिनीयशिक्षायां प्रयत्नस्याभ्यन्तरस्य भेदकत्वेनोपन्यासात् प्रतीयते यदाभ्यन्तरकरणार्थक एव करणशब्दोऽत्रोपात्तः। आभ्यन्तरस्यैव च भेदकत्वमुव्वटेनाप्युरीकृतम्—"**तुल्यस्थानानुप्रदानानामपि इकारजकारयकाराणां करणकृतः श्रुतिविशेषः**"[६] इत्यभिदधता। यद्यनुप्रदानस्य बाह्यप्रयत्नात्मकस्य वर्णस्वरूपभेदकत्वम्, तर्हि सुतरामाभ्यन्तरस्येति तु सुव्यक्तमेव। परन्तु अकारं प्रकृत्य "**ओष्ठौ करणविन्यासो**"[७] इति माहिषेयभाष्योक्तेः "**करणमोष्ठादि, तस्य वैविध्येन स्पर्शनं स्पृष्टतादि**[८]" इति भाष्यान्तराच्च सक्रियावयवानामपि जिह्वाग्रादीनां भेदकत्वमायाति। तथापि प्रथमस्य करणस्यैव स्वरूपभेदकत्वमिति बहुलं प्रसिद्धिः।

अत्र प्रसङ्गादिदमप्यवधेयम्—जिह्वाग्रादीनां करणानां स्थानानां च सर्वथा सर्वदा न पारमार्थिको भेदः, अपि तु स्थानत्वकरणत्वोपाधिकृत एव। अत एव "**अस्यन्त्यनेन वर्णान् इत्यास्यम्**" इति व्युत्पाद्यास्यपदम् "**किं पुनरास्यम्? स्थानं करणं च**" इति प्रोक्तं सवर्णसंज्ञासूत्रे महाभाष्ये। प्रतिपादितं चैवमेव [९]नागेशेनापि। अत एव येषां स्थानाद्भिन्नं करणं नास्ति ते "**समानस्थानकरणा [१०]नासिक्यौष्ठ्याः**" इति वाजसनेयिप्रातिशाख्योक्तं समञ्जसम्। अत एव च वर्णरत्नप्रदीपिकायामप्यभिहितम्[११]—

---

१. ऋक्प्रातिशाख्यभाष्यम्—१३।१३। २. अष्टाध्यायी—१।१।९।
३. तैत्तिरीयप्रातिशाख्यम्—२।३।
४. चतुरध्यायिका—१।१९; तैत्तिरीयप्रातिशाख्यम्—२।३२-३४।
५. ऋक्प्रातिशाख्यम्—६।२७, १३।८; वाजसनेयिप्रातिशाख्यम्—१।११।
६. ऋक्प्रातिशाख्यभाष्यम्—१३।१३। ७. तैत्तिरीयप्रातिशाख्यम्—२।२३।
८. वैदिकाभरणम्—२।२३। ९. लघुशब्देन्दुशेखरः, पृ० ३६।
१०. वाजसनेयिप्रातिशाख्यम्—१।८०। ११. वर्णरत्नप्रदीपिका—२७।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

ऋवर्णोऽथ कवर्गश्च जिह्वामूलीय एव च।
जिह्वामूले भवन्त्येषां जिह्वामूलं च कारणम् ॥ इति।

तस्मात् स्थानकरणभेद औपाधिक इति सूक्तम्। अत एवैकमेवाङ्गं क्वचित् स्थानम्, क्वचिच्च करणं भवत्येव। तथा च "येनोपसंह्रियते यच्चोपसंह्रियते[1]" तदेव क्रमेण स्वरस्य व्यञ्जनस्य च करणमिति तैत्तिरीयोक्तमेवोपाधौ निमित्तमवसेयम्।

(ङ) परिमाणम्

परिमाणं मात्राकालः। तुल्यास्यस्थानप्रयत्नानुप्रदानानामपि परिमाणकृतः श्रुति-विशेषो जायते। यथा-अ, आ, इ, ई-इत्यादीनाम्। परमिदं परिमाणं केवलमचां स्वरूपभेदे निमित्तम्, न व्यञ्जनानाम्। अत एव तैत्तिरीयाणां मते व्यञ्जनानां ङकारानुस्वारादीनां काल-कृतभेदेऽपि न वर्णान्यत्वं भवतीति तैत्तिरीयभाष्येऽभिहितम्।

तदत्र निबन्धे प्राचीनभारतीयाचार्याणां ध्वनितत्त्वविदां मतेन यथाप्रज्ञं निरूपिता वर्णस्वरूपभेदका गुणविशेषाः। अत्र स्थानसंख्यादिविषये वर्णसंख्यातदुच्चारणस्थानादिविषये चावान्तरो भेदो वर्त्तत एव यथासम्प्रदायम्, तथापि प्रकृतनिबन्धानुपयोगान्न चिन्तितं तद्विषये। एवमेवार्वाचीनानां ध्वनितत्त्वविदां मतमपि तुलनार्थं खण्डनार्थं वा नोपात्तम्, प्रकृते प्राचीनभारतीयाचार्याणामेव मतस्य प्रतिपित्सितत्वात्। परमेतावता नेदं कथमप्यवगन्तव्यं यदस्माकं कृते नवीनानां पाश्चात्यपद्धतिजुषां ध्वनिविदुषां मतं सर्वथाऽनुपादेयमेव। तैर्बहु चिन्तितं कदाचित् सुचिन्तितं च। अत एत्र तत्तत्त्वजिज्ञासुभिर्विशेषतोऽध्येतव्यः W. S. Allen महाशयस्य Phonetics in Ancient India इति ग्रन्थः, डॉ० सिद्धेश्वरवर्ममहाभागस्य च Critical Studies in the Phonetic Observations of Indian Grammarians इति ग्रन्थश्च।

● ● ●

---

१. तैत्तिरीयप्रातिशाख्यम्-२।३२-३४।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

ब्रह्मवैवर्ते अवतारसङ्ख्या

डॉ० वैकुण्ठनाथशास्त्री

वरिष्ठाध्यापकः, सवाईमाधवपुरम् (राजस्थानम्)

अवतारसंख्याविषये सामान्यतो जनाश्चतुर्विंशतिसङ्ख्यां व्यपदिशन्ति, किन्तु 'मुण्डे मुण्डे मतिर्भिन्ना तुण्डे तुण्डे सरस्वती' इत्युक्तिबलेन पुराणेष्ववतारसंख्याविषये नास्ति साधर्म्यम्। अग्नि-वाराहादिषु[1] पुराणेषु दशावतारचर्चा समुपलभ्यते। महाभारतेऽपि ३४८ तमेऽध्याये दशावतारपोषकः श्लोकः प्राप्यते। श्रीमद्भागवते[2] त्ववताराणां सङ्ख्या वृद्धिमुपगता, यतो ह्यत्र चतुर्विंशत्यवताराणां चर्चा प्राप्यते, येषु द्वाविंशत्यवताराणामुल्लेखस्तु प्रथमस्कन्धस्य तृतीयेऽध्याये वर्तते, अवशिष्टयोर्हंसहयग्रीवयोश्चर्चा[3] अन्येषु स्कन्धेषु वर्तते। इत्थं विद्वद्भिरत्र चतुर्विंशत्यवताराणां संख्यायाः पूर्तिर्विधीयते।

ब्रह्मवैवर्ते तु सप्तदशावताराणां वर्णनं प्राप्यते। अनया दृष्ट्या पुराणमिदं पौराणिकजगति वैशिष्ट्यं भजति। अस्मिन् पुराणे श्रीकृष्ण-जन्मखण्डस्य स्थलद्वये समग्ररूपेणावतारोल्लेखः प्राप्यते। सर्वप्रथममुक्तखण्डस्य नवमेऽध्याये समुपलब्धं सप्तदशावतारपोषकं वर्णनमित्थमस्ति[4]—

ब्रह्मेशशेषविघ्नेशाः कूर्मो धर्मोऽहमेव च।
नरश्च कार्तिकेयश्च श्रीकृष्णांशा वयं नव॥
सूकरो वामनः कल्किर्बौद्धः कपिलमीनकौ।
एते चांशकलाश्चान्ये सन्त्येव कतिधा मुने॥
कूर्मो नृसिंहो रामश्च श्वेतद्वीपविराड्विभुः।
परिपूर्णतमः कृष्णो वैकुण्ठे गोकुले स्वयम्॥

उपर्युक्तेषु पद्येषु ब्रह्मेशादीनां नवानामवताराणां श्रीकृष्णांशत्वेन निरूपणं कृतम्। तदनन्तरं शूकरवामनादीनामुत्कीर्तनं विद्यते। एवं परिगणनेनाष्टादशसङ्ख्या सम्प्राप्यते। किन्त्वत्र नर-नारायणस्य पृथक् पृथक् सङ्ख्यां मत्वा परिगणनं कृतम्। अन्यत्रास्मिन्नेव पुराणे श्रीकृष्ण-

१. अग्निपुराण एक अध्ययन, पृ० ४; वराह पु० ४।४।
२. श्रीम० भा० १।३।६–२३, २।७।११।१९।
३. श्रीम० भा० १०।४०।१७–२२, ११।४१।१।७।
४. ब्र० वै०, कृ० ख० ९।१०।१२–१३।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

खण्डस्य २२ तमेऽध्यायेऽवताराणां नामत उल्लेखः, तथा तेषां कार्यनिरूपणमपि कृतम् । अत्र नरनारायणस्यैकत्वेन निरूपणं कृतम् । श्रीमद्भागवतेऽपि[1] नरनारायणस्यैकैव सङ्ख्या स्वीकृता, अतो मयाप्यत्र ब्रह्मवैवर्ते सप्तदशावताराणामुल्लेखनमङ्गीक्रियते ।

डॉ० वीणापाणिना[2] स्वस्मिन् पुराणे नवावताराणां स्वीकरणं कृतम्, किन्तूपलब्धं वर्णनमवलोक्य नैतत् समीचीनम् । अतः सुस्पष्टं पूर्वोक्तमुद्धरणमवलोक्य यदस्मिन् पुराणे सप्तदशावताराणां स्वीकरणमावश्यकमिति मन्ये ।

कूर्मावतारस्य द्विरावृत्तिरत्र विद्यते, अतोऽस्मिन् विषये श्रीरामाचार्येण[3] सम्पादिते ब्रह्मवैवर्ते 'कूर्मो नृसिंहः' इति स्थाने 'पूर्णो नृसिंहः' इति यः पाठः प्राप्यते स समीचीनः प्रतिभाति, यतो ह्यनेन पाठेन द्विरावृत्तिदोषशमनम्, तथा प्रकरणस्य पूर्तिरपि संजायते । 'श्वेतद्वीपविराड्विभुः[4]' इत्यत्र श्रीकृष्णस्यार्थः परिगृहीतो मया, यतो हि विवेच्यपुराणस्यानेकेषु स्थलेषु श्रीकृष्णस्यैव विष्णुरूपमङ्गीकृतम्, कार्तिकेयब्रह्मेशादीनां पञ्चानामवताराणां सर्वथाऽत्र नूतनं परिग्रहणं कृतम्, येषामुल्लेखो नान्यत्र पुराणेषु सम्प्राप्यते । अतोऽस्मिन् पुराणे सप्तदशावताराणां चर्चा पुराणक्षेत्रे ब्रह्मवैवर्तस्य वैशिष्ट्यं प्रतिपादयति ।

● ● ●

---

१. श्रीम० भा० १।३।९ । २. हरिवंशपुराणस्य सांस्कृतिकं विवेचनम्, पृ० २८ ।

३. श्रीरामाचार्येण सम्पादितं ब्रह्मवैवर्तस्य संस्करणम्, ६३।९३, पृ० ७७, (संस्करणम् १९७०) ।

४. ब्र० वै०, ब्र० ख० १८।२५-२७; कृ० ख० ३।९० ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

वैदिकवाङ्मये दिग्ज्ञानम्

डॉ० नागेन्द्रपाण्डेयः
शिक्षकः—सम्पूर्णानन्दसंस्कृतविश्वविद्यालये

भूतले नभस्तले वा कस्यापि नियतवस्तुनः स्थाननिर्देशार्थं किमपि गणितीयं विधानमावश्यकं भवति। पुराकाले भूपृष्ठस्थानां व्यवहारप्रवर्तनाय स्थाननियमनार्थं कानिचित् साधनान्याविष्कृतान्यासन्। तेषामभिधानतः प्राग् दिक्परिभाषा दिगुत्पत्तिश्च वैदिकवाङ्मये केन रूपेण निर्दिष्टा वर्तत इति विविच्यते।

ऋग्वेदसंहितायां पुरुषसूक्ते दिशामुत्पत्तिर्विराट्पुरुषस्य श्रोत्राभ्यां वर्णिता वर्तते। तद्यथा—

नाभ्या आसीदन्तरिक्षं शीर्ष्णोः द्यौः समवर्तत।
पद्भ्यां भूमिर् दिशः श्रोत्रात् तथा लोकान् अकल्पयत[1]॥

अत्र हि अन्तरिक्ष-द्युलोक-भूमिदिग्लोका विराट्पुरुषस्य केषां केषामवयवानां पूरका इति रूपकपद्धत्या प्रदर्श्यंते। पुरुषस्य नाभिस्थाने अन्तरिक्षम्, शीर्षस्थाने द्यौः, पादस्थाने भूमिः, श्रोत्रस्थाने दिशः, तथाऽन्ये लोका अपि अनिर्दिष्टपुरुषाङ्गावयवा इति। अतः सामान्येन दिशां निर्देशो विद्यते। उषा पूर्वस्यां सूर्यपथमेवानुगच्छतीति लिखितम्। तद्यथा—

एषा प्रतीची दुहिता दिवो नृन्योषेव भद्रा नि रिणीते अप्सः।
व्यूर्ण्वती दाशुषे वार्याणि पुनर्ज्योतिर्युवतिः पूर्वथाकः[2]॥

एवम् ऋग्वेदे प्राचीप्रतीच्योर्निर्देशः, चतसृणां दिशानाञ्च व्यवहारे प्रवर्तनमुपलभ्यते। यतो हि दिङ्निर्देशं विना स्थानद्वयस्य स्थितिः स्पष्टयितुं न शक्यते। अतो महर्षिणां दिङ्नियमनमतीवावश्यकमभवत्। तैत्तिरीयारण्यके स्पष्टमेव निर्दिष्टं यद् यत्र सूर्य उदेति सा प्राची दिक्। एवं सर्वासां दिशां स्वरूपं भिन्नभिन्नोपादानप्रभवत्वेन वर्णितम्। यथा—

"आपो वै इदम् आसन् सलिलमेव। स प्रजापतिरेकः पुष्करपर्णे समभवत्। तस्य अन्तर्मनसि कामः समवर्तत इदं सृजेयमिति।''''तत आदित्य उदतिष्ठत्। सा प्राची दिक्। तथाऽऽरुणः केतुर्दक्षिणत उपादधात्। एवाह्यग्न इति। ततो वा अग्निरुदतिष्ठत्। सा दक्षिणा दिक्। अथाऽऽरुणः केतुः पश्चादुपादधात्। एवा हि वायो इति। ततो वायुरुदतिष्ठत्। सा प्रतीची दिक्। अथाऽऽरुणः केतुरुत्तरत उपादधात्। एवा हीन्द्रेति। ततो वा इन्द्र उदतिष्ठत्। सोदीची दिक्। अथाऽऽरुणः केतुर्मध्य उपादधात्। एवा हि पूषन्निति। ततो वै पूषोदतिष्ठत्। सेयं दिक्।

---

१. ऋग्वेदसंहिता—१०।९०।१४। २. ऋग्वेदसंहिता ५।८०।६।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अथारुणः केतुरुपरिष्टादुपादधात् । एवा हि देवा इति । ततो देवमनुष्याः पितरो गन्धर्वा अप्सरसश्चोदतिष्ठन् । सोर्ध्वा दिक् । याः विपुषो विपरायतन ताभ्योऽसुराः रक्षांसि पिशाचाश्च उदतिष्ठन् । तस्मात् ते पराभवन् विप्रुड्भ्यो समभवन् । ता एषाभ्यनूक्ताः···अद्भ्यो वै इदं समभूत् । तस्मादिदं सर्वं ब्रह्मस्वयम्भव इति । तस्मादिदं सर्वं शिथिलम् इव अध्रुवमिव अभवत् । प्रजापतिर्वाव तत् । आत्मना आत्मानं विधाय तदेव आनुप्राविशत् तदेषाभ्यनूक्ता"।

विधाय लोकान् विधानभूतानि विधाय सर्वाः प्रदिशो दिशश्च ।
प्रजापतिः प्रथमजाः ऋतस्य आत्मानात्मानभिसंविवेश[1] ॥

ऋग्वेदे तत्परवर्तिसाहित्ये च दिगवबोधनाय दिक्च्छब्दस्य[2] प्रयोग उपलभ्यते ।

केषुचित् स्थलेषु 'दिग्'[3], 'आशा'[4], 'काष्ठा'[5], 'ककुभ'[6] इति शब्दा अपि तदर्थे संयोजिताः । वैदिकसाहित्ये दिक्शब्द आकाशस्यैकभागस्य सूचको वर्तते[7] ।

प्राच्यादिचतसृणां[8] प्रमुखदिशां प्राधान्येनोल्लेखोऽस्ति । एतेषां परस्परं सम्मिश्रणेन चतस्रश्चोपदिशो[9] जायन्ते । ऊर्ध्वाधोभागयोः[10] सम्मेलनेन दिशो दशधाः ।

प्राच्यप्रतीच्यवाच्युदीच्योर्ध्वाधःप्रभृतीनां दिशां[11] सहैव चतसृणामवान्तरदिशामपि समुल्लेखोऽस्ति । यथा हि—

"चतस्रो दिशश्चतस्रोऽवान्तरदिश ऊर्ध्वेयं नवमी दिङ्[12] ।"

---

१. तैत्तिरीयारण्यके १।२३।१-९ ।

२. ऋग्वेदसंहिता--१।९५।३, १०।९०।१४, ३।३०।१२, ९।११४।३, १।१२४।३ ।
अथर्वसंहिता—११।२।१०, ११।२।१२, ४।१४।७८, १५।२।१, १५।२।४, ४।४०।१, ३।३१।४, ३।२६।१-२-३-४-५ ।
मैत्रायणीसं०—३।१२।८, शुक्लय० सं०—२२।२४, ९।३२ ।
बृहदारण्यकोप०—४।२।४, ऐतरेय०—२।१ ।
तैत्तिरीय०—१।२३, ४।४, १२।७, शु० य० वे० सं०—२।८।१ ।

३. सांख्यायनश्रौतसू०—१६।२८।२; बृ० आ० उपनिषद्—४।२।४; वाजसनेयी०—१४।१३; मैत्रायणीसं०—३।१२।८; तैत्तिरीयारण्यके—१।२३।६-८ ।

४. ऋग्वेदसंहिता—९।७२।३-४ ।

५. ऋ० सं०—४।५८।७; शुक्लय० सं०—९।१३; निरुक्तम्—२।१६ ।

६. ऋ० सं०—१।८७।८; १।३१।८ (अष्टौ व्यख्यत्ककुभः पृथिव्यास्त्रीधन्वयोजना सप्तसिन्धून्) ।

७. अथर्वसं०--३।३१।४ ।

८. अथर्वसं०—४।१४।७-८; ४।४०।१; १५।२।१; ३।२६।१-६; तैत्तिरीय०--७।१।१५; मैत्रायणी०—२।८।३; ३।१२।८; शुक्लय० सं०—२२।२४, ९।३२, १४।१३; बृ० आ० उप०—४।२।४; शतपथब्रा०—८।४।२।१३; ऐतरेय०—२।१ ।

९. तै० आ०—१।२३।९; कृष्णयजुर्वेदीयतैत्तिरीयब्राह्मणे—२।८।१ ।

१०. तै० आ०—१।२३।७-८, ७।१।१५; गोपथब्राह्मणे—१।१०; बृ० आ० उप०—४।२।४।

११. तैत्तिरीय०—७।१।१५ । १२. सा० श्रौ० सू०—१६।२८।२ ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

पुनश्च शतपथब्राह्मणे–"अथ यानि दश । सा दशाक्षरा विराड्विराडग्निर्दशदिशो दिशोऽग्निर्दशप्राणाः प्राणा अग्निर्यावाग्निर्यावत्यस्य मात्रा तावद्भवति[1] ।"

कुत्रचिद् ऊर्ध्वायाः स्थाने 'बृहती' शब्दस्य प्रयोगोऽपि दृश्यते[2] । ध्रुवाशब्दस्य प्रयोगः पादतलगताऽधोभागनिर्देशनावसरे कृतो दृश्यते[3] । षण्णां दिशामुल्लेखोऽपि प्राप्यते । यथा—

स दिशोऽन्वैक्षत प्राचीं दक्षिणां प्रतीचीमुदीचीं ध्रुवामूर्ध्वामिति[4] ।

वस्तुतस्तु भूमेः सत्तायामेव दिशां कल्पना सम्भवति । यदि भूरेव नाभविष्यत्तदा तु कस्यापि दिशः प्रश्न एव नोत्तिष्ठेत् । विचारोऽयम् ऋग्वेदेऽपि स्पष्टतया प्राप्यते । यथा —

भूर्यज्ञ उत्तानपदो भुव आशा अजायन्त ।
अदितेर्दक्षो अजायत दक्षाद्वदितिः परि[5] ॥

असतः सद् जायते, अर्थात् सदादेवाशाया उत्पत्तिः । यथा—

देवानां युगे प्रथमेऽसतः सदजायत ।
तदाशा अन्वजायन्त तदुत्तान पदस्परि[6] ॥

यदि ध्रुवनक्षत्रमुत्तरस्यां दिशि मन्यते, तदा तु वैदिकमहर्षीणां वैज्ञानिकज्ञानस्य भूसंस्थानविषये महत्त्वपूर्णान्वेषणशक्तिर्ज्ञायते । अद्यापि ध्रुवनक्षत्रज्ञानेनैव पृथिव्यां दिग्ज्ञानं क्रियते । तथा च "**सर्वेषामेव वर्षाणां मेरुरुत्तरतः स्थितः**" इत्युक्तेरुपपत्तिरपि जायते । शतपथब्राह्मणे ध्रुवविषये यदुक्तमस्ति तत्तु विचारणीयं विद्वद्भिः । यथा —

मित्रावरुणौ त्वोत्तरतः परिधत्तां ध्रुवेण धर्मणा विश्वस्यारिष्ट्यै[7] ।

तथा च यजुर्वेदेऽपि[8]·········प्रतिपदोक्तमिदमेव ।

उपरितनो निर्देशः सामान्येन परिचयायोपस्थाप्यते । किन्तु ऋग्वेदमन्त्रैर्यदा यज्ञानां प्रक्रिया लब्धप्रतिष्ठाऽभवत्, तदा वैदिकानां हवनकुण्डानां वेदिकानां निर्माणार्थञ्च दिग्बिन्दूनां वास्तविको परिचयोऽत्यावश्यकमभवत् । यतो हि वास्तविकदिग्बिन्दूनां स्थानानि निर्णीय वेदैर्यागानां शुभाशुभफलानां निष्पत्तिः स्फुटतया दृग्गोचरीभवति स्म । अत्रायं हेतुरासीद् यच्छास्त्रेषु शुल्बसूत्रप्रभृतिषु स्फुटदिङ्निर्देशेनैव शुभाशुभफलं निर्दिष्टमभवत् ।

शङ्कुद्वारा दिग्ज्ञानम्

शङ्कुद्वारा कात्यायनमहर्षिणैवं दिग्ज्ञानं कृतम्—"**समे शङ्कुं निखाय, शङ्कुसम्मितया रज्वा मण्डलं परिलिख्य, यत्र लेखयोः शङ्क्वग्रच्छाया निपतति तत्र शङ्कुं निहन्ति सा प्राची**[9]" ।

१. श० ब्रा०—६।२।२।३४ । २. काठकसंहिता—१७।८; वाजसनेयी०—१४।१३ ।
३. अथर्वसं०—४।१४।८, ३।२६।५; गोपथब्राह्मणे—१।१० ।
४. गोपथब्राह्मणे—१।१० । ५. ऋ० सं०—९।१०।४ ।
६. ऋ० सं०—९।१०।३ । ७. श० ब्रा० १।३।४।४ ।
८. कात्यायनशुल्बसूत्रे, सू० २ । ९. श० ब्रा० ३।५।१।१ ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

शतपथब्राह्मणे चैवम्—"चिह्नेनाप्यर्थसिद्धेः शङ्कुनिखननं........निहन्ति[१]"।
शङ्कुलक्षणं च श्लोकशुल्बे वर्णितमस्ति। तद्यथा—

षडङ्गुलपरिणाहं द्वादशाङ्गुलमुच्छितम्।
जरठम् (दृढम्) चाव्रणं चैव शङ्कुं कुर्याद् विचक्षणः॥
एतत्तक्ष ऋजुस्तीक्ष्णः खादिरः समवायतः।
शङ्कुः कार्यस्तु शुल्बज्ञैस्तस्यार्द्धं गमयेन्महीम्॥
प्रादेशमात्रो हविर्यज्ञे पूर्वलक्षणलक्षितः।
शङ्कुरामशिराः कार्यस्तस्याप्यूर्ध्वं निखापयेत्॥
द्विवितस्तिप्रमाणस्तु खादिरो मुद्गरस्तथा।
शङ्कुस्तेन निखातव्यस्तस्मात् तस्य परिग्रहः[२]॥

पूर्वादिदिग्बिन्दूनां वास्तविकं स्थानं निर्धारयितुं कात्यायनशुल्बसूत्रप्रणालिज्यौतिष-सिद्धान्तग्रन्थेष्वप्यङ्गीकृता वर्तते[३]।

नक्षत्रद्वारा दिग्ज्ञानम्

प्रथमं शङ्कुच्छायोपयोगमन्तरेण नक्षत्रदर्शनेन प्राचीदिग्साधनं प्राक्तनाचार्यैः कथं विहितमित्यस्य दिग्दर्शनमत्र प्रस्तूयते। यथा बौधायनशुल्बसूत्रे—"**कृत्तिकाः खल्विमाः प्राचीदिशं न परिजहाति। तासां दर्शनेन मापयेदित्येकम्। श्रोणादर्शनेन मापयेदित्यकम्। चित्रास्वात्योरन्तरालेनेत्वरम्।**"

चित्रास्वात्योर्मध्येन दिग्ज्ञानं कथं क्रियतेऽत्र कपर्दिभाष्यकारः—"**चित्रास्वात्योर्मध्ये उदकमवस्थाप्य प्रतिबिम्बं दृष्ट्वा प्राह्यम्।**"

कृत्तिकातारापुञ्जैर्दिक्साधनस्य निर्देशः प्रथमं शतपथब्राह्मण एव। यथा—

"**कृत्तिकास्वादधीत। एता ह वै प्राच्यै दिशो न च्यवन्ते सर्वाणि ह वा अन्यानि नक्षत्राणि प्राच्यै दिशश्च्यवन्ते तत् प्राच्यामेवास्यै तद्दिदश्यहितौ भवतस्तस्मात् कृत्तिकास्वादधीत[४]।**"

एवमेव शुल्बसूत्रेऽपि—

कृत्तिका श्रवणः पुष्यश्चित्रास्वात्योर्यदन्तरम्।
एतत् प्राच्या दिशो रूपं युगमात्रोदिते पुरः[५]॥

अत्र कृत्तिकानक्षत्रसम्बन्धेन महत्त्वपूर्णं ज्योतिर्विषयकं सङ्केतद्वयमुपलभ्यते। प्रथमं कृत्तिकायामग्न्याधानसम्बन्धेन तस्या नाडीक्रान्तिवृत्तयोः सम्पातसन्निकर्षे स्थितिः। द्वितीयश्च

१. शतपथब्रा० २. श्लोकशुल्बे–श्लो० ६-९।
३. द्र० मदीयः शोधप्रबन्धः—"ज्योतिषशास्त्रे दिग्देशकालज्ञानम्।"
४. शतपथब्राह्मणे–२।१।२। ५. श्लोकशुल्बे–३५।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

कृत्तिकातारापुञ्जस्य नाडीवृत्ते कृताधिष्ठानत्वम्, येन तस्योदयः पूर्वबिन्दौ भवति स्म । ब्राह्मण-कालिकाचार्या विषुवद्दिवसे (दिनरात्रिसमदिवसे) एवाग्न्याधानारम्भं कुर्वन्ति स्म । व्यवस्थैषा बहुषु स्थलेषु सङ्केतिता वर्तते । अग्न्याधाननक्षत्रत्वेनास्य देवता अग्निरिति कल्पितमभवत् । एवं कृत्तिकात आरभ्य सर्वेषां नक्षत्राणां देवतास्तैत्तिरीयब्राह्मणे पठिताः सन्ति[1] ।

अत्रास्मिन्नक्षत्राणां विषये म० म० प० सुधाकरद्विवेदिमतम्—भिन्ने भिन्ने देशे रचिताः प्राचीना वैदिकग्रन्थास्तेषु स्वस्वदेशोपयोगीनि पूर्वदिग्ज्ञानाय स्वस्वसमये यानि यानि प्राचीनैर्मुनिभिरुदितानि ततोऽनन्तरं गोलानभिज्ञैरपरैस्तान्येव सर्वाणि अनुपयुक्तान्यपि स्वस्वसमये भ्रान्तितः सङ्गृह्य पूर्वदिग्ज्ञानार्थं स्वस्वकृतौ विलिखितानि । अतः सम्प्रति साङ्कर्याद् देशाज्ञानाच्चेति ज्ञातुं न शक्यते यत् कानि कानि नक्षत्राणि केषु केषु देशेषु प्राचीनैः स्वस्वसमये दिग्ज्ञानोपयोगीनि दृष्ट्वा स्वस्वकृतौ निवेशितानि । युगमात्रोदितकृत्तिकानां स्वस्वदेशे यत्र यत्र दर्शनं भवेत् सैव वैदिकी प्राची इति यदि वैदिकानां मते प्राचीपरिभाषा भवेत्, तर्हि समयादिविषये किमपि वक्तुं शक्यते[2] ।

• • •

---

१. तै० ब्रा० ४।४।१०, १।५।१ ।   २. दिङ्मीमांसा–प्रक्रमः २३ ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अलौकिकसन्निकर्षविमर्शः

डॉ० स्वामी आत्मानन्दपरमहंसः,
अनुसन्धाता
गणितविभागे, काशीहिन्दूविश्वविद्यालये

सामान्यलक्षणासन्निकर्षः—

यथा चक्षुषा संयोगरूपसन्निकर्षद्वारा प्रमाताऽभिमुखे वर्तमानं घटादिकं प्रत्यक्षीकरोति, तथैव सामान्यलक्षणात्मकसन्निकर्षद्वाराऽनभिमुखं भूतादिकालीनमपि घटादिकं प्रत्यक्षीकरोति ।

तत्र आकृतिगुणादिमत्त्वेन समानानां पदार्थानां धूमघटगवादीनां भावः स्वाभाविको धर्मः सामान्यं जातिः (धूमत्वघटत्वगोत्वादिरूपा) द्रव्यगुणकर्मवृत्तिरिति सर्वमतसाधारण्येन स्वीक्रियते ।

प्राचीनतार्किकमते **'सामान्यं च सा लक्षणा चेति'** इत्यादिरीत्या विगृह्य सामान्यलक्षणारूपः सन्निकर्षो धूमत्वाद्यात्मक एवेति स्वीक्रियते । न च धूमत्वाद्यात्मकसामान्यलक्षणाया नित्यत्वेन सदैव सकलधूमविषयकप्रत्यक्षापत्तिरिति वाच्यम्, चक्षुरादीन्द्रियसंयुक्तधूमादिविशेष्यकः 'अयं धूमः' इति ज्ञानोत्पत्यनन्तरं तादृशज्ञाननिरूपितप्रकारताविशिष्टसामान्यस्यैव प्रत्यासत्तित्वाभ्युपगमात् केवलधूमत्वाद्यात्मकसामान्यस्य तथात्वास्वीकारात् । तथा च चक्षुस्संयोगेन धूमविषयकप्रत्यक्षात्मकज्ञाने सति ततो धूमसमवेतधूमत्ववत्तासम्बन्धेन सकलधूमविषयकप्रत्यक्षात्मकज्ञानोत्पादे चक्षुरादीन्द्रियसम्बद्धविशेष्यकचाक्षुषप्रकारतापन्नं धूमत्वादिकं सन्निकर्षः ।

ननु येनेन्द्रियेण तद्व्यक्तिर्गृह्यते, तेनैव तद्गता जातिरपि गृह्यत इति न्यायेन धूमत्वादिरूपसामान्यस्यापीन्द्रियसम्बद्धत्वेनेन्द्रियसम्बद्धसामान्यस्यैव सन्निकर्षत्वसम्भवे व्यर्थमेवेन्द्रियसम्बद्धविशेष्यकज्ञाननिरूपितप्रकारतेति पर्यन्तं निवेशनमिति चेन्न, पुरतो दृश्यमानधूलीपटले 'अयं धूमः' इति धूमत्वप्रकारकभ्रमात्मकज्ञानानन्तरभाविनः 'धूमाः' इति सकलधूमविषयकालौकिकप्रत्यक्षस्य सर्वानुभवासिद्धस्यानुपपत्तेः । चक्षुःसंयोगस्य धूलीपटले सत्त्वेन तदा धूमत्वेन धूमसमवेतसामान्येन सह चक्षुरिन्द्रियसंयुक्तसमवायात्मकसन्निकर्षाभावात् ।

अथ यत्र 'सुरभि चन्दनम्' इत्यादौ चन्दनांशे लौकिकं चाक्षुषं सौरभांशे च ज्ञानलक्षणसन्निकर्षजन्यालौकिकं चाक्षुषम्, तत्र ज्ञानलक्षणात्मकसन्निकर्षद्वारा चक्षुरिन्द्रियसम्बद्धसौरभविशेष्यक—'सुरभि चन्दनम्' इति ज्ञानप्रकारताविशिष्टसौरभत्वप्रत्यासत्त्या सकलसौरभविशेष्यकचाक्षुषापत्तिः स्यात् । न चेदमिष्टम्, सामान्यप्रत्यासत्त्या बहिरिन्द्रियेण सर्वांशे लौकिकभानस्यानुभवविरुद्धत्वात् । विनश्यदवस्थचक्षुःसंयोगाच्च घटचाक्षुषोत्तरं तादृशचाक्षुषज्ञानात्मकेन्द्रियसम्बन्धविशिष्टनिष्ठलौकिकविशेष्यताशालिपूर्वोक्तचाक्षुषज्ञानप्रकारीभूत—घटत्वात्मकसामान्यलक्षणाप्रत्यासत्त्या सकलघटविषयकचाक्षुषापत्तिः । तदभ्युपगमे च तादृश-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

लौकिकचाक्षुषात्मकज्ञानप्रकारीभूतघटत्वस्यैव प्रत्यासत्तित्वसम्भवेन तदुत्तरम्, पुनस्तथैव चानन्तरभाव्यलौकिकचाक्षुषात्मकज्ञानप्रकारतापन्नघटत्वस्य प्रत्यासत्तित्वसम्भवे सामान्यलक्षणाजन्यचाक्षुषधाराप्रसङ्ग इति चेन्न, बहिरिन्द्रियेण सामान्यलक्षणासन्निकर्षद्वारा प्रत्यक्षे जननीये इन्द्रियसम्बद्धविशेष्यज्ञानप्रकारतापन्नसामान्यात्मकसन्निकर्षघटकसम्बन्धस्य लौकिकस्यैव ग्रहणात्। यथा चोक्तं दीधितौ—'**अत्र च बहिरिन्द्रियस्य लौकिकः सम्बन्धो ज्ञानस्य तत्तदिन्द्रियजन्यत्वं च नियामकम्**[1]' इति।

एवञ्च न पूर्वोक्तः चाक्षुषधाराप्रसङ्गः, चक्षुःसंयोगविगमे घटादौ ज्ञानात्मकचक्षुःसन्निकर्षत्वेऽपि चक्षुर्लौकिकसन्निकर्षाभावेन विवक्षितसामान्यात्मकसामान्यप्रत्यासत्त्यभावादुक्तरीत्या चाक्षुषधाराया आपादयितुमशक्यत्वात्।

न चैवमपि 'सुरभि चन्दनम्' इति प्रत्यक्षोत्तरं सौरभत्वसामान्यप्रत्यासत्त्या पूर्वोक्तो यावत्सौरभविशेष्यकचाक्षुषप्रसङ्गस्तदवस्थ एव सौरभस्य चक्षुःसंयुक्तसमवायात्मकलौकिकसन्निकर्षवत्तया सौरभत्वस्य चक्षुर्लौकिकसन्निकर्षविशिष्टविशेष्यक 'सुरभि चन्दनम्' इति चाक्षुषप्रकारतापन्नसौरभत्वरूपायाः सामान्यप्रत्यासत्तेरक्षुण्णत्वादिति वाच्यम्, उक्तसामान्यप्रत्यासत्तिशरीरे चक्षुर्लौकिकसन्निकर्षविशिष्टविशेष्यकत्वं विहाय चक्षुर्लौकिकसन्निकर्षप्रयुक्तविशेष्यतानिरूपितत्वस्य चाक्षुषप्रकारतायां निवेशेन दोषाभावात्।

अथैवं गुरुत्वत्वेन यत्किञ्चिद् गुरुत्वोपस्थित्यनन्तरं सकलगुरुत्वविषयकमानसप्रत्यक्षस्यानुपपत्तिर्गुरुत्वस्यातीन्द्रियतयेन्द्रियेण सह लौकिकसम्बन्धेन सम्बद्धविशेष्यकज्ञानप्रकारीभूतसामान्यस्यासम्भवात् लौकिकविशेष्यताशालिमानसप्रकारताविशिष्टगुरुत्वत्वात्मकसामान्यस्य चाप्रसिद्धचरत्वादिति चेत्, सत्यम्, इन्द्रियसम्बद्धविशेष्यकज्ञानप्रकारीभूतसामान्यस्य बहिरिन्द्रियजन्यसकलघटादिप्रत्यक्षस्थल एव सन्निकर्षविधया कारणत्वोपगमान्मनःकरणकसकलघटादिविषयकप्रत्यक्षस्थले च केवलज्ञानप्रकारीभूतसामान्यस्यैव सन्निकर्षत्वस्वीकारात्। तथा च गुरुत्वोपस्थित्यात्मकज्ञानप्रकारीभूतगुरुत्वत्वसन्निकर्षस्यैव तत्र कारणत्वसम्भवेन सकलगुरुत्वविषयकमानसप्रत्यक्षोत्पत्तौ न किञ्चिद् बाधकमिति।

अनयैव रीत्या शब्दादिना यत्किञ्चित् पिशाचाद्युपस्थितौ मानसस्य सकलपिशाचादिबोधस्याप्युपपत्तिरिति।

तदुक्तं [2]दीधितिकारैरपि—'**एवं चाणुत्वेन यत्किञ्चिदणूपस्थितावपि सकलाणुगोचरो मानसो बोध इति वदन्ति**' इति।

अथ यत्किञ्चिद् दण्डप्रकारकपुरुषविशेष्यकचाक्षुषज्ञानानन्तरं दण्डवत्त्वात्मकसन्निकर्षाज्जायमानस्य सर्वदण्डिविषयकप्रत्यक्षस्यानुपपत्तिः, यत्किञ्चिद् दण्डस्यैव चक्षुरिन्द्रियसम्बद्धविशेष्यकज्ञानप्रकारतापन्नत्वेन तस्य दण्डान्तरवत्यभावादिति चेन्न, दण्डवत्त्वावच्छिन्नप्रकारताकालौकिकप्रत्यक्षं प्रति चक्षुरिन्द्रियसम्बद्धविशेष्यकज्ञानप्रकारतायामवच्छेदकस्य दण्डत्वात्मकसामान्यस्यैव स्वाश्रयाश्रयत्वसम्बन्धेन हेतुत्वोपगमेन तस्य च तादृशसम्बन्धेन दण्डान्तरवति सर्वत्र विद्यमानत्वेन समेषां दण्डान्तरवतां प्रत्यक्षोपपत्तौ बाधकाभावात्। तथैव दण्डत्वावच्छिन्ना-

१. सामान्यलक्षणग्रन्थे पृ० १६।   २. सामान्यलक्षणग्रन्थे पृ० २७।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

वच्छेदकताकप्रकारताक—दण्डिमानित्याकारकप्रत्यक्षं प्रति चक्षुरिन्द्रियसम्बद्धविशेष्यकज्ञानप्रकारतावच्छेदकतावच्छेदकस्य दण्डत्वात्मकसामान्यस्य स्वाश्रयाश्रयाश्रयत्वसम्बन्धेन हेतुत्वम्।

एवं दण्डत्वावच्छिन्नावच्छेदकतावच्छेदकताकप्रकारताक – दण्डिमद्वानित्याकारकप्रत्यक्षं प्रति चक्षुरिन्द्रियसम्बद्धविशेष्यकज्ञानप्रकारतावच्छेदकतावच्छेदकस्य दण्डत्वात्मकसामान्यस्य स्वाश्रयाश्रयाश्रयाश्रयत्वसम्बन्धेन हेतुत्वमित्यादिरित्याऽन्ततोगत्वा सामान्यस्यैव हेतुत्वं व्यवस्थाप्यत इति विवेचनीयमिति।

अथैवमपि संयोगेन 'दण्डवत्पुरुषः' इति ज्ञानोत्तरमिन्द्रियसम्बद्धविशेष्यकज्ञानप्रकारीभूतदण्डस्य कालिकेन महाकाले जन्ये च घटपटादौ सर्वत्र सत्त्वाद् 'दण्डवान् कालः, दण्डवान् घटः' इत्याद्यलौकिकचाक्षुषापत्तिः कारणीभूतपूर्वोक्तज्ञानीयप्रकारताविशिष्टस्य दण्डस्थकालिकेन महाकाले जन्यमात्रे च सत्त्वादिति चेन्न, इन्द्रियसम्बद्धविशेष्यकज्ञानीययत्सम्बन्धावच्छिन्नप्रकारताविशिष्टं सामान्यं भवति, तत्सम्बन्धेन सामान्यवतां प्रत्यासत्तित्वोपगमे तादृशदोषानवकाशात्। प्रकृते च संयोगेन दण्डवत्पुरुषज्ञानप्रकारीभूते दण्डे संयोगावच्छिन्ना प्रकारतेति संयोगेनैव दण्डवतां पुरुषाणामलौकिकप्रत्यक्षे निरुक्तसंयोगेन दण्डस्य सन्निकर्षत्वम्, न तु कालिकेनेति न पूर्वोक्तदूषणानां प्रसरः। अत्र सर्वत्र कार्यतावच्छेदकसम्बन्धो लौकिकमुख्यविशेष्यत्वम्, कारणतावच्छेदकसम्बन्धश्च यथायथं समवायः, स्वाश्रयाश्रयत्वम्, स्वाश्रयाश्रयाश्रयत्वमित्यादिर्भवतीति बोद्धव्यम्।

नव्यास्तु ज्ञायमानसामान्यस्य प्रत्यासत्तित्वे विनष्टतद्दण्डप्रकारकयत्किञ्चिद्देशविशेष्यकभ्रमात्मकप्रत्यक्षानन्तरं जायमानं तद्दण्डप्रकारेण वास्तवस्य तद्दण्डाश्रयस्यालौकिकप्रत्यक्षं न स्याद्, इन्द्रियसम्बद्धविशेष्यज्ञानप्रकारतापन्नतद्दण्डात्मकसामान्यस्य तदानीमभावात्। अत एव न ज्ञायमानसामान्यं प्रत्यासत्तिः, किन्तु सामान्यं लक्षणमर्थाद् विषयतया निरूपकं यस्याः प्रत्यासत्तेरिति शब्दव्युत्पत्त्या सामान्यज्ञानं प्रत्यासत्तिरिति स्वीकर्तुमुचितम्। तथा च सामान्यस्यातीतानागतत्वेऽपि सामान्यज्ञानस्य सम्भवेन सामान्यज्ञानरूपायाः प्रत्यासत्तेरक्षुण्णतया नातीतादिसामान्यप्रकारेण तदाश्रयस्यालौकिकप्रत्यक्षानुपपत्तिः। एतन्मते 'दण्डाः' इत्याकारकालौकिकप्रत्यक्षस्थले दण्डत्वप्रकारकालौकिकप्रत्यक्षत्वं कार्यतावच्छेदकम्, दण्डत्वज्ञानत्वं कारणतावच्छेदकम्, स्वप्रकारीभूतदण्डत्वादिसामान्याश्रयत्वं कार्यतावच्छेदकसम्बन्धः, स्वविषयदण्डत्वादिसामान्याश्रयत्वं च कारणतावच्छेदकसम्बन्धः। एवञ्चात्र समवायेन तद्धर्मप्रकारकप्रत्यक्षत्वावच्छिन्नं प्रति समवायेन तद्धर्मविषयकज्ञानत्वेन हेतुत्वमिति रीत्या आत्मनिष्ठप्रत्यासत्त्या कार्यकारणभावः।

अत्रापि तद्विषयकज्ञानत्वेन हेतुत्वे उच्यमाने समवायेन दण्डत्वप्रकारकज्ञानोत्तरं कालिकेन दण्डत्वाश्रयस्य यावतः प्रत्यक्षापत्तिः स्यात्, अतस्तत्सम्बन्धेन तत्प्रकारकतदाश्रयप्रत्यक्षं प्रति तत्सम्बन्धावच्छिन्नतन्निष्ठविषयताकज्ञानस्य हेतुत्वमिति वक्तव्यम्। न चैवं निर्विकल्पकस्य कारणत्वानुपपत्तिस्तदीयविषयत्वस्य सम्बन्धानवच्छिन्नत्वादिति वाच्यम्; तत्संग्रहार्थं तत्सम्बन्धावच्छिन्नत्वस्य स्थाने तदितरसम्बन्धानवच्छिन्नत्वस्य निवेशेन दोषाभावात्।

वस्तुतस्तु पूर्वोक्तरीत्या आत्मनिष्ठप्रत्यासत्त्या कार्यकारणभावो नोचितः, कारणतावच्छेदकगर्भे तत्तत्सामान्याश्रयस्य प्रवेशने गौरवात्। किन्तु स्वप्रकारीभूतदण्डत्वादिसामान्या

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

श्रयनिष्ठविशेष्यतासम्बन्धेन प्रत्यक्षं प्रति स्वविषयीभूतदण्डत्वादिसामान्याश्रयनिष्ठविशेष्यता-सम्बन्धेन ज्ञानं कारणमिति रीत्या विषयनिष्ठप्रत्यासत्त्यैव कार्यकारणभावः कल्पनीयः।

अथ सामान्यज्ञानस्यैव सन्निकर्षत्वाभ्युपगमे घटादिना सह चक्षुःसंयोगं विनापि यदा स्मरणाद्यात्मकं घटज्ञानं जायते, तदा यावद्घटविषयकालौकिकप्रत्यक्षोत्पादापत्तिः स्यादिति चेन्न, तत्तदिन्द्रियेण तत्तद्धर्माश्रयस्य सामान्यलक्षणासन्निकर्षद्वारा लौकिकप्रत्यक्षात्मके ज्ञाने जननीये सामान्यस्य यत्किञ्चिद् धर्मिणि सामान्यप्रकारकचक्षुरिन्द्रियजन्यलौकिकप्रत्यक्षज्ञानस्य सामग्र्याऽप्यपेक्षणीयत्वेन तादृशदोषाभावात्। तदिदमुक्तं दीधितिकारैः[1]—**'अपेक्षणीयं च तदिन्द्रियकरणकतद्धर्मवत्त्वबोधसामग्र्यन्तरम्'** इति।

नन्वेवं तत्प्रकारकप्रत्यक्षं प्रति निर्विकल्पकादिसाधारणतद्विषयकज्ञानत्वेन हेतुत्वं व्यवस्थाप्य पुनश्चातिप्रसङ्गवारणाय कारणसामग्र्यां तदिन्द्रियजन्यत्वं निवेश्यते। तदपेक्षया प्राचीनमतानुसारेणेन्द्रियसम्बद्धविशेष्यकज्ञानप्रकारीभूतेत्यादिरीत्या कार्यकारणभावस्थापन एव लाघवमिति चेन्न, प्राचीनमतेऽपि कारणसामग्रीनिवेशं विनाऽनिस्तारात्। तथा हि—यदा विद्युत्सम्पातकालावच्छेदेन चक्षुर्घटसन्निकर्षस्तदनन्तरं निर्विकल्पात्मकं घटघटत्वयोश्चाक्षुषं ततश्च घटत्वप्रकारकचाक्षुषं विद्युत्संयोगनाशश्च, तदा तादृशसंयोगनाशानन्तरं न ह्यलौकिकं लौकिकं चाक्षुषमनुभवसिद्धम्। किन्त्विन्द्रियसम्बद्धविशेष्यकज्ञानीयप्रकारतापन्नसामान्यमात्रस्य कारणत्वाभिधाने विद्युत्संयोगनाशेऽपीन्द्रियसंयोगादेस्तत्र सत्त्वेन तदानीं घटत्वादिना निखिलघट-प्रत्यक्षापत्तिः स्यात्। तत्स्वीकारे तु तत्कालेऽपि चक्षुःसन्निकर्षसत्वात् तत्सम्बद्धविशेष्यका-लौकिकात्मकज्ञानप्रकारतापन्नघटत्वस्य च सत्त्वात् पुनरपि प्रत्यक्षोत्पादप्रसङ्गः। तथा च चाक्षुष-धारापत्तिः। सामग्र्यन्तरस्य सहकारिकारणत्वाभिधाने तु न तादृशापत्तिः, आलोकसंयोगादि-घटित-सामग्र्या उत्तरकाले विरहात्। एवञ्चावश्यक्लृप्तसामग्र्यन्तरापेक्षाया हेतुत्वस्वीकारेणै-वोत्पत्तौ कार्यकारणभावे तत्तदिन्द्रियजन्यत्वनिवेशनं प्राचीनानां व्यर्थमेवेत्याकलनीयम्। तथा चोपरिष्टादुक्तं दीधितिकारैः[2]—**'अत एवान्धतमसे सौदामिनीसम्पातजनितेऽपि द्रव्यप्रत्यक्षे चरमं न चाक्षुषो निखिलद्रव्यसाक्षात्कारसन्तानः'** इति।

ज्ञानलक्षणसन्निकर्षनिरूपणम्

"सुरभि चन्दनम्" इत्यादौ सौरभत्वादिप्रकारकचन्दनविशेष्यकचाक्षुषे चक्षुरयोग्यस्य सौरभादेरपि भानं यत्र भ्रमाद् भवति, तत्र न लौकिकसन्निकर्षस्य कथमपि सम्भवः, नापि सामान्यलक्षणसन्निकर्षेण तद्भानं सम्भवति, तदर्थमपेक्षितस्य सौरभत्वत्वादिज्ञानस्याभावात्। अत एव तत्र ज्ञानलक्षणसन्निकर्षात् तद्भानमित्यभ्युपेयते।

यत्र च शुक्तिकया चक्षुःसन्निकर्षानन्तरं तस्याः शुक्तिकात्वाग्रहणेऽपि 'इदं रजतम्' इति ज्ञानं कस्यचित् पुंसो जायते, तत्र रजतत्वेन सह चक्षुषो लौकिकसन्निकर्षो न वक्तुं शक्यते। नापि सामान्यलक्षणा, तस्याः सामान्याश्रयस्यैव प्रत्यक्षोपधानस्वाभाव्यात्; इदन्त्वेन भासमानायाः शुक्तेस्तदनाश्रयतया तया शुक्तौ 'इदं रजतम्' इति प्रत्यक्षजननासम्भवात्। तत्रापि रजतत्वप्रकारकस्मरणात्मकज्ञानलक्षणाख्यसन्निकर्षादेव रजतत्वेन शुक्तेः प्रत्यक्षं भवतीत्यभ्युपेयते।

---

१. सामान्यलक्षणाग्रन्थे पृ० ६०। २. सामान्यलक्षणाग्रन्थे पृ० ६१।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तत्स्वरूपञ्चेत्थम्—यत्रैकदा कश्चित् पुरुषः चन्दनं घ्रात्वा सुरभि चन्दनमित्यवधृत्य पुनः कालान्तरे दूरतश्चन्दनमजिघ्रन्नपि दृष्ट्वैव तत् 'सुरभि चन्दनम्' इति चक्षुषैवाध्यवस्यति, तत्र सुरभि चन्दनमित्याकारकज्ञाने सौरभं चन्दनं चन्दनत्वं च भासन्ते। तादृशस्थले चक्षुःसंयोगेन चन्दनज्ञानम्, चक्षुस्संयुक्तसमवायेन चन्दनत्वज्ञानं च लौकिकप्रत्यक्षात्मकमेव, तयोः लौकिकसन्निकर्षवत्वात्। किन्तु घ्राणसन्निकर्षं विनापि जायमानं सौरभज्ञानं न केनचिल्लौकिक-सन्निकर्षेण, अपि तु पूर्वानुभवोद्भूतोद्बुद्धसंस्कारोद्भावितेन चक्षुःसंयुक्तमनःसंयुक्तात्मसमवेत-स्मरणात्मकज्ञानरूपसन्निकर्षेणोत्पद्यत इति तदलौकिकप्रत्यक्षात्मकमेव।

न च सौरभांशे स्मरणमुपगन्तव्यमिति वाच्यम्; स्मृतित्वप्रत्यक्षत्वयोः साङ्कर्यापत्तेः, अतो ज्ञानलक्षणसन्निकर्षमहिम्ना सौरभमवगाहमानं 'सुरभि चन्दनम्' इत्येकं विशिष्टप्रत्यक्ष-मुत्पद्यत इत्येव स्वीकार्यम्।

सामान्यलक्षणज्ञानलक्षणयोर्भेदस्य स्पष्टीकरणम्

सामान्यलक्षणा हि सामान्याश्रयाणां धर्मिणां ज्ञानं जनयति। तस्याश्च स्वप्रकारीभूत-सामान्यवत्त्वसम्बन्धेन प्रत्यक्षं प्रति स्वविषयसामान्यवत्त्वसम्बन्धेन हेतुत्वम्। ज्ञानलक्षणा तु यस्य सौरभादेः स्मरणाद्यात्मकं ज्ञानं प्राग् जातं तस्यैव सौरभाद्यात्मकधर्मस्य ज्ञानं जनयति, न तु तदाश्रयस्य चन्दनादेरपीति। एवञ्च प्रकारतासम्बन्धेन प्रत्यक्षं प्रति विषयतासम्बन्धेन ज्ञानलक्षणसन्निकर्षस्य हेतुत्वं पर्यवस्यति। तथा च नव्यतार्किकमत उभयोर्ज्ञानरूपत्वेऽपि फलवैचित्र्यात् प्रत्यासत्तितावच्छेदकसम्बन्धभेदाच्च भेद इति सिद्धम्। तदुक्तं भाषापरिच्छेदे—

आसत्तिराश्रयाणां तु सामान्यज्ञानमिष्यते।
तदिन्द्रियजतद्धर्मबोधसामग्र्यपेक्ष्यते ॥
विषयी यस्य यस्यैव व्यापारो ज्ञानलक्षणः। इति।[1]

अलौकिकसन्निकर्षानभ्युपगमवादिमतम्

दीधितिकारप्रभृतिनव्यनैयायिकानाम्, मीमांसकानां वेदान्तिनां च मते सामान्यलक्षणा नाम ज्ञानलक्षणा च नाम नास्ति काचित् प्रत्यासत्तिः। न च तदनभ्युपगमे महानसीयधूमे सहैवेन्द्रियस्य सन्निकर्षात् तत्रैव व्याप्तिग्रहसम्भवे पर्वतीयधूमादनुमित्यनुपपत्तिः, तदभ्युपगमे तु धूमत्वादेरेव प्रत्यासत्तित्वात्। तया च प्रत्यासत्त्या पर्वतीयधूमस्यापि प्रत्यासन्नत्वेन तत्रापि व्याप्तिग्रहसम्भवे न काप्यनुपपत्तिरिति वाच्यम्; सकलधूमगतवह्निव्याप्यत्वस्यैकत्वेन महानसीय-धूमे गृहीतस्य तस्यैव पर्वतीयधूमेऽप्यक्षतत्वेन तदवगत्यर्थं सामान्यलक्षणाया अकिञ्चित्करत्वात्।

ननु यो यत्र पूर्वं प्रत्यक्षतया मातः, तस्यैव तत्र संस्कारवशादलौकिकप्रत्यक्षे मानम्, यत्र च यस्य पूर्वं न कदापि प्रत्यक्षतया मानं तस्य तत्र धीरनुमित्याद्यात्मिकैव, न तु प्रत्यक्षा-त्मिकेति प्राचां मते; उपनयसन्निकर्षास्वीकर्तृमते, हेतुनिष्ठं साध्यसामानाधिकरण्यमेव व्याप्तिः न तु साध्यसमानाधिकरणवृत्तिहेतुतावच्छेदकमिति पक्षे च महानसीय एव धूमे गृहीतस्मृत-व्याप्तेः पर्वतीयधूमे प्रत्यक्षासम्भव इति चेन्न, व्याप्तिस्मृतिप्रकारेण पक्षधर्मताज्ञानस्यानुमिति-हेतुत्वोपगमेन महानसीयस्यैव धूमस्य धूमत्वेन व्याप्तिस्मृतिविषयत्वेऽपि सामान्यलक्षणां विना

---

१. भाषापरिच्छेदे, कारिके ६४-६५।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तादृशस्मृतिप्रकारीभूतधूमत्वप्रकारेण पर्वतीयधूममवगाहमानस्य पर्वतादौ धर्मिणि वह्निव्याप्य-धूमवत्त्वावगाहिनः परामर्शस्योदये बाधकाभावात् ।

अथ महानसे प्रत्यक्षधूमे वह्निव्याप्यत्वनिर्णयानन्तरं धूमत्वात्मकसामान्यलक्षणसन्निकर्षेण कालान्तरीणदेशान्तरीणसकलधूमानामलौकिकप्रत्यक्षं जायते । ततस्तेषु धूमेषु मध्ये व्याप्यतया गृहीतमहानसीयादिभिन्नधूमेषु वह्निव्यभिचारसंशयो भवति । किन्तु सामान्यलक्षणानभ्युपगमे तस्यानुपपत्तिरुपस्थितेषु महानसीयादिषु वह्निव्याप्यत्वस्य निश्चितत्वादनुपस्थितानां च प्रसिद्ध्यैव संशयधर्मित्वानुपपत्तेरिति चेन्न; धूमत्वेन यत्र धूमे धूमत्वसामानाधिकरण्येन वह्नि-व्याप्तिनिश्चयस्तत्रैव धूमे धूमत्वावच्छेदेन वह्निव्याप्तिं धूमत्वसामानाधिकरण्येन वह्नि-व्यभिचारं च गृह्णतः, संशयस्योत्पत्तेरप्रत्यूहत्वाद् '**घटत्वेनेतरभेदनिश्चयेऽपि पृथिवीत्वाविना तत्र संशयसिषाधयिषे भवत एव**' इत्यादिनैवमाशयकार्थस्य मणिकारैः स्पष्टीकरणात् ।

न च प्राचीनमते यत्र यस्य निश्चयस्तत्र न केनापि प्रकारेण तस्य संशयः, समान-विशेष्यकत्वेनैव तयोर्विरोधोपगमादिति वाच्यम्; समानविषयकसंशयप्रतिबन्धकतायामतिरिक्त-सम्भावनाया उत्तेजकत्वेन 'धूमो वह्निव्याप्यः' इति निश्चयेऽपि 'धूमत्वं वह्निव्याप्यत्वेन निश्चित-तत्तद्धूमभिन्नवृत्तिर्न वेति संशयकाले तादृशसंशयस्य (धूमत्वेन धूमो वह्निव्यभिचारी न वेति संशयस्य) अवश्यमभ्युपगन्तव्यत्वात् प्रामाण्यसंशयकाले विषयसंशयवत् । स्वीकर्त्तव्यमवश्यं चैतत् प्राचीनैरपि । अन्यथा तन्मते 'रूपत्वं पार्थिवादित्रिविधरूपभिन्नवृत्तिर्न वेति संशयकाले वायौ पार्थिवादिरूपविशेषाभावनिश्चयेऽपि जायमानस्य वायू रूपवान्न वेति संशयस्यानुपपत्तिः स्यात् । पार्थिवादिरूपाणि वायुवृत्तित्वाभाववन्तीति निश्चयेऽपि 'रूपत्वं पार्थिवादित्रिविध-रूपभिन्नवृत्तिर्न वेति संशयकाले जायमानस्य' रूपं वायुवृत्तिर्न वेति संशयस्यानुपपत्तिश्च ।

न चैतादृशोत्तेजकस्य सदैव सम्भवे निश्चयस्य प्रतिबन्धकत्वमेव लोकसिद्धं भज्येतेति वाच्यम्; रूपत्वावच्छेदेन पार्थिवादित्रिविधरूपान्यत्वाभावनिश्चयकाले संशयस्य प्रतिबध्यत्वेऽपि तादृशनिश्चयस्य कादाचित्कत्वेन तदभावदशायां संशयस्याप्युपपत्तौ बाधकाभावात् ।

ननु पाकत्वेन यत्किञ्चित् पाकस्य, सुखत्वेन यत्किञ्चित् सुखस्य चोपस्थित्यनन्तरं सामान्यलक्षणया भाविभूतसकलपाकानां तादृशसुखानां चोपस्थितावेव भाविपाकाद्यर्थं चिकीर्षाप्रवृत्त्यादेर्भाविसुखार्थमिच्छायाश्च सम्भवः । सामान्यलक्षणप्रत्यासत्त्यनभ्युपगमे भूतवर्तमानकालिकसिद्धपाकानामुपस्थितिसम्भवेऽपि तेषां सिद्धत्वेन तद्विषयकचिकीर्षायास्तथैव भूतवर्तमानकालिकसुखे चेच्छायाः कथमप्यसम्भवाद् भविष्यत्कालीनानिष्पन्नापाकतथाविध-सुखयोर्ज्ञानस्यैव कथमप्यसम्भवेन तदर्थं प्रवृत्तेरिच्छायाश्च न कथमप्युपपत्तिरिति चेन्न; चिकीर्षेच्छादौ समानप्रकारकत्वमात्रस्यैव नियामकत्वेन निष्पन्नपाकादिगोचरसुखत्वादि-प्रकारकज्ञानादेवाज्ञातसुखादाविच्छायाः सुतरां सम्भवात् ।

न चैवं समानप्रकारत्वस्यैव नियामकत्वे रजतत्वेन प्रकारेण रजतेऽनुभूयमाने घटादौ रजतत्वप्रकारकेच्छाप्रसङ्ग इति वाच्यम्; प्रकाराश्रयत्वस्यापि नियामकत्वोपगमेन तस्या वारणीय-त्वात् । न चैवमपि प्रकाराश्रयत्वस्य नियामकत्वोपगमे रजतभ्रमाच्छुक्ताविच्छानुदयप्रसङ्गस्तत्र प्रकाराश्रयत्वस्याभावादिति वाच्यम्, इष्टत्वात् । शुक्तौ रजतभ्रमस्थले रजत एवेच्छेत्युपगमात् । तद्रजतं तु हट्टस्थमनिर्वचनीयं वा भवतु तत्तन्मतेष्वित्यन्यदेतत् ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अथाभावज्ञाने प्रतियोगिज्ञानस्य जनकतायाः **'प्रतियोगिविशेषिताभावज्ञानं च विशिष्टवैशिष्ट्यबोधमर्यादां नातिशेत इति दर्शनात्'**[1] इत्यादिना व्युत्पत्तिवादादावुक्तत्वेन यावत् तेजोऽभावरूपस्थतमसः प्रत्यक्षानुपपत्तिः, सामान्यलक्षणां विना प्रतियोगिकुक्षिप्रविष्टसकलप्रतियोग्युपस्थितेरसम्भवादिति चेन्न, अभावज्ञाने प्रतियोगितावच्छेदकप्रकारज्ञानस्यैव कारणतया यावत्प्रतियोगिज्ञानस्याकारणत्वेन प्रतियोगिकुक्षिनिक्षिप्तसकलतेजोज्ञानस्यानपेक्षिततया सकलप्रतियोगिज्ञानजनकत्वेनाभिमतस्य सामान्यलक्षणासन्निकर्षस्यानावश्यकत्वात् ।

अथैवमपि गोत्वाभावज्ञाने गोत्वत्वप्रकारकज्ञानस्यापेक्षितत्वेन गोत्वत्वस्य च गवेतरावृत्तित्वे सति सकलगोवृत्तित्वरूपत्वेन यावद्गोघटितत्वात् तज्ज्ञानस्य च सामान्यप्रत्यासत्तिमन्तरेणासम्भवाद् गोत्वाभावज्ञानानुपपत्तिरिति चेन्न, यत्किञ्चिद् गोव्यक्तिमात्रद्वारेणापि गोत्वत्वग्रहसम्भवेनोक्तानुपपत्त्यभावात् । तथा हि—यथा 'घटो नास्ति' इत्यादिज्ञाने घटसामान्याभावस्य सकलघटप्रतियोगिकस्य भानेऽप्यभावविशेषणतया कस्यचिदेव घटस्य भानम्, न तु सर्वस्य, तथैव 'गोत्वं नास्ति, इत्यादिज्ञाने यावद्गोव्यक्तिघटितगोत्वत्वावच्छिन्नप्रतियोगिताकगोत्वाभावस्य भानेऽपि प्रतियोगितावच्छेदककुक्षौ केनचिदेकेन गवा आधेयतासम्बन्धेन विशिष्टस्य गोत्वस्य भानमुपेयम्, न तु तत्र सकलगोभानमभ्युपेयम्, अतो न सामान्यलक्षणाया गोत्वाभावग्रहानुपपत्तिः । उक्तं चेदं न्यायभाष्यकारैरपि भङ्ग्यन्तरेण—

'अजां ग्रामं नय, सर्पिराहर, ब्राह्मणं भोजयेति सामान्यशब्दाः सन्तोऽर्थावयवेषु प्रयुज्यन्ते, सामर्थ्याद् यत्रार्थक्रियादेशना सम्भवति तत्र प्रवर्तन्ते, नार्थसामान्ये क्रियादेशनाऽसम्भवात्'[2] इति ।

अस्तु वा गोत्वाभावप्रतियोगितावच्छेदककुक्षौ सकलगोवृत्तित्वप्रवेशः, तथापि तस्य गोवृत्तिभेदप्रतियोगितानवच्छेदकत्वरूपत्वेन तावतापि न सकलगोभानस्यापेक्षा, न वा तदर्थं सामान्यलक्षणासन्निकर्षस्यावश्यकत्वमिति ।

न च प्रागभावभानार्थं साऽवश्यमभ्युपगन्तव्येति । तथाहि— प्रागभावे वर्तमानस्यातीतस्य च प्रतियोगितया बाधेनानागतस्यैव तत्र तत्प्रत्यक्षे भानमुपेयम्, तदर्थं चानागतभासकस्य ज्ञानलक्षणसन्निकर्षस्य सम्पादनार्थं सामान्यलक्षणाप्रत्यासत्तिर्नूनं स्वीकार्येति वाच्यम्, वर्तमानघटादेरेव तत्र विशेषणतया भानाभ्युपगमात् । न चैवं प्रागभावप्रत्ययस्य भ्रमत्वापत्तिरिति शङ्क्यम्, प्रागभावे घटत्वावच्छिन्नाभावासत्त्वेन घटत्वावच्छिन्नाभाववति घटत्वावच्छिन्नप्रकारकत्वलक्षणस्य भ्रमत्वस्यासम्भवात् । अतो न प्रागभावभानार्थं कथञ्चिदपि सामान्यलक्षणाया आवश्यकत्वमिति ।

अथ तथाप्यनुमितेः पूर्वं साध्यप्रसिद्धेरावश्यकत्वात्, तस्याश्च सामान्यलक्षणाभ्युपगमं विनाऽसम्भवात् तदभ्युपगम आवश्यकः ।

न चानुमानान्तरात् साध्यप्रसिद्धिस्सेत्स्यतीति वाच्यम्; तस्मिन्नप्यनुमाने साध्यप्रसिद्ध्यर्थमनुमानान्तरस्याप्याश्रयणीयत्वेन पुनस्तद्रीत्यैवानुमानान्तरेष्वनुधावनेऽनवस्था स्यादिति चेन्न, साध्यतावच्छेदकप्रकारकज्ञानादेव साध्यविशेषणकपक्षविशेष्यकानुमितिसम्भवात् ।

---

१. व्युत्पत्तिवादे प्रथमखण्डे (मूलपुस्तके पृ० ५) ।

२. न्यायसूत्रे १।२।१२ संख्यके भाष्यम् ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

न चापूर्वव्यक्तिसाध्यकस्थले इतरभेदाद्यनुमितौ साध्यतावच्छेदकप्रकारकज्ञानासम्भव इति वाच्यम्, तत्र सामान्यलक्षणयापि साध्यप्रसिद्ध्यसामर्थ्येन तुल्यदोषात्। यथाकथञ्चित् प्रसिद्ध्यन्वेषणे त्वितरभेदानुयोगितावच्छेदकभिन्नधर्मवत्त्वादिप्रकारेण प्रसिद्धिशरणीकरणस्य पुनस्तुल्यत्वात्।

किञ्च घटत्वेन सन्निकृष्टघटव्यक्तिज्ञानानन्तरं तत्समानाकारकमसन्निकृष्टविषयकं ज्ञानान्तरमुत्पद्यत इति नानुभवसिद्धम्, घटत्वेनेमं घटं साक्षात्करोमि न व्यवहितमिति सर्वेषामेव प्रतीतेः। अन्यथा सकलघटव्यक्तीरहं साक्षात्करोमीत्यनुव्यवसायः स्यात्।

ज्ञानलक्षणाप्रतिक्षेपप्रकारः

चन्दने सौरभत्वप्रकारकचाक्षुषभ्रमाय ज्ञानलक्षणासन्निकर्षकल्पनमपि न युक्तम्, चन्दने सौरभत्वभ्रमजनकदोषकाले चन्दनत्वेन सौरभत्वानुमानस्यैव सम्भवेन तादृशभ्रमस्य चानुमिति-रूपत्वेन चाक्षुषत्वाभावात्, तदर्थं ज्ञानलक्षणासन्निकर्षस्यानावश्यकत्वात्। तत्र ज्ञानलक्षणया मानस्वीकारे सर्वत्र पर्वतादौ ज्ञानलक्षणयैव वह्न्यादेर्भानसम्भवेनानुमानकथाया विलोपापत्तिः स्यात्। तदुक्तम्[1]—**'एतेन सुरभिचन्दनमित्यादिविशिष्टज्ञानाय कल्पिताज्ञानलक्षणा प्रत्यासत्तिरपि निरस्ता'** इति। **'वह्न्यादेः प्रत्यक्षत्वापत्तावनुमानाद्युच्छेदापत्तेः'** इति।

न च बहिरिन्द्रियस्य स्वायोग्यमुख्यविशेष्यकज्ञानजनकत्वेन 'परमाणू रूपवान्' इत्यादिज्ञानस्यालौकिकचाक्षुषत्वाद्यसम्भवेन नानुमितेर्विलोपापत्तिरिति वाच्यम्, तत्रापि मानसमानसम्भवेन विलोपापत्त्युद्धारस्य कर्तुमशक्यत्वादिति।

अलौकिकसन्निकर्षव्यवस्थापनम्

तदेतत्प्रतिक्षेपो न विचारारूढः, ज्ञानान्तरोपनीतमाने 'सुरभि चन्दनम्' इत्यादावनु-मिनोमीत्यनुव्यवसायस्य कुत्राप्यदर्शनानुभवविरोधात्, विजातीयव्यवहारान्यथानुपपत्त्या विजातीयज्ञानसिद्धेः।

उपनीतमानस्य साधारणकारणान्तरनिरपेक्षमनोजन्यत्वेनानुमितौ ह्यसाधारणकारणतया परामर्शादेरपेक्षादर्शनान्न 'सुरभि चन्दनम्' इत्यादिज्ञानानामनुमितित्वं सम्भावयितुमपि शक्य-मिति विद्वद्वरैर्विवेचनीयमिति।

किञ्चाप्रसिद्धसाध्यके व्यतिरेकिणि ज्ञानान्तरोपनयासम्भवेन मानसभिन्नलिङ्गपरामर्शा-साधारणकारणकानुमितिज्ञानसिद्धौ, अन्यत्रापि लिङ्गपरामर्शघटितसामग्रीसमवधानेऽनुमिति-निष्प्रत्यूहेवेति न तदुच्छेदशङ्कापीति।

● ● ●

---

१. अद्वैतसिद्धौ प्रथमपरिच्छेदे प्रत्यक्षबाधोद्धारे पृ० ३४२। निर्णयसागरप्रेसतः १९३७ ख्रिस्ताब्दे प्रकाशिता।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

हेत्वलङ्कारविमर्शः

डॉ० वायुनन्दनपाण्डेयः
प्राध्यापकः—साहित्यविभागे
सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य

चमत्कारिशब्दार्थमयस्य काव्यस्य चमत्काराधायकेषु तत्त्वेषु वर्तते विशिष्टं स्थान-
मलङ्काराणामिति न तिरोहितं मतिमताम्। अस्फुटेऽपि रसे यश्चमत्कारोऽनुभूयते सहृदयै,
सोऽलङ्कारकृत एव। यद्यप्यलङ्काराणामपि रसाननुगुणतया योजना चमत्कारमपकर्षति,
तथाऽपि शक्तिविरहितानामभ्यासशालिनां वा काव्ये एवैषा स्थितिः, न सार्वत्रिकी,
उक्तिवैचित्र्यमन्तरा काव्यत्वानापत्तेः; वैचित्र्यमेवालङ्कारः।

अलङ्कृता वागेव सत्कवित्वमादधातीति निश्चित्यैव केचनाचार्या अलङ्कारानेव काव्य-
जीवातुभूतत्वेनाङ्गीकुर्वन्ति। अपरे काव्यजीवितं वक्रोक्तिमङ्गीकृत्य तानेव पुष्णन्ति वक्रो-
क्त्या। ध्वने रसस्य वा निरतिशयास्वादमयस्य काव्यात्मत्वं निरूपयन्त आचार्या अपि
काव्यशरीरतया शब्दार्थयुगलं व्याहरन्तस्तत्त्वमिदं स्फुटीकुर्वन्ति। यतो हि वाच्यार्थं शरीर-
स्वीकृत्य वाच्यानलङ्कारान् शरीरघटकतया प्रविष्टान् परिहर्तुमक्षमास्ते। वाच्यार्थश्चोपमादिभि-
प्रकारैः प्रसिद्धः प्राचीनाचार्यैर्बहुधा वर्णितश्च। अमुमेवाभिप्रायं मनसिकृत्य न हि काव्ये
नालङ्कारयोगः क्रियते, प्रत्युत **'सालङ्कारस्य काव्यता'**[1] इति कुन्तकः कवते। अतो वाच्या-
लङ्काराः शरीरभूता व्यङ्ग्याश्चात्मभूता इति सर्वथाऽलङ्काराणां काव्ये महत्त्वमतिशयितम्।

अलङ्काराणां काव्ये विनिवेशने या समीक्षा प्रादुर्भाविताऽऽनन्दवर्धनाचार्यैः,[2] साऽपि
काव्यात्मनो ध्वनेर्निरतिशयत्वोपपादनाय, न त्वलङ्कारापकर्षनिरूपणाय। रसभावाद्यवहितस्य
कवेः स्वयमलङ्कारा अहमहमिकया परापतन्ति, तन्निबन्धे यत्नान्तरानुष्ठाननिषेधे[3] तात्पर्यम्
अत एव सर्वैरालङ्कारिकैरनेकधा अलङ्कारा निरूपिताः।

यदपि **'अनलङ्कृती पुनः क्वापि'**[4] इत्युक्तम्, तदपि रसादिमये काव्येऽप्यस्फुटालङ्का-
रापेक्षानिरूपणाय न सर्वथाऽलङ्कारनिषेधाय। अर्थाद् ध्वनिरात्मा, शब्दार्थौ शरीरम्। अर्थश्च
द्विविधः—वस्तुरूपोऽलङ्काररूपश्च। तत्र वस्तुरूपादर्थाद् यत्र रसादिध्वनेरभिव्यक्तिस्तत्र रसेनैव
चमत्कारे सति न स्फुटालङ्कारापेक्षेति। प्रायः सर्वत्रालङ्कारविशिष्टयोरेव शब्दार्थयोः काव्ये
प्रयोगात् काव्यशब्दार्थयोर्लौकिकशास्त्रीयशब्दार्थापेक्षया वैशिष्ट्यम्। अत एव लोकशास्त्र-
विलक्षणशब्दार्थमयं काव्यमुच्यते। अलङ्काराभावे वैलक्षण्यं किं मूलं स्यात्?

ते चालङ्काराः के इति जिज्ञासायां प्रतिभाति—लोके शास्त्रे च ये व्यवहारप्रकारास्त
एव वक्ररीत्या वैचित्र्येण वोपपादिताः स्वाश्रयान् काव्याङ्गभूतान् शब्दार्थानलङ्कुर्वन्तस्तद्-
द्वारात्मभूतान् रसादीनुत्कर्षयन्तोऽलङ्कारा उच्यते। तदुक्तं भामहेन—

---

१. वक्रोक्तिजीवितम् १।६। २. ध्वन्यालोके २।१८–१९।
३. ध्वन्यालोके २।१६। ४. काव्यप्रकाशे १।४।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सैषा सर्वत्र वक्रोक्तिरनयाऽर्थो विभाव्यते ।
यत्नोऽस्यां कविना कार्यः कोऽलङ्कारोऽनया विना[1] ॥ इति ।

उद्धृतं चैतदानन्दवर्धनेन[2], मम्मटाचार्येणापि[3] सबहुमानम् । सत्कविगिरां गोचरा अर्था यथा स्वदन्ते, न तथा लोके । यदुक्तम्—

स्वभावश्चायमर्थानां यन्न साक्षादमी तथा ।
स्वदन्ते सत्कविगिरां गता गोचरतां यथा ॥ इति ।

तत्र कारणं वक्रोक्तिरेव, वक्रोक्तिश्चालङ्कारः । तदुक्तम्—

न नितान्तादिमात्रेण जायते चारुता गिराम् ।
वक्राभिधेयशब्दोक्तिरिष्टा वाचामलङ्कृतिः[4] ॥ इति ।

वक्रता च लोकशास्त्रेतिहासादिविलक्षणतया वर्णनमेव । यद्बलेन सकलजनोपभुक्तोऽप्यर्थो विचित्रतया (चमत्कारितया) प्रकाशते । तथा हि—

'गौरिव गवयः', 'कालोपसर्जने च तुल्यम्' इत्यादावुपमा, 'गौर्वाहीकः, खलेवालो यूपः' इत्यादौ रूपकम्, 'स्थाणुर्वा पुरुषो वा' इत्यादौ सन्देहः, 'इदं रजतम्' इत्यादौ भ्रान्तिः, 'नायं सर्पः' इत्यपह्नुतिः, 'पीनो देवदत्तो दिवा न भुङ्क्ते' इति पर्यायोक्तिः, 'पर्वतो वह्निमान्' इत्यनुमानम्, 'स देवदत्तः' इति स्मरणम्, 'तस्थस्थमिपां तान्तन्तामः' इति यथासंख्यम्, 'पुत्रेण सह आगतः पिता' सहोक्तिः, 'तेन विना गतः' इति विनोक्तिः, 'श्वेतो धावति, द्विवचनेऽचि' इति श्लेषः, 'दण्डेन घटः' इति काव्यलिङ्गम्, 'आयुर्घृतम्' इति हेतुः, यथा—'सुध्युपास्यः' इत्युदाहरणम्, 'न तस्य प्रतिमाऽस्ति' इति असमः, 'गामश्वं पुरुषं पशुम्' इति दीपकम्, 'स्थाघ्वोरिच्चेति' तुल्ययोगिता । सर्वाणि ज्ञापकानि अप्रस्तुतप्रशंसा । यथा 'सुप्तिङन्तं पदम्' इत्यत्रान्तग्रहणं ज्ञापयति 'अन्यत्र संज्ञाविधौ प्रत्ययग्रहणे तदन्तग्रहणं नास्ति' इति अप्रस्तुतप्रशंसा । 'उभयत्रविभाषासु विकल्पात्मकविशेषाभिधित्सया इष्टस्यापि विधेः पूर्वं निषेधनात् प्रतिषेधेन समीकृतः' इति न्यायविषये आक्षेपः । 'समुद्रः कुण्डिका' 'विन्ध्यो वर्धितवानर्कमार्गमरौत्सीत्' इत्यादावतिशयोक्तिश्च नालङ्कारतया मताः । एत एव यदा कविप्रतिभावशाद् लोकशास्त्रविलक्षणतयोपपादितास्तदालङ्कारतां यान्ति । अतो लोके शास्त्रे च ये सादृश्यविशेषणविच्छित्तिगम्यत्वविच्छित्तिविरोधश्रृङ्खलातर्कन्यायवाक्यन्यायलोकन्यायमूलका गूढार्थमूलकाश्च व्याहारास्ते सर्वे विचित्रतामुद्वहन्तोऽलङ्कारतां यान्ति । एतेषां परिच्छेदो इयत्ता वा नास्ति । उक्तञ्च—'अनन्ता हि वाग्विकल्पप्रकाराः, वाग्विकल्पाश्चालङ्काराः'[5] इति ।

अग्निपुराणं रसगङ्गाधरं यावदनेकशो नूतनोद्भाविता अलङ्कारा दृश्यन्ते । तत्र पूर्वाचार्यैर्विहिता अपि कियन्तोऽलङ्काराः पश्चाद्भवैर्नाङ्गीकृताः ।

१. काव्यालङ्कारे २।८५ । २. ध्वन्यालोके ३।४६७ पृ० ।
३. काव्यप्रकाशे १०।७४४ पृ० । ४. काव्यालङ्कारे १।३६ ।
५. ध्वन्यालोके ३।४७३ पृ० ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सर्वानलङ्कारशास्त्रीयग्रन्थानतिशय्य वर्तमाने काव्यप्रकाशे प्रायशश्चतुष्पञ्चाशदलङ्कार प्राचीनैरर्वाचीनैश्चाचार्यैरुद्भाविता नोपलक्ष्यन्ते, गणिताश्च ते काव्यप्रकाशभूमिकायां झलक करेण। तेषु केषाञ्चिदन्तर्भावो निषेधो वा काव्यप्रकाशे शब्दतः, अपरेषामर्थतः कृतः प्रतीयते शब्दतो यथा हेत्वलङ्कारस्य। हेत्वलङ्कारः कदा केनोद्भावितः, इतीदं प्रथमतया दृढमभिधा न शक्यते, भामहात् पुरातनग्रन्थानुपलब्धेः। भरतनाट्यशास्त्रे चतुर्णामेवालङ्काराणां निरूप लक्ष्यते। तथा हि—

उपमा रूपकं चैव दीपकं यमकं तथा।
अलङ्कारास्तु विज्ञेयाश्चत्वारो नाटकाश्रयाः[1] ॥ इति।

अग्निपुराणे हेत्वलङ्कारस्य निरूपणमुपलभ्यते, तद्यथा—

स्वरूपमर्थसादृश्यमुत्प्रेक्षातिशयावपि।
विभावना विरोधश्च हेतुश्च सममष्टधा[2] ॥

इत्यर्थालङ्कारानष्टधोद्दिश्य तत्सामान्यविशेषलक्षणं निर्दिशन् हेतुं लक्षयति—'सि षयिषितार्थस्य हेतुर्भवति साधकः'[4] इति। ततो विशेषमाह—**स द्विधा कारको ज्ञापकश्चेति।**

तथापि भामहो यथा निषेधति तथा नोपलभ्यते, तन्निरूपणनिराकरणरीत्याऽवगम यदभूवन् केचनान्य आचार्याः, येषां मतं तत्र तत्र निरूपयति निराकरोति च। तथा भामहः—

रूपकादिरलङ्कारस्तस्यान्यैर्बहुधोदितः।
न कान्तमपि निर्भूषं विभाति वनिताननम्॥
रूपकादिमलङ्कारं बाह्यमाचक्षते परे।
सुपां तिङां च व्युत्पत्तिं वाचां वाञ्छन्त्यलङ्कृतिम्॥
तदेतदाहुः सौशब्द्यं नार्थव्युत्पत्तिरीदृशी।
शब्दाभिधेयालङ्कारभेदादिष्टं द्वयं तु नः[3] ॥

इत्यत्र निर्दिष्टाः 'अन्ये' 'परे' 'आहुः' इत्यादिशब्दैः क्वचिद् मेधावीत्यादिनाम्ना निर्दिष्टा आसन्नाचार्या येषां कृतय इदानीं नोपलभ्यन्ते। तेष्वेव केनचित् प्रादुर्भावित हेत्वलङ्कारस्य वक्रोक्त्यभावाद् निराकरणं ब्रूते भामहः—**हेतुश्च सूक्ष्मो लेशोऽथ नालङ्कार मतः**'[4]। इति।

ज्ञापकहेतुं प्रतिषेधन्नाह—

गतोऽस्तमर्को भातीन्दुर्यान्ति वासाय पक्षिणः।
इत्येवमादि किं काव्यं वार्तामेनां प्रचक्षते॥[5] इति।

---

१. भरतनाट्यशास्त्रे १६।४०। २. अग्निपुराणे ३४४।२½।
३. अग्निपुराणे ३४४।२९। ४. काव्यालङ्कारे १।१२–१५। ५. तत्रैव २।८

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

पुनस्तद्रूपेणैव दण्डी शास्त्यलङ्कारत्वमेतेषाम्—

हेतुश्च सूक्ष्मलेशौ च वाचामुत्तमभूषणम् ।
कारकज्ञापकौ हेतू तौ चानेकविधौ यथा[1] ।। इति ।

हेतोः सामान्यलक्षणं दण्डिना नोक्तम्, मन्ये लोकप्रसिद्धत्वात् । शास्त्रीयपद्धत्या तद्विशेषं विवृण्वानो हेतुचक्रं च तेने । यथा हेतुर्द्विधा—क्रियार्थसम्पादकः, कर्मार्थसम्पादकश्च । तत्राद्यः कारकज्ञापकभेदाद् द्विधा । पुनश्चोत्पत्तिनिवृत्तिविषयभेदाद् द्विधा । कर्मार्थसम्पादकश्च कर्मभेदादनेकधा । कर्म त्रिविधम् —१. निर्वर्त्यम्, २. विकार्यम्, ३. प्राप्यं च ।

एतेषां विवरणम्—पूर्वमविद्यमानं वस्तु यत् क्रिययोत्पद्यते तन्निर्वर्त्यम् । यथा—कटं करोति, घटं करोति, वस्त्रं वयति । प्रकृतेर्विकाराज्जन्यं विकार्यम्, तच्च द्विविधम् । प्रकृतेर्विनाशाद् जातमाद्यम्, यथा–काष्ठं भस्म करोति । गुणान्तरोत्पत्त्या जातं द्वितीयम्, यथा—सुवर्णं कटकं करोति । यत्र कर्मणि क्रियाकृतविशेषाणां दर्शनादनुमानाद् वा न प्रतीतिस्तत् प्राप्यं कर्म । यथा—ग्रामं गच्छति, घटं पश्यति इति । तत्र प्राप्ये कर्मणि क्रियामात्रस्यापेक्षा भवति । तथा हि—

यदसज्जायते पूर्वं जन्मना यत् प्रकाशते ।
तन्निर्वर्त्यं विकार्यं च द्वेधा कर्म व्यवस्थितम् ।।
प्रकृत्युच्छेदसम्भूतं किञ्चित् काष्ठादिभस्मवत् ।
किञ्चिद् गुणान्तरोत्पत्त्या सुवर्णादिविकारवत् ।।
क्रियाकृतविशेषाणां सिद्धिर्यत्र न दृश्यते ।
दर्शनादनुमानाद् वा तत् प्राप्यमिति कथ्यते ।।

इति शास्त्रीयभेदभिन्नान् सर्वानपि हेतूनुदाहृत्य भावप्रतियोगिकाभावहेतूंश्चतुर्धाऽभावप्रतियोगिकाभावहेतूंश्चोदाजहार । तत्र दिङ्मात्रं निर्दिश्यते । कारकहेतोरुदाहरणं यथा—

अयमान्दोलितप्रौढचन्दनद्रुमपल्लवः ।
उत्पादयति सर्वस्य प्रीतिं मलयमारुतः[2] ।। इति ।

अत्र प्रीत्युत्पादनकार्यस्य हेतुर्मलयमारुते विलक्षणसुगन्धित्वादिगुणवैशिष्ट्यम् । तच्च विलक्षणतयोपनिबद्धमलङ्कारतां बिभर्ति । एवम्—

अवश्यैरिन्दुपादानामसाध्यैश्चन्दनाम्भसाम् ।
देहोष्मभिः सुबोधं ते सखि कामातुरं मनः[4] ।।

---

१. काव्यादर्शे २।८७ । २. काव्यादर्शे २।२३५ ।
३. काव्यादर्शे २।२२६ । ४. तत्रैव २।२४५ ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

इति ज्ञापकहेतुमुदाहृत्य भामहेन निरस्तस्याप्यलङ्कारत्वं ब्रूते—

गतोऽस्तमर्को भातीन्दुर्यान्ति वासाय पक्षिणः ।
इतीदमपि साध्वेव कालावस्था निवेदने[1] ॥ इति ।

एवमभावहेतूनप्युदाहृत्य चित्रहेतुर्दूरकार्यः, तत्सहजः, कार्यानन्तरजः, अयुक्तकार्यः युक्तकार्यः – इत्यादिभेदादनेकविधो निर्दिष्टः[2], परं काव्यलिङ्गमनुमानं च नामतोऽपि निर्दिशति मन्ये, तौ हेत्वलङ्कारेणैव गतार्थौ करोति । वामनो हेत्वलङ्कारं न लक्षयति स्म ।

भट्टोद्भटश्च हेतुं न निरूपयति, काव्यलिङ्गं च निरूपयति, तल्लक्षणं यथा—

श्रुतमेकं यदन्यत्र स्मृतेरनुभवस्य वा ।
हेतुतां प्रतिपद्येत काव्यलिङ्गं तदुच्यते[3] ॥ इति ।

तत्रैव प्रतिहारेन्दुराजः काव्यलिङ्गेति नामकरणस्य हेतुं टीकायामाटीकते, यन्नैयायिकानां हेतवो लौकिकवस्तुनिष्ठाः पक्षधर्मताऽन्वयव्यतिरेकानुविधायिनो भवन्ति, अतो विरसतामावहन्ति । परं काव्येऽतिशयेन सरसाः पदार्थाः सहृदयहृदयानुरूपा वर्ण्यन्ते, तन्निष्ठतयाऽत्रोक्ता निबध्यमाना हेतवः सरसतामापद्यन्ते इति सूचनायात्र काव्यग्रहणं कृतम् । अर्थात् प्रागुक्तो हेतुरेव यो वक्रोक्त्यभावाद् भामहेन निरस्तः, वक्रोक्तिवशाद् दण्डिना स्वीकृतः, तयोर्द्वयोः समन्वयं विदधानो भट्टोद्भटो नैयायिकाभिमतहेतोरनलङ्कारत्वं काव्यगतस्यालङ्कारत्वं निरूपयन् काव्यलिङ्गमित्यभिधया निर्दिदेश । हेतुर्लिङ्गमित्यनर्थान्तरम् । अयमप्यनुमानं पृथग् न निर्दिशति ।

रुद्रटश्च हेत्वलङ्कारं पूर्वाचार्येभ्यो विलक्षणं लक्षयति । तथा हि—

हेतुमता सह हेतोरभिधानमभेदकृद् भवेद् यत्र ।
सोऽलङ्कारो हेतुः स्यादन्येभ्यः पृथग्भूतः[4] ॥ इति ।

अर्थाद् यत्र कार्येण सह कारणस्याभेदेनाभिधानम्, तत्र हेत्वलङ्कारः । अयं हेत्वलङ्कारः दण्डिप्रभृतिलक्षितेभ्यः पृथग्भूत इति ।

नमिसाधुरपि स्वकृतटिप्पणे इत्थमेव व्याख्याति । अलङ्कारग्रहणमन्येभ्यः पृथग्भूत इति च पदं पर(दण्डिप्रभृति)मतनिरासार्थमिति । तत्रोदाहरणम्—

अविरलकमलविकासः सकलालिमदश्च कोकिलानन्दः ।
रम्योऽयमेति सम्प्रति लोकोत्कण्ठाकरः कालः[5] ॥ इति ।

अत्र अविरलानां कमलानां विकासहेतुत्वाद् वसन्तकाल एवाविरलकमलविकास इति कार्येण सह कारणस्याभेदेनाभिधानाद् हेत्वलङ्कार इति ।

नमिसाधुश्च

आयुर्घृतं नदी पुण्यं भयं चौरः सुखं प्रिया ।
वैरं द्यूतं गुरुर्ज्ञानं श्रेयो ब्राह्मणपूजनम्[6] ॥ इति ।

---

१. तत्रैव २।२४४ । २. तत्रैव २।२५३ । ३. अलङ्कारसारसङ्ग्रहे ६।७ ।
४. काव्यालङ्कारे ७।८२ । ५. तत्रैव । ६. तत्रैव ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

इत्यप्युदाजहार ।

अत्र सर्वत्र कार्यकारणभावेन शुद्धसारोपलक्षणा, अन्यवैलक्षण्येन कार्यकारित्वादिप्रयोजनं व्यङ्ग्यम् ।

भोजराजश्च पुनर्दण्डिप्रभृतिप्रतिपादितरीत्यैव हेतुं सप्रभेदं निरूपयाम्बभूव—

क्रियायाः कारणं हेतुः कारको ज्ञापकस्तथा ।
अभावश्चित्रहेतुश्च चतुर्विध इहेष्यते[1] ॥

वस्तुतो लक्षणमिदमग्निपुराणमादण्डिकृतलक्षणसङ्ग्रहभूतमिति ।

मम्मटाचार्यो हेत्वलङ्कारमग्निपुराणदण्डिभोजादिभिर्लक्षितं रुद्रटलक्षितं वोभयविधमपि नाङ्गीकुरुते, अपि तु भट्टोद्भटेनोद्भावितं काव्यलिङ्गमलङ्कारं स्वीकुरुते । लक्षयति च **'काव्यलिङ्गं हेतोर्वाक्यपदार्थता'** इति । अर्थात् स्वयमनुपपद्यमानस्यार्थस्योपपादकहेतोर्वचनं काव्यलिङ्गम् । तद् द्विविधम्—१. पदार्थता । २. वाक्यार्थता च । पदार्थतायामप्येकपदार्थताऽनेकपदार्थतेति भेदाद् द्वैविध्यम् । उदाहरणं यथा—

वपुः प्रादुर्भावादनुमितमिदं जन्मनि पुरा
पुरारे न प्रायः क्वचिदपि भवन्तं प्रणतवान् ।
नमन्मुक्तः सम्प्रत्यहमतनुरग्रेऽप्यनतिभा-
ङ्महेशः क्षन्तव्यं तदिदमपराधद्वयमपि[2] ॥ इति ।

अत्राहं भवन्तं पुरा क्वचिदपि न प्रणतवान्, सम्प्रति नमन् मुक्तोऽग्रेऽप्यनतिभागित्यवान्तरवाक्यद्वयस्यार्थोऽनमनमपराधे हेतुरिति ।

परमस्य निराकरणं विमर्शिनीकारः[3], तमनुसरन् पण्डितराजः[4], तद्रीत्या नागेशश्च[5] कुर्वते । तस्यायं सारांशः हेतोरनुपादाने निर्हेतुरूपदोष उक्तः, हेतोरुपादाने तदभावः, अतोऽयं दोषाभावमात्रम्, नालङ्कारः, हेतुहेतुमद्भावस्य च वस्तुसिद्धत्वेन कविप्रतिभानिर्वर्त्यत्वाभावात् । तदभावाच्चालङ्कारजीवातुभूतस्य चमत्कारस्याभावादलङ्कारत्वमस्य दुरुपपादमेव । व्यङ्ग्याश्लिष्टेऽपि व्यङ्ग्यकृत एव चमत्कारः, न काव्यलिङ्गस्येति । एतत् सर्वं विशेषजिज्ञासुभिर्विमर्शिनी द्रष्टव्या ।

तथा हि—**'ननु हेतोर्वाक्यपदार्थोभयनिबन्धेन न कश्चिद् विच्छित्तिविशेषः प्रतीयते··· । एवं हेतोर्वाक्यपदार्थतयोपनिबद्धस्य वास्तवत्वादस्य पृथगलङ्कारत्वं न युक्तम्, उक्तवक्ष्यमाणनीत्या अनुमान एवान्तर्भावोपपत्तेः[6]'** इति ।

---

१. सरस्वतीकण्ठाभरणे ।
२. काव्यप्रकाशे १०।५०१ ।
३. जयरथः—अलङ्कारसर्वस्वविमर्शिन्याम् ५४० पृ० ।
४. रसगङ्गाधरे ३।५८८ ।
५. काव्यप्रकाशस्य प्रदीपोद्द्योते १०।५२९५ पृ० ।
६. विमर्शिन्याम् ४५० पृ० ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अनन्तरं मम्मटाचार्यः कारणमालाऽलङ्कारं निरूप्य कार्यकारणभावालङ्कारनिरूपण प्रसङ्गे प्राचीनैर्लक्षित उदाहृतश्च हेत्वलङ्कारोऽपि लक्षणीय इति पूर्वपक्षं मनसिकृत्य स्वयं मूल एव निराचक्रे—'**हेतुमता सह हेतोरभिधानमभेदतो हेतुः**' इति हेत्वलङ्कारो मया न लक्षित यतो हि वैचित्र्यमलङ्कारः। '**आयुर्घृतम्**' इत्यादौ कार्येण सह कारणस्याभेदेनाभिधानेऽपि वैचित्र्याभावान्नायमलङ्कारः। यच्च तदुदाहरणस्य '**अविरलकमलविकासः···लोकोत्कण्ठाकर कालः**' इत्यादेः काव्यत्वम्, तदपि कोमलानुप्रासमहिम्नैव, न हेत्वलङ्कारेणेति, '**पूर्वोक्त काव्यलिङ्गमेव हेतुः**[१]' इति।

अयमनुमानालङ्कारं पृथग् '**अनुमानं तदुक्तं यत् साध्यसाधनयोर्वचः**[२]' इति लक्षयति स्म। अत्र पक्षसत्त्वसपक्षसत्त्वविपक्षव्यावृत्तत्वविशिष्टत्रिरूपो हेतुः साधनं भवति। कविप्रतिभा प्रसूतस्यैवास्यालङ्कारत्वमिति।

अर्वाचीनाचार्याणां मतानि, तत्र वाग्भटः (प्रथमः) काव्यलिङ्गं न लक्षयति, हेतुमेव लक्षयति। यथा—

यत्रोत्पादयतः किञ्चिदर्थं कर्तुः प्रकाशते।
तद्योग्यतायुक्तिरसौ हेतुरुक्तो बुधैर्यथा[३] **॥**

इति निरूप्योदाहरति—'**जुव्वण समउम्मत्ता···गीअं**' इति

तस्य छाया—

यौवनसमयोन्मत्ता तथा विरहेण करोति नाथस्य।
कण्ठाभ्यन्तरघोलितमधुरस्वरं बालिकागीतम्[४] **॥**

अत्र गीतकर्त्र्या बालिकयोत्पादिते गीते नाथस्य विरहो यौवनोन्मादश्च योग्यतायुक्तिः असौ हेत्वलङ्कारः।

हेमचन्द्रो मम्मटाचार्यस्यैव प्रतिमूर्तिरयं कतिपयानेवालङ्कारान् निरूपयति। काव्यलिङ्ग हेतुर्वा कोऽपि न लभ्यतेऽस्य ग्रन्थे। अनुमानं च '**हेतोः साध्यावगमोऽनुमानम्**[५]' इति लक्षयति।

जयदेवो हेतुं न निरूपयति। काव्यलिङ्गमित्थं निरूपयति—

स्यात् काव्यलिङ्गं वागर्थो नूतनार्थसमर्थकः।
जितोऽसि मन्दकन्दर्प मच्चित्तेऽस्ति त्रिलोचनः[६] **॥**

अत्र मन्दकन्दर्प! मच्चित्ते त्रिलोचनोऽस्तीति वाक्येन कन्दर्पदाहकस्य हरस्य तृतीय नेत्ररूपस्य नूतनार्थस्य प्रतीतेः कन्दर्पजयस्य निष्पत्तेः काव्यलिङ्गम्।

शोभाकरमित्रः '**परप्रत्यायकं लिङ्गं हेतुः**[७]' इति लक्षयित्वा पदकृत्ये परग्रहणस्य फल मनुमानव्यावृत्तिमाह। अतः फलितम्—लिङ्गात् स्वस्य प्रतिपत्तिरनुमानम्। लिङ्गेन परप्रत्या यनं परार्थानुमानमेव काव्यलिङ्गापरपर्यायो हेत्वलङ्कारः। यद्यपि हेतुरनुमानस्यैव भेदः

---

१. काव्यप्रकाशे १०।५२६। २. काव्यप्रकाशे १०।११७।
३. वाग्भटालङ्कारे ४।१०४। ४ तत्रैव ४।१०५। ५. काव्यानुशासने ६।२८
६. चन्द्रालोके ५।३८। ७. अलङ्काररत्नाकरे ७९ सू०।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अनुमानस्य स्वार्थपरार्थरूपत्वेन द्वैविध्यात्, तथापि प्राचीनैरनुमानात् पृथग् लक्षितः,ताननुसृत्य मयाऽपि तथैव लक्षितः ।

अथ यद्येवमुच्यते **'परैरप्रतीतप्रत्यायकमनुमानम्'**, **'परैः प्रतीतस्योपपादको हेतुः'** इति वैलक्षण्यं द्वयोरिति, तदपि न, यतो हि वक्त्रा प्रतीतस्यार्थस्योपपादकं लिङ्गम्, उत बोद्धव्येन ? नाद्यः, प्रमाणान्तरेण प्रतिपन्नत्वाद् लिङ्गाकाङ्क्षाभावात् । स्ववाक्यादाकाङ्क्षाविरामे स्वाश्रयप्रसङ्गात् ।

बोद्धव्येनापि प्रमाणान्तरेणानवगत एवार्थः, तस्मादेव वाक्यात् प्रतीतेः । तस्मात् प्रतीतार्थोपपादकं काव्यलिङ्गम्, अप्रतीतार्थप्रत्यायकमनुमानमित्यविवेक एव ।

इत्थमयं हेत्वनुमानयोरैक्येऽपि मम्मटादिप्राचीनाचार्यानुरोधाद् हेतुं पृथग् लक्षयति । अनुमानं च **'साधनात् साध्यप्रतीतिरनुमानम्'**[1] इति निजगाद ।

विश्वनाथः काव्यलिङ्गं हेतुं च पृथक् पृथग् लक्षयति । तथा हि—

'हेतोर्वाक्यपदार्थत्वे काव्यलिङ्गं निगद्यते'[2] इति सँल्लक्ष्य, काव्यलिङ्गानुमानार्थान्तरन्यासेषु भेदमुपपादयन्नाह–हेतुस्त्रिधा भवति—१. ज्ञापकः । २. निष्पादकः । ३. समर्थकश्च ।

तत्र ज्ञापको हेतुरनुमाने, निष्पादको हेतुः काव्यलिङ्गे, समर्थको हेतुरर्थान्तरन्यासे इति तेषां वैलक्षण्यम् । हेतुं च—**'अभेदेनाभिधाहेतुर्हेतोर्हेतुमता सह'**[3] इति निरूपयाम्बभूव । आह चास्मिन्नलङ्कारेऽध्यवसायमूलतामिति । **'अनुमानं च विच्छित्या ज्ञानं साध्यस्य साधनात्'**[4] इत्यनुमानमनुमन्यते ।

रुय्यको मम्मटानुसारमेव काव्यलिङ्गं निर्वक्ति, हेतुं न लक्षयति । तथा हि—

'हेतोर्वाक्यपदार्थता काव्यलिङ्गम्'[5] इति । अनुमानं च—**'साध्यसाधननिर्देशोऽनुमानम्'**[6] इति निरूपयति । आह चानुमाने प्रत्याय्यप्रत्यायकभावः । सा चाप्रतीतस्य प्रत्यायने भवति । काव्यलिङ्गे समर्थ्यसमर्थकभावः, स चाप्रतीतप्रत्यायने । तटस्थत्वेनोपन्यस्तस्य तु हेतुत्वेऽर्थान्तरन्यासः । ततश्च सामान्यविशेषभावोऽर्थान्तरन्यासस्य विषयः । तत्तूद्भटादिभिरर्थान्तरन्यासे कार्यकारणभावेन समर्थकत्वमुक्तम्, तत् पूर्वोक्तकाव्यलिङ्गमनाश्रित्यैवेति ।

जयरथः काव्यलिङ्गं निराकुरुते इति पूर्वमुक्तमेव ।

अप्पय्यदीक्षितः काव्यलिङ्गम्—**'समर्थनीयस्यार्थस्य काव्यलिङ्गं समर्थनम्'**[7] इति निरूप्योदाहृत्य चाह—**'इदं काव्यलिङ्गमिति', हेत्वलङ्कार इति केचिद् व्याजह्रुः'**[8] इति । अग्रे

---

१. अलङ्काररत्नाकरे ७८ सू० ।　२. साहित्यदर्पणे १०।६४० पृ० ।

३. तत्रैव पृ० ६४२ ।　४. तत्रैव

५. अलङ्कारसर्वस्वे सूत्रम् ५८ ।　६. तत्रैव ५९ सूत्रम् ।

७. कुवलयानन्दे ६० ।　८. तत्रैव १३८ पृ० ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

काव्यलिङ्गात् परिकरस्य भेदं निरूपयन्नाह—'परिकरे पदार्थवाक्यार्थबलात् प्रतीयमानार्थ वाक्योपस्कारकतां भजतः । काव्यलिङ्गे तु पदार्थवाक्यार्थाविव हेतुभावं भजतः' इति । अनन्तरं 'हेतोर्हेतुमता सार्धं वर्णनं हेतुरुच्यते' इति निरूप्यापरेषां मते—'हेतुहेतुमतोरैक्यं हेतुं केचित् प्रचक्षते' इति निरूप्य—'लक्ष्मीविलासा विदुषां कटाक्षा वेङ्कटप्रभोः[१]' इत्युदाजहार ।

तत्र रूपकप्रसक्तिमाशङ्क्य समादधे—रूपके कार्यकारणयोः सादृश्यादभेदः, हेतौ तु कार्यकारणभावादभेद इति । अनुमानालङ्कारं च प्रमाणालङ्कारेषु निरूपयति ।

जगन्नाथः—यद्यपि पण्डितराजस्य ग्रन्थो रसगङ्गाधर उत्तरालङ्कारपर्यन्तमपूर्ण एव लभ्यते, अतस्तन्मते हेतोः पृथग् लक्षणं न दृश्यते, तथापि स काव्यलिङ्गं लक्षयित्वा हेतुमपि प्रसङ्गतोऽभिदधे । तथा हि—'**अनुमितिकारणत्वेन सामान्यविशेषभावाभ्यां चानालिङ्गितः प्रकृतार्थोपपादकत्वेन विवक्षितोऽर्थः काव्यलिङ्गम्**'[२] इति तल्लक्षणम् ।

तत्र यस्यार्थस्य ज्ञानेन प्रस्तुतार्थस्य निश्चयो जायते, सोऽर्थः प्रकृतार्थोपपादक इत्युच्यते । अनुमितिकारणत्वेनालिङ्गित इत्युक्तेरनुमाने नातिप्रसक्तिः । सामान्यविशेषभावाभ्याम् मनालिङ्गित इत्युक्तेरर्थान्तरन्यासे नातिव्याप्तिः । द्वयोरर्थयोर्मिथ उपपाद्योपपादकभावसत्त्वेऽपि यदि नानुमाप्योपमापकभावः, न वा सामान्यविशेषभावस्तदोपमानोपमेयभाव आरोपविषयविषयिभावः सम्भाव्येत, तदोपमाया रूपकस्य वा सम्भावना स्यात्, तद्वारणायोपपादकत्वेनेत्युक्तम् ।

हेतुप्रतिपादकविभक्त्या पञ्चम्या तृतीयया तसिलादिना वा यत्र शब्दतो हेतुत्वोपपादनम् तत्र हेत्वलङ्कारस्तत्रातिप्रसक्तिवारणायोपपादकत्वेन विवक्षित[३] इति ज्ञेयम् । '**भयानकत्वात् परिवर्जनीयः**' इत्यादौ पञ्चमीविभक्त्या(शब्दतः)हेतोरुपपादनाद् न काव्यलिङ्गम्, यत्र हेतोर्हेतुता व्यङ्ग्या, तत्रैवायमलङ्कार इत्युक्तेः ।

अनन्तरं काव्यलिङ्गानुमित्योर्भेदमाह—

'**कविनिबद्धप्रमात्रन्तरनिष्ठा ह्यनुमितिरनुमानालङ्कृतिं प्रयोजयति । श्रोतृनिष्ठा महावाक्यार्थनिश्चयानुकूला तु काव्यलिङ्गमिति महान् विशेषः**[४]' इति । ततो विमर्शिनीकाररीत्या अस्यालङ्कारत्वं निरासे ।

नागेशः प्रसङ्गतो हेत्वलङ्कारं निरकार्षीत् । तथा हि—अतिशयोक्त्यलङ्कारे प्रथमातिशयोक्तिः, या उपमानेनान्तर्निगीर्णस्योपमेयस्य यदध्यवसानरूपा उक्ता सा हेतुफलयोरभेदाध्यवसायेऽपि भवति । यथा—

वित्रासनं समरसीमनि शात्रवाणामाजीवनं विबुधपर्षदि कोविदानाम् ।
सम्मोहनं सुरतसंसदि कामिनीनां रूपं तदीयमवलोकयतोऽद्भुतं मे[५] ॥

१. तत्रैव १६७–१६८ का० ।
२. रसगङ्गाधरे ३।५७२ । ३. तत्रैव । ४. तत्रैव ।
५. काव्यप्रकाशप्रदीपोद्द्योते १०।४९१ ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अत्र वित्रासनादिपदस्य तद्धेतौ साध्यवसानलक्षणा। सा च कार्यकारणभावसम्बन्धमूलकतया शुद्धा। अत्राप्यतिशयोक्तिः। 'हेतोर्हेतुमता सार्धमभेदो हेतुरुच्यते' इति हेत्वलङ्कारोऽयं पृथगित्यपास्तम्।

पण्डितविश्वेश्वरश्च पण्डितराजोक्तमनूद्य निराचक्रे। तथा हि—हेतुहेतुमद्भावस्य लोकसिद्धत्वाद् हेतोः कविप्रतिभानिर्मितत्वप्रयुक्तविरहात् काव्यलिङ्गं नालङ्कार इति यदुक्तम्, तत्तुच्छम्, काव्यलिङ्गीयहेतुहेतुमद्भावमात्रस्य लोकसिद्धत्वाभावात्, कविप्रतिभामात्रनिर्मितत्वात्, चमत्कारजनकत्वाच्च।

> **भस्मोद्धूलन भद्रमस्तु भवते रुद्राक्षमाले शुभं**
> **हा सोपानपरम्परे गिरिसुताकान्तालयाऽङ्कृते।**
> **अद्याराधनतोषितेन विभुना युष्मत्सपर्यासुखा-**
> **लोकोच्छेदिनि मोक्षनामनि महामोहे निलीयामहे॥**

अत्र सुखालोकोच्छेदादीनां महामोहतादात्म्यादिहेतुत्वं न लोकसिद्धम्। यदि लोकसिद्धमेवेत्याग्रहः, तदोपमादीनामप्यलङ्कारत्वं न स्यात्, सादृश्यस्य वास्तवेन कविकल्पितत्वविरहात्। न चोपमाप्रयोजकसाधर्म्यस्याभेदांशः कविकल्पित एवेति वाच्यम्, अभेदांशस्यालङ्कारत्वेऽपि सादृश्यस्यालङ्कारत्वानापत्तेः। रमणीयत्वादिनिमित्तधर्मस्यापि लोकप्रसिद्धत्वात्।

'गोसदृशो गवयः' इत्यत्रापि सादृश्यप्रयोजकधर्मस्य वस्तुतो भिन्नस्याभेदोऽध्यवसानकृत एवेति, तत्राप्यलङ्कारतापत्तेः। अतश्चमत्कारजनकस्य लौकिकस्याप्यलङ्कारत्वे बाधकाभावात्। अन्यथा सर्वाऽलङ्कारोच्छेदापत्तेः। तस्मात् काव्यलिङ्गमलङ्कार[1] एव।

निष्कर्षः

अग्निपुराणे हेत्वलङ्कारो विहितः, नानुमानादयः, अनुमानस्य हेतावन्तर्भावो ध्वन्यते **'अविनाभावनियमो ह्यविनाभावदर्शनात्'**[2] इत्युक्तेः।

दण्डी कारकज्ञापकहेतूपन्यासे हेत्वलङ्कारं निरूपयति, काव्यलिङ्गमनुमानं वा पृथग् न लक्षयति। मन्ये हेतुरूपे ते स्वीकृते। अस्य हेतुः कार्यकारणयोः पौर्वापर्यविपर्ययरूपातिशयोक्तिमपि व्याप्नोतीति, कार्यानन्तरजहेतोरुदाहरणेन लक्ष्यते। तथाहि—

> **पश्चात् पर्यस्य किरणानुदीर्णं चन्द्रमण्डलम्।**
> **प्रागेव हरिणाक्षीणामुदीर्णो रागसागरः**[3]**॥**

अत्र हरिणाक्षीणां रागसागरप्रवृद्धिः, चन्द्रमण्डलोदयस्य कार्यं तत् प्राग् वर्णितम्, कारणं पश्चादिति।

भट्टोद्भटो लौकिकवस्तुनिष्ठे हेतौ चमत्काराभावात् काव्यार्थस्य सरसत्वात् तत्र निष्ठस्यैव हेतोश्चमत्कारित्वात् काव्यलिङ्गमलङ्कारमाह, हेतुलिङ्गयोः पर्यायत्वात्।

रुद्रटो हेत्वलङ्कारमेवाह, न काव्यलिङ्गम्, तथापि पूर्वाचार्यापेक्षया विलक्षणमस्य हेतुः कार्येण सह कारणस्याभेदाभिधानरूपम्।

---

१. अलङ्कारकौस्तुभे ३४० पृ०। २. अग्निपुराणे ३४४।३२। ३. काव्यादर्शे २।२५७।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

भोजराजो हेतुनिरूपणे दण्डिनमनुससार।

मम्मटः काव्यलिङ्गमेव स्वीकृत्य हेतुं तत्रान्तर्भावयामास।

रुय्यको मम्मटमनुकृत्य काव्यलिङ्गमेव निर्वक्ति, परं विमर्शिनीकारो रत्
निराकुर्वन् काव्यलिङ्गस्याप्यलङ्कारत्वं निराकृत्यानुमानेऽन्तर्भावयति।

वाग्भटश्च हेतुं स्वीकरोति।

जयदेवः काव्यलिङ्गे मम्मटमनुसरति।

शोभाकरमिश्रः काव्यलिङ्गं निरूप्यानुमानरूपमेवाह।

विश्वनाथो हेतुं त्रिधा निरूप्य काव्यलिङ्गं हेतुमनुमानञ्च पृथक् पृथगलङ्कार
युक्त्या निर्दिदेश।

अप्पय्यदीक्षितः काव्यलिङ्गं हेतुमनुमानञ्चेति त्रीनलङ्कारान् सङ्कीर्णतया निरूपय

पण्डितराजः काव्यलिङ्गं निरूप्य जयरथमनुसृत्येदमर्थदोषाभावरूपमाह।

विश्वेश्वरश्च पण्डितराजमतं निराकृत्य काव्यलिङ्गं पुनः स्थापयामास। पण्डित
विश्वेश्वरौ हेतुं न निरूपयतः।

इत्थमाचार्याणां मतपर्यालोचनयाऽवगम्यते यत् केचन हेतुं न स्वीकुर्वन्ति,
हेतुमेवालङ्कारं ब्रुवते। अपरे काव्यलिङ्गालङ्कारं स्वीकृत्य हेतुं निराकुर्वते, केचन काव्य
हेत्वोरैक्यम्, अन्ये काव्यलिङ्गानुमानयोरैक्यम्, इतरे त्रयाणामप्यलङ्कारत्वं निरूपयन्ति।

विमर्शः

एतत्तु पूर्वमेवोक्तं यद् लौकिकं शास्त्रीयं वा वस्तूक्तिकौशलेन कविप्रतिभाप्रसूत
वैचित्र्येणोपपादितमलङ्कारतां बिभर्ति। एवं सति हेतुरपि वैचित्र्येणोपपादितः
नालङ्कारः ?

हेतोर्लौकिकवस्तुनिष्ठत्वाद् वैचित्र्याभावाद् नालङ्कारता चेत्, सादृश्ययथास
तद्गुणोत्तरदीपकादीनामपि वस्तुनिष्ठत्वाद् लौकिकत्वाच्चालङ्कारत्वं न स्यात्।
परिसंख्याऽर्थापत्त्यादीनामपि शास्त्रविषयत्वादलङ्कारत्वाभावः प्रसज्जेत्। यद्युक्तिकौ
तेऽलङ्कारतां भजन्ति, तदा तर्कन्यायमूलकैः काव्यलिङ्गहेत्वनुमानादिभिः किमपराद्ध
यदुक्तिवैचित्र्यादप्यलङ्कारतां न यान्ति।

एवं सति हेतोरलङ्कारतां निराकुर्वाणं भामहं स्वीकुर्वाणं दण्डिनं न विष्वग् नि
विमृश्य च तयोर्भावमित्थं विवृणुते विपश्चितः। यल्लौकिकहेतवो नालङ्काराः, परं काव्य
श्चमत्कारिणस्त एवालङ्काराः। अतः काव्यहेतुरलङ्कारो न हेतुः, हेतुर्लिङ्गञ्चानर्थान्तर
काव्यलिङ्गमभिदधे भट्टोद्भटः।

एतद्युक्तमिति विमृश्य मम्मटोऽपि रुद्रटोद्भावितं चमत्कारिणामायुर्घृतमित्य
प्रकाराणां हेत्वलङ्कारत्वं निराकृत्य चमत्कारिणां च हेतूनां काव्यलिङ्गालङ्कारत्वम
यद्यप्यनेकशो हेत्वलङ्कारमाह मम्मटः, तथाहि कविप्रौढोक्तिसिद्धेन वस्तुनाऽलङ्कारध्वनि
'केसेसु बलामोडिय'''संठविआ[1]**'** इत्युदाहृत्याह—**'एकत्र संग्रामे विजयदर्शनात् तस्यारयः प**
गुहासु तिष्ठन्तीति काव्यहेतुरलङ्कारः' इति।

---

१. काव्यप्रकाशे ४।६५।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

एवं कविनिबद्धवक्तृप्रौढोक्तिसिद्धेनालङ्कारेणालङ्कारध्वनिमुदाहृत्य **'महिलासहस्स-भरिए''''तणुए इ[1]' 'अत्र हेत्वलङ्कारेण तनोस्तनूकरणेऽपि तव हृदये न वर्तत इति विशेषोक्तिः'** इत्याह ।

अग्रे च कविप्रौढोक्तिसिद्धेनालङ्कारेण वस्तुध्वनिं पदप्रकाश्यम्—**'वारिज्जन्तोपि पुणो''''चलई से हारो[2]'** इत्युदाहृत्याह—अत्र विशुद्धजातित्वलक्षणहेत्वलङ्कारेण हारोऽनवरतं कम्पमान एवास्ते इति **'ण चलई'** पदद्योत्यं वस्तु इति । एवं तत्र तत्र हेत्वलङ्कारं ब्रूते, तथाऽपि तत् काव्यलिङ्गमुद्दिश्यैवेति हेतुः काव्यलिङ्गञ्चैकमेव ।

परं रुद्रटेन शुद्धसारोपलक्षणास्थले हेतुकार्ययोरभेदारोपस्थले हेतुरुदाहृतः, शुद्धसारोपा शुद्धसाध्यवसाना वा लक्षणा प्रयोजनवती । प्रयोजनं च व्यङ्ग्यम् । तत्र यदि चमत्कारो न स्यात्, तदा यथा गौर्वाहीक इत्यादावभेदारोपसत्त्वेऽपि न रूपकम्, तथा **'आयुर्घृतम्'** इति शुद्धसारोपस्थलेऽपि न हेतुः ।

सत्यपि व्यङ्ग्ये यदि चमत्कारविशेषः सहृदयैर्नानुभूयते, तदा नालङ्कारत्वम् । यदि वर्णनकौशलेन चमत्कारोऽनुभूयते, तदाऽलङ्कारत्वे कः सन्दिहीत सचेतः ? परं शुद्धसारोपस्थलेऽपि रूपकमाह शोभाकरमित्रः–**'आरोपो रूपकम्[3]'** इति रूपकं निरूप्याह–सादृश्यसम्बन्धेनाभेदारोप एव रूपकम्, न सम्बन्धान्तरनिमित्तकमिति न युक्तम् । तथा हि—

सादृश्यसम्बन्धनिबन्धनाया अलङ्कृतित्वं यदि लक्षणायाः ।
साम्येऽपि सर्वस्य परस्य हेतोः सम्बन्धभेदेऽपि तथैव युक्तम्[4] ।। इति ।

काव्यलिङ्गस्यानुमानेऽन्तर्भाव आचार्यैरेव खण्डितः, तत्तन्मतनिरूपणे पूर्वमेवोपपादितम् । समासत इदं वक्तुं शक्यते यत् साध्यसाधनभावे समानेऽपि अप्रतीतप्रतीतावनुमानम्, प्रतीतस्य समर्थनं काव्यलिङ्गम्, तटस्थहेतावर्थान्तरन्यास इति ।

एवमग्निपुराणदण्डयादिनिरूपितो हेतुः काव्यपदार्थनिष्ठ एवालङ्कारतामापद्यत इति काव्यहेतुरलङ्कारः, स एव काव्यलिङ्गमिति । रुद्रटादिभिरुद्भावितो हेत्वलङ्कारः शोभाकररीत्या रूपकमेवेति नास्ति हेत्वलङ्कारः ।

परमन्ये आचार्याः सादृश्यमूलकभेदमेव रूपकं ब्रुवते, नान्यसम्बन्धमूलकम् । तथा हि— **'उपमैव तिरोभूतभेदा रूपकमिष्यते'[5]** इति । अतो न सम्बन्धान्तरमूलकं रूपकमित्याग्रहश्चेत्, तदा चमत्कारिशुद्धसारोपलक्षणास्थलेऽस्तु हेत्वलङ्कार इति । अत एवाप्पयदीक्षितप्रभृतिभि-र्निरूप्यते । मम्मटस्त्ववचमत्कारिस्थले निषेधति । परं काव्यलिङ्गालङ्कारस्त्वस्त्येव ।

यदि निर्हेतुरूपदोषाभावरूपमिदं काव्यलिङ्गम्, नालङ्कार इत्युच्यते, तदा 'साभिप्राय-विशेषणोक्तिरूपः परिकरोऽप्यपुष्टार्थत्वरूपदोषाभावान्नालङ्कारः । एवं यथासंख्यमपि नालङ्कारः स्यात्, क्रमिकाणां क्रमेण वर्णने भग्नप्रक्रमतादोषाभावरूप एवेति बहूनामलङ्काराणा-मनलङ्कारतापत्तिः स्यात् । तस्मादुक्तिवैचित्र्येण युक्तमेव काव्यलिङ्गस्यालङ्कारत्वम् । एतत् सर्वं विष्वगनिभाल्यैव हेतुरेवालङ्कारः, न काव्यलिङ्गमिति कस्यचिदुक्तिर्न श्रूयते सहृदयैरिति शिवम् ।

● ● ●

१. तत्रैव ४।७१ । २. तत्रैव ४।८६ । ३. अलङ्काररत्नाकरे २६ सू० ।
४. तत्रैव ३३ पृ० । ५. काव्यादर्शे २ ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

प्रदीपप्रभयोर्वैमत्यविशेषे तत्त्वगवेषणम्

श्रीशशिधरशर्मा, वाचस्पतिः

प्राध्यापकः–पञ्जाबविश्वविद्यालये

देवगवीवाङ्मये 'वाग्देवतावतारः' इति प्रसिद्धस्य काश्मीराभिजनकुङ्कुमकेसरसहोदरस्य श्रीमतो मम्मटभट्टस्य निरतिशयमेवास्पदम्। साहित्यशास्त्रविषयकेषु ग्रन्थरत्नेषु तदीया जरामरणातिगा कृतिः काव्यप्रकाशः प्रायेणाऽष्टाभ्यः शताब्दीभ्यः समभ्यस्यमाना समास्ते सातत्येन, न तथाऽन्या कापि कृतिः। पुरा किल गृहे गृहे काव्यप्रकाशस्य टीका व्यरच्यन्त, तथापि स पूर्ववदेव दुर्गमोऽवागम्यत। यत[1] एवादर्शकारः–**'काव्यप्रकाशस्य कृता गृहे गृहे टीकाः, तथाप्येष तथैव दुर्गमः'** इत्यभिदधौ।

दुर्गमत्वेऽपि तु काव्यविद्वराणां वाल्लभ्यं यथा तदलभत्, न तथा ग्रन्थान्तरम्। कस्तत्र हेतुः? तस्य सर्वाङ्गीणतेति ब्रूमः। नहि ततः पूर्वं परं वा वृत्तिरीतिगुणदोषध्वन्यलङ्कारादीनां काव्यसर्वस्वतत्त्वानां स्वल्पाक्षरगम्भीरं निरूपणं कुत्रापि सञ्जातम्। तेन तद्विषये—

अधृष्यश्चाभिगम्यश्च यादोरत्नैरिवार्णवः[2]।

इतीयं कविकुलगुरोर्भणितिरञ्जसैव हृदयपथेऽवतरति। बत!

यादृशः खलु महिमशाली काव्यप्रकाशः, तादृश्येव महिममण्डिता तेन प्रदीपाख्या व्याख्यापि लब्धा महामहोपाध्यायगोविन्देन प्रणीता, यः खलु विद्याविनययोरजनि अनन्यसदृशं भाजनम्।

काव्यप्रकाशस्य विद्वद्भिष्टीकाकृद्भिः स्वविषये बलगना अनल्पाः कृताः। बालचित्तानुरञ्जनीकारस्य हृदयं हरन्नयमाकर्णनीयो मनाग्व्याहारः श्रीमतः सरस्वतीतीर्थस्य—

तर्के कर्कशकेलिना बलवता वेदान्तविद्यारसे
मीमांसागुणमांसलेन परितः सांख्येऽप्यसंख्योक्तिना।
साहित्यामृतसागरेण फणिनो व्याख्यासु विख्यावता
काश्यां तेन महाशयेन किमपि ब्रह्मामृतं पीयते॥

एष चापि कमलाकरभट्टस्य निर्णयसिन्धोरपि प्रणेतुः—

तर्केन्दुस्तर्कमेघः फणिपतिभणितिः पाणिनीयप्रघट्टे
न्याये प्रायः प्रगल्भः प्रकटितपटिमभट्टशास्त्रप्रघट्टे।
प्रायः प्राभाकरीये पथि मथितदुरूहान्तवेदान्तसिन्धुः
श्रौते साहित्यकाव्ये प्रखरतरमतिर्धर्मशास्त्रेषु यश्च॥

---

१. महेश्वरभट्टाचार्यकृतस्यादर्शस्यान्ते।   २. रघुवंशम् १।१६।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

श्रीमन्नारायणाख्यात् समजनि विबुधो रामकृष्णाभिधान-
स्तत्सूनुः सर्वविद्याम्बुधिनिजचुलुकीकारतः कुम्भजन्मा ।
टीकां काव्यप्रकाशे कमलपदपरस्त्वाकरोऽरीरचद् यः'''॥

इत्यादि । एतद्विपरीतमयं तु केवलं वक्ति—

कः शोधयेदत्राशुद्धमहोमहत्सु विधिना भारोऽयमारोपितः[1] ।

तथापि, काव्यप्रकाशस्य जटिलजटिलानां ग्रन्थीनां विमोचना यथा प्रदीपकारेण कृता, न तथाऽन्येन केनापि । अत एव प्रभाकृतो भणितिः—

काव्यप्रकाशगम्भीरभावबोधो न चान्यतः[2] । इति ।

अत एव व्याख्याकृदपि 'आचार्य'-पदव्यां वर्यैरयमभिषिक्तो विराजतेतराम् ।

अस्य चोद्द्योतः प्रभा चेति द्वे टीके । प्रथमायाः प्रणेता वैयाकरणानां मूर्धन्यो महाभाष्यरसगङ्गाधरादिव्याख्याता लघुशब्देन्दुशेखरपरिभाषेन्दुशेखरद्वादशशेखराशौचनिर्णय-सापिण्ड्यप्रदीपादिकर्ता नागेशभट्टः । द्वितीयस्याश्चोदाहरणचन्द्रिकायाः कर्ता तत्सदुपाह्ववैद्य-नाथः । कुवलयानन्देऽपि तस्य गाढगूढा विराजते व्याख्या । तस्य कालः—

वियद्वेदमुनिक्ष्माभिर्मितेऽब्दे कार्तिके सिते ।
बुधाष्टम्यामिमं ग्रन्थं वैद्यनाथोऽभ्यपूरयत्[3] ॥

इत्युक्त्या १७४० वैक्रमाब्दाः ।

नागेशभट्टश्च दिल्लीश्वरस्य 'शाहजहाँ' इत्यस्य सभाविभूषणपण्डितराजजगन्नाथसन्दृब्ध-रसगङ्गाधरे 'गुरुमर्मप्रकाशं प्रणिनाय' इत्यैशवस्याष्टादशशतकस्य द्वितीये तृतीये वांशे तस्य कालं कलयन्तीतिहासविदः ।

अथ तत्रभवान् श्रीमान् मम्मटोऽर्थशक्तिमूलानुरणनरूपव्यङ्ग्यस्य निरूपणामाचरन् स्वतः सम्भविनालङ्कारात्मनाऽर्थेनालङ्कारस्य व्यञ्जनमुदाहरन्—

गाढकान्तदशनक्षतव्यथा सङ्कटादरिवधूजनस्य यः ।
ओष्ठविद्रुमदलान्यमोचयन् निर्दशन् युधि रुषा निजाधरम् ॥

इत्यत्र "अत्र विरोधालङ्कारेणाधरनिर्दशनसमकालमेव शत्रवो व्यापादिता इति तुल्ययोगिता, मम क्षतयाप्यन्यस्य क्षतिर्निवर्ततामिति तद्बुद्धिरुत्प्रेक्ष्यत इत्युत्प्रेक्षा च व्यज्यत इति शेषः ।" इत्यलिखत्[4] ।

तत्र प्रदीपकारः—

"अत्र निजाधरदशनवैरिवधूजनोष्ठदशनव्यथामोचनयोः कारणकार्ययोः पौर्वापर्यभाव-लक्षणयाऽतिशयोक्त्याऽलङ्कारेण दशनसमकालमेव शत्रवो व्यापादिता इति 'समुच्चयोऽसौ स त्वन्यो युगपद् या गुणक्रिया' इत्युक्तलक्षणसमुच्चयालङ्कारो द्योत्यते । एष एव च तुल्यकालं

---

१. प्रदीपस्योपसंहारश्लोकः प्रथमः । २. प्रभाया उपसंहारे ।
३. उदाहरणचन्द्रिकोपसंहारात् । ४. सोद्द्योतप्रदीपे काव्यप्रकाशे पृ० १४३ ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

योगितेति व्युत्पत्त्या तुल्ययोगितेति कैश्चिदुच्यते। मम क्षत्याप्यन्यस्य क्षतिर्निवर्तितामिति तद्बुद्धेरुत्प्रेक्षणादुत्प्रेक्षाप्यत्र व्यङ्ग्येति"[१]।

प्रकाशकारस्यायमाशयः—

ओष्ठविषयकयोर्दशनमोचनयोर्विरोधः। यो हि निजमप्यधरं दशति, स कथं परेषामधरान् मोचयतीति।

वीरानुभावतया प्रकृतयोः स्वाधरदशनशत्रुव्यापादनयोरेककालरूपैकधर्माभिसम्बन्धेन च तुल्ययोगितालङ्कार उक्तविरोधेन प्रतियोगिभेदेनाभासतामादधानेन व्यज्यत इति।

प्रदीपकृतः पुनरभिप्रयन्ति

प्रकाशे विरोध इति नैव विरोधस्य (विरोधाभासस्य) ग्रहणमसम्भवात्। अतो विरोधगर्भोऽलङ्कारो विपर्ययविरोधस्तेनेति लक्षणया कारणकार्ययोः पौर्वापर्येणात्मनातिशयोक्त्या अलङ्कारेण, कारणकार्ययोः स्वाधरदशनवैरिवधूजनोष्ठदशनव्यथामोचनयोस्तुल्यकालं निर्दिष्टतया तुल्यकालं योगितेति यौगिकार्थेन समुच्चयालङ्कारो व्यज्यत इत्यर्थः।

'नियतानां सकृद्धर्मः सा पुनस्तुल्ययोगिता[२]' इति प्रसिद्धाया तुल्ययोगिताऽलङ्कृतेस्तु ग्रहणमत्र न संभवति, प्रकृतानामप्रकृतानां वा एकधर्माभिसम्बन्धरूपायास्तस्याः प्रकृतेऽनवसरादेवेति।

अत्र प्रभाकृतः

वस्तुतस्त्विदमयुक्तम्, उक्तातिशयोक्तेः प्रौढोक्तिसिद्धत्वेन स्वतः सम्भविव्यञ्जकार्थोदाहरणत्वायोगात्। अतो वृत्त्युक्त ओष्ठदशनतद्व्यथामोचनयौगपद्यविरोध एवाभासमानो व्यञ्जकः। वाच्यतया सामानाधिकरण्येनाप्रतीतस्यापि व्यञ्जनया तथा प्रतीतिसंभवादित्थमेव युक्तमिति[३]।

नागेशभट्टाश्च

केचित्तु वीरानुभावत्वेन प्रकृतयोः स्वाधरदशनशत्रुव्यापादनयोरेककालिकत्वरूपैकधर्मसम्बन्धात् तुल्ययोगिताऽत्र।

पूर्वनिर्दिष्टकालक्रमानुसारेण प्रभाकृत् पूर्वः, उद्द्योतकृत्तु परः। प्रभाकृद्व्यञ्जक(विरोधालङ्कार)विषये प्रदीपकृन्मतं निरास्थदित्युद्द्योतकारो व्यङ्ग्यतुल्ययोगिताविषये एव परमतोपन्यासमुखेन तन्मतनिरसनार्थं प्रायस्यत्।

वस्तुतस्तु नागेशेन परमतानुवादो निजास्वरससूचनायैव कृत इति वितत्य तन्मतसमीक्षणपूर्वकमन्यत्र दर्शितम्, मूलमतमपि हिरुगेव पर्यालोचितमिति प्रभाकृन्मतमेव प्रकृते समीक्षणनिकषविषयता नेतुमवशिष्यते।

ओष्ठदशनतद्व्यथामोचनयौगपद्यविरोध एवाभासमानो व्यञ्जक इति प्रभाकृतां भाणितिः। तत्रेदं विचारणीयम्—वस्तुगत्या विरोधाभावेऽपि विरोधप्रतिभाप्रयोजकरूपेणाभिधानो विरोधाभासोऽलङ्कारः। स च सामानाधिकरण्यमूलः—भिन्नदेशतया प्रसिद्धयोरेकदेशसम्बन्धादिरूप इति यावत्। यथा—

१. तत्रैव, पृ० १४३-४४। २. काव्यप्रकाशः, सूत्रम् १५८। ३. प्रदीपप्रभा, पृ० १४४।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अभिनवनलिनीकिसलयमृणालवलयादिदवदहनराशिः ।

सुभग कुरङ्गदृशोऽस्या विधिवशतस्त्वद्वियोगपविपाते[1] ॥

इत्यत्र नलिनीकिसलयत्वादिजातेर्दवदहनत्वजातेश्च विरोधः । असामानाधिकरण्ये तु पृथगलङ्कारोऽसङ्गतिः—

भिन्नदेशतयाऽत्यन्तं कार्यकारणभूतयोः ।

युगपद् धर्मयोर्यत्र ख्यातिः सा स्यादसङ्गतिः[2] ॥

इति लक्षणात् ।

अत्रात्यन्तमिति देशभेदस्यैवोपकारकम्, न तु पृथगपि विवक्षितार्थम्—तच्चैकत्रैव देशे विच्छेद(अंश)-भेदेन भिन्नदेशताव्यावर्तनाय । तेन 'दष्टो भुजङ्गेन पदेऽक्षिणा घूर्णत' इत्यत्र नातिव्याप्तिः। देशस्यात्यन्तभिन्नत्वाभावात्। युगपदिति स्वरूपानुवादमात्रं न लक्षणकोटिप्रविष्टम्—

उद्भिन्नमात्रे वयसि दृष्ट्वा प्रियतमाऽधरम् ।

भावी लाक्षारसोऽत्रेति कामिनो रज्यते मनः[3] ॥

इत्यत्र कालभेदेऽप्यसङ्गतेरिष्टत्वात् । संगतिरेकदेशत्वलक्षणः सम्बन्धस्तस्य त्यागादसंगतिः । एवं च विशेषप्रतिपत्तये कार्यकारणयोर्भिन्नस्थानस्थितत्वेनाभिधानेऽसङ्गतिरलङ्कार इत्यर्थः । एवञ्च विरोधः सामान्यम्, असङ्गत्यादिर्विशेषः । विशेषविषयपरिहारेणैव च सामान्यस्य स्थितिः । यथा **'अग्नीषोमीयं पशुमालभेत[4]'** इति श्रुतेर्विषयपरिहारेण **'मा हिंस्यात् सर्वभूतानि'** इति श्रुतेः । यथा वा **'उदिते जुहोति, अनुदिते जुहोति, समयाध्युषिते जुहोति'** इति श्रुत्योदितहोमादौ बलवदनिष्टाननुबन्धीष्टसाधनत्वं बोध्यते । अनयोक्त्या **'श्यावोऽस्याहुतिमभ्यवहरति य उदिते जुहोति, शबलोऽस्या इति अभ्यवहरति यः अनुदिते जुहोति श्याव शबलावस्याहुतिमभ्यवहरतः यः समयाध्युषिते जुहोति'** इति श्रुत्योदितादिहोमकर्तुः प्रायश्चित्तहोमबोधिकयोदितहोमादावनिष्टसाधनत्वमाक्षिप्यत इति श्रुत्योः परस्परविरोधादबोधकतयाऽप्रामाण्यम् **'तदप्रामाण्यमनृतव्याघातपुनरुक्तदोषेभ्यः'** इत्यत्रत्य**'व्याघात'**पदेनोपक्षिप्याक्षपादस्तत् प्राक्षिपत्—

अभ्युपेत्य कालभेदे दोषवचनात्[5] । इति ।

सूत्रेऽत्र 'अव्याघात' इति शेषः । अभ्युपेत्य प्राक्तनश्रुत्या बोधमभ्युपेत्य कालभेदे विहितकालमतिक्रम्य कृते दोषवचनात् । यथा अग्न्याधानकाले उदितहोमादिकमभ्युपगतं तत्रानुदितहोमादिकरणे दोषकथनान्न विरोध इतीत्यादिविवरणम्[6] । फलतोऽसङ्गत्यलङ्कारस्य विषयेऽत्र विरोधस्याऽनवसर एवेति प्रभाप्रणेतुः प्रकृतपद्ये विरोधालङ्कारस्यालङ्कारव्यञ्जकतासमर्थनमस्थान एव । अत एव वामनाचार्यः—

---

१. काव्यप्रकाशबालबोधिनी पृ० ६६३ ।

२. विरोधालङ्कारे प्रथमोदाहरणं प्रकाशस्य ।

३. काव्यप्रकाशः १०।१२४ । ४. सविवरणे न्यायसूत्रे पृ० ११९ ।

५. न्यायसूत्रम् २।१।५६ । ६. तदेव २।१।५८ ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

"अन्ये तु विरोधालङ्कारेणेत्यस्य वास्तवविरोधमूलाऽसंगत्यलङ्कारेणेत्यर्थः। स्वाधरनिर्दशनवैरिवधूजनोष्ठव्यथामोचनयोः कारणकार्ययोर्वैयधिकरण्येन निर्देशाद्विरोधस्य स्फुटत्वादिति वदन्तीति मतान्तरमुपन्यास्थत्[1]।"

सामानाधिकरण्याऽभावेन विरोधाऽलङ्कार इति स्पष्टीकृतं प्रदीपे—

शनिरशनिश्च तमुच्चैर्निहन्ति कुप्यसि नरेन्द्र यस्मै त्वम्।
यत्र प्रसीदसि पुनः स भात्युदारोऽनुदारश्च॥

अत्र **'विरुद्धावपि त्वनुवर्तनार्थमेकं कार्यं कुरुत'** इत्येतं शब्दशक्तिमूलानुरणनव्यङ्ग्यवस्तुरूपमुदाहरन्तं प्रकाशं व्याचक्षाणेन "अत्र प्रथमार्धे शनिरशनिश्चेत्यनेन 'विरुद्धावपि त्वदनुवर्तनार्थमेकं कार्यं कुरुतः' इति वस्तु ध्वन्यते, न तु विरोधालङ्कारः सामानाधिकरण्याभावात्, विरोधस्य च तत्रैव विश्रान्तेः" इति प्रदीपेन।[2]

"सामान्याधिकरण्याभावादिति। एकधर्मिगतत्वेन शनित्वतद्भिन्नत्वयोरप्रतिपादनादिति भावः। (नञो भिन्नार्थत्व एव विरोधः इत्यपि बोद्ध्यम्) इति" इत्युद्द्योतानुयातेन[3]।

'सामानाधिकरण्येन' इति प्रदीपव्याख्यायां स्वयं प्रभाकृतोऽपि प्राहुः, परस्परानन्वये नैकधर्मिबोधकत्वाभावात्। यथा शनिरिति वाक्ये [4]इत्यर्थः।

काव्यप्रकाशव्याख्यायामुदाहरणचन्द्रिकायामपि च—

'न च पूर्वार्धेऽपि विरोधस्य व्यङ्ग्यत्ववाच्यत्वयोरन्यतराशङ्का, एकधर्मिगतत्वेन विरुद्धनिर्देश एव तत्स्वीकारात्'[5] इति।

उद्द्योतकाराश्चान्यत्राऽपि वैयधिकरण्ये विरोधं व्यरुन्धन् दशमोल्लासान्ते—'यथा वा, भिन्नाश्रययोर्विरोधवर्णनम्। यथोष्णभासस्तनयाया अपि जलं शीतलमित्यादौ। एकाश्रयत्वेनैव विरोधस्योक्तेरिदमनभिहितवाच्यमेवेति[6]।

प्रभाकृतैव कुवलयानन्दस्यालङ्कारशास्त्रालङ्कारस्यापि टीकोदाहरणचन्द्रिका नाम्नैव कृता। तत्रापि स सिद्धान्तमिमं साधु व्याकरोत्—

आभासत्वे विरोधस्य विरोधाभास इष्यते।[7]

इत्यस्य व्याख्या तस्य।

'तथा चैकाधिकरण्येन प्रतीयमानयोः कार्यकारणत्वेनागृह्यमाणयोर्धर्मयोराभासमानापर्यवसन्नविरोधत्वं लक्षणं द्रष्टव्यम्। 'शनिरशनिश्च तमुच्चैरित्यादावतिव्याप्तिवारणायाद्यं विशेषणमित्यादि।[8]

विरुद्धं भिन्नदेशत्वं कार्यहेतोरसङ्गतिः।[9]

इत्यस्य च **'भिन्नदेशत्वं भिन्नाधिकरणत्वम्'**[10] इति।

---

१. सबालबोधिनीके काव्यप्रकाशे पृ० १३९।
२. काव्यप्रकाशे ४।३८ स्थः प्रदीपः।
३. आनन्दाश्रमप्रकाशिते सोद्द्योते पृ० १३९।
४. सप्रभस्य काव्यप्रदीपस्य पृ० १०१।
५. तत्रैव टिप्पणे समुद्धृतम्।
६. सप्रदीपोद्द्योते—काव्यप्रकाशे पृ० ६००।
७. कुवलयानन्दे कारिका ७६।
८. कुवलयानन्दस्य निर्णयसागरीये संस्करणे पृ० १०३।
९. कुवलयानन्दः—कारिका ८५।
१० उक्तसंस्करणे पृ० १०९।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तथा च प्रकृते विरोधालङ्कारस्य व्यञ्जकतां समर्थयन् प्रभाकारो नालङ्कारिकीं सरणिमेव केवलां स्वीयं वचननिश्चयमपि तु विरुणद्धि ।

स्वयं तत्रभवान् मम्मटो विरोधाऽसङ्गत्यलङ्कारयोर्भिदां विशदामकरोत् **सङ्गतिप्रकरणे** —

'एषा च विरोधबाधिनी न विरोधः । भिन्नाधारतयैव द्वयोरिह विरोधितायाः प्रतिभासात् । विरोधे तु विरोधित्वमेकाश्रयनिष्ठमनुक्तमपि पर्यवसितम्, अपवादविषयपरिहारेणोत्सर्गस्य व्यवस्थितेः । तथा चैवं निर्दशितम्'[1] इति ।

अस्य व्याख्यानम्–ननु विरोध एवायं स्यादित्यत आह—एषा चेति । अत्र हेतुमाह—भिन्नेति । एवञ्च व्यधिकरणयोर्यत्रैकाधिकरण्येन विरोधप्रतिसन्धानं स विरोधाभासः, यत्र तु समानाधिकरणयोर्वैयधिकरण्येन विरोधप्रतिसन्धानं साऽसङ्गतिरिति द्रष्टव्यम् ।

नन्वेवं विषयभेदान्नोत्सर्गापवादभावः, विषयैक्य एव तत्संभवादिति चेन्न, विरोधाभासस्य हि विरोधसामान्यं विषयः, असंगतेश्च कार्यकारणवैयधिकरण्यमात्रप्रयुक्तो विरोधविशेष इति समानविषयत्वस्योत्सर्गापवादभावस्य च संभवादिति[2] ।

परमसहृदया जगन्नाथपण्डितराजा अपि–'व्यधिकरणत्वेन प्रसिद्धयोः सामानाधिकरण्येनोपनिबन्धने विरोधः, सामानाधिकरण्येन प्रसिद्धयोर्द्वयोर्वैयधिकरण्येनोपनिबन्धनेऽसङ्गतिः' इति प्रव्यक्तमुक्तवन्तः ।[3]

एवञ्च —'ओष्ठत्वेन सामानाधिकरण्यस्य विवक्षितत्वात् प्रतियोगिभेदेनाभास इति बोध्यम्' इत्युद्द्योतप्रभानाम्ना वामनस्याचार्यवर्यस्यात्र विरोधालङ्कारसमर्थनमतितुच्छमात्मनैव पराकृतं वेदितव्यम् । असंगत्यामपि यथाकथञ्चिदेकाधिकरण्यं विवक्षित्वात्तस्यादत्तजलाञ्जलित्वप्रसङ्गात्—शनिरशनिरित्यत्रापि तथैव विरोधालङ्कारव्यञ्जनसम्भवेन सकलालङ्कारिकसिद्धान्तव्याकुलीभावापत्तेः, उद्द्योतस्यात्रास्वरसोक्तेः प्रभायाश्च पराकृतत्वात् ।

तथा च स्थितं यत् प्रकृते व्यञ्जकं विरोधाभासमलङ्कारं समर्थयन् प्रभाकृन्न केवलमालङ्कारिकीं सरणिं स्ववचनान्यपि तु विरुणद्धि इति ।

अग्रे च—"ओष्ठदशनतद्व्यथामोचनविरोध एवाभासमानो व्यञ्जकः, वाच्यतया सामानाधिकरण्येनाप्रतीतस्यापि व्यञ्जनया तथाप्रतीतिसंभवादित्येव युक्तमिति प्रभाऽपि न प्रभासते । विरोधालङ्कारस्यात्रावकाशस्यैवाभावात् । उक्तयुक्तेः[4] ।" अथ "सामानाधिकरण्यस्य प्रतीतावेव विरोधालङ्कार आरोहति"—इत्यस्यालङ्कारिकसम्प्रदायस्य विरोधः प्रभाकृतो न नाम नाऽस्फुरत्–तत एवाग्रेतन्याः पङ्क्तेरवतरः । न च सोऽपि युक्तिसहः, व्यञ्जनया सामानाधिकरण्यप्रतीतेरुपगतौ हि विरोधोऽपि वैयञ्जनिकबोधविषय एवाङ्गीकरणीयः स्यात् । तदा च प्रक्रमभङ्गदोषः प्रसज्जेत । वाचकेन वस्तुना वस्तुनोऽलङ्कारस्य वा व्यञ्जनं शब्द-

---

१. सप्रदीपोद्द्योते काव्यप्रकाशे पृ० ५५३ २. द्र० चक्रवर्तिभट्टाचार्यकृता विस्तारिका ।
३. रसगङ्गाधरेऽसङ्गतिप्रकरणम् । ४. काव्यप्रकाशबालबोधिन्याम्, पृ० १३१ ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

शक्तिमूलानुरणनात्यपूर्वमुपपाद्यार्थशक्तिमूलानुरणनरूपेष्वपि प्रकृतादुदाहरणात् पूर्वं परतश्चापि वाचकेनैव स्वतः संभविना कविप्रौढोक्तिसिद्धेन तदुम्भितवक्तृप्रौढोक्तिसिद्धेन वाऽर्थेन वस्त्वलङ्कारात्मना तादृशस्य व्यक्तिमेव हि प्रकाशकार उदाजहार।[1]

तत्किं व्यङ्ग्येनालङ्कारेणाऽलङ्कारस्य व्यक्तिर्न भवति ? न न भवति। न तु प्रसङ्गेऽस्मद्विवेचनाविषयतामाचामति तथोदाहर्तुमाचार्यवर्यस्य प्रवृत्तिः। व्यङ्ग्येन व्यञ्जनं सोऽन्यत्रैवोदाहरत्।[2]

परमार्थविचारे पुनर्नासङ्गतेरप्यत्राऽऽस्पदम्, अपि तु कारणकार्यविपर्ययरूपातिशयोक्तेरेव। वर्ण्यनृपकर्तृकं स्वाधरदशनमत्र कारणम्, अरिनारीणामोष्ठदशनव्यथामोचनं कार्यम्। न च कारणकार्ययोर्यौगपद्यम्, सव्येतरविषाणयोरिव। अत्र तु निर्दशममोचयदिति कारणकार्ययोर्द्वयोः समकालिकत्वमुक्तम्। इयमेव चाक्रमातिशयोक्तिरप्युच्यते। कारणकार्ययोः पौर्वापर्यमात्रमिदमीयो विषयः। सामानाधिकरण्यस्थलीयो विरोधो विरोधाभासस्य तद्भिन्नश्चासङ्गतेः। तत्र कारणकार्यविपर्ययस्थलेऽपि विरोधस्यासङ्गतेर्वा प्रसङ्गेऽक्रमातिशयोक्तेर्विषय एवोच्छिद्येत।

तथा च—"आ ईषद्-भासते विरोधश्च सः। आमुख एव प्रतीयमानो झगिति जायमानाऽविरोधधीतिरस्कृतः। तत्रापि कार्यकारणादिबुद्ध्यनालीढो विरोधाभासो विरोधालङ्कारः, तदालीढस्तु-विभावनादिरित्यादिरीत्या विषयभेदं व्यवातिष्ठिपन्नलङ्कारागममार्मिकाः[3]।

एवञ्चात्र विरोधालङ्कारस्य व्यञ्जकत्वसमर्थनं प्रभाकृतः प्रभाविहीनमेवेत्यवगन्तव्यम्।

परन्तु तदीयेयमुक्तिर्यत् पौर्वापर्यविपर्ययात्मिकातिशयोक्तिश्चेदलङ्कारव्यञ्जिकात्रोपेयेत, तर्हि तस्याः कविप्रौढोक्तिसिद्धत्वेन स्वतःसम्भविनाऽलङ्कारात्मनाऽर्थेनालङ्कारव्यक्तेरुदाहरणदानं न युज्यत इति, सा खलु दूरपरिहारैव।

तस्माद् भिक्षोर्जीर्णकन्था यथैकतः सन्धीयमाना अपरतः शीर्णा भवति, तथैव प्रकृतमुदाहरणमिति पण्डितराजीमिवापरमुदाहरणमेवादर्तव्यमिति कृतं कृतिषु विततेन।

● ● ●

---

१. द्र० काव्यप्रकाशे चतुर्थ उल्लासः। २. तत्रैव— २१७।

१. रसगङ्गाधरे विरोधाभासप्रकरणम्।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

धर्मस्वरूपविमर्शः

श्रीबैरिस्टरतिवारी,
अनुसन्धाता
सरस्वतीभवनपुस्तकालयसदस्यः
सम्पूर्णानन्दसंस्कृतविश्वविद्यालये

सृष्टौ नानाविधप्राणिनां सञ्चालनाय प्रकृतिसिद्धनियमाः सन्ति। आब्रह्मस्तम्बपर्यन्तं जगदिदं व्यवस्थितरूपेण कयाप्यदृष्टशक्त्या सञ्चाल्यते। परमाणूनां विखण्डनकर्तृभिः आइन्टीन-महोदयैरपि परमाणुव्यवस्थाया नैयत्यम्, परमाणूनां निश्चितावस्थानम्, संस्थानं च दृष्ट्वा सा दृष्टशक्तिरङ्गीकृता। निखिलभौतिकजगद्-ग्रह-नक्षत्र-तारकाकाशादीनां व्यवस्थितनियन्त्रणार्थं या शक्तिः, सैवार्यविचाराधारायां 'धर्म'शब्देनाङ्गीकृता। स धर्म एव ईश्वरः। धर्मः स्वशक्त्या जगतः सर्जनमपसंहरणं च करोति। उक्तं च—

धारणाद् धर्ममित्याहुर्धर्मो धारयति प्रजाः।
यः स्याद् धारणसंयुक्तः स धर्म इति निश्चयः[1]॥

कौटिल्येनापि 'सुखस्य मूलं[2] धर्मः' इत्युक्तम्। जगत उत्पत्तिस्थितिप्रलयकर्तृत्वशक्ति-विशेषो धर्म इत्येव गीतायामपि वर्णितम्। तस्य धर्मस्य योनिरीश्वरः। तथा हि—

'बीजं मां सर्वभूतानां विद्धि पार्थ सनातनम्।'[3] इति।
'अहं कृत्स्नस्य जगतः प्रभवः प्रलयस्तथा।'[4] इति च।

एवञ्च आत्मयोनेर्धर्मस्याधिदैविकाधिभौतिकाध्यात्मिकसृष्टिसञ्चालनविधायकत्वमुक्तम्। यदा धर्मव्यवस्था स्वव्यवस्था भवति, तदा तेनैव प्रकृत्यध्यक्षेण धर्मो व्यवस्थाप्यते। तथा च—

अजोऽपि सन्नव्ययात्मा भूतानामीश्वरोऽपि सन्।
प्रकृतिं स्वामवष्टभ्य संभवाम्यात्ममायया॥
यदा यदा हि धर्मस्य ग्लानिर्भवति भारत।
अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहम्।
परित्राणाय साधूनां विनाशाय च दुष्कृताम्।
धर्मसंस्थापनार्थाय सम्भवामि युगे युगे[5]॥

---

१. म० भा० शा० प०-१०९।१०। २. चा० नी० सू०। ३. गीता-७।१०।
४. गीता-७।६। ५. गीता-४।६-७-८।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

गीतायां कृष्णेन धर्मस्य हानिदशायां धार्मिकसेतुभूतमर्यादानां स्थापनाय, दुष्कृ विनाशाय, साधुधार्मिकजनानां रक्षणाय चेश्वरावतारो भवतीति प्रतिपादितम्। स्वपरभे धर्मस्यापि द्विधा विभागः। एकश्च स्वधर्मः, द्वितीयो परधर्मश्चेति। पुनश्च सामान्यविशे भेदाभ्यां प्रत्येकस्य द्वैविध्यम्। तथा च गीतायाम्—**'स्वधर्मे निधनं श्रेयः परधर्मो भयावह** इत्युक्तम्। भारतवर्षे विश्वे च प्राणिजगत् गुणकर्मविभागशः चतुर्धा विभक्तम्। तथा हि—

चातुर्वर्ण्यं मया सृष्टं गुणकर्मविभागशः।
तस्य कर्त्तारमपि मां विद्ध्यकर्त्तारमव्ययम् ॥ इति।
स्वे स्वे कर्मण्यभिरतः संसिद्धिं लभते नरः[१]।

तस्य धर्मस्य ज्ञानं शास्त्रज्ञानादृते दुःशकम्, धर्मस्य, स्वर्गादिसाधनस्य शास्त्रैकगम्य त्वात्। पत्न्युपगमनादिरूपः कर्मोऽपि धर्मशास्त्रीय एवाभिहितः। तथा हि—**'धर्माविरुद्ध कामोऽस्मि भूतेषु भरतर्षभ'** इत्यभिहितत्वात्। मनुनापि **'ऋतुकालाभिगामी स्यात् स्वदारनिरत सदा'** (मनु० अ० ३।४५) इत्यनेन कामस्य **'ऋतामृताभ्यां जीवेत'** (मनु० ४।४ इत्यनेनार्थस्य च धर्म्यत्वमुपपादितम्। मोक्षोपायत्वेनाभिहितस्यात्मज्ञानस्यापि धर्मत्वा तद्धर्मविषयत्वं स्पष्टमेव। इत्थञ्च ब्राह्मण-क्षत्रिय-वैश्य-शूद्रादीनां वर्णानां धर्मार्थकाममोक्षाख्य पुरुषार्थचतुष्टयावाप्तिसाधनीभूतनियतकर्मणां प्रसवत्या देश-समाज-कुल-व्यक्तीनाञ्च व्यवस्थ उचिता सम्पद्यते। धर्म ईश्वररूप एव। अत एव **'तस्माच्छास्त्रं प्रमाणं ते'** इति गीतोक्ति **'शास्त्रयोनित्वात्'** इति ब्रह्मसूत्रञ्च सङ्गच्छते। शास्त्रेषु कर्तव्याकर्तव्यव्यवस्था ऋषिभिः कृता दिक्देशकालपरिस्थितिभिः सह धर्मस्य सम्बन्धस्त्वग्रे विवेचयिष्यते। धर्मश्च नियतकर्म एव नियतकर्म शास्त्रीयं कर्म एव। तथा हि—**'नियतं कुरु कर्म त्वं'** (गी० ३।८) इति नियतकर्मणो योनिर्ब्रह्म, यथा—**'कर्म ब्रह्मोद्भवं विद्धि'** (गी० ३।१५) इति।

एवञ्च ब्रह्मयोनिर्नियतं कर्म एव धर्मः। धर्माचरणेनैव इह लोके सुखं पर्यन्ते मोक्षं च जीवो लभते। तथा चेश्वरनिर्दिष्टकर्मणो धर्मत्वं सिद्धम्। उक्तं हि—

धर्मं तत्ते पुरीषं तेन वर्धस्व चाप्यायस्व।
वर्धिषीमहि च वयमाचाऽऽप्यासिषीमहि[२] ॥

अत्र 'हे धर्म ! एतत् पयः। ते तव पुरीषम्। पृणाति पूरयतीति पुरीषं पूरयित्रि अन्नम्। तेन पयसा वर्धस्व वृद्धिं गच्छ। आप्यायस्व चास्मानपि सर्वतो वृद्धिं प्रापय। भवत् प्रसादाद् वयं वर्धिषीमहि वृद्धिं प्राप्नुयाम। आप्यायसीमहि च अस्मदीयपुत्रपश्वादीन् सर्वतो वृद्धान् करवाम' इति सायणाचार्यो बभाषे। एतेनैहिकामुष्मिकसुखमूलत्वं धर्मस्य सिद्धम्।

---

१. गीता ४।१३। २. वा० सं० ३८।२।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

भोग्योऽभवदथो अन्नमदद् बहु ।
यो देवमुत्तरावन्तमुपासातै सनातनम् ॥
सनातनमेनमाहुरुताद्य स्यात् पुनर्णवः ।
अहोरात्रे प्रजायेते अन्यो अन्यस्य रूपयोः ॥

अर्थाद् 'व्यक्तेः समाजस्य राष्ट्रस्य विश्वेषां धारणपोषणसंघटनसामञ्जस्यसाम्मनस्य-हेतुत्वेन धर्मस्य सर्वोपादेयता। तस्य प्रसादादेव मनुष्योऽन्ये चान्नवन्तोऽन्नादाश्च भवन्ति। सनातनोपासनेनैव सनातनपदप्राप्तिर्भवति। धर्मोऽयं सनातनोऽपि पुनर्नवो भवति[2]' इति करपात्रिस्वामिमहाभागाः।

धर्म एव स्वशक्त्या प्रजा धारयते सर्वमेव धर्ममूलम्। सर्वेषां धारणपोषणानुगुणशक्ति-सम्पन्नत्वादपि तस्य धर्मत्वम्। तथा च—

'धर्मो विश्वस्य जगतः प्रतिष्ठा। लोके धर्मिष्ठं प्रजा उपसर्पन्ति। धर्मेण पापमपनुदति। धर्मे सर्वं प्रतिष्ठितं। तस्माद्धर्मं वदन्ति' (तैत्तिरीये १०।६३) इति।

एतेन जगतः सृष्टिस्थित्यादिकं पापनिवारकत्वम्, जीवपालनकर्तृत्वम्, सर्वयोनित्वञ्च धर्मस्य सिध्यति। धर्मपालकमेव राजानं प्रजा उपसर्पन्तीत्यपि स्पष्टम्।

धर्मशब्दनिर्वचनम्

महर्षिणा पाणिनिना अर्धर्चादिगणे 'धर्म' शब्दः पठितः। 'धृञ् धारणे', (भ्वा० उ० अ०) धृङ् अवस्थाने (तु० आ० अ०) इति धातुभ्याम् 'अर्तिस्तु···' इत्यौणादिकेण सूत्रेण मन् प्रत्यये धारणावस्थानार्थकस्य धर्मशब्दस्य सिद्धिः। महाभारते—

प्रभवार्थाय भूतानां धर्मप्रवचनं कृतम्।
यः स्यात् प्रभवसंयुक्तः स धर्म इति निश्चयः॥ १ ॥
धारणाद्धर्ममित्याहुर्धर्मेण विधृताः प्रजाः।
यः स्याद्धारणसंयुक्तः स धर्म इति निश्चयः॥ २ ॥

इति धर्मपदस्य निर्वचनमुपलभ्यते[3]।

मत्स्यपुराणे—

धर्मो धर्मगतिः प्रोक्तः शब्दो ह्येष क्रियात्मकः।
कुशलाकुशली चैव धर्माधर्मौ ब्रवीत् प्रभुः॥ १ ॥
धर्मेति धारणे धातुर्माहात्म्ये चैव पठ्यते।
धारणाच्च महत्त्वेन धर्म एव निरुच्यते॥ २ ॥

इत्येवं धर्मशब्दस्य निर्वचनं लभ्यते[4]।

---

१. अथर्वसं० १०।८।२२-२३। २. राजनीतिदर्शनबिन्दुः पृ० २८ पं० २०-२३।
३. म० भा० शा० प० १०९।१०-११। ४. मत्स्यपु० १३३ अध्याये १७।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तत्रैव धर्मशब्दस्य निर्वचनमुक्त्वा स्वरूपमप्युक्तम् । तथा हि—

स इष्टः प्रापको धर्म आचार्यैरुपदिश्यते ।
इतरश्चानिष्टफल आचार्यैर्नोपदिश्यते[1] ॥

अस्य इष्टप्रापकत्वरूपस्य धर्मस्याचार्यैर्मन्वादिभिरुपदेशः क्रियते । इतरोऽध स चानिष्टफलः । स चाचार्यैर्निषेध्यत्वेनैवोपदिश्यत इत्यर्थः ।

भविष्यपुराणेऽपि—

धर्मः श्रेयः समुद्दिष्टं श्रेयोऽभ्युदयलक्षणे ।
स तु पञ्चविधः प्रोक्तो वेदमूलः सनातनः ॥
अस्य सम्यगनुष्ठानात् स्वर्गो मोक्षश्च जायते ।
इह लोके सुखैश्वर्यमतुलं च खगाधिप[2] ॥

इत्युक्तम् । तथा च वेदेषु बहुत्र धर्मशब्द आम्नातः । तथा हि -

मित्रावरुणौ त्वोत्तरतः परिधत्तान् ध्रुवेण धर्मणा[3] ।
मारुतीमिनोतु मित्रावरुणौ ध्रुवेण धर्मणा[4] ॥
यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन्[5] ।

इत्यादिषु यजुःषु स्थिरधर्मादिशाश्वतविध्यर्थे च धर्मशब्दः पठ्यते । पुनश्च—

त्वे धर्माण आसते जुहूभिः सिञ्चतीरिव । (ऋ० १०।२१।३)
तानि धर्माणि प्रथमान्यासन् ।। (१०।९०।१६)

'धर्मणा मित्रावरुणा विपश्चिता व्रता रक्षेथे असुरस्य मायया' (५।६३।७), 'स **धर्माणि'** (३।३।१), **'प्रथमानु धर्मा'** (३।१७।१), **'द्यावापृथिवी वरुणस्य धर्मणा विष्कभिते भूरिरेतसा'** (६।७०।१), **'अचित्ती यत्तव धर्मा युयोपिम मा नस्तस्मादेनसो देव रीरिषः'** (७।८ इत्यादिस्थलेषु विधिक्रियासंस्कार-नियम-रक्षणादिष्वर्थेषु धर्मशब्दः प्रयुक्तः[6] । अथर्ववेदे—

ऋतं सत्यं तपो राष्ट्रं श्रमो धर्मश्च कर्म च ।
भूतं भविष्यदुच्छिष्टे वीर्यं लक्ष्मीर्बलं बले[7] ॥

अत्र धर्मस्य क्रिया-संस्काराभ्यामासादितगुणस्यार्थः । **'धर्मस्य गोप्ता ज तमभ्युत्कृष्टमेवं विदभिषेक्ष्यन्नेतया चाभिमन्त्रयेत'** । अत्राभिषेके **'धर्मस्य गोप्ता जनिः'** इत्य ऋचा मार्जनं प्रयुञ्जीतेत्यर्थः[8] इत्यैतरेयब्राह्मणे प्राप्यते । छान्दोग्ये—

त्रयो धर्मस्कन्धाः यज्ञोऽध्ययनं दानमिति । प्रथमस्तप एवेति द्वितीयो ब्रह्मचार्याचार्यकुलवासी । तृतीयोऽत्यन्त-मात्मानमाचार्यकुलेऽवसादयन् सर्व एते पुण्यलोका भवन्ति ब्रह्मसंस्थोऽमृतत्वमेति[9] ॥ इति ।

---

१. मत्स्य १३३।१८ । २. कुल्लूकभट्टम् (२।१ टीकायाम्) । ३. वा० सं० ५।
४. वा० सं० ५।२७ । ५. वा० सं० ३१।१६ । ६. इति (काणे) अ० । पं० ६-
७. अथर्व० ११।९।१७ । ८. ऐतरेये ७।१७ । ९. छान्दोग्ये २।२३ ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

इति शाखानिर्वचनव्याजेन धर्मस्वरूपनिर्वचनमुपलभ्यते । वैदिकसाहित्ये धारण-पोषण-रक्षण-आचार-क्रिया-विध्यादिष्वर्थेषु धर्मशब्दः प्रयुक्तः । मेदिनीकोषे —

धर्मो स्त्रीपुण्यमाचारे स्वभावोपमयोः क्रतौ ।

अहिंसोपनिषन्न्याये ना-धनुर्यम सोमपे' ॥

इति धर्मशब्दस्यार्थाः सन्ति ।

'धर्मः पुण्ये यमे न्याये स्वभावाचारयोः क्रतौ' इति विश्वे, स्यात् धर्ममस्त्रियां पुंसि श्रेयसो सुकृतं वृषमित्यमरकोशे च धर्मशब्दः प्रयुज्यते ।

इत्थमेतेष्वर्थेषु वेदब्राह्मणारण्यकादिषु मन्वादिस्मृतिषु भागवतादिपुराणेषु चोपलभ्यते धर्मशब्दः । स्मृतीतिहासपुराणादिषु प्रतिपादितः सनातनो धर्मः श्रुतिस्मृतिपुराणोक्तधर्मं इत्यपि व्यपदिश्यते । महाभारते धर्मस्य महत्त्वमिदमुक्तम्—

न जातु कामान्न भयान्न लोभाद्धर्मं त्यजेज्जीवितस्यापि हेतोः ।

नित्यो धर्मः सुखदुःखे त्वनित्ये नित्यो जीवो धातुरस्य त्वनित्यः[1] ॥

धर्मः प्रजां समाजं राष्ट्रं च दधाति । धर्मार्थकामाख्ये त्रिवर्गे धर्म एव मुख्यः । एवं च राज्यानां मूलम् धर्म एव—**त्रिवर्गोऽयं धर्ममूलं नरेन्द्र राज्यं चेदं धर्ममूलं वदन्ति[2] ।**

गीतायामपि—

'स्वल्पमप्यस्य धर्मस्य त्रायते महतो[3] भयात् ।'

इति धर्मस्य महत्त्वमुक्तम् । धर्म एवार्थकामयोर्मूलम् । अधर्ममार्गेणाप्तराज्यस्य दुर्योधनस्य राज्यनाशः, विपत्स्वत्यक्तधर्मस्य युधिष्ठिरस्य राज्यप्राप्तिः, आपामरप्रसिद्धेति महाभारत-तात्पर्यमूह्यम् । उक्तं हि—**'धर्मे सर्वं प्रतिष्ठितम्[4] धर्मो विश्वस्य जगतः प्रतिष्ठा' ।**

इत्थञ्चास्य धर्मशब्दस्यानेकेऽर्था नानाजातीयाभिः शेमुषीभिर्नानारूपतया स्थापिता आकृतिभिन्ना अपि तत्त्वतः समानाः । तथापि धर्मस्य महत्त्वं सर्वत्रैव स्वीकृतम् । मनुनाप्युक्तम्—

धर्म एव हतो हन्ति धर्मो रक्षति रक्षितः ।

धर्मलक्षणम्

अधुना धर्मशब्दस्य लक्षणमधिकृत्य विचार्यते । तत्र परमकारुणिकेन महर्षिणा जैमिनिना **'अथातो धर्मजिज्ञासा'** इत्यारभ्य **'अन्वाहार्ये च दर्शनाद्'** इत्यन्ता द्वादशाध्यायी पूर्वमीमांसा प्रणीता । प्रथमेऽध्याये 'विध्यर्थवादमन्त्रस्मृतिनामधेयार्थकस्य शब्दराशेः प्रामाण्यम्, द्वितीये कर्मभेदोपोद्घातप्रमाणापवादप्रयोगभेदरूपोऽर्थस्तृतीये श्रुतिलिङ्गवाक्यादिविरोधप्रतिपत्ति-कर्मानारभ्याधीतबहुप्रधानोपकारकप्रयाजादियाजमानचिन्तनम्, चतुर्थे प्रधानप्रयोजकत्वा-प्रधानप्रयोजकत्वम्, जुहूपर्णतादिफलराजसूयगतजघन्याङ्गाक्षद्यूतादि चिन्तनम्, पञ्चमे श्रुत्यादि-क्रमतद्विशेषवृद्ध्यवर्धनप्राबल्यदौर्बल्यचिन्ता, षष्ठेऽधिकारि तद्धर्मद्रव्यप्रतिनिध्यर्थलोपन-

१. स्वर्गा० ५।६३, उद्योग ४०।१२　२. वन० ४।४ ।　३. गीता ।　४. म० भा० ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

प्रायश्चित्तसत्रदेयवह्निविचारः, सप्तमे प्रत्यक्षवचनातिदेशशेषनामलिङ्गातिदेशविचारः, स्पष्टास्पष्टप्रबललिङ्गातिदेशापवादविचारः, नवमे ऊहविचारारम्भसामोहमन्त्रोहतत्प्रसंगा विचारः, दशमे बाधहेतुद्वारलोपविस्तारबाधकारणकार्यकत्वसमुच्चयग्रहादिसामप्रकीर्णन विचारः, एकादशे तन्त्रोपोद्घाततन्त्रावापतन्त्रप्रपञ्चनावापप्रपञ्चनचिन्तनानि । द्वादशे प्र तन्त्रिनिर्णयसमुच्चयविकल्पविचारः[२] इति संक्षेपतो मीमांसाशास्त्रीयविषयनिबन्धनम् अस्ति

तत्र वेदबोधितेष्टसाधनताको धर्मः । तथा च—**'चोदनालक्षणोऽर्थो[३] धर्मः'** इति सूत्र चोदना नाम प्रवर्त्तकं निवर्त्तकं च विधिनिषेधात्मकं वैदिकवचनम् । तयैव धर्मो साक्षाद् बोध सैव लक्षणं प्रमाणं वा यस्मिन् स धर्मः । यथा यागादिः **'अग्निहोत्रं जुहुयात् सन्ध्यामुपासीत** वेदबोधितानिष्टसाधनताकोऽधर्मः यथा कलञ्जभक्षणादिः । महर्षिः कणादोऽपि **'यतोऽभ्युद निःश्रेयससिद्धिः स धर्मः'** इत्यूचिवान् । यद्यपि **'धर्माधर्मावदृष्टं स्यात्'** इत्यदृष्टशब्दवाच्य धर्माधर्मयोः व्यापारतया यागादीनामुपादानं **'गंगास्नानादि-यागादिव्यापारस्तस्य कीर्तितः'** नैयायिकनये विद्यते, तथापि मीमांसकानां नये यागहोमदानानामेव धर्मत्वात् कलञ्जभक्ष दीनाञ्चाधर्मत्वात्तयोरनुष्ठायोपयोगित्वं सिध्यत्येव ।

मीमांसकेष्वपि प्राभाकरास्तु नैयायिकवदेव यागजन्यमपूर्वमेव धर्मं संगिरन्ते तथा हि—

विहितक्रियया साध्यो धर्मः **पुंसो गुणो** मतः ।
प्रतिषिद्धक्रियासाध्यो हि गुणो धर्म **उच्यते** ।। इति ।

परन्तु भाष्यकार-वार्त्तिककार-पार्थसारथि-माधवाचार्यादिभिर्यागादेरेव धर्मत्वं व्यवस्थापितम् । तथाहि—यो हि यागादिकमनुतिष्ठति तं धार्मिक इति समाचक्षते । न केवलं लोके वेदेऽपि **'यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन्'** इति 'यजति'शब्दवाच्यमेव समामनन्तीति भाष्यम् ।

इत्थञ्च व्यक्ति-कुल-जाति-राष्ट्र-विश्वेषां धारण-पालन-रक्षणकर्तृत्वविशिष्टा शक्तिराचा विधिर्व्यवहारो वा धर्म इति फलितम् । धर्मतन्मूलभूतशास्त्राण्यभ्युपगन्तृत्वेनैव मानुष्यं भव आहारादिचतुष्टयस्य पशुसाधारण्यात् । तथाहि—

आहारनिद्राभयमैथुनं च सामान्यमेतत् पशुभिर्नराणाम् ।
धर्मो हि तेषामधिको विशेषो धर्मेण हीनाः पशुभिः **समानाः** ।।

इति हितोपदेशे ।

आदिकविना वाल्मीकिना तु—

धर्मादर्थः प्रभवति धर्मात् **प्रभवति सुखम् ।**
धर्मेण लभ्यते सर्वं धर्मसारमिदं **जगत्** ।। (वा० रा० आरण्ये)

---

१. तैत्तिरीयारण्यकम् १०।६३ ।
२. राजनीतिदर्शनबिन्दुः पृ० ३०।२१ तः पृ० ३१ पं० ५ यावत् ।
३. मीमांसासूत्रम् १।१।२ ।
४. कणाद–वैशे० सूत्रम् १।१।३ ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

स च धर्मो वेदैकसमधिगम्यः। यथारूपाय चक्षुषो प्रामाण्यं न श्रोत्रादीनाम्। तथैव धर्मे वेदा एव प्रमाणम्। स्मृतिपुराणेतिहासादीनां तु तन्मूलकत्वेनैव प्रामाण्यमिति उपरिष्टाद् वक्ष्यते। इत्थञ्च-आचार-व्यवहार-प्रायश्चित्तादीनां निरूपणस्मृतीनाम्, सर्गप्रतिसर्ग-वंशमन्वन्तरादीनां निरूपणं पुराणानां विषयाः सन्ति। वेदेषु यद्यपि संस्कार-विवाहादीनां विधिर्नास्ति, तदविषयत्वात्तथापि बहुत्र आचार-व्यवहारादीनां निदर्शनं तत्र तत्रोपलभ्यते। तन्मूलकतयैव श्रौतगृह्यादिकर्मणां विधानं स्मृतितन्त्रेषूपलभ्यते।

निखिलधर्ममूलं वेदा एव। स्मृत्यादीनि तदर्थोपबृंहणान्येव। अत एव मनुना प्रोक्तम्—

इतिहासपुराणाभ्यां वेदं समुपबृंहयेत्।
बिभेत्यल्पश्रुताद् वेदो मामयं प्रहरिष्यति ॥ इति।

धर्मे प्रमाणम्

तथा च मनुः

अर्थकामेष्वसक्तानां धर्मज्ञानं विधीयते।
धर्मजिज्ञासमानानां प्रमाणं परमं श्रुतिः ॥ (मनु० २।१३)
वेदोऽखिलो धर्ममूलं स्मृतिशीले च तद्विदाम्।
आचारश्चैव साधूनामात्मनस्तुष्टिरेव च ॥ (मनु० २।६)

आपस्तम्बस्तु 'धर्मज्ञसमयः प्रमाणं वेदाश्च' (१।१।१।२)।

वसिष्ठधर्मसूत्रे—'श्रुतिस्मृतिविहितो धर्मः' इत्युक्तम्।

हारीतः स्वधर्मसूत्रे —'अथातो धर्मं व्याख्यास्यामः। श्रुतिप्रमाणको धर्मः। श्रुतिश्च द्विधा–वैदिकी तान्त्रिकी च' इत्युक्तवान्।

कुल्लूकभट्टः (२।१) मनोष्टीकायां—

वेदविद्भिर्ज्ञात इति प्रयुञ्जानो विशेषणम्।
वेदादेव परिज्ञातो धर्म इत्युक्तवान् मनुः ॥
हृदयेनाभिमुख्येन ज्ञात इत्यपि निर्दिशन्।
श्रेयःसाधनमित्याह तत्र ह्यभिमुखं मनः ॥
वेदप्रमाणकः श्रेयः साधनं धर्म इत्यतः।
मनूक्तमेव मुनयः प्राणिन्युर्धर्मलक्षणम् ॥

इति सङ्ग्रहश्लोकानाह। एतेन निखिलानामपि स्मृतीनामपेक्षया मनोस्तद्धर्मलक्षणस्य च वैशिष्ट्यम्, सर्वमनिषिद्धत्वं चोवाच। मनुस्मृतिप्रतिपादितविषयाणां वेदमूलकत्वे मनोरेव सम्मतिरस्ति—

यः कश्चित् कस्यचिद्धर्मो मनुना परिकीर्तितः।
स सर्वोऽभिहितो वेदे सर्वज्ञानमयो हि सः ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

स्वधर्मपरधर्मयोरपि ज्ञानं श्रुतिप्रामाण्यसापेक्षम् । तथा हि—

सर्वं तु समवेक्ष्येदं निखिलं ज्ञानचक्षुषा ।
श्रुतिप्रामाण्यतो विद्वान् स्वधर्मे निविशेत वै ॥ (२।८)

कणादप्रोक्तधर्मलक्षणम्—'यतोऽभ्युदयनिःश्रेयससिद्धिः' इत्यादि। तल्लक्षणघटकीभू 'यतः' इत्यस्यार्थो मनुसम्मतश्चाधस्ताद् निर्णीयते—

श्रुतिस्मृत्युदितं धर्ममनुतिष्ठन् हि मानवः ।
इह कीर्तिमवाप्नोति प्रेत्य चानुत्तमं सुखम् ॥ इति । (२।९)

अर्थात् श्रुतिस्मृतिप्रतिपादितेन कर्मणा आचरितेनाभ्युदयो मोक्षश्च लभ्येते । का श्रुतिः, का च स्मृतिरिति चेत्—

श्रुतिस्तु वेदो विज्ञेयो धर्मशास्त्रं तु वै स्मृतिः ।
ते सर्वार्थेष्वमीमांस्ये ताभ्यां धर्मो हि निर्बभौ ॥ (२।१०)

गौतमेनापि—'वेदो धर्ममूलं तद्विदां च स्मृतिशीले' प्रथमाध्याये इत्युक्तम् ।

तथा गौतमस्मृतेरष्टमाध्याये—'द्वौ लोके धृतव्रतौ राजा ब्राह्मणश्च बहुश्रुतस्त श्चतुर्विधस्य मनुष्यजातस्यान्तःसंज्ञानां चलनपतनसर्पणानामायत्तं जीवनं प्रसूतौ, रक्षणमसङ्क धर्मः' (गै० स्मृ० ८, प्रथमसूत्रम्) इति विशेषमुक्तम् ।

वृद्धगौतमस्मृतौ—

धर्मः श्रुतो वा दृष्टो वा कृतो वा कथितोऽपि वा ।
आमोदितो वा राजेन्द्र पुनाति ह नरं सदा ॥ २९ ।
धर्मः पिता च माता च धर्मश्च सुहृदस्तथा ।
धर्मो भ्राता सखा चैव धर्मः स्वामी परंतप ॥ ३० ।
धर्मादर्थश्च कामश्च धर्माद् भोगाः सुखानि च ।
धर्मादैश्वर्यमेवञ्च धर्मात् स्वर्गगतिः प्रभो ॥ ३१ ।
धर्मो वशे विपन्नं च त्रायते महतो भयात् ।
द्विजत्वं देवतात्वञ्च धर्मः प्रापयते नरम् ॥ ३२ ।
(प्रथमाध्या

इति धर्मस्वरूपमुक्तं महत्त्वञ्च प्रोक्तम् ।

धर्मे वेदस्य प्रामाण्यमपि—

धर्मं जिज्ञासमानानां प्रमाणं परमं श्रुतिः ।
द्वितीयं तु स्वशास्त्राणि तृतीयं लोकसंग्रहः ॥ (१४।४३)

इत्युक्तम् । तच्च मनुसम्मतमेव । लघुयमस्मृतावपि—'श्रुतिस्मृत्युदितं धर्मं वर्णानाम पूर्वशः' (१।१) इति धर्मे वेदस्मृत्योरेव प्रामाण्यमभिमतम् ।

इत्थञ्च वेद-स्मृति-शिष्टाचारकुलपरम्परात्मतुष्टिषु पूर्वपूर्वाविरोधेन प्रामाण्यम् । पूर्वालाभे उत्तरोत्तरस्य स्वतन्त्रप्रामाण्यम् ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तथा च जैमिनिः—

विरोधे त्वनपेक्ष्यं स्यादसति ह्यनुमानम् । (१।१।३)

जाबालोऽपि—

श्रुतिस्मृतिविरोधे तु श्रुतिरेव गरीयसी ।
अविरोधे सदा कार्यं स्मार्त्तं वैदिकवत् सदा ॥

भविष्यपुराणेऽपि—

श्रुत्या सह विरोधे तु बाध्यते विषयं विना ।

इति प्रोक्तम् । (इति कुल्लूकभट्टोद्धृतम्) ।

मनुना कर्त्तव्याकर्त्तव्यविनिर्णयश्चेत्थमुक्तः—

श्रुतिद्वैधं तु यत्र स्यात् तत्र धर्मावुभौ स्मृतौ ।
उभावपि हि तौ धर्मौ सम्यगुक्तौ मनीषिभिः ॥ (२।१४)

अत्र दृष्टान्तो यथा—

उदितेऽनुदिते चैव समयाध्युषिते तथा ।
सर्वथा वर्त्तते यज्ञ इतीयं वैदिकी श्रुतिः ॥ (२।१५)

इत्थञ्च श्रुतिद्वैते उभयोर्धर्मत्वम् । स्मृतिद्वयविरोधे श्रुतिः प्रमाणम्, पुराणद्वयविरोधे स्मृतिः प्रमाणम्, पुराणस्मृत्योर्विरोधे स्मृतिः प्रमाणम् । असति श्रुतौ, सति स्मृतौ पुराणे वा विरोधे वा मूलवेदानुमानम् । गीतायां भगवता कृष्णेन—'तस्माच्छास्त्रं प्रमाणं ते कार्याकार्यव्यवस्थितौ' इत्युक्तम् । सकलस्मृत्यपेक्षया मनोर्वैशिष्ट्यं विद्यते । आह च बृहस्पतिः—'मन्वर्थविपरीता या सा स्मृतिर्नैव शस्यते' इति । इत्थं श्रुति-स्मृतिप्रोक्तं धर्मस्वरूपमुपपन्नम् ।

श्रीमद्भागवतेऽपि—

वेदप्रणिहितो धर्मो ह्यधर्मस्तद्विपर्ययः ।
वेदो नारायणः साक्षात् स्वयम्भूरिति शुश्रुम ॥ (६।१।४०)

गीतायां कर्तव्याकर्तव्ययोर्निर्णयाभावे शास्त्रशरण्यमुक्तम्—

यः शास्त्रविधिमुत्सृज्य वर्तते कामचारतः ।
न स सिद्धिमवाप्नोति न सुखं न परां गतिम् ॥
तस्माच्छास्त्रं प्रमाणं ते कार्याकार्यव्यवस्थितौ ।
ज्ञात्वा शास्त्रविधानोक्तं कर्म कर्तुमिहार्हसि ॥ (१६।२३-२४)

गहना हि कर्मणो गतिः । मानुष्यया बुध्या न बोध्यते । अतोऽभ्युदये निःश्रेयसि वा संशये समापतिते शास्त्राणां प्रामाण्यमुक्तम् । कुमारिलभट्टेनापि—

प्रत्यक्षेणानुमित्या वा यस्तूपायो न विद्यते ।
एवं विदन्ति वेदेन तस्माद् वेदस्य वेदता ॥

इत्युक्तम् ।

यदि तु स्वातन्त्र्येण लौकिकप्रत्यक्षानुमानाभ्यां धर्मावगमः स्यात्, तदा गीतोक्तं 'तस्माच्छास्त्रं प्रमाणम्' न संगच्छेत् । न वा भोजनक्षुन्निवृत्त्योः कार्यकारणभावः, न प्रत्यक्षानु-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

मानावगमः शास्त्रमन्तरा शक्यावगमो भवति, अबाधितानधिगतगन्तृत्वेनैव प्रमाणानां प्रामाण्य स्वीकारात् । अत एव बुद्धेः प्रामाण्यनिश्चयोऽपि प्रामाण्येनैव वक्तुं युक्तः । नहि खलु नेत्रविहीन सहस्रोक्तम् 'पीतः शंखः' इति वचनं प्रमाणीकुर्महे, प्रत्यक्षविरोधात् । तथैव श्रुति-स्मृत्यादि शास्त्रैरेव प्रमेयसिद्धिरित्यन्यत्र विस्तरः ।

शास्त्राधारो हि धर्मः । अपौरुषेयत्वाद् वेदानां सर्वश्रेष्ठशास्त्रत्वम् । शासनाच्छंसना च्छास्त्रमिति शास्त्रस्वरूपम् । श्रुति-स्मृतिप्रतिपादितविषयेषु प्रतिकूलतर्कणमेव नास्तिकत्वम् **'नास्तिको वेदनिन्दकः'** इति मनुवचनात् । उक्तञ्च तैरेव—

श्रुतिस्तु वेदो विज्ञेयो धर्मशास्त्रं तु वै स्मृतिः ।
ते सर्वार्थेष्वमीमांस्ये ताभ्यां धर्मो हि निर्बभौ ।।
योऽवमन्येत ते मूले हेतुशास्त्राश्रयाद् द्विजः ।
स साधुभिर्बहिष्कार्यो नास्तिको वेदनिन्दकः ।। (मनु० २।१०-११)

धर्मस्य भेदाः

प्रकृतिप्रत्ययान्वितस्य 'धर्म'शब्दयस्याभ्युदनिःश्रेयस्कत्वसाधकत्वरूपार्थंनिर्णये जा धर्मस्य शाखानां विषये किञ्चिद्विचार्यते । तथा चोक्तं भविष्यपुराणे—

वर्णधर्मः स्मृतस्त्वेक आश्रमाणामतः परम् ।
वर्णाश्रमस्तृतीयस्तु गौणो नैमित्तिकस्तथा ।। १ ।।

वर्णत्वमेकमाश्रित्य यो धर्मः संप्रवर्तते ।
वर्णधर्मः स उक्तस्तु यथोपनयनं नृप ।। २ ।।

यस्त्वाश्रमं समाश्रित्य अधिकारः प्रवर्तते ।
स खल्वाश्रमधर्मस्तु भिक्षादण्डादिको यथा ।। ३ ।।

वर्णत्वमाश्रमत्वं च योऽधिकृत्य प्रवर्तते ।
स वर्णाश्रमधर्मस्तु मौञ्जीया मेखला यथा ।। ४ ।।

यो गुणेन प्रवर्तेत गुणधर्मः स उच्यते ।
यथा मूर्धाभिषिक्तस्य प्रजानां परिपालनम् ।। ५ ।।

निमित्तमेकमाश्रित्य यो धर्मः संप्रवर्तते ।
नैमित्तिकः स विज्ञेयः प्रायश्चित्तविधिर्यथा[१] ।। ६ ।।

अयं विभागः कुल्लूकभट्टेन मनुस्मृतेः (२।२५) टीकायामुपन्यस्तः । पुलस्त्येनापीत्थ मेव धर्मप्रकारो निर्दिष्टः । तथा हि—

पञ्चधा वा स्थितं धर्मं शृणुध्वं द्विजसत्तमाः ।
वर्णधर्मः स्मृतस्त्वेक आश्रमाणामतः परम् ।।
वर्णाश्रमस्तृतीयस्तु गुणनैमित्तिकस्तथा[२] ।

१. मनु० २।२५, कुल्लूकभट्टः । २. पुलस्त्यस्मृतिः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तथा च धर्मस्याश्रमभेदेन चतुष्प्रकारत्वम् । पञ्चमः खलु राजधर्मः । तथा हि—

ब्रह्मचारी गृहस्थश्च वानप्रस्थश्च भिक्षुकः ।
उक्त आश्रमधर्मस्तु राजधर्मस्तु पञ्चमः ॥

पुनश्च वर्णाश्रमोभयसाधारणधर्मं प्रतिजानीते—

इज्याध्ययनदानानि यथाशास्त्रं सनातनम् ।
ब्रह्मक्षत्रियवैश्यानां सामान्यो धर्म उच्यते ॥
याजनाध्ययने राज्ञो भूतानां चाभिरक्षणम् ॥
पशुपाल्ये कृषिश्चैव वैश्यस्याजीवनं स्मृतम् ॥
शूद्रस्य द्विजशुश्रूषा द्विजानामानुपूर्वशः ।
शूद्रा च वृत्तिस्तत्सेवा कारुकर्म तथैव च[1] ॥

इति वर्णानां धर्माः समासेन निरूपिताः ।

आश्रमाणां स यथा—

गुरौ वासोऽग्निशुश्रूषा स्वाध्यायो व्रतधारिणि ।
त्रिकालस्नापिता भृत्यैर्गुरौ प्राणान्तिकी स्थितिः ॥
तदभावे गुरुसुते तथा सब्रह्मचारिणि ।
कामतो वा समानत्वं स्वधर्मो ब्रह्मचारिणः[2] ।
समेखलो जटी दण्डी···· ···· ···· ···· । इत्यादि ।

गृहस्थाश्रमकर्तव्यरूपधर्मा यथा—

अग्निहोत्रोपचरणं जीवनं च स्वकर्मभिः ।
धर्मदानेषु वाक्येषु सर्वत्र जनविक्रियाः ॥
देवपित्र्यतिथिभ्यश्च भूतानामानुकम्पिता ।
श्रुतिस्मृत्युक्तसंस्कारो धर्मोऽयं गृहमेधिनः[3] ॥

वानप्रस्थस्य यथा—

जटित्वमग्निहोतृत्वं भूशय्याजिनधारणम् ।
वने वासः पयोमूलनीवारकणवृत्तिता ॥
प्रतिग्रहनिवृत्तिश्च त्रिःस्नानं मौनधारणम् ।
देवतातिथिपूजा च धर्मोऽयं वनवासिनाम्[4] ॥

सन्यासिनां यथा—

सर्वारम्भपरित्यागो भैक्षान्नं वृत्तमूलता ।
निष्परिग्रहताऽद्रोहः समता सर्वजन्तुषु ॥
प्रियाप्रियपरिष्वङ्गः सुखदुःखविकारिता ।
सबाह्याभ्यन्तराशौचं नियमो व्रतकारिता ॥
सर्वेन्द्रियसमाहारो धारणाध्याननित्यता ।
भावशुद्धिस्तथेत्येवं परिव्राड्धर्म उच्यते ॥

---

१. पुलस्त्यस्मृतिः । २. पुलस्त्यस्मृतिः । ३. पुलस्त्यस्मृतिः । ४. पुलस्त्यस्मृतिः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सर्वसामान्यधर्मो वर्णिनां लिङ्गिनाश्च यथा—

अहिंसासत्यवादश्च सत्यं शौचं दया क्षमा ।
वर्णिनां लिङ्गिनां चैव सामान्यो धर्म उच्यते ॥
स्वज्ञानं हृदि सर्वेषां वर्णिनां लिङ्गिनां तथा ।
अदृष्टार्थो द्विधा प्रोक्तो दृष्टार्थश्च द्वितीयकः ॥
उभयार्थस्तृतीयश्च न्यायमूलश्चतुर्थकः ।
उभयोर्व्यवहारश्च दण्डधारणमेव च ॥
तुल्यार्थानां विकल्पः स्यान्न्यायमूलः प्रकीर्तितः ।
वेदे तु विहितो धर्मः स्मृतौ तादृश एव च ॥

इत्थं वर्णाश्रमधर्मानुक्त्वा ---

उक्तः पञ्चविधो धर्मः श्रेयोऽभ्युदयहेतुकः ।
पुरुषाणां यथायोगं स च सेव्यः फलार्थिना ॥

इति भगवता पुलस्त्येन धर्माणां स्वरूपनिदर्शनं कृतम् ।

बृहद्योगियाज्ञवल्क्यस्मृतौ विद्यानिर्णये सर्वाणि शास्त्राणि वेदादेव निःसृतानीति प्रतिपादितम् । तथा हि —

न वेदशास्त्रादन्यत्तु किञ्चिच्छास्त्रं हि विद्यते ।
सर्वं विनिःसृतं शास्त्रं वेदशास्त्रात् सनातनम् ॥
दुर्बोधं तु भवेद् यस्मादध्येतुं नैव शक्यते ।
तस्मादुद्धृत्य सर्वं हि शास्त्रं तु ऋषिभिः कृतम्[1] ॥

धर्मयोनीनि विद्यास्थानानि नामत उक्तानि—

पुराणतर्कमीमांसाधर्मशास्त्राङ्गमिश्रिताः ।
वेदाः स्थानानि विद्यानां धर्मस्य च चतुर्दश ॥
साङ्ख्यं योगः पाञ्चरात्रं वेदाः पाशुपतं तथा ।
अतिप्रामाण्यान्येतानि हेतुभिर्न विचालयेत्[2] ॥

मनुनापि एतदेवोक्तम्—

योऽमन्येत ते मूलं हेतुशास्त्राशयाद्द्विजः ।
स साधुभिर्बहिष्कार्यो नास्तिको वेदनिन्दकः ॥ इति ।

वेदविरुद्धस्मृतीनां नास्ति धर्मे प्रामाण्यम् । यथा च मनुः -

या वेदबाह्याः स्मृतयो याश्च काश्च कुदृष्टयः ।
सर्वास्ता निष्फलाः प्रेत्य तमोनिष्ठा हि ताः स्मृताः ॥
उत्पद्यन्ते च्यवन्ते च यान्यतोऽन्यानि कानिचित् ।
तान्यर्वाक्कालिकतया निष्फलान्यनृतानि च ॥
चातुर्वर्ण्यं त्रयो लोकाश्चत्वारश्चाश्रमाः पृथक् ।
भूतं भव्यं भविष्यञ्च सर्वं वेदात् प्रसिध्यति ॥ (१२।९५-९६)

---

१. बृ० यो० या० स्मृ० । २. बृ० यो० या० स्मृ० ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तान्येव याज्ञवल्क्ये स्पष्टीकृतानि—

बौद्धः कापिलकुहकौ लोकायतिकभिन्नकाः ।
वेदबाह्यास्तथाऽन्ये तु तामसा अशिवास्तु ते ॥
नैरात्म्यवादकुहकैर्मिथ्यादृष्टान्तहेतुभिः ।
वेदशास्त्रं तु बाधन्ते पौरुषेयास्तु ते स्मृताः ॥
आसुरेयाः पाशुपता बृहस्पतिकृतास्तु ये ।
शुक्रं रूपं समास्थाय देवानां हितकाम्यया ॥
प्रजापतिकृताश्चान्ये असुराणां प्रमोहनाः ।
येनेदं वाङ्मयं दुग्धमधर्मे विफलीकृतम् ॥ इत्यादि ।

इत्थं वेदशास्त्राविरोधिस्मृत्यादीनां धर्मे प्रामाण्यमुक्तं तैः । पुनश्च मनूक्तमेव द्रढयति—

यः कश्चित् कस्यचिद्धर्मो मनुना संप्रकीर्तितः ।
स सर्वोऽभिहितो वेदे सर्वज्ञानमयो हि सः ॥ (या० स्मृ० १२।२०)

एतेन मनुप्रणीतधर्मा एव स्वीकृताः । मनुविरुद्धस्मृतेर्नास्ति प्रामाण्यमित्यसकृदावेदितम् ।

अथ गीतायाम् अर्जुनेन कर्तव्यं परिपृच्छता—

"कुलक्षये प्रणश्यन्ति कुलधर्माः सनातनाः" (गीता० १।४०)
"उत्साद्यन्ते जातिधर्माः कुलधर्माश्च शाश्वताः" (१।४३)

इति भेदद्वयमुक्तम् । एतेन कुलपरम्पराया अपि विशेषधर्मत्वमुक्तम् । तथा च मनुः—

येनास्य पितरो याताः येन याताः पितामहाः ।
तेन यायात् सतां मार्गं तेन गच्छन्न रिष्यति ॥

इत्याह ।

अयमेव कुलधर्मः ।

जातिधर्मो यथा—ब्राह्मणस्य इज्यादिकम् । क्षत्रियस्य—रक्षेत्यादिः । तत्रैव धर्मविशेषो यथा–स्त्रीधर्मयोगम् (२।११४), तापस्यं मोक्षम्, सन्न्यासम्, राजधर्मः, साक्षिधर्मः, स्त्रीपुंसयोर्धर्मः, विभागधर्मः, आपद् धर्म, देशजाति-कुल-पाषण्ड-धर्मादीनां नामतः परिगणनम् (२।११८) कृतम् ।

मेधातिथेरनुसारं तु स्मृतिषु धर्मस्य वर्ण-आश्रम-वर्णाश्रम-नैमित्तिक-गुणेति पञ्चधा विभागः कृतः । तथा चोक्तम्—'इह पञ्चप्रकारो धर्म इति विवरणकाराः प्रपञ्चयन्ति ।'

अत्र च धर्मशब्दः षड्विधस्मार्तधर्मविषयः । तद्यथा वर्णधर्मः, आश्रमधर्मो वर्णाश्रमधर्मो गुणधर्मो निमित्तधर्मः साधारणधर्मश्चेति ।

महाभारते त्रिविधो धर्मो निरूप्यते—

वेदोक्तः परमो धर्मः स्मृतिशास्त्रगतो परः ।
शिष्टाचीर्णः परः प्रोक्तस्त्रयोधर्माः सनातनाः ॥ इति ।
(अनुशासने १४१।६५, वनपर्वणि २०७।८३)

बौधायनधर्मसूत्र उपदिष्टस्मार्तशिष्टागमभेदात् त्रिधाधर्मविभागः कृत इति धर्मशास्त्राणां परम्परानिरूपणसंक्षेपः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

साहित्यस्य भूमापृष्ठम्

श्रीगिरीशदत्तपाण्डेयः

अनुसन्धाता

सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी

उद्गीथप्रणवोद्गीथ सर्ववागीश्वरेश्वरी ।
शंदधा शंददा घोरा तारिणी दिशताज्जयम् ॥

स्वानुपजीविप्रमाणाप्रयोज्यज्ञानविषयत्वसामान्याभाववत्त्वे सति **"सकलपुमर्थसाधनार्थविषयकज्ञानसाधनत्वं शास्त्रत्वम्"** । रसास्वादमुखपिण्डदानद्वारा रामादिवद् वर्त्तितव्यम्, न रावणादिवदिति प्रवृत्तिनिवृत्तिकारित्वात्, तुल्येऽपि पुनरुक्तिदोषे, जघनकाञ्चीति दुष्टं न कर्णावतंसादिपदमित्यादिशासनात् तत्साहित्यस्य शास्त्रत्वमव्याहतम् ।

'नानृषिः कविः[1]' इति भट्टतौतवचनात् स्मर्त्ता कविः । लोकप्रसिद्धस्य सीताचरितमहाकाव्यस्य, आम्नायार्थरसगर्भनिर्भरस्य शान्तिरिव रुद्रस्य महाभारतस्य, शुकमुखादमृतद्रवसंयुतनिगमकल्पतरोर्गलितफलस्य भागवतस्य, अन्येषामपि ख्यातादर्शलोकवृत्तानां गाथादीनां काव्योपजीव्यत्वम् । विद्याव्याकरणकोशच्छन्दोऽलङ्कारकलोपकलासु कविसन्निधिदेशव्यवहृतिविद्वद्वरिष्ठगोष्ठीसूक्तिमहाकविनिबन्धादीनां काव्ययोनित्वमिति काव्यमीमांसकाचार्यराजशेखरमतम् । काव्याङ्गतयैवास्यापि शास्त्रस्य फलवत्त्वमिति विश्वनाथेनोक्तत्वाद् भवतु नाम काव्याङ्गत्वम्, मीमांसापरिशिष्टत्वं वा, व्याकरणपरिशिष्टत्वं वेत्यादिकथनं तु मूलाज्ञानविजृम्भितमेव।

शास्त्राख्यानकाव्यमिति त्रिविधं वाङ्मयं पुनः प्रभु-सुहृत्-कान्तासम्मितभेदात् त्रिविधम्। वेदस्य प्रभोः शब्दप्रधानत्वमलङ्घनीयाज्ञत्वमनिष्टानुबन्ध्यकरणकविधेयबोधकविधिप्रयोजकत्वम्, तच्च नित्यकर्मविधायके वेदादिशास्त्रे साधारणो धर्मः । नित्याग्निहोत्रादीनामकरणस्यानिष्टसाधनत्वेन तथाविधाग्निहोत्रादिकर्त्तव्यत्वबोधकविधिवाक्यादिघटितत्वाद् वेदस्यैव प्रभुसम्मितत्वम् । अर्थवादोपबृंहितफलप्रशंसाद्वारा कर्त्तव्यबोधकवेदस्मृतीतिहासपुराणभागानां सुहृत्सम्मितत्वम् । सुहृदोऽर्थतात्पर्यकत्वं पुरुषार्थसाधनताज्ञानप्रवृत्तितात्पर्यकवाक्यप्रयोजकत्वम् ।

शब्दार्थोभयप्रधानं शास्त्रं काव्यमिति महिमभट्टमतम् । **'द्वयोर्गुणत्वे व्यापारप्राधान्ये काव्यधीः[2]'** इति भट्टनायकाचार्याः । तदनुसारेणैव वैयाकरणमतानुयायिभिः साहित्याचार्यैः रसबोधौपयिकसाहित्याख्यकविलक्षणव्यापारस्यैव प्राधान्यात् काव्यतेति स्वीकृतम् । भामहाचार्यास्तु **'शब्दार्थयोः साहित्यं काव्यम्'; 'इष्टार्थव्यवच्छिन्ना पदावली काव्यम्'** इति च दण्डिनः।

---

१. का० मी० टी० पृ० ५८ । २. ध्वन्यालोकलोचनम्, प्र० उ० पृ० ८९ ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

शास्त्रात् काव्यस्य भेदमुपदिशद्भिर्व्यासकृष्णद्वैपायनचरणैस्त्वाग्नेयपुराणसंहितायाम्

ध्वनिर्वर्णाः पदं वाक्यमित्येतद् वाङ्मयं मतम् ।
शास्त्रे शब्दप्रधानत्वमितिहासेषु निष्ठता ॥

शास्त्रेतिहासवाक्यानां त्रयं यत्र समाप्यते ।
अभिधायाः प्रधानत्वात् काव्यं ताभ्यां विभिद्यते ॥

अदोषं गुणवत् काव्यमलङ्कारैरलङ्कृतम् ।
रसान्वितं कविः कुर्वन् कीर्त्तिं प्रीतिश्च विन्दति ॥

वाग्वैदग्ध्यप्रधानेऽपि रस एवात्र जीवितम् ।
अपृथग्यत्ननिर्वर्त्यं वाग्वक्रिम्नि रसाद्वपुः ॥

तमसा मरुताप्यन्यैर्विभावैरतिनिर्भरैः ।
सर्ववृत्तिप्रवृत्तञ्च सर्वभावप्रभावितम् ॥

सर्वरीतिरसैः पुष्टं जुष्टं गुणविभूषणैः ।
अत एव महाकाव्यं तत्कर्त्ता च महाकविः[1] ॥ इति ।

'रस आत्मा ययोस्तयोर्वाच्यवाचकव्यञ्जकव्यङ्ग्ययोः परस्परोत्कर्षजननद्वारा सहृदयहृदयाह्लादजनकत्वे सति कविविवक्षितार्थैकप्रतिपादकताविशिष्टशब्दस्य रसपरिस्पन्दरमणीयार्थस्य च दोषाभाव-गुणालङ्काररसादिसंयुक्तत्वे सति शोभाजनकत्वं सौन्दर्यं लावण्यमेव वा काव्यकायस्य जीवितमिति निर्विचिकित्सः सिद्धान्तः" इति च विद्यागुरवः। काव्यप्रकाशः, साहित्यदर्पणम्, रसगङ्गाधरः इति ग्रन्थसंज्ञास्वारस्यमाकलय्य 'रस-काव्य-साहित्य'शब्दानां शक्यतावच्छेदकैक्यं सत्यपि विपरीतानुपूर्वीकत्वे न दुष्यति ।

नाट्यशास्त्रे दृश्यानामिव श्रव्यानामपि काव्याङ्गानां रससिद्धान्तस्य च निरूपणदर्शनात्, 'चत्वारि शृङ्गाः[2]' इत्यस्या ऋचः काव्यशरीरपरभाष्योपलम्भात्, 'रसो वै सः यंल्लब्ध्वाऽऽनन्दी भवति'[3] इति वेदान्तश्रुतिभाष्यावलम्बनादेवाखिलमपि 'साहित्यशास्त्रम्' श्रौतं स्मार्त्तं पौराणिकमैतिहासिकं वैज्ञानिकञ्च सिध्यति । राजशेखरसमाम्नातायाः साहित्यविद्यायाः परम्परायां परिगणितानामाचार्याणां कौटल्य-वात्स्यायनादिग्रन्थेषूल्लेखदर्शनात् परमप्रामाणिकत्वम् ।

संस्कृतकाव्यानामुद्भवो विकासश्च', 'साहित्यसम्प्रदायमीमांसा', 'शास्त्रेषु लोकप्रामाण्यं न्यायस्वरूपविमर्शश्च' इति शोधपत्राणि सारस्वत्यां सुषमायाम्' 'विश्वसंस्कृतम्' इति प्रख्यातानुसन्धानपत्रिकायाञ्च सर्वं यथामति चिन्तितं प्राकाश्यमानीतम् ।

दण्डिभामहानन्दवर्धनाचार्येभ्योऽपि प्राग्वर्त्तिनां यास्कादिसमानभाविनां भागुरिप्रभृतीनामाचार्याणां विवरणानि 'संस्कृतव्याकरणशास्त्र का इतिहास' इति ग्रन्थे युधिष्ठिर-

---

१. अग्निपुराणे ३३७।२—३३ पर्यन्ततः साभिप्रायमुद्धृतम् ।
२. शु० यजु० सं०–१७।९१ ।　　३. तै० उ०–२।७।१ ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

मीमांसकमहाशयैर्निपुणमुपात्तानि । भरतमुनिमारभ्य श्रीकरपात्रस्वामिपर्यन्ता नाट्यशास्त्र भक्तिरसार्णवान्ता परम्परा अविच्छिन्नैवेति प्रत्यक्षमेव शास्त्रेतिहासविद्याविलासप्रतिभा पवित्रितविद्वदपश्चिमानां पुरस्तात् ।

काव्यालङ्कारे ध्वन्यपोहस्फोटवादानां खण्डनानि विद्यन्ते । भामहाचार्यैरिदं प्रथ तया अपोहवादप्रत्याख्यानस्य रुचिरा सरणिरुद्भाविता, वर्णनित्यतावादश्चाभ्युपगतः । स्फो वादस्तु **'अवङ् स्फोटायनस्य'** इति श्रीपाणिनिमुनिपूजितस्फोटायनाचार्योपज्ञः । तत्खण्डनानि प्राचीनान्येव । वर्णनित्यतावादिना भामहेन ध्वनिसिद्धान्तखण्डनं महाभाष्यावलम्बनादे कृतमिति युक्तमुत्पश्यामः । पूर्वपक्षरूपेण तत्र ध्वनि-स्फोटापोहप्रभृतिवादानां बीजानि तत्र विद्यन्ते ।

आनन्दवर्धनः स्फोटवादमूलकमेव ध्वनिवादं विवृण्वन् रसादिध्वनिवादं सिद्धान्तितवान् प्रतीयमानासंलक्ष्यक्रमव्यङ्ग्यानामेव काव्यात्मत्वम्, वस्त्वलङ्कारध्वन्यो रसध्वनिपर्यवसायित्वं प्रतिष्ठाप्य वाच्यप्रतीयमानयोरुभयोरप्यर्थयोः सहृदयश्लाघ्यत्वम्, परस्परोत्कर्षजननद्वाराङ्गि रसव्यञ्जकत्वम्, रसाद्यानुगुण्येनैव शब्दार्थगुणालङ्काररीतिवृत्तिप्रवृत्त्यौचित्यविनिवेशप्रक्रि सम्प्रसाधिता तेनैव ध्वनिप्रस्थापनपरमाचार्येण । अर्थानामपि व्यञ्जकत्वं व्यङ्ग्यत्वञ्चे नव्यसाहित्यसिद्धान्तनिष्कर्षः ।

साधारणीकृतविभावादिपरामर्श एव काव्यशब्दस्य व्यापारः । शक्तिमत्त्वमर्थवत्त्वम् विशिष्टार्थप्रतिपादकः शब्दः काव्यम् । वैशिष्ट्यञ्च धर्ममुखेन, व्यङ्ग्यमुखेन, व्यापारमुखेन वे क्षोदनीयमतिगहनगहनमिति नेह प्रपञ्च्यते, निबन्धविस्तरभयात् ।

प्रकटत्वमभिव्यक्तिरिति[1] भगवानस्मत्पूर्वपुरुषो पाराशर्यो व्यासः । 'श्रुतिराहे **इत्यपि**'[2] इति च । अयमेवाभिव्यक्तिवादो वैदिकसिद्धान्तसिद्धः । अत एवास्य काव्यात्मत्वे नाभिमतस्य ध्वनेस्तत्त्वं महाभारतादिरामायणादिप्रामाण्यात् प्रसाधितम्, परक्रियारूपैकनायक वती सीतारामचरितावली, पुराकल्परूपानेकनायकवती कुरुकुलवृत्तार्थदर्शिनी शतसहस्रारि महाभारता भारतसंहिता, शुकमुखादमृतद्रवसंयुक्तनिगमकल्पतरोर्गलितफलमयी श्रीमद्भागवत संहिता च करुण-शान्त-भागवतरसप्रधानाः ।

'पूर्वपूर्वोपमर्दपूर्वकमुत्तरोत्तरो विकासः प्रगतिरिति पाश्चात्त्याः । काव्य-सौन्दर्य-साहित्य शास्त्रप्रवर्त्तकाः प्लेटो-अरस्तूप्रभृतयो दार्शनिकाः स्वबुद्धिविशेषविलासकैलाशचारिणः, अन्येऽपि क्रोचेप्रभृतयो विद्वांसो यथामति साहित्यशास्त्रीयस्वरूपसिद्धान्तादिकं निरूपयन्ति स्म । वस्तुतत्त्व विश्लेषणार्थं तैः काचन सरणिराविष्कृता, तस्या एव परिमृष्टं स्वरूपं मैक्समूलरेण, पार्जिटर कीथप्रभृतिभिश्च स्वकीयसर्वस्वकारसाहाय्येन समुपस्थापितम् । संस्कृतवाङ्मयपरिशीलनं तयैव रीत्या अद्यापि प्रचलति । सा चेयं प्रक्रिया तुलनात्मिका, ऐतिहासिकी वैज्ञानिकी चेति व्यपदिश्यते । आधुनिकभाषाविज्ञानाधुनिकेतिहासपुरातत्त्वशास्त्राणि तस्यां प्रक्रियायां प्रमाणत्वे नावधार्य्यन्ते । संस्कृतवाङ्मयस्य प्रकाशः स्वशक्त्यैव दिगन्तं व्याप्यातिष्ठते इति किमु वक्तव्यम्

१–२. अग्निपुराण० अ० ३३८।१ ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

इयमाधुनिकभाषाविज्ञानेतिहासप्रामाण्यवादिनी मीमांसाशैली ऐतिहासिकी, वैज्ञानिकी, तुलनात्मिका वा भवतु नाम प्रकामम्। प्रामाणिकी वा न वेति संशयस्तिष्ठत्येव। प्राचीनाचार्यापेक्षयाधुनिकवादानां स्वैरकल्पनामूलकरुचिभेदानन्त्येनानन्त्यमेवात एव —

यः शास्त्रविधिमुत्सृज्य वर्त्तते कामचारतः।
न स सिद्धिमवाप्नोति न सुखं न [1]परांगतिम्॥
तस्माच्छास्त्रं प्रमाणं ते कार्याकार्यव्यवस्थितौ।
ज्ञात्वा शास्त्रविधानोक्तं कर्म कर्त्तुमिहार्हसि[2]॥

इति योगेश्वरेश्वरांशेनास्मत्कुलपूज्येन पाराशर्येण भगवता व्यासेन श्रीमद्भगवद्गीतायां या संशयापनोदनप्रक्रियोपदिष्टा, तामेव सरणिमाश्रित्य साहित्यशास्त्राचार्यैः काव्ये शब्दार्थसम्बन्धदोषाभावगुणालङ्काररीतिवृत्तिप्रवृत्त्यौचित्याङ्गाङ्गिभावपरस्परविरोध–विपरीतसम्भावनौचित्यादीनां निरूपणं कृतम्। अद्यापि तयैव रीत्या संस्कृतविश्वविद्यालयेऽधीयतेऽध्याप्यते च। तामेव शास्त्रीयां मीमांसासरणिमाश्रित्य नव्यसाहित्याचार्यैर्नियमनिर्धारणपुरस्सरं न्यायाः प्रसाधिताः।

एक एव साहित्यसम्प्रदायः। संयोगाद् रसनिष्पत्तिः। संयोगपदस्य संयुक्तत्वसामान्याभिधायित्वे चमत्कारजननानर्हत्वात् कविकर्मबहिर्भावापत्तेर्नालङ्कारादिनिष्पादनक्षमत्वम्, रमणीयार्थप्रतिपादकत्वाभावाच्च न शब्दार्थयोः शब्दस्य वाक्यस्य वा काव्यत्वम्। अत एव सम्बन्धविशेष एवार्थः। स एव च '**रसपरिस्पन्दरमणीयः संयोगविशेषः**' साहित्यम्। रसगङ्गाधरे संयोग(साहित्य)-रसवादः, विभावरसवादः; अनुभावरसवादः, भावरसवादः, भोगरसवादः, ध्वनिरसवादः, रसानुमेयत्वमेवमादयो वादा यथाशास्त्रं निर्णीताः, तदेतत् सर्वमेव विभावादिनिष्पत्त्यन्तरससूत्रमूलकमिति वक्तव्यमुपरिष्टात्।

न्यायाः स्वयं सिद्धाः। प्रवर्त्तकः, निवर्त्तकश्च, व्यवस्थाविशेषो नियमः। नियम्यशास्त्रीयोद्देश्यतावच्छेकव्याप्यं नियामकशास्त्रीयोद्देश्यतावच्छेदकव्यापकं यद्रूपं तद्रूपावच्छिन्नातिरिक्तत्वेन नियम्यशास्त्रीयोद्देश्यतावच्छेदकावच्छिन्ने सङ्कोचः क्रियते।

न्यायश्च साधकं प्रमाणमिति मम्मटभट्टः। स्वशक्तिप्रयोज्यविधिनिषेधप्रयोजकत्वे सति विशेषावयवविशिष्टत्वं न्यायत्वमिति भामहोक्तादवगम्यते। प्रमाणानुग्राहकस्तर्को न्यायः। प्रमाणैरर्थपरीक्षणं न्यायः। न्यायानां प्रामाण्यं चमत्काराधायकत्वविघातकत्वादिनिर्णये सर्वत्रैव भवति। न्यायशरीरमेव युक्त्युपपत्तिभ्यामित्यन्यत्र विस्तरः।

सर्वेषामपि शास्त्राणां निष्यन्दमेतच्छास्त्रं क्वचित् क्वचित् शास्त्रान्तरीयरहस्यमनुवदति। किञ्चालङ्कारस्य सौन्दर्यपरत्वाल्लोकातिक्रान्तगोचरकविप्रतिभासाध्यत्वाच्चातिशयान्वितवक्रत्वस्यैव जीवितत्वं भामहाचार्येणोपपादितमेव। '**सैषा सर्वत्र वक्रोक्तिः**'[3]। तस्याः काव्यार्थविभावकतया विभावत्वं विभावस्य रसत्वमित्यपि रससूत्रसिद्धम्। अतो वक्रोक्तिरपि

१. श्रीमद्भगवद्गीता–१६।२३। २. श्रीमद्भगवद्गीता–१६।२४।
३. काव्यालंकारे पृ० ८५।

 CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

काव्यजीवितमिति भामहोन्मीलितदिशैव वक्रोक्तेरपूर्वालङ्कारत्वमिति कुन्तकाशया काव्यसर्वस्वतापि सिद्ध्यति ।

द्वावपि वाच्यप्रतीयमानावर्थौ ध्वनिः । शब्दार्थौ काव्यशरीरमिति सर्वमतः शब्दार्थयोर्वर्णमूलकत्वात्, वर्णानां नादध्वनिमूलकत्वेन नादब्रह्मैव सर्वेषामपि वर्णानां नित्यम्, कूटस्थमक्षरञ्च । वर्णनित्यत्वाङ्गीकारादेव शब्दार्थसम्बन्धानामपि नित्यत्वमि रमणीयः पन्थाः । गुणरूपः शब्दोऽनित्यः, न तु द्रव्यरूपः । वर्णपरमाणूनामपि नित्यत्वमे तन्मूलत्वाच्छब्दार्थयोरुभयोरपि नित्यत्वमेव । अत एवोभयोर्नित्यत्वं भामहमतम् । तथा हि

वागर्थाविव संपृक्तौ वागर्थप्रतिपत्तये ।
जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ[1] ।।

इति वदन् कालिदासः संयोगरसवादम्;

वर्णानामर्थसंघानां रसानां छन्दसामपि ।
मङ्गलानाञ्च कर्त्तारौ वन्दे वाणीविनायकौ[2] ।।

इति महाकविस्तुलसीदासश्च काव्यस्वरूपमेव कटाक्षयतः । 'स्व'पदेनात्मनः, 'ह शब्देन चाङ्गपरामर्शः । तस्यैव प्रकटत्वमभिव्यक्तिः । तस्यैव भोगः, वस्तुसौन्दर्यबलात् मम्मटाद्याः स्थायिभावरसवादिनः । भाव एव विभावादिभिर्व्यज्यमानः, भाव्यमानो विभाव्यमानोऽनुभाव्यमानो वा चर्वणाविश्रान्तिधामतामापन्नो रसः । अत एव भावुका एव सहृद रसिकाश्च । भावाः सात्त्विकादिभेदेन बहुविधाः । तस्माद्भावो रसः, असंलक्ष्यक्रमश्चेत्यस्य विस्तरः । भक्तेरपि नवरूपत्वात् तस्यैव शृङ्गारादयो भेदा इति रासपञ्चाध्यायीपरिशीलने स्फुटीभवति ।

साहित्यशास्त्रस्य काव्याङ्गत्वमेवोचितम्, अत एव काव्याङ्गतयैव काव्यफलत्व काव्यशब्दव्यपदेश्यत्वं च । रसपदेनाप्यस्यैव शास्त्रस्य परामर्शः ।

'प्रज्ञात्मा आनन्दः अजरः अमृतं हितम्[3]**'** इति श्रुतिस्वारस्याद् हितमानन्द '√हि √सह √षह √दुदाञ् √डुधाञ्' प्रकृतिभिः सहित-हित-शब्दौ । ताभ्यां भावे कर्म करणे स्वार्थे च ष्यञि साहित्यम् । द्वन्द्वपदमपि साहित्यपर्यायरूढम् । यद्वा 'सह' इत्यव्यय तस्य सप्तार्थाः । तत इतच्, ष्यञि च साहित्यम् ।

हितं सौन्दर्यमिति वामनः । सौन्दर्यमेवान्तर्बहिर्भेदेन द्विविधम् । बाह्यसौन्दर्यं वाच्यार्थः, अन्तःसौन्दर्यमेव प्रतीयमानार्थः । एवञ्चालङ्कारशब्दविश्लेषणेनैव रूपस्यात्मन बोधः । अलङ्कार्यालङ्करणयोरुभयोरेव प्रसिद्धत्वात्तन्मूलमलङ्कारमेव सौन्दर्य-लावण्य-शोभा प्रभृतिभिः शब्दैर्व्यवहरन्ति । ध्वनिवदलङ्काराणामपि साङ्कर्य-संश्लेषरीत्यानन्त्यं स्व मेवोह्यम् । तदेतत् सर्वमनुसन्धायैव च रसपरिष्पन्द-रमणीयत्वमेव साहित्यशब्दापरपर्याय प्रतिष्ठामासादयतीति गुरवः ।

---

१. रघु० १।१ । २. रामचरितमानसः १।१ । ३. कौ० ब्रा० उ० अ० ३ ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

रससूत्रीययोगविभागादेव साहित्यशास्त्रीयनियमन्यायानां दर्शनं स्पष्टायते। तदेतत् साहित्यागमरहस्यभूतं सूत्रं वर्णसमाम्नायवन्नित्यम्। काव्येऽपि स्मृत्यादिवन्मन्त्रादिवच्चानुपूर्वीनित्यत्वमस्त्येव।

काव्यं हि कवेः शब्दार्थमयी तनुः। अत एव काव्यानां स्मृतिकोटिप्रविष्टत्वेन लोकव्यवहारे शास्त्रेऽपि च प्रामाण्यं भवत्येव। तन्निरूपणपथि पद्यमानसंशयापनोदोपायस्य साहित्यशास्त्रैकसमधिगम्यत्वात् स्वतः प्रामाण्यं सिद्धम्।

कान्ताकटाक्षैकमात्रोद्घाटितबुद्धिकवाटो हर्षो नैषधीयमहाकाव्ये बालाकटाक्षविलासं बहुतरमनुभावयति रसिकान्। सैवाशेषविशेषातीता वेद्यान्तरस्पर्शादिरहितापि साहित्यशास्त्रीयनियमसहिता सत्यासत्यविशिष्टा सहृदयहृदयार्णवविकसितद्रुतिदीपित(मनोनोद)मनोमोदमाविर्भावयन्ती कवेः काव्यस्य कायस्य तत्त्वम्। स्वापाङ्गनिक्षेपाखिलकलिमलापसारणी तारिणी शब्दमयी तनुरेव संयोगाल्लोकोत्तरत्वं नित्यत्वञ्चापादयति। अत एव साहित्यशास्त्रीयनियमन्यायमीमांसामयीमनन्ताखिलैश्वर्य्यगुणगणकल्याणनिलयां वियदीकारसंयुतवीतिहोत्रान्वितार्धेन्दुविलासामद्वितीयामपि द्वितीयां भूमापृष्ठे निधाय गुरूनभिवन्द्य च वाङ्मयार्णवं प्रवेष्टुकामोऽस्मि।

'रसो वै सः'[1] इत्यनेन रसस्य काव्यात्मत्वम्, **'चत्वारि शृङ्गाः'**[2] इत्यनेन काव्योपकरणानि, रससूत्रव्याख्यानं व्यासस्यालङ्कारप्रस्थापनपरमाचार्यत्वं भामहदण्डिध्वनिकाराणां साहित्यसम्प्रदायाचार्यत्वं बहुसम्प्रदायवादखण्डनादिकं चोपस्थाप्यमानं निबन्धादाकलनीयमिति भूयो भूयो विदुषस्समभ्यर्थ्य च मुधा लेखाद् विरम्यते।

● ● ●

---

१. तै० उ० २।७।१। २. शु० यजु० १७।९१।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

प्राकृतशब्दस्यार्थस्तद्व्याप्तिश्च

डॉ० गङ्गारामपाण्डेयः

मण्डलीयसंस्कृतपाठशालानिरीक्षकः, लक्ष्मणपुरम् (लखनऊ)

शताब्द्यामस्यां 'प्राकृत'शब्दो भाषाशास्त्रीयविवादविषयतामापन्नः। विवादमेक क्षिप्त्वा टी०बरोमहोदयः संस्कृतविलोमार्थकमेनं मनुते, यथा संस्कृतानां सभ्यजना प्रतिलोमतया प्राकृताः पामरा गृह्यन्ते जनाः[1]। प्राकृतशब्दस्यायमभिप्रायो प्रचलितोऽतिष्ठत्[2]। अस्यैव संवादी प्राकृतस्यान्योऽर्थो वर्ततेऽकृत्रिमः स्वाभाविको वा[3] अत्र महत्तमोऽयं प्रश्न उदेति यत् प्राकृतस्य गृहीतावास्तामिमावुभावप्यर्थौ, त संस्कृतमाधृत्य कृत्रिमरूपतया प्रतिष्ठापितानां नाटकीयप्राकृतानां तात्पर्यं व्याहन्यते, य सर्वास्ताः संस्कृतप्रकृतिका निर्मितयः। अस्तु नाम कश्चन प्राकृतजनेष्वेतासामाधार टी०बरोमहोदयो भगवतः पतञ्जलेः सम्पर्कात् स्वाभिप्रायमकथयिष्यत् चेत्, तर्हि प्राकृतस्याने पभ्रंशस्य प्रयोगमकरिष्यत्। सम्भवतोऽयमेव तस्याभिप्रायः। संस्कारगुणविमुखोच्चारणा पदप्रक्रियायाश्च घटन्ते विविधा अपभ्रंशाः[4]।

परन्तु किञ्चिदितोऽधिकं वर्तते मान्यं बरोमहाभागस्य। स कदाचिदेतन्न मन्य यदपभ्रंशताया रक्षाहेतवे संस्कारा आवश्यका अभूवन्। ततस्तादृशीं च व्याकृतां भाषां संस्कृ ममन्यत, प्रत्युत स तु संस्कृतमेव प्राकृतस्य शाणितं रूपं मनुते। ऋग्वेदः स्वयमेव नास्ति तथा विधभाषायाम्, यतः शाणकर्षणकार्यं बहुकालानन्तरमचलत्। स्थितावेतस्यां किम् ऋग्वेदीय भाषा प्राकृतम् इति मन्यताम्? अपभ्रंशात् सुरक्षायाः प्रयासास्तदानीमपि प्रचलन्त आसन्[5]।

नायमस्यर्थो यद् ऋग्वेदीया ऋषयो जनप्रचलितां काञ्चिद् भाषां संशोध्य संमार्ज्य वेदमन्त्रानलिखन्। अशिष्टजनभाषातः शिष्टजनभाषायां शब्दसमूहाः, पदविन्यासा उच्चार णानि च सर्वत्र भिद्यन्ते, अद्यापि तदस्ति, तत्रैवास्ति संकेतः।

तथ्यैरेतैः सह वक्तुमिदमपि प्रसङ्गप्राप्तं यद् भाषाक्षेत्रे प्राकृतशब्दस्य यथारुचि गृहीतेऽर्थे प्रश्ना अनेके उत्तिष्ठन्ति। प्रथमतस्तावदेतद् यद् वैयाकरणेषु प्राकृतस्य योऽर्थ

---

१. द्रष्टव्यम्---संस्कृतभाषा--टी० बरो, पृ० ६८--७१।

२. कादम्बरी---प्राकृत इव परिभूयमानमात्मानं न रुणत्सि।

३. शिशुपालवधम् २।३६ स्यातामभित्रौ मित्रेव सहजप्राकृताविव।

४. वाक्यपदीयम् ब्र० का०---पारम्पर्यादपभ्रंशा विगुणेष्वभिधातृषु।
प्रसिद्धिमागता येषां तेषां साधुरवाचकः॥

५. महाभाष्यम्--पस्पशोद्धृता ऋक्--सक्तुमिव तितउना पुनन्तो यत्र धीरा मनसा वाचमक्रत।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

प्रचलन्नास्त, तदपेक्षया व्यापकमायाममादाय प्रयोगे कृते बहुभ्रान्त्यवकाशः। जना अवगच्छन्ति यदुपलब्धान्येव प्राकृतानि संस्कृतस्य मूलानि, यद्यपि टी० बरो न तथा अभिप्रैति। द्वितीयं च–प्राकृतस्याध्ययनप्रणालीमधिकृत्य यन्नामकरणमजनि, तस्यां समग्रपरम्परायामाक्षेपो घोरः। भाषाशास्त्रस्य कमपि पारिभाषिकं शब्दं विचाल्य तस्य मनोरुचितमर्थकरणं न विद्वज्जनस्य, अपि तु प्राकृतजनस्य कर्म। एकमपरमपि विचारास्पदं तथ्यं यद् न कश्चन वैयाकरणः शौरसेनीम्, मागधीम्, पैशाचीं वा प्राकृतनाम्ना अभिधत्ते, यदा हि जैना अर्धमागधीं ग्रियर्सनश्च शौरसेनीं प्राचीनतमाममन्यन्त। प्राकृतस्यायं सीमितोऽर्थः केनचिदभिप्रायेणाभवत्। तं संनिधाप्य संमुखे विचारः प्रसार्यः।

व्यातव्यं यद् ग्रन्थभाषा उपतिष्ठते किमप्यन्तरमादायैव प्रचलिताया भाषायाः (बोलीतः इत्यर्थः) ऋग्वेदस्यापि भाषा न वर्तते, तदपवादः संस्कृतेन सह अवेस्तायास्तोलने कृते स्पष्टतामेति यद् जन-भाषासु (बोलीषु) प्रायोगिकाणि अन्तराणि सततं भवन्त्येव। अत्र देश-काल-भेदा अपि हेतवः, परन्तु प्राचीनतमजनभाषायाः प्राकृतनामकरणमनौचित्य-विजृम्भितम्। एतेन व्यवस्थितचिन्तने व्याघात उत्पद्यते, यतः प्राकृतं नाम मूलतो वैयाकरणैः कृतम्। तेऽजानन् यद् भाषाया अस्या अध्ययनं यदि कथमपि कर्तुं पार्यते, तर्हि तत् कस्याश्चन परिनिष्ठिताया विद्वज्जनसम्मतायाः शिष्टभाषायास्तुलनायामेव संभाष्यते। अन्यथा अस्याः शब्दकोशः कथमपि हस्तयितुं न शक्यते। प्रत्यय-व्यवस्थाः पद-प्रक्रियाश्च केनाप्युपायान्तरेण सहजलभ्या न, अतः प्रकृतिसंभूतां तां मत्वा प्रकृतिविकृतिप्रणाल्या च तामधीत्य संस्थापितवन्तः। व्याकरणस्य प्रकृति-विकृतिभावो न तथा, यथा पानीयं विकृतं सदपेयं चरित्रं च विकृतं भूत्वा अस्पृहणीयम्। दुग्धं च विकृतं सदनुपादेयं जायते, प्रत्युत दारुविकृतं सन् कपाटो भवति, दुग्धं विकृतं सद्दधि, जलं विकृतं सद् हिमं भवति, तदा 'सुधी उपास्यः' विकृतं सद् 'सुद्ध्युपास्यः' सञ्जायते। अतः साम्प्रतं यो विकासः कथ्यते, यश्च सांख्ये विकार-पर्यायः परिणाम उच्यते, यस्य च द्वौ भेदौ विकृतपरिणामः, अविकृतपरिणामश्च; तस्यैव सुविधा-संवलितो भाषाशास्त्रीयः संग्रहः। अस्य च प्रकृति-विकृतिभावस्य संकेतो वैयाकरणानां प्रतिपादने सुलभः। प्रकृतेर्विकृतिप्रक्रियायां कदाचिद् वस्तुनो वस्त्वन्तरस्य निष्पत्तिः, यथा दुग्धाद् दधि। कदाचिच्च तात्त्विकं परिवर्तनमभूत्वापि वस्तुरूपान्तरितं जायते, यथा यूपाय दारु। प्राकृतं कस्याश्चन प्रकृतभाषाया एतादृशी विकृतिः; या रूपान्तरं स्वीकृत्य वस्त्वन्तरं यावद् गतिं लब्धवती। अतः संस्कृतभाषाया अपेक्षायामिदं भाषान्तरमेव मन्तव्यम्।

नात्रायमभिप्रायो यद् यत् संस्कृतं काव्येषूपलभ्यते यच्च पाणिनिः सूत्रेषु बबन्ध, तद-धिकृत्य हठाद् भाषान्तरस्वरूपमुत्थाप्यते। प्राग्वैदककालादेव काचिज्जनभाषाधारा प्रचलन्ती अतिष्ठत्। तस्यामेव धारायां विकासमादाय समुपस्थिताया भाषाया अध्ययनस्य प्रशस्तः प्राञ्जलश्च मार्गः संस्कृतं प्रकृतिं मत्वा कर्तुं शक्यते, अतः प्राकृतं तद् यत्प्रकृतेर्निष्पन्नम्। अध्ययनसुविधाहेतवे च सा प्रकृतिः संस्कृतम्। उदाहरणार्थं हेमचन्द्रः 'धृतिः' शब्दस्य 'धिई-दिही' प्राकृतरूपे अदात्। तत्र 'धिई' संस्कृतस्य 'धृतिः' शब्दस्य विकारः, परन्तु 'दिही' वैदिक'दिधिः' इत्यस्य रूपविकारः। एतादृशा अनेके प्राकृतशब्दा येषां वैदिकस्रोतांसि अनुपलब्धान्यद्य, यतः सर्वमपि वैदिककालिकं शब्दस्वरूपं वेदेषु समाहितमिति कथनमपि

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

सर्वथाऽसंगतमेव । अवस्थायामस्यां शब्दांस्तान् देशजान् मत्वा कस्यचित् संस्कृतशब्दस्य स्था आदेशरूपतया संगृह्य व्याकरण-व्यवस्था संपादिता । अस्योदाहरणमेकं संस्कृतादेशात् शक्यम् । पाणिनिः 'युवन्' शब्दात् 'यवीयस्-यविष्ठ'निर्माणसमकालमेव 'कनीयस्-कनि एतयोरपि व्यवस्थां दत्ते, 'युवन्' शब्दस्य स्थाने 'कन' आदेशं वक्ति । वस्तुतः 'कन' शब्द ह्रस्वार्थकः पूर्वसम्पत्तिः । परं स्वतन्त्रो न प्रयोगः, तदा प्रत्ययान्तप्रयोगार्थं तादृशी व्याक णिकी व्यवस्था अपरिहार्या । एवमेव प्राकृतवैयाकरणा विदधति । यदा ते वदन्ति कथ्-धातो स्थाने प्राकृते 'बोल्ल' आदेशः, 'गम्' इत्यस्य भमाण आदेशो वा । अयं तु नास्यार्थो यत् क बोल्ल-रूपतया निष्पद्यते । अयं तु तथाविधः कश्चन धातुर्यस्य मूलमद्य नानुसन्धेयम् 'भमाण' विषये त्विदमपि सम्भाव्यते यत् 'भ्रम्-अट्' इति द्वौ धातू एकत्र संयुक्तौ । बहुषु स्थ ष्वेतदपि यदार्येतरभाषायाः कश्चन शब्दः समायातः । परं नवनवतिः प्रतिशतमध्यय संस्कृतमादाय प्रकृति-विकृतिभावेन कर्तुं शक्यते, अतः प्रकृतेरागतं प्राकृतं मत्वा अध्यय प्रावर्तत ।

अत्र विचारणीयमिदमपि यत् प्राकृतवैयाकरणो यदा काञ्चिद् भाषां प्रकृतिं प्रतिष्ठा पयति, तदा न भवति तस्येदं तात्पर्यं यदध्येतव्या भाषा प्रकृतिभाषाया उत्तरो विकासोऽस्ति न वा ? प्रश्नमिमं भाषावैज्ञानिकानां कृते हित्वा हस्तामलकतां प्रतिपादयति भाषाक्षेत्रे उदाहरणार्थं वररुचिराचार्यो मागधीभाषायाः 'प्रकृतिः शौरसेनी' इत्युपस्थापयति । तेन तस्य तात्पर्यं यद् मागधी शौरसेन्या उत्तरो विकासः । अद्यापि यदा (खड़ी बोली) हिन्दीं केन्द्री कृत्य देश-कालस्य विविधतावतां प्रयोगाणामध्ययनं विधीयते, तदा तथैव प्रतिपाद्यते । यथा खड़ीबोली 'देखा' राजस्थानी 'देख्या' भवति । अत्र 'यकारागमः' मन्यते । यदा च विकास धारायां 'देख्या' पूर्ववर्ती, तदनु 'देखा' अभूत् । यथा विवरणेनाधस्तनेन स्पष्टीभवति—

प्राकृतम्	प्राचीना हिन्दी	राजस्थानी	हिन्दी
देक्खिय	देखिया	देख्या	देखा

प्राकृताध्ययने संस्कृतमर्वाचीनं स्थापयितुं न शक्यते प्रोक्तदिशा, अतो बहुशः संस्कृत शब्देषु परिवर्तनेन निर्मितान् प्राकृतशब्दान् दृष्ट्वा सामान्यधिया संस्कृतप्रकृतिकस्वीकरणे नाभूत् व्यापत्तिराचार्याणाम् । अर्धमागधीं 'आर्षमनार्यभाषां' वा मत्वापि जैनाचार्यास्तस्या अध्ययनं संस्कृत-प्रकृतिकमेवाकार्षुः, यतो नासीदध्ययनस्य मार्गान्तरम् ।

"प्राक्कृतं प्राकृतम्' स्वीकृतं स्यात्; तदापि तस्याः प्राक्कृताया भाषाया यस्या विलोमार्थकमस्तु संस्कृतम्, नाद्यास्ति कश्चित् संकेतलेशोऽपि । प्रकृतिजनिता नैसर्गिकी बोली इत्येव गृहीतो भूयादर्थस्तदापि तामद्य विज्ञातुं न वयं पारयामः । न च तथाविधपुरातनेन गौरवेणाच्छादितया भाषया सह प्राकृतस्य सम्बन्धसंयोजनेनास्ति किञ्चित् स्वारस्यम् । अयमेव हेतुर्यद् भाषावैज्ञानिकसम्प्रदायवादादुपर्युत्थाय भारतीया भाषाशास्त्रिणो यथार्थमेव सत्यममन्यन्त ।

अद्यत्वे प्राकृतशब्दस्य प्रयोगोऽनेकधा क्रियते । परन्तु प्राकृतवैयाकरणाः 'शौरसेनीम्, मागधीम्, पैशाचीम्' वा प्राकृतनाम्ना न व्यवहरन्ति । भरतः प्राकृतनाम्ना तामेव भाषां

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

गृह्णीते या अग्रे महाराष्ट्री इत्यभिधामभजत् । स नाट्यसंवादव्यवस्थाम् 'संस्कृत-प्राकृत-भाषा' इति भाषामये दत्ते । स च शौरसेनीं मागधीं च भाषावर्गे गणयति, येन प्रतीयते यत् तद्दृष्टौ भाषा बोलीपर्यायः । स च प्राकृतं संस्कारगुणवर्जितं विपर्यस्तं मन्वानः कथयति :—

एतदेव विपर्यस्तं संस्कारगुणवर्जितम् ।
विज्ञेयं प्राकृतं पाठ्यं नानावस्थान्तरात्मकम् ॥ (ना० शा० १७।२)

प्राकृतस्य मूला व्याप्तिरेतावती । ध्वनि-परिवर्तनस्य चापेक्षिता नियमावली समाविशत्यत्रैव ।

प्राकृतशब्दस्य अपरा व्याप्तिरियं यत् शौरसेनी, मागधी—पैशाचीभाषा अपि तत्र समाविष्टाः स्युः । **'प्राकृतप्रकाशः'** इति नाम दत्वा वररुचिराचार्यस्तासु विचारं प्रसृतवान् । अनेन व्याप्तिरियं संवलिता भवति । परन्तु यदि तत्त्वात्मिकया दृशा दृष्टं स्यात्, तर्हि प्राकृतस्य वृत्ते तासां सर्वासां ग्रहणं प्रवृत्तिराधुनिकी । हेमचन्द्रः अर्धमागधीमार्षप्राकृतं कथयति । प्राकृतनियमैः सहैव च वृत्तौ तस्या नियमविशेष्यान् संकेतयति । शेषा भाषा न मनुते स प्राकृततया । शौरसेनी निर्वचनान्ते स सूत्रयति—**'शेषं प्राकृतवत्'** ।

एतेन स्वष्टमेव प्राकृतवैयाकरणा निर्भ्रान्तरूपेण प्रथमां व्याप्तिमङ्गीकुर्वते ।

सम्प्रति तृतीयैका व्याप्तिरपि गतिमती यत् पालिः अशोकस्य शिलालेखानां च भाषाः प्राचीनप्राकृतनाम्ना व्यवह्रियन्ते । एतस्य प्रमुखं कारणमेतदेव यत तासामप्यध्ययनं संस्कृतप्रकृतिकं क्रियते । भवतु नाम नेदं तथ्यं शब्दस्वीकृतम् ।

एका तुरीया व्याप्तिरपि दृश्यते, वयं संस्कृतस्य प्रतिलोमभाषां कल्पामहे । तां च प्राक्कृतम्, प्रकृतिजन्यम्, वा व्युत्पाद्य प्राकृतं मन्यामहे, संस्कृतं च प्राकृताख्यविविधबोलीभ्य आपातविशिष्टां शिष्टभाषां च स्वीकुर्वते । व्याप्तिरियं नितान्तभ्रान्तिरूपा, यत्रापेक्षितो विचारः कृतः ।

● ● ●

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

एकावली

कवेर्विद्याधरस्यासाधारणी कृतिः

डॉ० भृगुनाथपाण्डेयः, एम्० ए०, एम्० एड्०,
हिन्दीसाहित्यरत्नम्, पी-एच्० डी०

भारतीयं काव्यशास्त्रक्षेत्रं व्यापकम् । अनेकानेककाव्यशास्त्रमर्मज्ञैः समये समये साहित्यशास्त्रीयैर्विचारैः परिवर्धितं परिपोषितं च । ईदृशेषु साहित्यशास्त्रमर्मज्ञेषु कवेर्विद्याध स्थानं विशिष्टम् । अस्य कृतिः 'एकावली' एव । अलङ्कारशास्त्रस्यैको महत्त्वपूर्णोऽयं ग्र 'एकावली' नामकरणं काव्यशास्त्राणामन्यनामभ्यो भिन्नं विचित्रञ्च । अस्मिन्नेव ग्रन्थे विद्या काव्यतत्त्वानि स्वरचितोदाहरणमुखेन निरूपितानि । भामहादिप्राचीनालङ्कारिकैः 'का लङ्कारः' इति नामकरणं कृतम् । तदनन्तरं प्रमुखकाव्यशास्त्रज्ञैः राजशेखर-मम्मट-हेमच क्रमेण 'काव्यमीमांसा', 'काव्यप्रकाशः', 'काव्यानुशासनम्' इति काव्यशास्त्राणां नाम कृतानि । कविराजो विश्वनाथस्तु 'साहित्यदर्पणम्' प्रणीतवान् । कवेर्विद्याधरस्यैका त्रयोदशशतकान्ते चतुर्दशशत्यादावुत्कलनरेशस्य द्वितीयस्य नरसिंहस्य प्रशस्त्यां निर्मि यद्यप्ययं ग्रन्थः काव्यप्रकाशालङ्कारसर्वस्वयोराधृतः; तथापि स मौलिकमतेनोपेतः । ग्रन्थक स्वयमेव रचिताः श्लोकाः 'चाटुश्लोकाः' इति कथितम्[1] । नवीनेयं प्रवृत्तिर्विद्याधरेणोद् विता । अनन्तरञ्च सरणिमिमामनुकृत्य विद्यानाथेन 'प्रतापरुद्रीयम्' ग्रन्थो लिखितः ।

'एकावली'ग्रन्थस्य संस्करणं मुम्बईतः १९०३ ख्रीस्ताब्दे प्रकाशितम् ।

जीवनवृत्तम्

प्रथमस्तु भारतवर्षस्योत्तरस्यां दिशि कश्मीरदेशः साहित्यशास्त्रस्य परिशीलनस्था एवञ्च प्रथमो विद्याकेन्द्र आसीत् । अयं देशः साहित्यशास्त्रस्य द्विसहस्रवर्षाणामिति द्वादशशतके प्रसूतं रुय्यकं यावद् मौलिभूत आसीत् । तत्पश्चादेव गुर्जरपूर्ववङ्गराज्ये साहि प्रवृत्तीनां केन्द्रभूते आस्ताम् । एकावलीकारादारभ्य दक्षिणभारतं विद्याकेन्द्रो बभूव । विद्या विद्यानाथ-विश्वनाथादयो दक्षिणभारतस्य विभूतयः, यैरलङ्कारशास्त्रस्य साहित्यनि सर्वोत्कृष्टं महत्त्वपूर्णं योगदानं प्रदत्तम् ।

सर्वमान्यं मतमिदं यद् विलक्षणग्रन्थैकावलीनामकरणम्, तद्ग्रन्थस्य रचयित विद्याधर इति । कालोऽयमुत्कलनरेशनरसिंहद्वितीयस्यास्ति । अयं समयस्तु ख्रीस्ता (१२८०-१३१४) । अत एव विद्याधरस्य कालोऽयम्, यस्मिन् स महामना प्रादुर्भू चतुर्दशख्रीस्ताब्दस्यारम्भ एवायं समयः ।

---

१. एष विद्याधरस्तेषु कान्तासंमितलक्षणम् ।
करोमि नरसिंहस्य चाटुश्लोकानुदाहरन् ॥ (एकावली १।७)

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

एकावल्याः प्रत्येकोन्मेषे **'इति श्रीमतो महामाहेश्वरस्य कवेर्विद्याधरस्य कृतावेकावली-नाम्न्यलङ्कारशास्त्रे'** इति लिखितम् । अनेन ध्वन्यते—महामाहेश्वरः कविर्विद्याधर एक एव, न त्वन्यः । अयं विद्याधरः कविर्विद्याधरः । अन्यश्च वैद्यविद्याधरः, यस्मादेकावलीकारो भिन्नः ।

सम्प्रति तस्य वंशविषये बृहद् विवरणं प्रामाणिकञ्च नोपलब्धम् । सर्वमान्य एवायं यत् स उत्कलनरेन्द्रनरसिंहद्वितीयस्य शासनकालेऽलङ्कृतवान् इदं भारवर्षम् । उदात्तवंशे स उत्पन्नः । महामाहेश्वरेति विशेषणेन सिद्धमिदं मतं यत् स शिवभक्त आसीत् । नमस्कारात्मक-श्लोकेनापि परिपुष्टश्च[1] ।

कृतित्वम्

'एकावली' विद्यारस्यासाधारणी कृतिः । मम्मटकृतकाव्यप्रकाशस्य या शैली, तस्यामेव निर्मितोऽयं ग्रन्थः । अस्मिन् ग्रन्थेऽष्टावुन्मेषाः । प्रथमोन्मेषो भूतभावनशङ्करस्य वन्दनाश्लोका-दारब्धः । तदनन्तरं नमस्कारात्मकपदकारणसम्बन्धे तर्कोहापोहौ । निर्विघ्नरूपेण ग्रन्थपरिसमा-प्त्यर्थं विद्याधरेण मीमांसादर्शनस्य संनिपत्योपकारकाङ्गभूता आरादुपकारकाङ्गभूता वा शब्द-द्वयी प्रयुक्ता । अर्थात् प्रत्यक्षरूपेणाथवाऽप्रत्यक्षरूपेण कार्येऽयं सहायकः । मीमांसादर्शने विधि-विवेचनम् । त्रयश्च विधयः—नित्यविधिः, नैमित्तिकविधिः, काम्यविधिः ।

नित्यविधौ **'अहरहः संध्यामुपासीत'** इति सन्ध्योपासनाया नित्यत्वम् । नित्यकरणीय-मेव, तद्वैपरीत्ये प्रत्यवायो भवेत् । नैमित्तिकं कर्म विना निमित्तं क्रियेत, यथा ग्रहणश्राद्धादौ कर्म नैमित्तिकम् । काम्यकर्मणि तु कामनाधीनक्रियायां फलम् । यथा स्वर्गोद्देश्येन कृतमश्वमेधयागादि । एकावल्या वन्दना काम्यविधिरूपेण स्वीकृता, यथा काव्यग्रन्थस्य परिसमाप्तिर्निर्विघ्नरूपेण भविता, कामना च पूरिता । काव्यं व्यक्तौ सकलकामनानां कविसिद्धिं प्रददाति । अतो ध्वनिः, अथवा मुख्यभावः काव्यस्यात्मैव भवति । अभाव-वादिभिर्भामहादिभिर्ध्वनिसत्ता न स्वीक्रियते । अन्येषामपि गतिरियम् ।

भामहरुद्रटावन्तर्भाववादिनौ, याभ्यां गुणालङ्कारयोर्ध्वनिः स्वीकृतः । व्यक्तिविवेककार-महिमभट्टेन ध्वनिस्त्वनुमानान्तर्गतः स्वीकृतः । कुमारिलभट्टोऽभिहितान्वयवादी, प्रभाकर-गुरुश्चान्विताभिधानवादी । भट्टलोल्लटो दीर्घव्यापारवादी ।[2] ध्वनिव्यवस्थापनार्थं विद्याधरेणो-

---

१. प्रालेयाचलकन्यकाकुचतटीपत्रावलीशिल्पिनः
प्रेङ्खद्भालविलोचनानलशिखानिष्पीतचेतोभुवः ।
देवस्येन्दुविभूषणस्य सुचिरं पादारविन्दद्वयं
युस्मान् पातु सुरासुरेश्वरशिरोरत्नांशुकिञ्जल्कितम् ॥ (एकावली, १।१)

२. यदि पुनः सोऽयमिषोरिव दीर्घदीर्घो व्यापार इति मन्वानाः शब्दश्रवणसमनन्तरं यावतोऽ-र्थस्य प्रतिमानं तावत्यमिधैव व्यापारः प्रगल्भते इत्यभिदधाति । इत्थमपि वृथा विकत्थनम् । सम्प्रत्यभिषिषेणयिषति वः कुपित एष नरसिंहनरपतिः । किञ्च विमुञ्चत-कान्दीशीकतामनुप्रविशत भामिति च कथयत्ययमित्यादावखिलभूपालगतत्वेनोल्लसतो त्रासश्वासादीनामपि वाच्यत्वप्रसङ्गात् । अपि च यदि न व्यापारान्तरमभिधातः स्वीक्रियते, तर्हि कृतं लक्षणया । दीर्घदीर्घाभिधाव्यापारेणैव लक्ष्यस्याप्यर्थस्य प्रतीत्या तस्याः स्वीकारवैयर्थ्यापत्तेः (एकावली प्रथमोन्मेषः) ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

पन्यस्तं यत् 'अस्य ध्वनेः सत्तापि न संभाव्यते, अप्रामाणिकत्वान्नाङ्गीक्रियत इत्यर्थः। गुणालङ्कारव्यावर्तको धर्म इत्यर्थः। अनिर्वाच्यः सहृदयहृदयैकसंवेद्यः, न तु निर्वक्तुं शक्यः। भाक्त औपचारिकः। ततो विप्रतिपत्तिसद्भावात्'। शब्दार्थशरीरं काव्यम्, तत्र ध्वनिरात्मेति सिद्धान्तः[1]। आनन्दवर्धनकृतध्वन्यालोकस्य प्रथमश्लोकेन सादृश्यम्[2]।

एकावल्या द्वितीयोन्मेषे शब्दार्थस्वरूपं निरूपितम्। मम्मटेन 'लक्षणा तेन षड्विधा' उक्ता। परञ्चेति विद्याधरेण लक्षणायाः सप्तभेदाः प्रदर्शिताः। जहदजहत्स्वार्था लक्षणाधिकोल्लिखिता 'तत्त्वमसि' महावाक्येऽयं भेदो वेदान्तानुसारेण दर्शनीयः। इयं तु भागत्यागलक्षणा।

तृतीयोन्मेषे ध्वनिभेदाः प्रभेदा वर्णिताः। उत्तमकाव्ये तु ध्वनिः। अस्मिन् काव्ये व्यङ्ग्यार्थस्तु वाच्यार्थादधिकचमत्कारको भवति। विभिन्नमतानां रसभेदान् प्रदर्शयता वात्सल्यरसमन्यमतेषु विशेषं मन्यमानेन विद्याधरेण नवरसा एव निरूपिताः। असंलक्ष्यक्रमकाव्यस्याष्टौ भेदाः—१. रसः, २. भावः, ३. रसाभासः, ४. भावाभासः, ५. भावशान्तिः, ६. भावोदयः, ७. भावसन्धिः; ८. भावशाबल्यञ्च।

चतुर्थोन्मेषे द्वितीयप्रकारककाव्यस्यार्थाद् गुणीभूतव्यङ्ग्यस्य सोदाहरणा व्याख्या प्रस्तुता। वाच्यार्थाद् व्यङ्ग्यार्थस्त्वधिकचमत्कारको न भवत्यस्मिन् काव्ये।

पञ्चमोन्मेषे माधुर्यौजःप्रसादगुणानां विवेचनमस्ति। अलङ्कारस्य परिभाषापि च। दण्डि-वामन-भोजराजप्रभृतीनां गुणान् खण्डयता कतिपया दोषाभावाः, अन्ये च गुणान्तर्गताः, तथापरे चान्तर्भावाः प्रदर्शिताः। वैदर्भी-पाञ्चाली-गौडीरीतयश्च वर्णिताः।

षष्ठोन्मेषे प्रमुखदोषाः, यथा—अविमृष्टविधेयांश-प्रक्रमभङ्ग-अवाच्यवचन-वाच्यावचन-अर्थपौनरुक्त्यादयः सोदाहरणा उपलब्धाः।

सप्तमोन्मेषेऽष्टमोन्मेषे च क्रमेण शब्दालङ्कारार्थलङ्कारलक्षणोदाहरणानि प्रदर्शितानि।

एकावल्याः प्रथमोन्मेषे मम्मटकृतकाव्यप्रकाशस्य प्रथमपञ्चमोल्लासान्तिमभागौ, द्वितीयोन्मेषे द्वितीयतृतीयोल्लासौ, तृतीयोन्मेषे चतुर्थोल्लासः, चतुर्थोन्मेषे पञ्चमोल्लासः, पञ्चमोन्मेषेऽष्टमोल्लासः, षष्ठोन्मेषे सप्तमोल्लासः, सप्तमोन्मेषे षष्ठनवमोल्लासौ, अन्तिमाष्टमोन्मेषे दशमोल्लासोऽन्तर्निहितः। प्रत्येकोन्मेषे कारिकोदाहरणवृत्तयः। कारिकासूत्ररूपे, वृत्तिस्तु व्याख्यारूपे, तथोदाहरणानि पुष्टिरूपे लिखितानि, यानि स्वयमेव विद्याधरेण

---

१. शब्दार्थौ वपुरस्य तत्र विबुधैरात्माभ्यधायि ध्वनि-
श्चार्वाकैरिव कैश्चिदस्य न पुनः सत्तापि सम्भाव्यते।
कर्तुं लक्षणमक्षमैरयमनिर्वाच्यः परैरुच्यते
भाक्तोऽन्यैः समुदीर्यतेऽस्य हि ततो ब्रूमः स्वरूपं वयम्॥ (एकावली १।१३)

२. काव्यस्यात्मा ध्वनिरितिबुधैर्यः समाम्नातपूर्व-
स्तस्याभावं जगदुरपरे भाक्तमाहुस्तमन्ये।
केचिद् वाचां स्थितविषये तत्त्वमूचुस्तदीयं
तेन ब्रूमः सहृदयमनःप्रीतये तत्स्वरूपम्॥ (ध्वन्यालोकः १।१)

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

रचितानि। एवञ्च कलिङ्गनरेशनरसिंहद्वितीयस्य प्रशस्तौ विनिर्मितानि। विद्यानाथेनापि **'प्रतापरुद्रयशोभूषणम्'**, कविनरसिंहेन **'नञ्जराजयशोभूषणम्'** लिखितम्। क्रमेण च प्रतापरुद्रस्यैव नञ्जराजनीतिप्रशंसायां लिखितौ ग्रन्थौ स्तः।

एकावलीग्रन्थोल्लेखस्तु मल्लिनाथटीकाग्रन्थेषु यथा—मेघदूत-किरातार्जुनीय-शिशुपालवधेषु, एवञ्च शिङ्गभूपालकृतरसार्णवसुधाकरनामककाव्यशास्त्रेऽस्ति।

'एकावली' नाम त्वप्पय्यदीक्षितस्य चित्रमीमांसाकुवलयानन्दग्रन्थयोः, पर्वतीयपण्डितविश्वेश्वरकृतालङ्कारकौस्तुभग्रन्थे च समुपलब्धम्।

'एकावली' व्यतिरिक्तं डा० औफ्रेख्टमहोदयस्य ग्रन्थसूचीषु विद्याधरस्य द्वितीयरचनोल्लेखः 'केलिरहस्य'ग्रन्थो 'रायल एशियाटिकसोसाइटी', वङ्गप्रदेशस्थग्रन्थालये हस्तलिपिरूपेण (१९०३) खीस्ताब्दे समुपलब्धः। अस्मिन्नेव ग्रन्थे ईश्वरं प्रति प्रेमभक्तिवर्णनम्। प्रथमपद्यमिदमुद्धृतम्।[1] ग्रन्थेऽष्टादशपरिच्छेदाः। आकारे तु महानयं ग्रन्थः प्रतीयते।

मल्लिनाथेन प्रायो रतिरहस्यस्य नामाङ्कितम्। अस्मिन्नुल्लेखः—**'एतच्छ्रीवैद्यविद्याधरकविविरचिते केलिरहस्यं समाप्तम्'**। वैद्यशब्दस्याधिकोल्लेखेन स्पष्टं यत् सोऽन्यो विद्याधर आसीत्। एकावल्यां कविविद्याधरनामोल्लेखः। वैद्यविद्याधरः कविविद्याधराद्भिन्नः। एक एव नास्ति। अतः कविविद्याधरस्यासाधारणी कृतिः **'एकावली'** इति।

समयः

उत्कलनरेशनरसिंहद्वितीयस्य प्रशस्तौ निर्मितोऽयं ग्रन्थः 'एकावली'। अनेन ग्रन्थेन परिज्ञायतेऽस्मिन्नेव काले कविविद्याधर आसीत्। यतः सूक्ष्मवर्णनमस्ति ग्रन्थेऽस्मिन्। अत एव कविविद्याधरस्य समयश्चतुर्दशशताब्द्यामस्ति। कलिङ्गनरेशनरसिंहद्वितीयस्यापि समयोऽयमेव। अष्टौ राजानो बभूवुर्नाम्नोऽस्य।

निम्नतालिका प्रसङ्गेऽस्मिन् द्रष्टव्या—

१—नरसिंहदेवः	खैस्ताब्दपूर्वं	(४२१-३०६)
२—नरसिंहकेसरी	खैस्ताब्दः	(१०१३-१०२४)
३—लाङ्गुलीयनरसिंहः	तदेव	(१२३७-१२८२)
४—केशरीनरसिंहः	तदेव	(१२८२-१३०७)
५—प्रतापनरसिंहः	तदेव	(१३०७-१३२७)
६—कपिलनरसिंहः	तदेव	(१३२९-१३३०)
७—नरसिंहजनः	तदेव	(१५५४-१५५०)
८—नरसिंहदेवः	तदेव	(१६२८-१६५३)

---

१. येनाकारि प्रसभमचिरादर्धनारीश्वरत्वं
दग्धेनापि त्रिपुरजयिनो ज्योतिषा चाक्षुषेण।
इन्दोर्मित्रं स जयति मुदा वामवामप्रचारो
देवः श्रीमान् भवरसभुजां दैवतं चित्तजन्मा॥ (केलिरहस्य १।१)

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

उत्कलभूभृतां परिज्ञानसम्बन्धे नरसिंहदेवचतुर्थनरसिंहदेवद्वितीययोस्ताम्रपत्रलेखौ क्रमेण १८९५ खीस्ताब्दे 'एशियाटिक-सोसाइटी', वङ्गपत्रिकायाश्चतुष्षष्टिखण्डे पञ्चषष्टिखण्डे च प्रथम-भागे प्रकाशितौ । लेखेनोपलब्धोत्कलनृपाणां शासनकालोऽधोलिखितः—

नामानि		शासनवर्षाणि	खैस्ताब्दः
चोडगङ्गः		७०	१०७०
कामार्णवः		१०	१०८०
राघवः		१५	१०९५
राजराज।		२५	११२०
अनङ्गभीमदेवः	(प्रथमः)	१०	११३०
राजराजः	(द्वितीयः)	१७	११४७
अनङ्गभीमदेवः	(द्वितीयः)	३४	११८१
नरसिंहदेवः	(प्रथमः)	३३	१२१४
भानुदेवः	(प्रथमः)	१८	१२३२
नरसिंहदेवः	(द्वितीयः)	३४	१२६६
भानुदेवः	(द्वितीयः)	२४	१२९०
नरसिंहदेवः	(तृतीय।)	२४	१३१४
भानुदेवः	(तृतीयः)	२६	१३४०
नरसिंहदेवः	(चतुर्थः)		१३९७

'नरसिंहः' इति नाम्ना चतुर्णां राज्ञां समयः प्राप्तलेखानुसारेणाधोलिखितः—

नरसिंहदेवः	(प्रथमः)	खैस्ताब्दः	(१२२९–१२६२)
नरसिंहदेवः	(द्वितीयः)	तदेव	(१२८०–१३१४)
नरसिंहदेवः	(तृतीयः)	तदेव	(१३३८–१३६२)
नरसिंहदेव।	(चतुर्थः)	तदेव	(१३८८–१३९७)

शिङ्गभूपालकृत'रसार्णवसुधाकरे' एकावलीग्रन्थस्योल्लेखेन ज्ञायते यद् नरसिंहनरेशस्य समयश्चतुर्दशशताब्दया अन्तिमः समयः, यस्मिन् काले मल्लिनाथेन टीकापि लिखिता । अतो विद्याधरस्य कालस्त्रयोदशशतकस्यान्तिमो भागश्चतुर्दशशतकस्यारम्भश्चासीत् । मिस्टरस्वेलानुसारेण प्रतापनरसिंहनरेशस्य समय। (१३०७–१३२७), स एव कालो विद्याधरकृतैकावल्याः।

मल्लिनाथस्तु भट्टिकाव्यान्यमहाकाव्यानां टीकाकारः। एकावल्यास्तरला टीकाऽपि तेनैव लिखिता । तस्य टीकाः सरला बोधगम्याश्च । मल्लिनाथस्यापि समयश्चतुर्दशशतकस्यान्तिमो भागः। एवमेव विद्याधरस्य समयो नरसिंहद्वितीयस्योत्कलाधिपतेरवधिः[1] ।

व्यक्तित्वम्

विद्याधरस्य व्यक्तित्वमुच्चतमम् । यतः स नरेशनरसिंहस्याश्रये पल्लवितो बभूव । पूर्णरूपेणायं महाभागः सर्वमान्यः । विद्याधरस्यासाधारणी कृतिः **'एकावली'** एव । एककृति-

१. मुम्बापुरीस्थराजकीयग्रन्थशालाधिकारिणा प्रकाशितैकावल्याः प्रथमसंस्करणस्य भूमिकायाः खीस्ताब्दे (१९०३) उद्धृतोऽयमंशः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

द्वारेणैवायं महाभागोऽमरोऽभूत् । अस्य नाम सदा स्मरणीयम् । विद्याधरेण नरसिंहनरेशः काव्यालङ्कारमीमांसातर्कन्यायादिशास्त्रव्याकरणागमज्ञः स्वीकृतः ।

एकावल्याः प्रथमोन्मेषे तर्कपूर्णयुक्तयः । मीमांसायाः पूर्णपण्डितो विद्याधरः ।[1]

न्यायप्रणाल्या[2] तर्कोहापोहश्चानेन महात्मनाऽद्वितीयोऽनुपमश्च । साधारणविदुषाऽस्य ग्रन्थस्य टीका दुरूहा । मीमांसकव्याकरणज्ञमल्लिनाथेनास्य ग्रन्थस्य तरला टीका लिखिता । विद्याधरो व्याकरणज्ञ[3] आसीत् ।

विद्याधरः शिवोपासकः, उच्चवंशावतंसनरसिंहो राजा द्वितीयोत्कलनरेशस्य छत्रच्छायायां चतुर्दशशतकस्यारम्भे त्रयोदशशतकस्यान्तिमसमये पल्लवितः पुष्पितश्च बभूव ।

विद्याधरस्य वैशिष्ट्यमेकावलीत्यनुपमनामकरणम् । अस्मिन्नेव ग्रन्थे पूर्वं पूर्वं प्रत्युत्तरोत्तरोपस्कारकत्वं प्रदर्शितम् । विद्याधरेण स्वरचितान्युदाहरणानि प्रदर्शितानि । अन्यकाव्यशास्त्रज्ञेभ्यो भिन्नवैशिष्ट्यमस्ति महात्मनोऽस्य । अस्य विषये **'कविर्मनीषी परिभूः स्वयंभूः'**, **'जगत्स्रष्टा'** इत्यक्षरशश्चरितार्थं[4] ।

---

१. ननु नमस्कारात्मकं यत् कर्म तत् किं शास्त्रस्याङ्गमिति प्रथमत एव क्रियते प्रधानमिति वा । अङ्गतयाऽङ्गीक्रियमाणमपि संनिपत्योपकारकत्वेनेदमभिमतमारादुपकारकत्वेन वा ? नादिमः पक्षः, द्वाराभावात् । शास्त्रप्रतिबन्धकदुरितोच्छेद एव द्वारमिति चेन्न, उच्छेद्यस्य सन्देहास्पदत्वेनोच्छेदकानुष्ठानाभावप्रसङ्गात् । नापरः, अलौकिकस्य नमस्कारस्य लौकिकशास्त्रकर्माङ्गतानुपपत्तेर्ग्राहकग्रहणाभावात् । अथ प्रधानं तर्हि नित्यमिदं नैमित्तिकं काम्यं वा ? नाद्यः, 'अहरहः सन्ध्यामुपासीत' इत्यादिवदस्य नित्यत्वे प्रमाणाभावात् । अस्तु वा, तथापि सन्ध्यावन्दनादेरिवास्यापि ग्रन्थारम्भे करणीयत्वानुपपत्तेः । न द्वितीयः, 'उपरागे स्नायात्' इतिवन्नमस्कारं प्रति ग्रन्थस्य निमित्तत्वेनासंकीर्तनात् । समाचारबलादेवमुन्नीयत इति चेन्न, नैमित्तिकं कर्म समाचारबलादन्यदुन्नेयं किमपि नास्तीति दृष्टान्ताभावात् । न तृतीयः, पुत्रादिकामनाया अधिकारिविशेषणाभावेन ग्रन्थारम्भे नमस्कारकरणानुपपत्तेः ।
(एकावली १। पृ० ३-७)

२. यत् पुनरनुमानतो नातिरिच्यते ध्वनिरित्याचष्ट महिमभट्टः, तदपि पलालायमानम् । अनुमानस्य चाङ्गं व्याप्तिः । अनया विनाऽनुमानमपि कथङ्कारमात्मानमासादयितुमीशिष्यते—
(एकावली १ । पृ० ३२-३५) ।

३. साक्षादव्यवधानेन । जात्यादिर्जातिगुणक्रियाद्रव्यरूपः । यद्यप्यर्थक्रियाकारितया व्यक्तेरेव प्रवृत्तिनिवृत्तियोग्यता, तथापि व्यक्तीनामानन्त्याद् व्यभिचाराच्च प्रतिव्यक्ति न शक्यते सङ्केतः कर्तुमिति जातिरेव विषयः सङ्केतस्य—(एकावली १। पृ० ५५-५६) ।

४. कविर्मनीषी परिभूः स्वयंभूः । (शुक्लयजुःसंहिता-अ० ४, मं० ८) ।

अपारे काव्यसंसारे कविरेकः प्रजापतिः ।
यथा वै रोचते विश्वं तथेदं परिवर्तते ॥
(अग्निपुराणम्-अध्यायः ३३९।१०)

● ● ●

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

वाल्मीकीयरामायणसमीक्षा

डॉ० श्रीकृष्णमणित्रिपाठी

कवीन्द्रं नौमि वाल्मीकिं यस्य रामायणीं कथाम् ।
चन्द्रिकामिव चिन्वन्ति चकोरा इव साधवः ।।

संस्कृतं हि भारतवर्षस्यास्ति मूलभाषा, या देवभाषा-अमरवाणी-सुरभारतीप्रभृतिभिर्नामभिरभिधीयते। तत्र भारतस्य साहित्यिक-सांस्कृतिक-ऐतिहासिक-राजनीतिक-धार्मिक-आध्यात्मिकजीवनस्य प्रचुरा व्याख्या समाविष्टा वर्तते। वेदवाङ्मयस्यातिरहस्यमयज्ञानतः समारभ्य सामान्यजीवनस्य मनोविनोदेन सम्बन्धितपञ्चतन्त्रहितोपदेशकथापर्यन्तं यावत् साहित्यवैभवं संस्कृतभाषायामेव निबद्धं सुरक्षितं च विद्यते, यत् कस्यापि गीर्वाणवाणीसमुपासकस्य विपश्चितो गौरवास्पदं वरीवर्ति।

संस्कृतभाषायाः साहित्यं विश्वस्य शीर्षस्थभाषाणां साहित्ये विशिष्टं स्थानं बिभर्ति। संस्कृतभाषाया इदमुच्चासनोपलब्धिकारणमकारणं नास्ति, अपि तु भारतवर्षस्य तेषामेव महामनस्विनां मनीषिणामेकान्तज्ञानजिज्ञासाया फलीभूतमस्ति, यैर्गृहवास-मायामोह-धनसम्पत्ति-स्वसम्मान-लोककीर्तिभ्यो विमुखीभूय निर्जनेऽरण्ये निवसद्भिर्निरन्तरं तपस्यद्भिश्च नैजं समस्तं जीवनं जगत्कल्याणाय कस्याश्चित् कृतेर्निर्माण एव व्ययीकृतम्। तेषां भारतीयमहापुरुषाणां व्यक्तित्वस्याध्यवशायस्य च वास्तविकं मूल्यं नाङ्कितुं शक्यते। तैरेवंविधानां ग्रन्थरत्नानां निर्माणं कृतम्, येषां सम्यगनुशीलनाय दीर्घस्यायुष आवश्यकता वर्तते।

भारतीयलोकसाहित्यस्यादिनिर्मातुरन्वेषणे क्रियमाणे महर्षेर्वाल्मीकेर्नाम सहसा समुपतिष्ठते। अनेनादिमहाकविना लोकोत्तरं रामायणं निर्मायातिमहती प्रतिष्ठाऽवाप्ता। रामायणं न केवलेन कथनमात्रेणादिकाव्यमस्ति, किन्तु परवर्तिनां महाकविनां पथप्रदर्शकत्वादिदं यथार्थमादिमहाकाव्यमस्ति। अत एव धनञ्जयेन स्वकीये दशरूपके नाटकलेखकानां कृते नाटकरचनातः पूर्वं रामायणाध्ययनस्य परामर्शो दत्तः[1]।

रामायणं हि वैदिकपौराणिकयोः कालयोर्मध्यवर्तिनि समये निर्मितमितिहासात्मकमादिमहाकाव्यमस्ति। अस्मिन्नार्षे महाकाव्ये सर्वतोमुखज्ञानस्य भण्डारः सञ्चितो विद्यते। धार्मिक-नैतिक-आर्थिक-सामाजिक-व्यावहारिक-वैज्ञानिक-आध्यात्मिक-कलासम्बन्धि किमप्यङ्ग-

---

१. इत्याद्यशेषमिह वस्तुविभेदजातं
रामायणादि च विभाव्य बृहत्कथां च ।
आसूत्रयेत्तदनु नेतृरसानुगुण्यां
चित्रां कथामुचितचारुवचः प्रपञ्चैः ।। (१।६९) ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

मेतादृशं नास्ति, यस्य विस्तृतं विवेचनं न विद्यते। सर्वज्ञता-गभीरता-विचारप्रवणतादि-विवेचनादस्य सद्ग्रन्थस्य सर्वासु विश्वभाषास्वनुवादो जातोऽस्ति। तेन तत्रत्या अनुशीलन-कर्तारो लाभान्विता भवन्ति। अत इदं रामायणं न केवलं भारतीयानामेव, अपि तु विश्वस्य गौरवस्य निधिरस्ति।

तत्रैकतो रचयितुरनुपमपाण्डित्यप्रभाया औत्कृष्ट्यम्, अपरत्र च धार्मिक-सामाजिक-नैतिक-आध्यात्मिकादर्शमयजीवनस्यापि समावेशो विद्यते। रामायणं न केवलं मूलरूपेण संस्कृतसाहित्यस्यादिकाव्यमस्ति, तथा परवर्तिनां महाकाव्यानां प्रेरणास्रोतोऽप्यस्ति, अपि तु तद् भारतीयपरिवाराणामाचार-विचार-व्यवहार-संस्काराणामादर्शमयो धर्मग्रन्थस्तथा भक्ति-भावना-मैत्रीभावना-प्राणिमात्रकल्याणभावनानां प्रतिनिधिपुस्तकमस्ति। रामायणे पितापुत्र-स्त्रीपुरुष-भातृ-भगिनी-गुरुशिष्य-नृपप्रजादीनां कृतेऽभ्यर्हितमादर्शमयमुपदेशपूर्णं विवेचनं विद्यते।

रामायणे हिमालयसदृशोच्चतमानामादर्शानां सागरवद् गभीरविचाराणां च विमर्शः कृतोऽस्ति। आसामेव मौलिकविशेषतानां विद्यमानत्वाद् रामायणं विश्वसाहित्यस्य सर्वाङ्गीणाऽति-महती कृतिरस्ति। रामायणं भाषाभावच्छन्दोरचनाविधानरसव्यञ्जनादिदृष्टिभिरेकमत्युत्तमं मान्यं महाकाव्यमस्ति। महर्षेर्वाल्मीकेरेकान्ते विपिने जीवनयापनेन साकं पारिवारिक-सामा-जिक-व्यवहाराचारविचारादिक्रियाकलापादीनामपरिमितं ज्ञानमासीत्। अतस्तेन रामायणे पारिवारिकसम्बन्धानां सामाजिकजीवनस्य च विश्लेषणं महत्या सावधानतया कृतमस्ति, यदन्यत्र दुर्लभमस्ति। कविनाऽनेन सर्वाङ्गीणभावना रामायणे स्थले स्थले प्रदर्शिताऽस्ति।

महर्षिर्वाल्मीकिः प्राथमिको महाकविः, धर्माचार्यः, पारिवारिकजीवनविशेषज्ञः, सामाजिकादर्शस्थापकः, लोकोपदेष्टा विशिष्टो महात्मा आसीत्। अत एव कविकुलकलाधरेण कालिदासेन स्वरघुवंशमहाकाव्ये[1] तथा प्रतिभावता भावुकेन काव्यशास्त्रिणाऽऽनन्दवर्द्धनेन च ध्वन्यालोके[2] महर्षिर्वाल्मीकिर्न केवलमादिकविरेव स्वीकृतः, प्रत्युत शोकश्लोकयोः समीकरण-कर्ता एकोऽद्भुत आलोचकोऽप्यभिमतः। एवं सर्वगुणानामाकरत्वाद् रामायणं महाकाव्यं सर्वा-धिकं लोकप्रियमस्ति। महामुनेर्वाल्मीकेः कवित्वप्रतिभाया अयं सर्वोत्कृष्टो गुण आसीद् यत् तस्यानुभूतावनुकरणे च संस्कृतसाहित्यं महद्बलिष्टं जातम्। तद्द्वाराऽनुप्राणिताश्च शतशः कृतयो दृष्टिगोचरीभवन्ति।

रामायणस्योपक्रमः

अथैकदा तमसातीरेः कृताश्रमस्य तपस्विनो वाल्मीकिमुनेः सर्वगुणसम्पन्नमानवविषयके प्रश्ने, तदुत्तरे श्रीरामस्य तच्चरितस्य च सर्वोत्कृष्टत्वमभिधाय देवलोकं प्रस्थिते देवर्षौ नारदे महर्षिर्वाल्मीकिर्भरद्वाजनामकेनैकेन शिष्येण सार्द्धं स्नातुं तमसातीरं गतः, यद् गङ्गातो

---

१. तामभ्यगच्छद् रुदितानुसारी कविः कुशेध्माहरणाय यातः।
निषादविद्धाण्डजदर्शनोत्थः श्लोकत्वमापद्यत यस्य शोकः॥ (१४।७०)

२. काव्यस्यात्मा स एवार्थः तथा चादिकवेः पुरा।
क्रौञ्चद्वन्द्ववियोगोत्थः शोकः श्लोकत्वमागतः॥ (१।१८)

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

नातिदूरे आसीत् । तमसातीरमुपस्थाय मुनिरेकमतिरमणीयं स्थलमालोक्य भरद्वाजमुवाच— वत्स ! पश्यैतन्निर्मलं स्थलम् । अत्र कर्दमस्य लेशोऽपि नास्ति । अत्रत्यं जलं तथैव स्वच्छमस्ति यथा सज्जनानां भवति निर्मलं मनः । अत्रैव कलशो न्यस्यताम्, मह्यं वल्कलं च देहि । अहमत्रैव तमसाया निर्मले स्थले स्नास्यामि[1] ।

ततस्तेन दत्तं वल्कलवस्त्रमादाय स मुनिस्तत्रत्यां विशालवनशोभां पश्यन् विचचार। तत्रैको व्याधो मधुरं कूजन्तम्, निर्भयं चरन्तं क्रौञ्चपक्षिणोर्मिथुनमालोक्य पश्यत एव मुने-स्तयोरेकं पुमांसं बाणेन विव्याध । तेन निहितं शोणितपरीताङ्गं पृथिव्यां पतितं पक्षती चालयन्तं तं क्रौञ्चं पतिमालोक्य तत्पत्नी क्रौञ्ची करुणया गिरा चिक्कारं कुर्वन्ती महता दुःखेन रुराव । तद् दुर्दर्शं[2] दृश्यमालोक्य करुणाक्रान्तचेतसो मुनेर्मुखात् सहसा पद्यमेकं निःससार ।[2] एतदनन्तरं तेन मनसि विचारितं यदहो ! पक्षिणोऽस्य शोकेन मया किमिद-मुक्तम् । ततः शिष्यमाह—वत्स ! शोकार्तस्य मम मुखाद् यद् वाक्यं निःसृतं तच्चतुर्षु चरणे-ष्वाबद्धमस्ति, अस्य प्रत्येकचरणे समानान्यक्षराणि सन्ति । अतो ममैतद्वचनेन श्लोकरूपेण भाव्यम् । तथैतद्वीणालयेन गातुमपि शक्यते । मुनेरेतद्वचनं निशम्य शिष्यस्य भरद्वाजस्य महती प्रसन्नता जाता ।

तथा तेन तत्समर्थनं कुर्वता प्रोक्तं भगवन् ! एतेन वचनेन शोकरूपेणैव भवितव्यम्। भरद्वाजस्यैतेन कथनेन मुनेर्विशेषसन्तोषो जातः । तत्पश्चात् तेन तस्मिन्नुत्तमे तमसातीर्थे यथाविधि स्नानं कृत्वा सन्ध्योपासनादिकं कृत्यं च विधाय तमेव विषयं विचिन्तयन्नाश्रममुपा-वर्तत । जलपूर्णं कलशमादाय शिष्येणाऽनुगम्यमानो मुनिराश्रममुपस्थायासने समुपविश्य अन्याः कथाः कुर्वन्नपि तत्र श्लोक एवाकृष्टचेता आसीत् । एवं 'मा निषाद'इति पद्यस्यार्थे निमग्नचेतस-स्तस्य मुनेः समीपं स्वयमेव लोकपितामहो ब्रह्मा समागत्य महर्षिणा साञ्जलिकृतातिथ्यः प्रहसन् तमुक्तवान् । महर्षे ! तव मुखाद् निर्गतं पद्यबद्धमिदं वाक्यं श्लोकरूपं भविष्यति, इत्यत्र न कोऽपि त्वया विचिकित्सा कार्या । यतो हि मत्प्रेरणयैव सरस्वती ते जिह्वाया-

---

१. अकर्दममिदं स्थानं भरद्वाज निशामय ।
रमणीयं प्रसन्नाम्बु सन्मनुष्यमनो यथा ॥
न्यस्यतां कलशस्तात ! दीयतां वल्कलं मम ।
इदमेवावगाहिष्ये तमसातीर्थमुत्तमम् ॥ (१।२।५-६)

२. तस्याभ्यासे तु मिथुनं चरन्तमनपायिनम् ।
ददर्श भगवांस्तत्र क्रौञ्चयोश्चारु निःस्वनम् ॥
तस्मात्तु मिथुनादेकं पुमांसं पापनिश्चयः ।
जघान वैरनिलयो निषादस्तस्य पश्यतः ॥ (१।२।९-१०)
तथाविधं द्विजं दृष्ट्वा निषादेन निपातितम् ।
ऋषेर्धर्मात्मनस्तस्य कारुण्यं समपद्यत ॥
मा निषाद ! प्रतिष्ठां त्वमगमः शाश्वतीः समाः ।
यत् क्रौञ्चमिथुनादेकमवधीः काममोहितम् ॥ (१।२।१३, १५)

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

मुपविष्टाऽस्ति । इतः परं त्वं निर्भयो भूत्वा श्लोकबद्धं रुचिरं रामचरित्रं वर्णय । न तत्र कापि ते वाग् मिथ्या भविष्यति ।[1]

तदनुसारं समाधियोगात् सर्वं प्रत्यक्षीकृत्य महर्षिर्वाल्मीकी रामायणाख्यं महाकाव्यं जग्रन्थ । यदस्माकं समक्षमद्य चतुर्विंशतिसहस्रश्लोकात्मकं वरीवर्ति तदधीत्य वयं नित्यं कृतकृत्या भवामः ।

एवं वैदिकयुगादारभ्य पौराणिककाव्यनाटकयुगपर्यन्तं भारतीयसाहित्ये सर्वत्र रामकथाया व्यापकत्वं दर्शनेन प्रतीयये यद् महर्षिणा वाल्मीकिना स्वकाव्यस्य कृते यत् कथानकं गृहीतं तस्यास्तित्वं ततः पूर्वं पश्चाद्वा विद्यते । एकया पौराणिकानुश्रुत्या प्रतीयते यद् रामायणात् पूर्वं स्वायम्भुवमन्वन्तरे सत्ययुगे भगवता शिवेन सर्वप्रथमं महासतीं रामायणं श्रावयामास, यस्य नाम महारामायणमासीत् ।

रामायणस्य वेदमूलकत्वम्

वेदाः सन्ति भारतीयधर्मस्य संस्कृतेश्च मूलस्रोतः । तत एव साक्षात् परम्परया वा समस्तस्य संस्कृतवाङ्मयस्योद्भवो जातः । अत एव वेदानां सारभूतस्य गायत्रीमन्त्रस्य सर्वत्र महिमा गीताऽस्ति । आदिकविना महर्षिणा वाल्मीकिना स्वकीयं रामायणं चतुर्विंशतिसहस्रश्लोकैरुपश्लोकितं विद्यते ।

तपःस्वाध्यायनिरतं तपस्वी वाग्विदां वरम् ।
नारदं परिपप्रच्छ वाल्मीकिर्मुनिपुङ्गवम्[2] ।

इत्यत आरभ्य—

यामेव रात्रिं शत्रुघ्नः पर्णशालां समाविशत् ।
तामेव रात्रिं सीताऽपि प्रसूता दारकद्वयम्[3] ॥

---

१. आजगाम स्वयं ब्रह्मा लोककर्ता स्वयं प्रभुः ।
अथोपविश्य भगवानासने परमार्चिते ॥
वाल्मीकये च ऋषये सन्दिदेशासनं ततः ।
तमुवाच विषीदन्तं प्रहसन् मुनिपुङ्गवम् ॥
श्लोक एषस्त्वयं बद्धो नात्र कार्या विचारणा ।
मच्छन्दादेव ते ब्रह्मन् ! प्रवृत्तेयं सरस्वती ॥
रामस्य चरितं कृत्स्नं कुरु त्वमृषिसत्तम ।
न ते वागनृता काव्ये काचिदत्र भविष्यति ॥
कुरु रामकथां पुण्यां श्लोकबद्धां मनोरमाम् ।
यावत् स्थास्यन्ति गिरयः सरितश्च महीतले ।
तावद् रामायणकथा लोकेषु प्रचरिष्यति ॥ (१।२।३०-३१, ३५-३६)

२. वा० रा० १।१।१ । ३. वा० रा० ७।६६।१ ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

इति पर्यन्तमेकैकस्मिन् सहस्रे श्लोके गायत्र्या एकैकेनाक्षरेण महाकाव्यस्यास्यारम्भो भवति। तानि चतुर्विंशत्यक्षराणि स्पष्टरूपेण गायत्र्यर्थप्रतिपादकानि सन्ति। गातुस्त्राणकारणाद् गायत्र्या समारब्धमिदं रामायणं विरच्य महर्षिणा लवकुशद्वारा गानं कारितम्[1]।

अस्य काव्यस्य श्रवणमननिदिध्यासनैस्त्रिविधेभ्यस्तापेभ्यः त्राणं जायते। रामावतारसमये त्रेतायां स्वयं ब्रह्मदेवः प्रचेतसो गृहे वाल्मीकिरूपेणावतीर्णो वेदं रामायणात्मकत्वेनोपबृंहितवान्। अत एवागस्त्यसंहितायां भगवतीं भवानीं प्रति प्रोक्तवान् भगवान् भूतभावनः सदाशिवः[2]। यतो दुरूहो वेदराशिर्न सर्वसाधारणस्योपयोगी विद्यते, अतो वेदस्यैव सकललोककल्याणकारिसंस्करणं वाल्मीकिरामायणमाविष्कृतं तेन मुनिना। अतो रामायणस्य वेदमूलकत्वमशंसयं सिध्यति। अत एवास्यादिकाव्यस्य मान्यता समस्त आस्तिकवर्गे वेदतुल्यैवास्ते। वेदस्यैव सर्वलोकहितकारि संस्करणमस्ति वाल्मीकीयं रामायणम्। तस्मादस्य वेदमूलकत्वमसंशयं सिध्यति।

रामायणस्य महत्ता

महर्षिवाल्मीकिप्रणीतं रामायणं विश्वभाषाणां साहित्येष्वेकं विशिष्टं महत्वं बिभर्ति। रामायण एकत्रानुपमपाण्डित्यस्य प्रभा प्रकाशते, तर्ह्यपरत्र भारतीयसामाजिकजीवनस्य प्रतिबिम्बं विराजते। रामायणं हि संस्कृतवाङ्मयस्य प्रथमं महाकाव्यमस्ति, तथा विश्वसाहित्यस्य काव्येषु भाषा-भाव-छन्दः-गुण-अलङ्कार-रस-रीतिव्यञ्जनादिभिरत्युत्कृष्टं स्थानं लभते। अत्र पारिवारिकव्यवहाराणाम्, कौटुम्बिकसदाचारविचाराणां सामाजिकक्रियाकलापानां लौकिकादर्शानाञ्च विश्लेषणं महता कौशलेन कृतमस्ति। एतद् महाकाव्यं भारतीयजनभावनया सह लोकप्रियताया व्यञ्जकं कवेरसामान्यायाः कवित्वप्रतिभायाः परिचायकं विद्यते।

महर्षेः काव्यप्रणयनप्रतिभयाऽनुप्राणितस्य रामायणस्योत्कृष्टरचनया प्रभाविता अनेके महाकवयोऽनेकानि महाकाव्यानि निर्माय परमां प्रसिद्धिं प्राप्नुवन्तः। एवं रामायणं परवर्तिनां महाकाव्यानां प्रेरणायाः स्रोतोऽस्ति, तथा भाविनां महाकवीनां स्फूर्तिदायकमादर्शमयं महाकाव्यमस्ति। अत्र पारिवारिकसम्बन्ध-सामाजिकजीवनविषयकगभीरविचाराणां चारुतया समावेशादिदं रामायणं विश्वसाहित्यस्यानुपमा कृतिः स्वीक्रियते।

भारतस्य कृते रामायणं गौरवस्य वस्तु वर्तते, तथा देशस्य बहुमूल्यो राष्ट्रियनिधिरस्ति। अतः सर्वेषां कृते श्रवण-पठन-मननादेः शुभकरं विद्यते। अस्य काव्यस्यैकैकमक्षरं महापातक-

---

१. स शिष्यावब्रवीदृष्टौ युवां गत्वा समाहितौ।
कृत्स्नं रामायणं काव्यं गायतां परमामुदा॥ (७।९३।५)
तौ रजन्यां प्रभातायां स्नातौ हुतहुताशनौ।
यथोक्तमृषिणा पूर्वं सर्वं तत्रोपगायताम्॥ (७।९४।१)

२. वेदवेद्ये परे पुंसि जाते दशरथात्मजे।
वेदः प्राचेतसादासीत् साक्षाद् रामायणात्मना।
तस्माद् रामायणं देवि! वेद एव न संशयः॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

नाशकं स्मृतमस्ति—'**एकैकमक्षरं पुंसां महापातकनाशनम्**' इति। भगवता वेदव्यासेनास्याध्ययनं विधाय पुराणमहाभारतादिनिर्माणं कृतम्। तथा चोक्तं बृहद्धर्मपुराणे—

रामायणं पाठितं मे प्रसन्नोऽस्मि कृतस्त्वया।
करिष्यामि पुराणानि महाभारतमेव च॥

महाभारते धर्मराजयुधिष्ठिरस्यानुरोधेन महर्षिव्यासद्वारा वाल्मीकिरामायणे रामायणतात्पर्यदीपिकाव्याख्यालेखनस्य चर्चा विद्यते। हरिवंशस्य विष्णुपर्वणि यदुवंशिद्वारा वाल्मीकिरामायणस्य नाटकक्रीडाया उल्लेखो वर्तते—'**रामायणं महाकाव्यमुद्दिश्य नाटकं कृतम्**' इति।

एवमग्निपुराण-स्कन्दपुराण-मत्स्यपुराणादिषु रामायणस्य महती महत्ता गीताऽस्ति। इत्थमेव स्वामिशङ्कराचार्यरामानुजाचार्यप्रभृतयः सम्प्रदायाचार्याः सम्मानपूर्वकं रामायणस्य तद्रचयितुर्महर्षेर्वाल्मीकेश्चोल्लेखः कृतो विद्यते। गोस्वामिना तुलसीदासेन तु महर्षि वाल्मीकिं ब्रह्मसमानं मत्वा रामायणस्य महती प्रशंसा कृताऽस्ति।

अत एवास्यादिकाव्यस्य रामायणस्य महत्ता समस्ते जगति वेदतुल्या वरीवर्ति। यथा महर्षिर्वाल्मीकिर्विश्वस्यादिमहाकविरस्ति, तथैव तद्रचितमेतद् रामायणमपि प्रथमं महाकाव्यं वर्तते। यो मानवमणिर्नरशिरोमणिरिदं रामायणं श्रद्धया शृणोति, पठति वा, स शरीरान्ते विष्णुसारूप्यं लभते[1]। इदं रामायणस्याख्यानमायुर्वर्द्धकम्, सौभाग्यप्रदम्, पापतापनाशकम्, धर्मवर्द्धकम्, यशोदायकं विजयकारकं च विद्यते[2]। यो भाग्यशाली नरपुङ्गवः सूर्यग्रहणसमये कुरुक्षेत्र एकभारं सुवर्णं प्रयच्छति सः, यश्च रामायणं शृणोति तौ द्वावपि समानपुण्यभाजौ भवतः[3]।

येन पुंसाऽस्मिल्लोके रामायणस्य कथा श्रुता, तेन प्रयागादितीर्थानां गङ्गादिपवित्रनदीनां नैमिषारण्यादिवनानां कुरुक्षेत्रादिपुण्यक्षेत्राणां च यात्रा पूर्णा कृता[4]। श्रद्धया रामायणस्य हृदये धारणेन श्रवणेन च देवाः सन्तुष्टा भवन्ति, पितरश्च तृप्तिं लभन्ते[5]। गभीरार्थसनाथं शुभकरमिदं रामायणं निशम्य मानवस्य कुटुम्बधनधान्यादीनां वृद्धिर्जायते। श्रेष्ठगुणशालिन्यः सुन्दर्यः सुलभा भवन्ति, तथा भूतले सुखं समस्ता मनोरथाश्च प्राप्यन्ते[6]। अत आयु-

---

१. आदिकाव्यमिदं त्वार्षं पुरा वाल्मीकिना कृतम्।
यः शृणोति सदा भक्त्या स गच्छेद् वैष्णवीं तनुम्॥ (७।१११।१६)

२. धर्म्यं यशस्यमायुष्यं राज्ञां च विजयावहम्।
आदिकाव्यमिदं चार्षं पुरा वाल्मीकिना कृतम्॥ (६।१२८।१०७)

३. हेमभारं कुरुक्षेत्रे ग्रस्ते भानौ प्रयच्छति।
यश्च रामायणं लोके शृणोति स दशावुभौ॥ (७।१११।१४)

४. प्रयागादीनि तीर्थानि गङ्गाद्याः सरितस्तथा।
नैमिषादीन्यरण्यानि कुरुक्षेत्रादिकान्यपि॥
गतानि तेन लोकेऽस्मिन् येन रामायणं श्रुतम्। (७।१११।१३)

५. देवाश्च सर्वे तुष्यन्ति श्रवणाद् ग्रहणात् तथा।
रामायणस्य श्रवणे तृप्यन्ति पितरस्तथा॥

६. कुटुम्बवृद्धिं धनधान्यवृद्धिं स्त्रियश्च मुख्याः सुखमुत्तमं च।
श्रुत्वा शुभं काव्यमिदं महार्थं प्राप्नोति सर्वां भुवि चार्थसिद्धिम्॥ (६।१२८।१२४)

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

रारोग्ययशस्करं भ्रातृप्रेमवर्द्धकं बुद्धिप्रदं सर्वविधमङ्गलकार्ये तदादिकाव्यं समृद्धिकामैः सत्पुरुषैः नियमपूर्वकं नूनं श्रोतव्यम्[1]।

वस्तुतो महामुनिर्वाल्मीकिर्लौकिकस्य संस्कृतस्य प्रथमो महाकविरस्ति। यतो हि तेन सर्वतः प्रथमं लौकिके संस्कृते महाकाव्यस्य रचना कृता। अतः स लौकिकसंस्कृतभाषाया आदिकविः कथ्यते। तद्रचितं रामायणं च सर्वाङ्गीणं प्रथमं महाकाव्यं प्रोच्यते। यद्यपि वैदिकीनाम् ऋचां कवयितारोऽनेके श्रूयन्ते, तथापि लौकिकोपाख्यानमय्याः कविताया आरम्भस्तु सर्वप्रथमं महर्षिणा वाल्मीकिनैव कृतोऽस्ति।

मौलिकमादिमहाकाव्यमिदं न केवलं भारतीयानामेव, प्रत्युत विश्वस्यास्ति बहुमूल्यो निधिः। यत्र सार्वजनीनो ज्ञानभाण्डारः सञ्चितो विद्यते। अतो महर्षिवाल्मीकिद्वारा निबद्धमिदमाश्चर्यमयं रामायणस्वरूपं महाकाव्यं परवर्तिनां कवीनामाधारशिलेवोपकुरुते[2]।

अस्यादिकवेः समये तत्पूर्ववर्तिकस्यापि ग्रन्थस्यास्तित्वे एतादृशस्याद्भुतस्य बृहत्काय-स्याद्वितीयस्य महाकाव्यस्यैवंविधचमत्कारपूर्णरचनासौष्ठवे वास्तविकं तपोबलमेवानुमीयते। नैसर्गिककवितास्रोतःसमुद्भूते स्वाभाविकप्रसादगुणसम्पन्नेऽस्मिन् महाकाव्ये काव्यस्य समस्ता-न्युपादानानि विजृम्भितानि सन्ति। महर्षेर्वाल्मीकेरेवंविधाद्भुतकाव्यरचनायां मूलभूतसाधन-स्रोतस्तीव्रं तप एवास्ति। यतस्तप एव सर्वं साधयितुं समर्थं विद्यते। देवदानवमानवानां कृते सर्वविधस्य सुखस्य मूलं साधनं तप एवास्ति। तथा चोक्तम्—**'तपो मूलमिदं प्रोक्तं देवमानुषकं सुखम्'** इति।

विश्वामित्रेण मुनिना तपसा किं किं न साधितम्, तपःप्रभावादेव भगीरथेन ब्रह्मलो-कादस्यां वसुन्धरायां लोकपावनी भगवती गङ्गा समानीता। वसिष्ठादयो महर्षयस्तपसैव मन्त्र-ब्राह्मणात्मकान् वेदान् प्राप्तवन्तः। तपसैव हिरण्यगर्भः सकललोकोत्पत्तिस्थितिकर्मणि प्रभुर्भवति।

तपसा क्षीणकल्मषा निष्पापान्तःकरणा वाङ्मनोयमनियमोपेताः कन्दफलमूलाशनाः, अब्वायुभक्षा योगिन एकदेशस्थाः पृथिव्यन्तरिक्षलोकत्रयं हस्तामलकवत् पश्यन्ति स्म। तीव्रेण तपसैव हिमालयतनया भगवती पार्वती पूर्वतनं पतिं भगवन्तं सदाशिवं प्राप्तवती।

मरीचिभृगुगौतमादीनामृषीणां महर्षिणाञ्च तपोबलप्रभावप्रसिद्धिरेवास्ति। तपोबले-नैव विधिर्विविधवैचित्र्यपूर्णमिदं विश्वं विरचयति, भगवान् विष्णुः पालयति, अन्ते सदाशिवश्च संहरति। पूर्वमसुरा अपि तपोबलेनैव शक्तिसम्पन्ना भूत्वा देवैः सह सर्वदा स्पर्धन्ते स्म। रावणादीनां राज्यसुखशक्तिसम्पन्नतायुर्लाभादीनां मूलं तप एवास्ति। तथा चोक्तं भगवता

---

१. आयुष्यमारोग्यकरं यशस्यं सौभ्रातृकं बुद्धिकरं शुभं च।
श्रोतव्यमेतन्नियमेन सद्भिराख्यानमोजस्करमृद्धिकामैः॥ (६।१२८।१२५)
नास्ति गङ्गासमं तीर्थं नास्ति मातृसमो गुरुः।
नास्ति विष्णुसमो देवो नास्ति रामायणात् परम्॥ (५।२१)

२. परं कवीनामाधारं समाप्तं च यथाक्रमम्।
अभिगीतमिदं गीतं सर्वगीतिषु कोविदौ॥ (वा० रा० १।४।२६)।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

मनुना[1]—महर्षिवाल्मीकिमतानुसारं यावन्तः सुखादिभोगाः सन्ति, तेषामेकमात्रं हेतुस्तप एवास्ति । अत एव तेन स्वकाव्यस्यारम्भः तपःशब्देनैव कृतोऽस्ति[2] ।

रामायणस्यैतिहासिकपरिवेशः

(क) अस्मिन्नार्षे महाकाव्य ऐतिहासिकघटनानां महत्त्वपूर्णं विवेचनं विद्यते । यद्यप्याधुनिकतत्कालीनवर्णनपद्धतौ महानन्तरः प्राप्यते । रामायणमस्ति प्राचीनं महाकाव्यम् । यतस्तत्कालीनानामनेकेषां राज्ञां तच्छासनपद्धतीनामपरैः सह सम्बन्धानां विभिन्नराजनीतीनाञ्च ज्ञानं लभ्यते । येषां सम्बन्धः साक्षादितिहासादेवास्ति । परमद्यतनेनेतिहासेन न तेषां पूर्णतया समन्वयो भवति । अथापि तत्कालीनस्यैतिहासस्याभिप्रायस्तु सिध्यत्येव ।

(ख) शिक्षायाः पाश्चात्त्यपद्धत्या प्रभाविता विद्वांसः सर्वतर्काणामाधारेणैव साधयितुं प्रयतन्ते । तदनुसारं बहवो विपश्चितो रामायणस्यैतिहासिकतायां सन्दिहन्ते, परमास्तिकजनान् प्रश्नोऽयं न कदाप्युद्वेजयति । यतो हि तेषां कृते रामस्तु साक्षादीश्वरोऽस्ति । यो हि भूभारहरण-दुष्टदमन-धर्मसंस्थापन-साधुसंरक्षणपूर्वकं सदुपदेशं दातुं त्रेताया राज्ञो दशरथात् कौशल्यायामवतीर्ण आसीत्, स सर्वथाऽस्ति ऐतिहासिको महापुरुषः । तस्यादर्शमयी कथापि प्रामाणिकी, ऐतिहासिकी च वर्तते ।

> **अजोऽपि सन्नव्ययात्मा भूतानामीश्वरोऽपि सन् ।**
> **प्रकृतिं स्वामधिष्ठाय सम्भवाम्यात्ममायया ॥**
> **यदा यदा हि धर्मस्य ग्लानिर्भवति भारत ।**
> **अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहम् ॥**
> **परित्राणाय साधूनां विनाशाय च दुष्कृताम् ।**
> **धर्मसंस्थापनार्थाय सम्भवामि युगे युगे ॥** (गीता ४।६–८)

इति श्रीमद्भगवद्गीतायां कृतस्वप्रतिज्ञानुसारं यदा यदा धर्मस्य ह्रासो भवति, अधर्मः प्रवर्द्धते, सीदन्ति गावः, विषीदन्ति ब्राह्मणाः, असुरभावापन्ना भावना सज्जनान् उद्वेजयति, पापाचारैरशान्ता भवति भूमिः, तदा स्वयमाविर्भवति भगवान् । एतदेव समर्थयति श्रीमद्भागवतम्—

> **भावयत्येष सत्त्वेन लोकान् वै लोकभावनः ।**
> **लीलावतारानुगतो देवतिर्यङ्नरादिषु ॥** (१।२।३)

विष्णुपुराणस्य चतुर्थांशे सप्तविंशत्यध्यायेऽपि—

> **गोविप्रद्विजसाधूनां छन्दसामपि चेश्वरः ।**
> **रक्षामिच्छन् तनूर्धत्ते धर्मस्यार्थस्य चैव हि ॥** ४।२७

---

१. यद् दुस्तरं यद् दुरापं यद् दुर्गं यच्च दुष्करम् ।
सर्वं तु तपसा साध्यं तपो हि दुरतिक्रमः ॥ (११।११।२३८)

२. तपःस्वाध्यायनिरतं तपस्वी वाग्विदांवरम् । (१।१।१)

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तथा च स्वकृतप्रतिज्ञानुसारं समये समयेऽवतीर्य भगवान् धर्मधुरं व्यवस्थापयन् जगत् परिपालयति।

तेषां मान्यतानुसारं महर्षिवाल्मीकी रामकालीन एवासीत्, तथा तेन रामायणमपि रामराज्यकाल एव प्रणीतं वर्तते। किन्तु कतिपयाधुनिका गवेषका इतिहासकारा ऐतिहासिक-रूपेण रामायणस्य कथां मन्तुं नोद्यताः सन्ति। कियतां गवेषकाणां तु रामायणस्य घटनाया मूलमपि नेतिहासरूपेण ग्राह्यं विद्यते।

लासेन-वेबरयोर्मतेन रामायणमनार्यदक्षिणस्यार्यद्वारा विजयस्य तथा तत्र तत्संकृतेः प्रचारस्य चालङ्कारिकं निरूपणमात्रमस्ति। जैकोबी-मैकाडानलयोर्विश्वासो विद्यते यद् रामायणं भारतीयधर्मस्य विश्वासस्य च काल्पनिकी अभिसृष्टिर्वर्तते।

परमेतेषां पाश्चात्त्यविपश्चितां मतमस्माकं मतानुसारं सर्वदाऽमान्यमप्रामाणिकं पक्षपातपूर्णं चास्ति। यतो हि वाल्मीकिरामायणं वर्तमानेतिहासशैल्या न लिखितमस्ति, अपि तु महर्षेर्वाल्मीके रामायणं प्राचीनपद्धतेरितिहासोऽस्ति। न तदद्यतनीयविकासोपनेत्रं परिधाय पठितुं युक्तम्। अत एव विष्णुधर्मोतरे पुराणे इतिहासस्य लक्षणमङ्कितमस्ति यत् सः पुरुषार्थचतुष्टयधर्मार्थकाममोक्षलोकव्यवहारपरलोकसुखदृष्ट्या लाभकारकः सिध्यति, स एव पूर्ववृत्तकथानकसनाथो ग्रन्थः **'इतिहास'** प्रोच्यते—

धर्मार्थकाममोक्षाणामुपदेशसमन्वितम्।
पूर्ववृत्तं कथायुक्तमितिहासं प्रचक्षते॥ (३।१५।१)

आर्षे महाकाव्ये धर्माद्युपदेशव्यवहारपूर्वकमैतिहासिकघटनानां महत्त्वपूर्णं सम्यग् विवेचनमस्तीत्यैतिहासिकी प्रतिज्ञा वस्तुतः पूर्णा जायते। अत एवास्माकं मतेन वाल्मीकिरामायणमेव दीर्घकालीनविश्वस्यास्य वास्तविक इतिहासो भवितुमर्हतीति निश्चप्रचम्।

रामायणानुसारमयोध्याधिपतिरासीद्राजा दशरथः। तस्य तिस्रः पत्न्य आसन्। तासु रामलक्ष्मणभरतशत्रुघ्नाश्चत्वारस्तनया अभूवन्। तत्र सर्वश्रेष्ठस्य रामस्य विवाहसंस्कारो मिथिलानरेशस्य पुत्र्या सीतया सहाभवत्। तत्र लवकुशौ द्वावात्मजावभवताम्, तत्र लवस्य राजधानी श्रावस्ती, कुशस्य च कौशाम्बो निर्मिता। रामो हि बहुवर्षं राज्यं सुव्यवस्थया परिपालयन्नन्ते स्वर्जगाम। यस्य राज्यं विश्वस्मिन्नादर्शराज्यं मन्यते एकमतेन सर्वैः। यद्येवंविधो राजा तद्राज्यञ्चैतिहासिकं न भवति, तर्हि कीदृश इतिहास इतिहासकोटौ समागच्छतेतिहासविद एव विचारयन्तु।

रसविवेचनम्

वाल्मीकीयं रामायणं भूतलस्याद्यं महाकाव्यमिति सर्वसम्मतं मतमिति। इदमेव परवर्तिनामादर्शकाव्यानां जन्मभूमिरिति भूरिशो भणितं भारतीयैर्विद्वद्भिः। एतदेवालक्ष्य महर्षिणा वेदव्यासेन 'अग्निपुराणे' अग्निमुखोद्गतं काव्यलक्षणं [1]विहितम्। इदमेव च लक्षणमुपजीव्य मम्मटाचार्येण काव्यप्रकाशे **'तददोषौ शब्दार्थौ सगुणौ अनलङ्कृती पुनः क्वापि'** इति

१. काव्यं स्फुरदलङ्कारगुणविवर्जितम्—(अग्निपु० ३३७।७)।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

मनोरमं काव्यलक्षणमभिहितम्[1]। एतदेवालोच्य ध्वन्यालोके **'काव्यस्यात्मा ध्वनिरिति बुधैयंः समाम्नातपूर्वः'**[2] इति ध्वनिकृता रामायणप्रभृतीन् लक्ष्ये सर्वत्र लक्षणयोजनं कृतम्। तामेव सरणिमनुश्रित्य मम्मटेन ध्वनेरेवोत्तमकाव्यत्वं स्वीकृतम्[3]। ध्वन्यमानो रस एव काव्यजीवितमिति समेषां सचेतसां सम्मतम् **'ध्वनिस्तत्काव्यमुत्तमम्'**। अत एवाग्निपुराणे भगवान् अग्निरप्याह[4]। तादृशं रसविशिष्टं महाकाव्यं वाल्मीकीयं रामायणं कुशलवाभ्यां [5]गीतम्।

रसदृष्ट्या विचारे क्रियमाणे रामायणं करुणरसप्रधानं काव्यमस्ति, तस्माद् वाल्मीकिरामायणस्य करुणरस एवाङ्गी, तस्यैव प्रयासः सर्वत्र समासाद्यमानत्वाद् अन्ये रसास्तदङ्गभूता एव प्रसङ्गानुसारं यथास्थानं सन्निवेशिता आस्वाद्यन्ते। परं तत्र प्रधानः करुणरस एवास्ति। महर्षेर्वाल्मीकेर्मुखाम्भोजात् क्रौञ्चपक्षियुग्मस्य कारुणिकं दृश्यं विलोक्य यः शोकोद्गारः सहसा निर्गत्य तद्धृदयपटलेऽङ्कितो जातः स एव शोकः करुणरसस्य स्थायिभावरूपेण रामायणे सर्वत्र व्याप्तो वर्तते, तथा स एव समस्तस्य रामायणस्य रचनाया अस्ति आधारः। अतो रामायणे प्रायः सर्वत्रैव करुणरसो भूयो भूयो दन्ध्वन्यते। तथा चादिकवेर्वाल्मीकेर्निहितसहचरविरहकातरक्रौञ्च्याः क्रन्दनजनितः शोक एव श्लोकतया परिणतः।

अस्येदं रहस्यम्

भगवतो रामचन्द्रस्याज्ञया विवशीभूतलक्ष्मणद्वारा जनकनन्दिन्याः सीताया विपिने त्यागानन्तरस्य वर्णनमस्ति। कुशं समिधं चादातुकामनया वनान्तरमुपगतो महर्षिर्वाल्मीकिमुनिः सीतायाः करुणक्रन्दनं निशम्य तदनुसरन् तत्समीप उपगतः। भगवतीसीतासमक्षे समुपस्थितः स एवादिकविरासीत्, यस्य शोको व्याधविद्धं क्रौञ्चपक्षिणमवलोक्य श्लोकरूपेण परिणतः।

अत्र कविशब्दद्वारा निर्दिष्टस्य मुनेः परिचये वाल्मीकिशब्दकथनमात्रं पर्याप्तमासीत्, किन्तु पद्यस्योत्तरार्द्धे महर्षेः परिचयं पूर्वानुभूतेन क्रौञ्चपक्षिणो वृत्तान्तेन प्रदाय कविनेदं सूचितं यद् यस्य परमकारुणिकस्य मुनेरन्तःकरणस्य स शोकोद्गारो यः क्रौञ्चस्य शोचनीयां दशामवलोक्य समुदपद्यत, अर्थात् श्लोकरूपेण बलात् तन्मुखान्निर्गतो जातः।

तस्यान्तःकरणस्य सा करुणाप्लाविता विवशा दशा या निर्जने वने परित्यक्तायाः जनकराजपुत्र्याः साकेताधिपतेर्महाराजाधिराजस्य श्रीरामचन्द्रस्य प्राणप्रियाया गर्भिण्या सीताया अत्यन्तं शोचनीयामवस्थामवलोक्याजायत।

---

१. काव्यप्रकाशः १।४। २. ध्वन्यालोकः १।१।
३. इदमुत्तममतिशायिनि व्यङ्ग्ये वाच्याद् ध्वनिर्बुधैः कथितः—(काव्यप्रकाश १।४)।
४. वाग्वैदग्ध्यप्रधानोऽपि रस एवात्र जीवितम्— (अग्निपु० ३३७।३५)।
५. रसैः शृङ्गारकरुणहास्यरौद्रभयानकैः।
वीरादिभी रसैर्युक्तं काव्यमेतदगायताम्॥ (वा० रा० १।४।९)

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

इत्थं रामायणे प्रधानतया करुणो रसः स्वयमेवादिकविना सूत्रितः । सीतावियोगपर्यन्तमेव स्वप्रबन्धमुपरचयताऽऽदिकविना 'मा निषाद' इति श्लोके करुणो रस एव ध्वन्यते । अत्र पतिविरहकातरा क्रौञ्ची, व्याधविद्धः शोणितपरीताङ्गो भूतले चेष्टमानः क्रौञ्चश्चालम्बनविभावः । व्याधकर्तृकं निहननमुद्दीपनविभावः । क्रौञ्च्याः क्रन्दनमनुभावः । एवं विभावानुभावाभ्यामभिव्यज्यमानचिन्ताविषाददैन्यमोहादिभिः सञ्चारिभिः सञ्चार्यमाणः शोक एव स्थायीभावः करुणरसतामुपेतश्चर्वणाविषयो बोभवीति निश्चप्रचम् ।

यादृशं मनोरमं सरसं मधुरं प्रसन्नगम्भीरं सालङ्कारं गुणसहितं च वर्णनं वाल्मीकिरामायणे समुपलभ्यते, तादृशमन्यत्र सुदुर्लभमस्ति । परवर्तिभिर्दण्डिभामहप्रभृतिभिराचार्यैरपि रामायणमेव लक्ष्यीकृत्य काव्यलक्षणं संलक्षितं विलक्षणाश्च तत्सम्बन्धिनश्चमत्काराः प्रकाशमानीताः । सुन्दरकाण्डस्य काव्यसौन्दर्यं तु सर्वतोऽधिकमतिशायीति समेषां सुधियां समालोचकानाञ्च सम्मतम् ।

विभिन्नै रसैः ओतप्रोतस्य पञ्चमस्य काण्डस्य सुन्दरकाण्डेति नाम यथार्थतः सार्थकं विद्यते । यतो हि रामायणे सुन्दरकाण्डस्य प्रत्येकश्लोकमात्मीयं वैशिष्ट्यं बिभर्ति, भिन्नं भिन्नञ्च तस्य महत्त्वं वरीवर्ति । पञ्चमः सर्गस्तु सकलैः काव्यगुणैरलङ्कृतो नितान्तं सुन्दरो वरीवर्ति । अतोऽस्यानुपमं काव्यसौन्दर्यं पर्यालोच्याभियुक्तैः सत्यमुक्तम्—

सुन्दरे सुन्दरी सीता सुन्दरे सुन्दरी कथा ।
सुन्दरे सुन्दरो रामो सुन्दरे किन्न सुन्दरम् ॥

एवं रामायणे सर्वविधज्ञानभण्डारः सञ्चितोऽस्ति । आर्थिक-धार्मिक-सामाजिक-नैतिकाध्यात्मिक-वैज्ञानिककलासम्बन्धि किञ्चिदप्यङ्गमेवं नास्ति, यस्य सविस्तरं विवेचनमत्र न स्यात् । अनेन स्पष्टं प्रतीयते यद् महर्षिवाल्मीकिरवश्यं सर्वज्ञ आसीत् । अत एव तत्कृतस्यास्य महाकाव्यस्य सौरभं सर्वत्र प्रसरति । विश्वस्मिन्नेवंविधा कापि भाषा न विद्यते यस्यामेतस्यानुवादो नोपलभ्येत ।

वाल्मीकीये रामायणे बाल-अयोध्या-अरण्य-किष्किन्धा-सुन्दर-लङ्का-उत्तरनामधेयानि सप्त काण्डानि पञ्चशतसर्गाः, तथा चतुर्विंशतिसहस्रश्लोका विद्यन्ते[२] । अस्य रामायणस्य श्लोकेषु बहवः सूक्तिस्वरूपा धार्मिका विभिन्नमहत्त्वाधायकाश्च सन्ति ।

इदं काव्यं मानवजीवनस्य व्यावहारिकोपदेशपरिपूर्णं नीतिनैपुण्यं पथप्रदर्शकं सदाचारपालनहेतुककर्मशास्त्रमिव सर्वहितसाधकं बाह्याभ्यन्तरभावप्रकाशकं हृदयग्राहिमनोरञ्जककथानकञ्च विद्यते ।

---

१. मा निषाद ! प्रतिष्ठां त्वमगमः शाश्वतीः समाः ।
यत् क्रौञ्चमिथुनादेकमवधीः काममोहितम् ॥ (रा० १।२।१५)

२. चतुर्विंशत् सहस्राणि श्लोकानामुक्तवान् ऋषिः ।
तथा सर्गशतान् पञ्च षट् काण्डानि तथोत्तरम् ॥ (रा० १।४।२)

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

रामायणस्य संस्करणानि

वाल्मीकिकृतरामायणकलेवरस्य मूलरूपं किमासीत्, तत्र कियन्तः श्लोका आसन्नित्यत्र प्राचीनग्रन्थत आरभ्याधुनिकविद्वत्पर्यन्तं भिन्ना भिन्नाः स्थापना दृष्टिगोचरीभवन्ति । अयं प्रवादो वर्तते यद्वाल्मीकिमुनिना शतकोटिश्लोका निबद्धाः पद्मपुराणस्य पातालखण्डेऽपि **'ततः स वर्णयामास राघवं ग्रन्थकोटिभिः'** आसन् । **'चरितं रघुनाथस्य शतकोटिप्रविस्तरम्'** ।

महामुनिना वाल्मीकिना शतकोटिपरमितश्लोकानां या रामकथा लिपिबद्धा कृताऽऽसीत्, सा सर्वा देवलोके गता । केवलं लवकुशद्वाराऽधीता २४००० चतुर्विंशत्सहस्रपरमिताः श्लोका एव तत्रत्या अवशिष्टाः सन्ति, ये वाल्मीकिरामायणरूपेणोपलभ्यन्ते । मत्स्यपुराणेऽपि—

वाल्मीकिना च यत् प्रोक्तं रामोपाख्यानमुत्तमम् ।
ब्रह्मणा चोदितं तच्च शतकोटिप्रविस्तरम् ॥

सम्प्रति वाल्मीके रामायणस्य चत्वारि मुख्यानि संस्करणानि समुपलभ्यन्ते (१) पश्चिमोत्तरशाखीयम्, लाहौरसंस्करणम्, (२) गौडीयसंस्करणम् बंगशाखीयम्, गोरेसियासंस्करणम्, (३) दाक्षिणात्यम्, बम्बईकुम्भकोणसंस्करणम्, (४) औदीच्यम्, काश्मीरीसंस्करणञ्च ।

एषु चतुर्ष्वपि संस्करणेषु विदुषां विभिन्ना धारणाऽस्ति । एषां संस्करणानां पाठानुसन्धानात् तेषु पर्याप्ता भिन्नता परिलक्ष्यते, एषु दाक्षिणात्यौदीच्यसंस्करणयोरैक्येऽपीतरयोर्महदन्तरमुपलभ्यते । तत्र न केवलं श्लोकेष्वेवान्तरमस्ति, प्रत्युताध्यायेष्वप्यन्तरं दृश्यते । दाक्षिणात्यपाठे ६४३, औदीच्यपाठे ६६४, गौडीयपाठे ५६६, पश्चिमोत्तरपाठे च ५०० सर्गा उपलभ्यन्ते ।

कामिलबुल्केमहोदयेन स्वकीयरामकथायामुक्तसंस्करणानामसमानपाठांशानां तुलनात्मकं विवेचनं विस्तरशः कृतमस्ति ।

रामायणस्य टीकाः

लोकप्रियस्यास्य वाल्मीकीयरामायणस्यानेका व्याख्या लिखिताः । तत्र साम्प्रतं कियत्य एवोपलभ्यन्ते । रामवर्मणः तिलकटीका सर्वतः प्रामाणिकी विख्याता चास्ति । रामवर्मणः प्राग् रामायणे कतकनाम्नी टीका लिखिताऽऽसीत् । यस्या उद्धरणं महता सम्मानेन रामवर्मणः स्वतिलकव्याख्यायां दत्तमस्ति । नागेशभट्टेनापि रामायणे रामीया व्याख्याऽतिमहत्त्वपूर्णा लिखिता । एतदतिरिक्ता माहेश्वरतीर्थकृता 'रामायणतत्त्वदीपिका', श्रीरामकृता 'अमृतकतकटीका', गोविन्दराजकृता 'शृङ्गार-(भूषण) टीका', रामानन्दतीर्थकृता 'रामायणकूट'-टीका, अहोबलकृता 'वाल्मीकिहृदयटीका', अप्पय्यदीक्षितकृता 'रामायणतात्पर्यसङ्ग्रहः' टीका, त्र्यम्बकमखिन्कृता 'धर्माकूत' टीका, विश्वनाथकृता 'वाल्मीकितात्पर्यतरणि' टीका, वरदराजमैथिलकृता 'विवेकतिलक'टीका चोल्लेखनीयाः सन्ति । दैवादिदानीं प्रायो बह्व्यष्टीका आपणे नोपलभ्यन्ते । किन्तु हस्तलिखिताः काश्चन केष्वपि पुस्तकालयेषूपलभ्यन्ते ।

महर्षेर्वाल्मीकेः परिचयः

(१) महर्षेर्वाल्मीकेर्जन्मविषयेऽनेका अनुश्रुतयोऽनुश्रूयन्ते । तत्रानेक एनं व्याधजातीयं मन्यन्ते, परन्तु स्वयं स महर्षिभंगवतो रामचन्द्रस्य राजसूययज्ञावसरे सीतायाः शपथग्रहणात्

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

पूर्वं कुशलवयोः परिचयप्रदानप्रसङ्गे आत्मनोऽपि परिचयं ददानो रामायणस्योत्तरकाण्डेऽकथयत् — रघुकुलनन्दन श्रीराम ! अहं हि प्रचेतसः (वरुणस्य) दशमः पुत्रोऽस्मि । न मम मुखात् कदापि मिथ्या वाङ्निःसृतेति । अहं सत्यं वच्मि इमौ तवैवात्मजौ स्तः[1] ।

(२) स्कन्धपुराणस्य वैष्णवखण्डे वैसाखमासमाहात्म्यवर्णनप्रसङ्गे स जन्मान्तरीयव्याध उक्तोऽस्ति । तत्र जन्मत्रयस्य कथायाः सङ्केतोऽपि विद्यते । अयं प्रथमे जन्मनि ब्राह्मणः, द्वितीये जन्मनि व्याधः, तृतीये च जन्मनि पुनर्ब्राह्मणकुले समुत्पत्य तीव्रेण तपसा वाल्मीकिर्बभूव । व्याधजन्मनः पूर्वं प्रथमे जन्मन्यसौ स्तम्भनामा वत्सगोत्रीय एको ब्राह्मण आसीत् । तदा जन्मान्तरीयकुसंस्कारवशाद् ब्राह्मणोचितधर्मकर्मभ्यां वञ्चितस्य स्तम्भस्य तस्य द्वितीयं जन्म व्याधस्य गृहे जातम् । तत्र शङ्खाख्यस्य महामुनेः कृपया स व्याधस्य गर्हितं कर्म परित्यज्य रामनाम जपन् पञ्चत्वं प्राप्तः । ततस्तृतीये जन्मनि तस्य जीवात्मनः पुनर्ब्राह्मणकुले शरीरग्रहणं जातम् । तत्र तस्याग्निधेयमग्निशर्मेति प्रथितमासीत् । तत्रापि व्याधानां कुसंगत्या कियद्दिनं यावद् प्राक्तनसंस्कारवशात् स व्याधकर्मणि प्रवृत्त आसीत् । अनन्तरमेकदा स सप्तर्षीणां कृपया पूर्वतः कुसंस्कारनिवृत्तये रामनामजपस्योपदेशमवाप्य शीर्षासनेन राममन्त्रं जपन् समाधिस्थो बभूव । समाधिकाले कीटैः तच्छरीरोपरि वल्मीकं विरचितम् । कियद्दिनानन्तरं समाधौ भग्ने स यदा बहिरागतः, तदा तत्कालतोऽयं महर्षिवाल्मीकिरिति नाम्ना प्रसिद्धो जातः ।

(३) एकदा वैसाखमासे बभ्रम्यमाणस्य शङ्खनामकमहर्षेरेकेन केनापि व्याधेन वस्तुजातं चोरितम् । मुनिना तत्कृत्यं विष्णोर्महिमानमवगत्य प्रातःकाले दैनिकं कृत्यं कृत्वा तं व्याधं प्रेम्णा स्वपार्श्वमाहूय पापकर्मणो विरतये रामनाम्न उपदेशो दत्तः । रामनामोपदेशं दत्वा तं प्रोक्तवान्—'व्याध ! सर्वेभ्यो नामभ्योऽधिकफलदायकमेतद् द्व्यक्षरं श्रीरामनाम वर्तते । जीवनपर्यन्तं त्वं निरन्तरं जप । ततस्ते द्वितीयं जन्म वल्मीकस्य ऋषेः कुले भविष्यति, तत्र त्वं वाल्मीकिनाम्ना प्रसिद्धो भविष्यसि[2]' इति ।

तत्प्रभावाद् जातश्रद्धः स रामनाम जपन् पञ्चत्वं प्राप्तः । राममन्त्रजपसंस्कारप्रभावात् स द्वितीये जन्मनि वल्मीकनामकस्य मुनिर्गृह उत्पन्नः । वल्मीकस्य मुनेरपत्यत्वादस्य वाल्मीकि-

---

१. (क) प्रचेतसोऽहं दशमः पुत्रो राघवनन्दन ।
न स्मराम्यनृतं वाक्यमिमौ तु तव पुत्रकौ ॥ (७।९६।१९)

(ख) महर्षेर्भृगोर्वंशे समुत्पन्नत्वाद्वाल्मीकिर्भार्गवोऽप्युच्यते स्म—'भार्गवेणेति संस्कृता भार्गवेण समाधिना' ।

२. वैसाखे मेषगे सूर्ये स्नात्वा प्रागरुणोदयात् ।
कृत्वा सन्ध्यादिकं कर्म तथा सन्तर्प्य चाखिलम् ॥
व्याधमाहूय दृष्टात्मा मूर्ध्नि प्रेक्ष्य परीक्ष्य च ।
रामेति द्व्यक्षरं नाम ददौ वेदाधिकं शुभम् ॥ (स्कन्दपु० वै०ख० २२।५१,५३)
ततस्ते भविता जन्म वल्मीकस्य ऋषेः कुले ।
वाल्मीकिरिति नाम्ना च भूमौ ख्यातिमवाप्स्यसि ॥ (२२।५६)

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

रिति नामा बभूव । तत्रैव वैसाखमासे पालनीयधर्माणां सम्यगाचरणनिर्मलान्तःकरणो भूत्वाऽयं रामायणाख्यं महाकाव्यं निर्मितवान्[1] ।

महर्षेर्वाल्मीकेः पितुः परिचयप्रसङ्गे तत्रैवोल्लेखो विद्यते यत् तस्य नाम पूर्वं कृणुरित्यासीत् । परं सरस्तटे कठिनं तपस्तपतस्तस्य शरीरं वल्मीकैः (कीटैः) आवृतत्वांत्तस्य 'वाल्मीकिः' इति नामान्तरं जातम्[2] ।

(४) स्कन्धपुराणस्यावन्तिखण्डे उत्तरार्धे वाल्मीकेश्वरस्य महिम्नो वर्णनप्रसङ्गे प्रोक्तमस्ति यत् पुरा भृगुवंशस्य सुमतिनामकस्य द्विजस्य भार्यायां कौशिक्यामुत्पन्नो **'अग्निशर्मा'** पित्रा भूयो भूयो प्रोच्यमानोऽपि वेदाभ्यासं नाकार्षीत् । ततो बहुतिथं कालमनावृष्ट्या खिन्नः सुमतिः स्त्रीपुत्राभ्यां सह काननं गत्वा तत्र कृताश्रमः समयं यापयामास । तत्र निवसद्भिर्दस्युभिः सहाग्निशर्मणः सङ्गो जातः । परिणामे तेन मार्गेण यो याति स्म, तं स हन्ति स्म ।[3]

अथैकदा तीर्थयात्राप्रसंगतः सप्तर्षयस्तत्रोपस्थिताः । तान् दृष्ट्वा हन्तुकामः सोऽब्रवीत्—वस्त्राणि मुञ्चध्वम्, छत्रकोपानहौ द्वे हेये, नो चेन् मया हता यूयं यमसदने गमिष्यथ । तस्य तद्वचनं श्रुत्वा तेषु अत्रिमुनिरवोचत् —वत्स ! वयं तीर्थयात्रिणस्तपस्विनः स्मः । तत्कथमस्मान् हन्तुं पापं तव हृदये जायते । ततः स उवाच ! भगवन् मम माता पिता भार्या पुत्राश्च सन्ति, तान् पोषयितुमहमिदं कृत्यं करोमि । ततोऽत्रिरुवाच—वत्स ! त्वं गत्वा पित्रादीन् पृच्छ, यद् युष्मदर्थे मया एवंविधं पापं क्रियते, तस्य फलभागिनः के भविष्यन्ति, यूयमहं वा ? तत्कर्मोपार्जितं पापं भोक्तुं ते स्वीकुर्वन्ति, तर्हि निःशंकमस्मान् मारय, नो चेत्तर्हि त्वया वृथा प्राणिवधो न कार्यः । ततोऽग्निशर्मा प्रोक्तवान्—तपस्विन् ! मया कदाचिदपीदृशं वचो न ते पृष्टाः । इदानीं युष्माकं वचसा मे प्रतिबोधो प्रवर्तते । तावद् यूयमत्रैव तिष्ठन्तु यावदहं गत्वा तस्य भावः कीदृशो विद्यते इति पृष्ट्वा आगच्छामि[4] ।

एवमुक्त्वा स शीघ्रं गत्वा तान् पप्रच्छ । पित्रादयो धर्मस्य प्रतिघातेन प्राणिनां पीडनेन च यद् मया प्रतिदिनं पापं क्रियते, तत् कस्येति कथ्यताम् । तच्छ्रुत्वा ते तत्कालं प्रोचुः-

---

१. प्रातः स्नात्वा दिवारात्रं जपन् रामेति सर्वदम् ।
व्याधजन्मनि नामासौ वल्मीकस्य सुतोऽभवत् ॥
वाल्मीकिरिति विख्यातो भुवनेषु महायशः ।
यो वै रामकथां दिव्यां स्वप्रबन्धैर्मनोहरैः ॥
लोके प्राख्यापयामास कर्मबन्धनिकृन्तनीम् । (२१।६४,६७-६८)

२. कृणुनाममुनिः कश्चिदस्मिन्नेव सरोवरे ।
तपो वै दुस्तरं तेपे बाह्यव्यापारवर्जितः ॥
वल्मीकमभवद् देहे तस्य कालेन भूयसा ।
वाल्मीकिरिति तं प्राहुरतो वै मुनिपुङ्गवम् ॥ (२१।६४–६५)

३. आभीरैर्दस्युभिः साधं सङ्गोऽभूदग्निशर्मणः ।
आगच्छति यथा तेन यस्तं हन्ति स पापकृत् ॥ (२७।७)

४. गत्वा पृच्छामि तान् सर्वान् कस्य भावश्च कीदृशः ।
यूयमत्रैव तिष्ठध्वं यावदागमनं मम ॥ (२७।१६)

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

पुत्र ? त्वं यत्पापं प्रकुरुते तत्त्वयैव भोग्यं नास्माभिः । वयं फलभागिनः स्मः, न कर्मभागिनः। तत्तेषां भाषितमाकर्ण्य नष्टोऽहमिति मन्वानो येन बहवो जन्तवो हताः, तं लगुडं प्रक्षिप्य त्वरितमृषीणामग्रे स्थित्वा प्रणम्य प्रोवाच[1] । तस्मात् सुष्ठूपदेशदाने यूयं न मां नरकात् त्रातुमर्हथ । एवं वादिनं तं दृष्ट्वा तेऽत्रिमुनिमब्रुवन् । भवतो वचनादस्य प्रतिबोधो जातः। अतोऽयं भवतैवानुग्राह्यः । तत्कृपया पापपुञ्जप्रणाशनाय वृक्षमूले स्थित्वा ध्यानयोगं विधातुमुपदिष्टः । अनन्तरं ते स्वाभीष्टं स्थानं गताः । स च निर्विकल्पः सन् ध्याननिमग्नो जातः। त्रयोदशे वर्षे निवृत्तास्ते सप्तर्षयस्तं वल्मीकिभूतं दृष्ट्वा तदुदीरितं ध्वनिञ्च श्रुत्वा विस्मयाविन्ता भूत्वा तमुपस्थापयामासुः । ततस्तपसा दीप्ततेजः स तान् मुनिपुङ्गवान् प्रणम्य प्रोवाच। भगवन्तः ! दुस्तरे पापकर्दमे निमग्नोऽहमतिदीनो युष्माभिः कृपालुतया परमया कृपया समुद्धृतः । तत्रभवतां प्रसादादद्य मया शुभदं मौलिकं ज्ञानं लब्धमिति कोऽस्ति मदन्यो धन्यः । तस्य तद्वाक्यं निशम्य परमधार्मिका दयालवस्त [2]ऊचुः ।

एवमुक्त्वा मुनिमुख्येषु स्वस्थानं गतेषु वाल्मीकिः कुशस्थल्यामागत्य महेश्वरं समाराध्य तस्मात् कवित्वशक्तिमासाद्य मनोहरं रामायणाख्यं प्रथमं महाकाव्यं कृतवान्[3] ।

(५) प्रकाशक्षेत्रमाहात्म्ये लिखितमस्ति यद् रामायणकारस्य वाल्मीकेः पूर्वजन्मनि वैसाख इति नामासीत् । प्राग् अयं क्रूरकर्मा आसीत् । अनेनातिदीनत्वाद् गार्हस्थजीवननिर्वाहार्थं दस्युवृत्तिं स्वीकृतवान् । अनन्तरं सप्तर्षिणां सदुपदेशेनास्य ज्ञानोदयो जातः । अनन्तरं देवर्षिनारदस्य दीक्षया राममन्त्रस्य जपेनायं सिद्धो भूत्वा रामायणं विरच्यादिकविर्बभूव ।

(६) अपि च मत्स्यपुराणानुसारं ब्रह्मणो मानसपुत्रस्य महर्षेर्भृगोः पुत्र आसीत् च्यवनर्षिः । तस्य पुत्रो बभूव आप्नवान्, तस्य 'उर्वः', तस्य ऋचीकः, तस्य जमदग्नि-अग्निवेश-वल्मीकादयः शतपुत्रा बभूवुः । वल्मीकस्य पुत्रोऽग्निरेव वल्मीकस्यापत्यत्वाद् वाल्मीकिरुक्तः। एवं भृगुवंशजो वाल्मीकिस्तमसातटे विराजते स्म । अस्यैव वाल्मीकेराश्रमे लोकापवादभीतेन श्रीरामेण निर्वासिता पूर्णगर्भा भगवती सीता कुशलवौ सुषुवे । रामस्य राज्याभिषेकानन्तरं तच्चरित्राधारेण महर्षिर्वाल्मीकी रामायणस्य निर्माणं कृतवान् ।

(७) स्कन्धपुराणे तु भगवता शङ्करेण भगवतीं पार्वतीं प्रति प्रोक्तमस्ति यद् रामावतारसमये ब्रह्मैव वाल्मीकिरूपेणावतीर्णः सरस्वती च तस्य वाग्रूपेण प्रकटीभूय पवित्रस्य रामचरित्रस्य गुणगानं कृतवती[4] ।

---

१. न मे माता न च पिता न भार्या न च मे सुतः ।
सर्वैस्ते परित्यक्तोऽहं भवतां शरणं गतः ।। (२७।२३)

२. वल्मीकेऽस्मिन् स्थितो वत्स यतस्त्वमेकचित्ततः ।
वाल्मीकिरिति ते मां भुवि ख्यातं भविष्यति ।। (२७।३३)

३. तस्मात् कवित्वमासाद्य चक्रे काव्यं मनोरमम् ।
रामायणञ्च मत्याह्वः कथासु प्रथमस्थितम् ।। (२७।३६)

४. वाल्मीकिरभवद् ब्रह्मा वाणी वाक्तस्य रूपिणी ।
चकार रामचरितं पावनं चरितव्रता ।।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

पौराणिककालमानानुसारं भारतीयपरम्परायामेकस्मिन् मन्वन्तरे किञ्चिदधिकानि एकसप्तति संख्याकानि महायुगानि भवन्ति। एकस्मिन् महायुगे च सत्ययुग-त्रेता-द्वापर-कलियुगनामानि चत्वारि युगानि भवन्ति। तत्र वर्तमाने सप्तमे वैवस्वतमन्वन्तरेऽष्टाविंशतितमे त्रेता युगे भृग्वादीनामृषीणामुत्पत्तिर्जाताऽस्ति। तथाहि वायुपुराणस्यानुषङ्गपादे—

भृगुरङ्गिरा मरीचिः पुलस्त्यः पुलहक्रतुः।
अत्रिश्चैव वसिष्ठश्च अष्टौ ते ब्रह्मणः सुताः॥ (६५।११)

एष्वष्टसु महर्षिभृगुवंशपरम्परायां वल्मीकेस्तनयोऽग्निरभवत्, यो वल्मीकेरपत्यत्वाद् वाल्मीकिमुनिनाम्नापि प्रसिद्धिं गतः। इत्थं भार्गववंशजो वाल्मीकिरग्निस्तमसानदीतटे आश्रमं निर्माय तपस्यन् निवसति स्म। श्रीरामस्य राज्याभिषेकानन्तरं तेन वाल्मीकिनाऽग्निना रुचिरस्य रामायणस्य प्रणयनं विधाय रामस्य राज्यसभायां कुशलवद्वारा रामायणस्योत्तरं काण्डमगापयत —

प्राप्तराज्यस्य रामस्य वाल्मीकिर्भगवानृषिः।
चकार चरितं कृत्स्नं विचित्रपदभूषितम्॥ (रा० १।४।१)
तथा समुपविष्टेषु ब्रह्मविष्णुमहात्मसु।
भविष्यदुत्तरं काव्यं जगतुस्तौ कुशीलवौ॥

वायुपुराणानुसारं चतुर्विंशे त्रेतायुगे पुरोधसो महर्षेर्वसिष्ठस्याचार्यत्वे अनुष्ठीयमान-पुत्रेष्टियज्ञप्रभावाद् रावणस्य वधनिमित्तं दशरथात्मजः श्रीरामः प्रादुरभवत्। तदैव च स्वतपसः क्षयात् लङ्काधिपती राक्षसराजो रावणो युद्धे रामबाणप्रहारेण निधनं गतः। तद्यथा—

चतुर्विंशे युगे रामो वसिष्ठेन पुरोधसा।
वधाय रावणस्यार्थे यज्ञे दशरथात्मजः॥
(वा० पु० अनुषङ्गपादयः ९८।९१)

त्रेतायुगे चतुर्विंशे रावणः तपसः क्षयात्।
रामं दाशरथिं प्राप्य निधनञ्चायमीयिवान्॥
(वा० पु० अ० पा० ७७।४८)

वाल्मीकेराश्रमविमर्शः

रामायणे वर्णिता तमसानदी तया तमसतयाऽस्ति सर्वथा भिन्ना, यस्या उल्लेखो रामायणे अयोध्याया दक्षिणे गङ्गायाश्चोत्तरे समीप एव विद्यते।[1] एवं वनवाससमये प्रथमरात्रौ विश्रम्य प्रसुप्तां जनतां विहाय सीतालक्ष्मणाभ्यां सह स्यन्दनेन तां तीर्त्वा रामो वनमुपजगाम।[2] अपि चात्रिमुनिस्थलसमीपे कन्दमूलफलपरिपूर्णेऽनेके मुनिपुङ्गवनिवासे साधु-

---

१. स मुहूर्तं गते तस्मिन् देवलोकं मुनिस्तदा।
जगाम तमसातीरं जाह्नव्यास्त्वविदूरतः॥

२. (क) तं स्यन्दनमधिष्ठाय राघवः सपरिच्छदः।
शीघ्रगामाकुलावर्तां तमसामतरन्नदीम्॥ (१४६।२८)

(ख) ततः सुमन्त्रो रथाद्विमुच्य श्रान्तान् हयान् संपरिवार्य शीघ्रम्।
पीतोदकास्तोयपरिप्लुताङ्गानवारयद् वै तमसाविदूरे॥ (१४५।३३)

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

जनावासे चित्रकूटेऽपि वाल्मीकेराश्रमस्य वर्णनं विद्यते । यत्र श्रीराम-सीता-लक्ष्मणश्चेति त्रयः साञ्जलिः प्रविश्य महर्षि वाल्मीकिमभिवाद्य तेन सत्कृतास्तत्र कियद्दिनं निवासं कृतवन्तः ।[1]

किञ्च, बहवो वदन्ति यदुत्तरप्रदेशीयकर्णपुरमण्डले वर्तमानं विठूरमेवास्ति वाल्मीकेराश्रमः । अत्रैव लोकापवादभीतेन श्रीरामेण पूर्णगर्भा भगवती सीता लक्ष्मणद्वारा परित्यक्ताऽऽसीत् ।

अपि च श्रीरामस्याज्ञया लवणासुरस्य वधाय स्वां सेनामग्रे प्रस्थाप्य शत्रुघ्नो रामादीन् प्रणम्य एकाकी मधुवनमार्गे प्रस्थितः । मध्ये मार्गे रात्रिद्वयं विश्रम्य तृतीये दिने महर्षेर्वाल्मीकेराश्रममुपस्थाय साञ्जलिर्महर्षि प्रणम्योवाच—भगवन् ! अहं हि ज्येष्ठस्य भ्रातुः श्रीरामस्याज्ञया कार्यवशादस्मिन् प्रदेशे समागतोऽस्मि । अद्यात्र रात्रौ विश्रम्य श्वः प्रातर्वरुणपालितां प्रतीचीं दिशं प्रस्थातुमिच्छामि । एतद्वचो निशम्य मुनिवरो विहस्योवाच, वीरवर ! तवास्ति स्वागतम्, सौम्य ! आश्रमोऽयं रघुवंशिनां कृते तु स्वगृहमेवास्ति । अतस्त्वं निश्शङ्को भूत्वा मम आसनं पाद्यमर्घ्यं स्वीकुरुष्व, कन्दमूलफलादिकं च भुक्त्वा पर्णशालायां विश्रम[2] । यस्यां रात्रौ शत्रुघ्नो महर्षेर्वाल्मीकेः पर्णशालायां विशश्राम, तस्यामेव रात्रौ निशीथे भगवती सीता सुतद्वयमसूत ।

तदनन्तरं मुनिकुमारैर्महर्षिमुपेत्य सीतायाः प्रसवस्य शुभं समाचारं निवेद्य प्रोक्तम्—भगवन् ! श्रीरामस्य धर्मपत्नी सीता दारकद्वयं प्रासोष्ट । अतो भवता तयोर्बालग्रहजनितबाधानिवृत्तये प्रयतस्व । ततो महर्षिः प्रसन्नचेताः सूतिकागारे प्रविश्य रक्षाव्यवस्थां विधायैकां कुशमुष्टिं लवञ्च प्रदायादिष्टं यद् वृद्धाभिस्तापसीभिर्मन्त्रद्वाराभिमन्त्रितया कुशमुष्ट्या प्रथमकुमारः सम्मार्जनीयः । एवं कृते तस्य कुश इति नाम भविष्यति । तथा तयोर्यः कनिष्ठस्तस्य

---

१. तां वृक्षपर्णच्छदनां मनोज्ञां यथाप्रदेशं सुकृतां निवाताम् ।
वासाय सर्वे विविशुः समेताः सभां यथा देवगणाः सुधर्माम् ॥ ३४ ।
सुरम्यमासाद्य तु चित्रकूटं नदीं च तां माल्यवतीं सुतीर्थाम् ।
ननन्द हृष्टो मृगपक्षियुष्टां जहौ च दुःखं पुरविप्रवासात् ॥ ३५ ।
इति सीता च रामश्च लक्ष्मणश्च कृताञ्जलिः ।
अभिगम्याश्रमं सर्वे वाल्मीकिमभिवादयन् ॥
तान् महर्षिः प्रमुदितः पूजयामास धर्मवित् ।
आस्यतामिति चोवाच स्वागतं तं निवेद्य च ॥ (१।५६।१६-१७)

२. द्विरात्रमन्तरे शूर उष्य राघवनन्दनः ।
वाल्मीकेराश्रमं पुण्यमगच्छद् वासमुत्तमम् ॥
सोऽभिवाद्य महात्मानं वाल्मीकिं मुनिसत्तमम् ।
कृताञ्जलिरथो भूत्वा वाक्यमेतदुवाच ह ॥
भगवन् ! वस्तुमिच्छामि गुरोः कृत्यादिहागतः ।
श्वः प्रभाते गमिष्यामि प्रतीचीं वारुणीं दिशम् ॥ (७।६५।२-३-४)

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

लवेन मार्जनं विधेयं तेन तस्य नाम लवो भविष्यति ।[१] तदनुसारं सीतारामनामगोत्रोच्चारण-पूर्वकं कुमारयोर्मार्जनं कुर्वन्तीनां तासां ध्वनिमाकर्ण्य शत्रुघ्नः परमप्रसन्नः सीतायाः पर्णशालां प्रविश्योक्तवान् । मातः ! दिष्ट्या वर्धसे महतः सौभाग्यस्यायं विषयः । प्रसन्नतया वार्तालापे एव तयोर्वर्षाकालिकी सा श्रावणमासस्यावशिष्टा रात्रिर्व्यपगता । प्रातरुत्थायाह्निकं कृत्यं कृत्वा शत्रुघ्नो मुनिराज्ञामादाय प्रतीचीं दिशं प्रस्थितः ।[२] तत्रोपस्थाय युद्धे दुर्दान्तं लवणासुरं निहत्य द्वादशभिर्वर्षैर्यावन्मधुपुरीं राजधानीरूपेण मनोहरां सन्निवेश्य सुसमृद्धां च विधाय श्रीरामचरणदर्शनलालसया परिमितैर्जनैः सह अयोध्यां प्रत्यागच्छन् शत्रुघ्नो मार्गे वाल्मीके-राश्रमे पुना रात्रौ विश्रम्य मुनिना कृतातिथ्यं कुमाराभ्यां मधुरवाण्या गीयमानं रुचिरं राम-चरित्रं श्रावं श्रावमानन्दनिमग्नचेताः पुनः प्रातरयोध्याभिमुखं प्रतस्थे ।[३]

एतेनेदं निश्चीयते यदयोध्यातः पश्चिमे भागे वर्तमाने विठूरे वाल्मीकीयाश्रम एव लोकापवादभिया रामेण लक्ष्मणद्वारा परित्यक्ता गर्भवती सीता युग्मं पुत्रद्वयं जनयामास । एवं वाल्मीकिरामायण एव त्रिषु स्थानेषु वाल्मीकिमुनेराश्रमस्य वर्णनमुपलभ्यते ।

मन्मते विश्वहितैषिणो लोकसङ्ग्राहकस्योदारचरितस्य महर्षेर्वाल्मीकेराश्रमोऽनेकत्र सम्भवति, यतो हि भारतीया महात्मानः, ऋषयो मुनयश्च प्रायो भवन्ति स्म यायावराः = भ्रमणशीलाः । अतस्तेषु केषाञ्चिदनेकेऽपि आश्रमा भवितुमर्हन्ति । एवं महर्षेर्वाल्मीकेरप्यनेके आश्रमा आसन् । समये समये च स तत्र तत्रोपतिष्ठते स्म । रामायणरचनाकाले कविरूपेण स तमसातीर एव कृताश्रम आसीत् । रामवनागमनसमये च स विठूरे कृतवास आसीत् ।

धनराजपुरीमहोदयस्तु भरतस्योत्तरप्रदेश-नेपालयोः सीम्नि भैंसालोटननामके श्रीनारायणगण्डजाया नारायण्याः सुरम्ये तटे वाल्मीकिनगरं साधयितुं प्रयतते ।

प्रकृतिचित्रणं संवादवैलक्षण्यञ्च

रामायणे प्रकृतिचित्रणं त्वनुपममस्त्येव संवादभागोऽप्यतिरुचिकरो वर्तते । श्रीमतोऽ-ञ्जनीनन्दनस्य हनुमतो वाक्पटुता तथाऽऽलापकुशलता महती आकर्षिका विद्यते । श्रीराम-लक्ष्मणाभ्यां सह लङ्कास्थितया सीतया साकं वा रावणस्य समक्षं भरतेन सार्द्धं वा वदनस्य

---

१. (क) यस्तयोः पूर्वजो जातः स कुशैर्मन्त्रसंस्कृतैः ।
निर्मार्जनीयस्तु तदा कुश इत्यस्य नाम तत् ॥ (७।६६।७)
(ख) यश्चावरो भवेत् ताभ्यां लवेन सुसमाहितः ।
निर्मार्जनीयो वृद्धाभिर्लवेति च स नामतः ॥
(ग) एवं कुशलवौ नाम्ना तावुभौ यमजातकौ ।
मत्कृताभ्यां च नामभ्यां ख्यातियुक्तौ भविष्यतः ॥ (७।६६।७-८-९)

२. प्रभाते सुमहावीर्यः कृत्वा पौर्वाह्णिकीं क्रियाम् ।
मुनिं प्राञ्जलिरामन्त्र्य ययौ पश्चान्मुखः पुनः ॥ (७।६६।१४)

३. स भुक्तवान् नरश्रेष्ठो गीतमाधुर्यमुत्तमम् ।
शुश्राव रामचरितं तस्मिन् काले यथाक्रमम् ॥ (७।७१।१४)

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

विलक्षणा कला, मधुरा शैली, तर्कयुक्तं प्रस्तुतीकरणं वस्तुस्थितेर्यथार्थं ज्ञानञ्चेति सर्वं तत्र निहितमासीत्। अत एव स बुद्धिमतां वरिष्ठो ज्ञानिनामग्रगण्यो वारं वारं प्रोच्यते। रावण-विभीषण-भरत-श्रीरामाणामपि संवादो रोचकतापूर्ण एवास्ति। एवं न्यायदर्शन-मीमांसा-दर्शन-धर्मशास्त्र-नीतिशास्त्र-गणितशास्त्र-मनोविज्ञान-राजनीति-व्यवहारपरकज्ञानादीनां समा-वेशोऽत्र ग्रन्थे यथास्थानं सुन्दरया सरण्या कृतो वर्तते। तयोर्महत्त्वप्रतिपादनमपि दृढतरं कृत-मस्ति। अस्य ग्रन्थस्यारम्भ एव तपःशब्देन कृतोऽस्ति। महर्षेरेवंविधाया अद्भुतकविता-रचनाया तथाऽन्यान्यमहत्त्वपूर्णसिद्धीनां प्राप्तेर्मूलसाधनस्रोतस्तस्य प्रकाण्डा तपश्चर्यैवासीत्। राजर्षिणा विश्वामित्रेणात्मीयविचित्रया तपस्यया सर्वं साधितम्। तपसैव तेन राजर्षिदुर्लभं ब्रह्मर्षित्वमप्यवाप्तम्। तपसः प्रभावेणैव राज्ञा भगीरथेन ब्रह्मलोकाल्लोकपाविनी भगवती गङ्गा धराधाम्नि समुपस्थापिता। एवम् ऋषिश्रृङ्ग-गौतम-भृगु-विन्ध्यवासिनामृषीणां तपस्यायाः पर्याप्तं वर्णनमुपलभ्यते। महर्षेर्वाल्मीकेर्मतानुसारं स्वर्गादिसुखभोगस्यैकमात्रो हेतु-स्तपस्यैवास्ते।

किमधिकं रावणदीनां राज्यसुख-शक्ति-आयुरादीनां मूलमपि तप एवासीत्। श्रीरामस्तु दण्डकारण्ये चित्रकूटादौ च प्रत्येकतपस्विनामाश्रमे उपतिष्ठते स्म। ते चात्मज्ञानिनो मन्त्रद्रष्टारो महर्षयश्च यदा श्रीरामं ददृशुस्तदा तस्मिन् तत्त्वतो नारायणस्वरूपं परिचीयापारानन्दमनुभूत-वन्तः। इत्थं पवित्रतापूर्वकं तपोऽनुष्ठानद्वारा ते परमं ब्रह्मसुखमवाप्नुयुः।

रामकथोद्गमः

रामकथाया उद्भवसम्बन्धे विपश्चितामेकं मतं नास्ति। तत्र डॉ० वेबरस्य मतमस्ति यद् बौद्धग्रन्थे दशरथजातके वर्णिताया रामकथायाः प्रेरणया वाल्मीकिना रामायणस्य स्वरुच्यनुसारं विस्तारः कृतः।

अपि च बौद्धग्रन्थेषु अनुपलब्धसीताहरणकथा वाल्मीकिना होमरकाव्यस्य पेरिसद्वारा हेलेनस्यापहरणप्रसङ्गतस्तथा लङ्कायुद्धं सम्भवतो यूनानीसेनाद्वारा त्रायस्यावरोधप्रसङ्गत उद्धृतमस्ति[1]।

डॉ० योकाबीमहोदयेन रामायणस्य वर्णनविषया भागद्वये विभक्ताः। एका अयोध्याया घटना, यस्या केन्द्रमस्ति राजा दशरथः। द्वितीया दण्डकारण्ये रावणवधघटना। तत्रायोध्या-घटनैतिहासिकी विद्यते। यस्या आधारः कश्चिद् इक्ष्वाकुवंशीयो राजकुमारो वर्तते। दण्डकारण्यरावणवधघटनाया मूलोद्गमो वेदवर्णितदेवतानां कथातो गृहीतोऽस्ति[2]। याकोबीमत-समर्थकाः सन्ति मैकडानलः[3], कीथः[4], रमेशचन्द्रसेनो[5] बेलवेल्करश्च[6]। रमेशचन्द्रसेनस्य मतेन रामायणस्य प्रथमो भागो दशरथजातकेन प्रभावितोऽस्ति। यस्य प्रचार उत्तरभारते वर्तते,

---

१. आन दि रामायण, पृ० ११। २. दस रामायण, पृ० ८६–१२०।
३. हिस्ट्री आफ संस्कृत लिट्रेचर, पृ० ३११। ४. हिस्ट्री आफ संस्कृत लिट्रेचर, पृ० ४३।
५. हिस्ट्री आफ सिविलाइजेसन इन एंसिएन्ट इण्डिया, पृ० ९४।
६. उत्तररामचरित की भूमिका, पृ० ४७।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तथा द्वितीयो भागो रावणसम्बन्धिभिराख्यानैः प्रभावितोऽस्ति, यस्य प्रचलनं दक्षिण-भारते विद्यते[1] ।

रामचन्द्रस्य समये वाल्मीकिनामकेन भृगुवंशीयेन मुनिना सर्वप्रथमं रामस्योपाख्यानं श्लोकबद्धं कृतम् । यदाधारे वाल्मीकिरामायणस्य रचनाऽभूदिति जयचन्द्रविद्यालङ्कारः[2] ।

सूतद्वारा प्रोक्तं रामकथायाः सत्यतां साधयतः फादरकामिलबुल्केमहोदयस्याभिमतमस्ति यद् रामरावणहनुमद्विषये पूर्वं स्वतन्त्रतयाख्यानानि लोके प्रचलितान्यासन् । येषां सङ्ग्रहेण रामायणस्य रचना जाता[3] ।

रामकथाया अस्तित्वं वाल्मीकिमुनेः पूर्वमपि वर्तमानमासीदित्यस्य समर्थनं कुर्वतो हरिवंशपुराणस्य कथनमस्ति यद् रामायणरचनातः पूर्वमपि रामकथा पुराणविद्भिः सूतचारणकुशलवैर्यत्र तत्र गीयते स्म[4] ।

इत्येवं रामकथाया उद्गमविषये विभिन्नानां समालोचकानां संक्षेपतो मतानि सन्ति ।

रामायणकालविमर्शः

मैकडानलो रामायणस्य मौलिकं रूपम् ईशापूर्वपञ्चमशताब्दीसमीपे स्वीकरोति । तथा तस्य मिश्रितं रूपम् २०० शताब्दीपूर्वमेव मन्यते ।[5] वर्तमानस्येतिहासस्याधारेण कथ्यते यद् मगधनरेशोऽजातशत्रुः ५०० ई० पू० समीपे वज्जीनामाक्रमणं विफलयितुं गङ्गासोणसङ्गमे पाटलिपुत्रं नाम नगरमवासयत्, परं रामायणे गङ्गासोणसङ्गमे पाटलिपुत्रस्योल्लेखो नोपलभ्यते । येन प्रतीयते यत् पाटलिपुत्रनामकरणात् पूर्वम् (५०० ई० पू०) रामायणस्य निर्माणं नूनमजायत ।

बुद्धसमये यस्य वैशालीप्रजातन्त्रस्योल्लेखोऽवाप्यते तद् रामायणकाले मिथिलाविंशालेति राजतन्त्रद्वये विभक्तमुक्तमस्ति । विशालाया नामकरणं हि नृपतेरिक्ष्वाकोरलम्बुषायामप्सरायां जायमानेन विशालनाम्ना तनयेन निर्मितत्वादजायत । तथाहि सीतास्वयम्बरे राजर्षिणा विश्वामित्रेण साकं गच्छन् श्रीरामो मध्येमार्गं गङ्गासीमे दिते। तपःस्थले रम्यां विशालां नगरीमवलोक्य विश्वामित्रं तत्परिचयं पप्रच्छ । स च तदुत्तरे तदुत्पत्तिमवोचत्—

> **इक्ष्वाकोस्तु नरव्याघ्र ! पुत्रः परमधार्मिकः ।**
> **अलम्बुषामुत्पन्नो विशाल इति विश्रुतः ॥**
> **तेन चासीदिह स्थाने विशालेति पुरी कृता । (१।४७।१२ ½)**

एवमेव मिथिलायां तदानीं जनकवंशीयो राजा सीरध्वजो जनको राज्यं करोति स्म । अतो निश्चीयते यद् रामायणं बुद्धाद् बहुपूर्वं निर्मितमासीत् ।

एवं रामायणकाले दक्षिणदिशोऽरण्यभागः पर्याप्त आसीत् । इयं स्थितिः ५०० ई० पूर्वमेवासीत् । अत एभिः प्रकरणै रामायणस्य रचनायाः स्पष्टीकरणं सम्यक् सञ्जायते ।

---

१. दि बंगाली रामायण, पृ० २७ ।
२. भारतीय इतिहास की भूमिका, पृ० १५८ ।
३. रामकथा, पृ० ६४ ।
४. हरि०पु०, हरिवंशपर्व ४१–१४९ ।
५. हिस्ट्री आफ संस्कृत लिट्रेचर, पृ० ३०६–३०९ ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

काशीप्रसादजायसवालोऽप्येतदेव समर्थयन् ब्रवीति यद् मूलग्रन्थस्य रचना ५०० इशवीयपूर्वं जाता, तथा २०० इशवीयसमीपे तस्य द्विरावृत्तिर्जाता ।[1] ए० बी० कीथः ईशापूर्वं चतुश्शताब्दीं मनुते ।[2] विन्टरनित्सेन रामायणस्य रचनाकाल ईशापूर्वं २०० शताब्दी मन्यते ।[3] प्रोफेसरवेबरेण रामायणे वारद्वयं यवनशब्दस्य प्रयोगं दृष्ट्वाऽत्र यवनानां प्रभावः साधयता यूनानीकविहोमरतः पश्चाद् रामायणस्य रचनाकालो मन्यते ।[4] परन्तु याकोबिना तद् यूनानस्याक्रमणानन्तरं मिश्रितं साधयता भाषाविज्ञानस्याधारेण तर्कोऽयं प्रस्तूयते यद् वाल्मीकिर्युद्धान्तरमभविष्यत्तर्हि एवंविधं लोकप्रियं महाकाव्यं प्राकृतभाषायामेव अनिर्मास्यत । अतो यूनानयुद्धात् पूर्वमेव रामायणस्य प्रणयनं जातम् ।[5] रामायणे कोशलजनपदस्य राजधानी अयोध्या प्रोक्ता ।[6] परन्तु जैनबौद्धसाहित्येषु तन्नाम साकेतमुक्तमस्ति । पतञ्जलिमुनिना स्वकीये महाभाष्ये **'अरुणद् यवनः साकेतम्'** इत्युक्तं विद्यते । अतः प्रतीयते यद् रामायणस्य रचना बुद्धात् पूर्वमेव जाता ।[7]

श्रीरामेण कुशस्य कृते विन्ध्यपर्वतसमीपे कुशावती नाम्नी रमणीया नगरी, तथा लवस्य च कृते श्रावस्तीनाम्नी प्रसिद्धा नगरी प्रदत्ता ।

अतो श्रावस्ती स्थापनात् पूर्वमेव रामायणं विरचितम् । रामायणे मिथिला-विशाला चेति द्वेऽपि नगर्यौ स्वतन्त्रराज्यरूपेण पृक्क् पृथग् वर्णिते विद्येते, किन्तु बुद्धसमये इमे उभे अपि नगर्यौ सम्मेलितवैशालीराज्यरूपेण परिणते । इतोऽपि रामायणस्य रचना बुद्धतः पूर्वमेव सिध्यति । अपि च रामायणस्य बालकाण्डे उत्तरभारतमङ्ग-मगध-मिथिला-कोशल-कान्यकुब्ज-प्रभृतिषु लघुराज्येषु विभक्तमासीत्, परमियं राजनीतिकस्थितिर्बुद्धात् पूर्वमेव प्राप्यते। रामायणे भारतस्य दक्षिणभागोऽरण्यानीरूपेण वर्णितो विद्यते । यत्रासभ्या अर्धसभ्या वा वानर-भल्लूकादयो निवसन्ति स्म । अतो दक्षिणभारतस्यार्यरूपेण परिणतेः पूर्वमेव रामायणस्य निर्माणं जातम् । रामायणस्य अयोध्याकाण्डे जाबालिद्वारा समुपस्थापितनास्तिकमतस्य खण्डनप्रसङ्गे श्रीमता रामेण प्रोक्तं यद् यथा चोरो दण्डनीयो भवति, तथैव वेदविरोधी बौद्धमतावलम्बी नास्तिकोऽपि दण्डनीय इति । तथागतबुद्धस्य स्पष्टमुल्लेखाद् बुद्धानन्तरं रामायणस्य रचना प्रतीयते ।[8] अपि च आदिकाण्डे महर्षेर्वसिष्ठस्य गोहरणसमये तदाज्ञया गोद्वारा

---

१. जे० वी० ओ० आर० यस० खण्ड ४, पृ० २६ ।

२. एज आफ दि रामायण, पृ० २१८ ।

३. हिस्ट्री आफ इण्डियन लिट्रेचर, भाग १, पृ० ५५६ ।

४. आन दि रामायण पृ०, १३५ । ५. दस रामायण, पृ० १०० ।

६. वा० रा० बा० का० ५–६ ।

७. कुशस्य नगरी रम्या विन्ध्यपर्वतरोधसि ।
कुशावतीति नाम्ना सा कृता रामेण धीमता ॥
श्रावस्तीति पुरी रम्या श्राविता च कुशस्य च । (वा० रा० उ० का० १०८।४)

८. यथा हि चोरः स तथा हि बुद्धस्तथागतं नास्तिकमत्र विद्धि ।
तस्माद्धि यः शक्यतमः प्रजानां स नास्तिके नाभिमुखो बुधः स्यात् ॥ (२।१०९।३४)

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

प्रादुर्भूताभ्यां शकयवनाभ्यां विश्वामित्रेण साकं युद्धस्य तत्सेनासङ्घर्षस्य च चर्चा वर्तते, तेनाऽपि यवनशकयोराक्रमणानन्तरं रामायणस्य रचना [1]प्रतीयते ।

किष्किन्धाकाण्डे वानरराजेण सुग्रीवेण सीतान्वेषणाय कपीन्द्रान् प्रेषयितुं यवनदेशस्य शकनगराणां च स्थितिः कुरुप्रदेशमद्रासयोर्मध्ये निर्दिष्टाऽस्ति[2] । एतेनाऽपि स्पष्टं प्रतीयते यत् तस्मिन् समये यवनशकानां च पञ्चनदभूभागेऽधिकार आसीत् । किञ्च अयोध्याकाण्डे सिन्धु-सौवीर-द्रविड-सौराष्ट्र-दक्षिणापथ-मगध-मत्स्य-अङ्ग-वङ्ग-कलिङ्ग-काशी-कोशलादीनां जनपदानां स्वतन्त्रतया उल्लेखो वर्तते । तथा चैतेषां जनपदानामैतिहासिकी स्थितिस्तृतीयचतुर्थशताब्दीपूर्वमासीत्[3] । अतः सिध्यति यद् रामायणस्य निर्माणं पञ्चम-षष्ठ-शताब्दीपूर्वं जातम्, किन्तु तस्य परिमार्जितं रूपं द्वितीय-तृतीयशताब्दीपूर्वं सम्पन्नम् ।

कात्यायनीपुत्रकृतस्य ज्ञानप्रस्थानस्य टीकामहाविभाषानुसारं प्रथमद्वितीयशताब्द्यो रामायणे केवलं द्वादशसहस्रश्लोका आसन्[4] । डॉ० भाण्डारकर आचार्यपाणिनेः पूर्वं रामायणस्य रचनाकालं कथयति । यतोऽत्र पाणिनीयव्याकरणस्य नियमा यथावद् न पालिताः सन्ति । यदि इदं तदनन्तरं निर्मितं स्यात्, तर्हि तन्नियमानुकूलः प्रयोगोऽत्र सम्भवेत् । अतो वाल्मीकिरामायणस्य रचना ईशातः पूर्वमेव जातमिति निश्चप्रचम् ।

अन्तःसाक्ष्यम्

रामायणे कोशले जनपदे राजधानीरूपेणायोध्याया उल्लेखो [5]विद्यते । बुद्धसमयाद् अयोध्याया नाम साकेतं जातम् । पतञ्जलिना स्वमहाभाष्ये यवनकृतसाकेतस्योल्लेखः कृतोऽस्ति । लवेन श्रावस्ती निजराजधानी कृता । अतः सिध्यति यद् रामायणस्य रचना बुद्धात् पूर्वमजायत । बुद्धात् पूर्वमेवोत्तरभारतमङ्गवङ्ग-मत्स्य-मगध-कोशल-कान्यकुब्जादिराज्येषु विभक्तमासीत्, यस्योल्लेखो रामायणेऽस्ति । अनया दृष्ट्या ईशातः पूर्वं पञ्चमशताब्द्यां रचना जाता ।

---

१. भूय एवासृजद् घोराञ्छकान् यवनमिश्रितान् ।
तैरासीत् संवृताभूमिः शकैर्यवनमिश्रितैः ॥ (५४।२१) ।

२. तत्र म्लेक्षान् पुलिन्दांश्च शूरसेनास्तथैव च ।
प्रस्थलान् भरतांश्चैव कुरुश्च सह मद्रकैः ॥
कम्बोजयवनांश्चैव शकानां पत्तनानि च ।
अन्वीक्ष्य दरदांश्चैव हिमवन्तं विचिन्वथ ॥ (रा० ४।४३।११–१२)

३. द्राविडाः सिन्धुसौवीराः सौराष्ट्रा दक्षिणापथाः ।
वङ्गाङ्गमगधा मत्स्याः समृद्धाः काशिकोशलाः ॥ (१०।३७) ।

४. जर्नल आफ दि रायल एशियाटिक सोसाइटी (ग्रेट ब्रिटेन) ९०७ पे० ९९)

५. कोशलो नाम मुदितः स्फीतो जनपदो महान् ।
विशिष्टः सरयूतीरे प्रभूतधनधान्यवान् ॥
अयोध्यानामनगरी तत्रासील्लोकविश्रुता ।
मनुना मानवेन्द्रेण या पुरी निर्मिता स्वयम् ॥ (१।५।५–६)

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

रामायणे तत्र रामकृतगमनस्य वर्णनं वर्तते, यत्राद्यत्वे पाटलिपुत्रस्यास्ति स्थितिः। अतः पाटलिपुत्रनिर्माणात् पूर्वमेव रामायणं निर्मितम्।

बहिःसाक्ष्यम्

समस्तेऽपि रामायणे महाभारतस्य पात्राणां न क्वचनोल्लेखो विद्यते, प्रत्युत महाभारते रामायणस्य कियन्तः श्लोका उद्धृताः सन्ति। वनपर्वणि च रामायणसम्बद्धस्थानानि महाभारते तीर्थरूपेणोक्तानि सन्ति। अतो रामायणस्य रचना महाभारतात् पूर्वमेवेति निश्चप्रचम्। द्रौपद्याः प्रीत्यर्थं सौगन्धिककमलं समानेतुं प्रस्थितस्य भीमसेनस्य गन्धमादनशिखरे कदलीवने हनुमता सह जाते साक्षात्कारे अध्यायपर्यन्तं षट्सु अध्यायेषु रुचिरस्य रामचरितस्य चर्चा विद्यते।

यथा भीमसेनेन सह हनुमतः कदलीवने जाते साक्षात्कारे वायुपुत्रो हनुमान् पवनतनयं भीमसेनमपृच्छत्–कोऽस्ति हनुमान् नाम, येन समुद्रो लङ्घितः? ततस्तेनोत्तरितं यद् वानरश्रेष्ठो रामप्रियो हनुमान् मे ज्येष्ठभ्राताऽस्ति। स हि स्वसद्गुणैः सर्वैः प्रशंसनीयो बलबुद्धिविद्याधैर्योत्साहसमन्वितोऽस्ति। तथा रामायणे तस्य महती ख्यातिरस्ति। स हि भगवतो रामचन्द्रस्य धर्मपत्न्या भगवत्याः सीताया अन्वेषणाय शतयोजनविस्तीर्णं सागरमनायासेनोल्लङ्घितवान्। तथा हि—

हनुमान् वायुतनयो वायुपुत्रमभाषत।
क एष हनुमान् नाम सागरो येन लङ्घितः॥
मम भ्राता गुणश्लाघ्यो बुद्धिसत्त्वबलान्वितः।
रामायणेऽति विख्यातः श्रीमान् वानरपुङ्गवः॥
रामपत्नीकृते येन शतयोजनविस्तृतः।
सागरः प्लवगेन्द्रेण क्रमेणैकेन लङ्घितः॥

(महाभा० वन० १४७।१०-११-१२)

एवं महाभारतं रामायणतः पूर्णतया प्रभावितमस्ति। अतो रामायणस्य रचना ततः पूर्वं जाता।

किञ्च श्रीरामो जैनबौद्धग्रन्थेष्वादर्शमयमर्यादापुरुषोत्तमरूपेणाङ्कितो विद्यते। बौद्धकविकुमारपालो बौद्धसाहित्ये, तथा जैनकविर्विमलसूरिर्जैनसाहित्ये स्पष्टरूपेण रामकथाया उल्लेखं कृतवन्तौ। बौद्धानां जातकेषु दशरथजातकं तु रामायणस्य पूर्णाख्यानयुक्तमेव विद्यते। जातकानां समयस्तु ३०० ख्रैस्ताब्दपूर्वं विद्यते। एवमन्तरङ्गबहिरङ्गसाक्ष्यप्रमाणैरपि रामायणस्य समयः २०० शतीतः ५०० ईशवीशतीपूर्वमेव निश्चेतुं शक्यते।

कामिलबुल्केमहोदयेन रामायणस्य रचनाकाल ईशवीपूर्वं ६०० स्वीकृतोऽस्ति[1]। हापकिन्स-विन्टरनित्स-विसेन्टस्मिथ-मैक्डोनल-मोनियरविलियम्सप्रभृतीनां मतानि खण्डयित्वा चिन्तामणिविनायकवैद्यमहोदयस्तु रामायणस्य प्राचीनतमरूपस्य रचना १२०० ई० पू० मनुते। वैद्यमहोदयस्यासङ्गतीनां निरसनं कन्हैयालालपोद्दारेण संस्कृतसाहित्येतिहासस्य प्रथमे भागे सोपष्टम्भं कृतमस्ति।

---

१. रामकथा, पृ० १०५।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

ए० श्लेगस्य मतानुसारं रामायणस्य रचना ११०० ई० पूर्वं तथा गोरेशियोमतानुसारम् १२०० ई० पूर्वं जाता[1]। इत्थं रामायणस्य रचनाकालसम्बन्धे देशिभिर्विदेशिभिर्वा विद्वद्भिः पर्याप्तं विश्लेषणं कृतम्। तथाऽत्र सम्बन्धे तेषां पर्याप्तो मतभेदोऽप्यासीत्। परं विपश्चितां विभिन्नेषु मतभेदेषु सत्स्वपि अत्र प्रायः सर्वेषां सम्मतिरस्ति यद् रामायणम् ६०० शताब्दीतः पूर्वतनस्य रचनाऽस्ति।

याकोबीमहोदयस्य कथनमस्ति यद् रामायणं मूलरूपेण अयोध्याकाण्डतो युद्धकाण्डपर्यन्तं केवलं पञ्चसु काण्डेषु विभक्तमासीत्[2]। रामायणस्य बालोत्तरकाण्डयो ऋष्यश्रृङ्गविश्वामित्र-अहल्यागङ्गावतरणादीनां मुख्यकथाभिः कश्चन सम्बन्धो नास्तीत्ययमंशो प्रक्षिप्तोऽस्ति। वाल्मीकिना राम आदर्शो महापुरुषोऽभिमतः, किन्तु बालोत्तरकाण्डयोरेवंविधाः श्लोका अपि उपलभ्यन्ते, येषु रामोऽवताररूपेणाङ्कितो विद्यते। अतोऽत्रोभयोः काण्डयोः प्रक्षिप्ता अंशाः प्रतीयन्ते[3]।

रामस्य शोकविजयप्रसङ्गे बौद्धादिदर्शनप्रभावितदशरथजातकानुसारं बुद्धस्य भिक्षुमयं जीवनं दानरूपेण गृहीत्वा वाल्मीकिना हिन्दुगृहस्थानां कृते रामस्यादर्शमयं जीवनं रामायणे प्रस्तुतीकृतमस्ति[4]।

किन्तु कामिलबुल्केनोक्तविषयस्य विश्लेषणं कुर्वता प्रोक्तं यत् सम्भवतो वाल्मीकिर्बौद्धधर्मस्य ख्यात्या प्रभावितः स्यात्। परं रामस्योत्तमचरितशक्तिसौम्यताकोमलादिसद्गुणगणैराकृष्टः स रामस्य स्वाभाविकमौलिकतया तस्य तादृशमादर्शमयञ्च चरित्रमुपस्थापितम्।[5]

'चरितं रघुनाथस्य शतकोटिप्रविस्तरम्' इत्यनुसारं विदुषां मतमस्ति यद् वाल्मीकिमुनिना रामायणकथा शतकोटिश्लोकेषु निबद्धाऽऽसीत्। पद्मपुराणीयपातालखण्डस्यायोध्यामाहात्म्यवर्णनप्रसङ्गेऽपि **'तत्र स वर्णयामास राघवं ग्रन्थकोटिभिः'**। नागेशभट्टेनास्यार्थः स्पष्टयता प्रोक्तं यद् महामुनिना वाल्मीकिना शतकोटिश्लोकानां रामकथा लिपिबद्धा कृताऽऽसीत्, या ब्रह्मलोकं गता। केवलं कुशीलवद्वारा अधीता २४००० श्लोका एवावशिष्टाः, ये वाल्मीकिरामायणरूपेणावशिष्टाः कथयन्ते।

रामायणे भौगोलिकपरिवेशः

भूगोलसम्बन्धिनो ज्ञानभाण्डारस्योपलब्धयोऽप्यस्मिन्नार्षे महाकाव्ये प्रचुरमात्रायां विद्यन्ते। सीतान्वेषणाय चतुर्दिक्षु गच्छतो वानरयूथपतीन् प्रति सुग्रीवेण विभिन्नदेशनद-नदीवन-पर्वत-समुद्र-वनस्पति-जनपद-जलवायुप्रभृतीनां सङ्केतः कृत आसीत्, यस्य भौगोलिकसत्यता साम्प्रतं स्पष्टं प्रतीयते।

---

१. जर्मन ओरियन्टल जर्नल, भाग-३, पृ० ३७९, रामायण भाग १० भूमिका।

२. दस रामायण पृ० ४५। ३. रामकथा १२०-१३३।

४. (क) याकोबी-दस० पृ० ८८। (ख) विन्टरनित्स-हि० ई० लिट्रेचर, भा० १, पृ० ४०९।
(ग) हिलर-हिष्ट्री आफ इन्डिया, भा० २, पृ० ७२।
(घ) दिनेशचन्द्रराय-दि बंगाली रामायण, पृ० १०१।

५. रामकथा, पृ० १४२।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

रामायणसम्बन्धिभूगोलस्य भृशमनुसन्धानं सञ्जातमस्ति। कनिंघममहोदयस्य 'एन्सेन्ट डिक्सेनरी' नामके कोषग्रन्थे देमहोदयस्य 'ज्यागरफिकल डिक्सेनरी' नामके कोषे चैतद्विषये भृशं विचारपूर्णमनुसन्धानं महते उपकाराय सिध्यति। केचिदनुसन्धातारः स्वतन्त्रान् निबन्धानपि न्यभान्त्सुः। लन्दननगरस्थ 'एशियाटिक सोसाइटी जर्नल' नामकपत्रिकायामप्येतद्विषयक एको महत्त्वपूर्णो निबन्धो दृष्टिगोचरीभवति। पं० गिरिशचन्द्रकर्तृके वेदधरातलाख्ये ग्रन्थेऽपि समीचीना सामग्री समवलोक्यते। लङ्काविषयकास्त्वनेके निबन्धाः सन्ति। 'सर्वेश्वरः'[1] पत्रिकायामेकस्मिन् निबन्धे 'मालद्वीप' एव लङ्केति पक्षः पोषितः। केचित्तु लङ्का विध्वस्ता महासागरे मग्ना दुर्ज्ञेया चेति मन्यन्ते।

वाल्मीकीयरामायणस्य बालकाण्डे द्वात्रिंशतितमे सर्गे राज्ञः कुशस्य कुशाम्ब-कुशनाभ-अमूर्तरजः-वसुनामकैश्चतुर्भिः पुत्रैः पितुराज्ञया स्थापितेषु चतुर्षु कौशाम्बी-महोदय-धर्मारण्य-गिरिव्रजनामकेषु नगरेषु या कौशाम्बीपुरी, सा वर्तमानः 'कोसम' नामको ग्राम एव। य इदानीं प्रयागान्नैऋत्ये कोणे सप्तक्रोशं भूभागमतीत्य विद्यते। महोदयं नाम नगरं तु तदधिपस्य कुशनामकस्य कन्याकानां वायुशापेन कुब्जात्वात् कान्यकुब्जनाम्ना ख्यातिमगमत्। कान्यकुब्ज एव क्रमेणापभ्रंशतां गत इदानीं 'कन्नौज' इति नाम्ना परिणतो जातः। धर्मारण्यं तु सुप्रसिद्धा गया पुर्येवास्ति। गिरिव्रजस्तु विहारप्रान्ते **'राजगृह'** (राजगिरि) इति नाम्ना प्रसिद्धं तीर्थभूतं स्थानमेव वर्तते।[1]

महात्मनो वसोरियं गिरिव्रजनामिका राजधानी वसुमती इत्याख्या प्रसिद्धा। अस्याश्चतुर्दिक्षु पञ्च श्रेष्ठतमाः पर्वताः सुशोभन्ते। रमणीया सोणनदी दक्षिणपश्चिमतः प्रवहन्ती मगधभूभागे प्रविशति। अतोऽत्रैषा सुमागधी नाम्ना विख्याता। इयं हि एषां पञ्चानां पर्वतानां मध्ये मालावत् सुशोभते।

सैषा वसुमती नाम वसोस्तस्य महात्मनः।
एते शैलवराः पञ्च प्रकाशन्ते महात्मनः॥
सुमागधी नदी रम्या मागधान् विश्रुता ययौ।
पञ्चानां शैलमुख्यानां मध्ये मालेव शोभते॥

पूर्वस्मिन् काले देवतानां प्रयत्नैर्निर्मितौ वाल्मीकीयरामायणस्य बालकाण्डे चतुर्विंशे सर्गे वर्णितौ मलदकरूषाख्यौ[2] जनपदौ तु सम्प्रति विहारप्रान्ते वर्तमानस्यारण्य(आरा)जन-

---

१. कुशाम्बस्तु महातेजाः कौशाम्बीमकरोत् पुरीम्।
कुशनामस्तु धर्मात्मा पुरं चक्रे महोदयम्॥ ६॥
अमूर्तरजसो नाम धर्मारण्यं महामतिः।
चक्रे पुरवरं राजा वसुनाम गिरिव्रजम्॥ ७॥

२. मलदाश्च करूषाश्च देवनिर्माणनिर्मितौ।
पुरा वृत्रवधे राम! मलेन समभिप्लुतम्।
मलदाश्च करूषाश्च ममाङ्गमलधारिणौ॥
इमौ जनपदौ स्फीतौ ख्यातिं लोके गमिष्यतः॥ (वा० रा० २४।१८-२२-२३)

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

पदस्य पश्चिमोत्तरदिग्वर्तिनि भूभाग एवास्ताम् । पुरा वृत्रासुरस्य वधानन्तरं देवराजो मलेन लिप्तो जातः, क्षुधावशेनाक्रान्तो ब्रह्महत्या च तदन्तरमाविष्टा । ततो देवैस्तपोधनैर्महर्षिभिश्च मलिनमिन्द्रं गङ्गाजलेन स्नापयित्वा तन्मलं कारुषं च दूरीकृतम् । महेन्द्रस्य शरीराद् मलकारुषयोः निर्गमनानन्तरं स पूर्ववन्निर्मलो निष्करुषश्चाभवत् । तत्कालादेव इमौ भूभागौ मलदकारुषनाम्ना विख्यातिं गतौ ।

पञ्चनदप्रान्ते विपाशाशतद्र्वोरन्तरालेऽवस्थितो भूभाग एव पुरातनः केकयो जनपद इति बहूनां विदुषां सम्मतम् । केचित्तु 'गजनी' नामकं स्थानं केकयं मन्यन्ते, तन्नातिश्रद्धेयम्, तस्य प्रदेशस्य गान्धारदेशान्तर्गतत्वात् । केचन वितस्तातटवर्ती कीकनाख्यो भूभाग एव 'केकयः' इति मन्यन्ते ।

वाल्मीकेराश्रमो जाह्नव्या अविदूरतः तमसातटनिकट एवासीदिति बालकाण्डे द्वितीये सर्गे तृतीये श्लोके तथैव वर्णनादवगम्यते[1] । नारदवाल्मीकिसंवादकाले सोऽत्रैवासीदिति सुस्पष्टम् । श्रीरामस्य चित्रकूटवासकाले तु चित्रकूटसमीपेऽपि तस्याश्रम आसीत् । सीतारामलक्ष्मणानां तत्राभिगमस्य वर्णनाद् विज्ञायते । सीतापरित्यागकाले स गङ्गातटनिकटवर्तिनि निजे कस्मिंश्चिदाश्रमे निवसति स्मेति विज्ञायते । उत्तरकाण्डे एकोनपञ्चाशत्तमे सर्गेऽर्घ्यमादाय जाह्नवीतटे सीतासमीपे तदागमनस्य वर्णनात्[2] । अयमेवाश्रम इदानीं 'विठूर'नाम्ना प्रसिद्धिमुपेतः । शत्रुघ्नस्य मथुरायात्राकाले मार्गे तदाश्रमे रात्राववस्थानस्य वर्णनादप्येतदेव मतं पुष्यति ।

शासनप्रणाली

रामायणे आदर्शमयी प्राचीनतमा भारतीया राजनीतिः परांकोटिमुपगता दृष्टिगोचरीभवति । तत्कालीनं शासनं च साधारणतो राजतन्त्रमासीत् ।

अथापि महान्तो ज्ञानिनोऽनुभाविनः सत्कुलोत्पन्ना विद्वांसो मन्त्रिणो नियुज्यन्ते स्म । ये राजसञ्चालनकार्ये राज्ञे सत्परामर्शं प्रददति स्म । सहैव कस्याश्चिद् महत्त्वपूर्णसमस्यायाः समाधानाय प्रजावर्गस्यापि सम्मतिर्गृह्यते स्म । समये समये सर्ववर्गस्य विशिष्टपुरुषानाहूय तेषां मतमपि गृहीत्वा समाद्रियते स्म । राज्ञा दशरथेन रामराज्याभिषेकोपक्रमावसरे समेषां सम्मतिर्गृहीता तथा प्रजावर्गस्य मनोभावसम्मानं विशेषरूपेण कृतमासीत् ।

स हि रामराज्याभिषेकार्थमेकां सभामायोज्य तत्रोपविष्टान् सभ्यान् सम्बोध्योक्तवान्—सभासदः ! जानन्त्येव भवन्तो यद् मत्पूर्वजैः राज्यमेतत् प्रेम्णा पुत्रवत् परिपालितम् । आत्मपूर्वजाचरितं मार्गमनुचरन्नहमपि प्रजाजनहिते जागरूको निरन्तरं यथाशक्ति प्रजापालनमकार्षम् । भवतामनुमतिं गृहीत्वा सकलकार्यसाधनसमर्थं धर्मभृतां वरिष्ठं सर्वगुणश्रेष्ठं ज्येष्ठं

---

१. स मुहूर्तं गते तस्मिन् देवलोकं मुनिस्तदा ।
जगाम तमसा तीरं जाह्नव्यास्त्वविदूरतः ॥ (वा० रा० १।२।३)

२. अर्घ्यमादाय रुचिरं जाह्नवीतीरमागमत् ।
ददर्श राघवस्येष्टां सीतां पत्नीमनाथवत् ॥ (वा० रा० ७।४९।९)

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तनयं श्रीरामं यौवराज्येऽभिषिच्य विश्रमितुं वाच्छामि । इत्थं राज्ञो दशरथस्याभिप्रायं निशम्य सर्वे ब्राह्मणा नगरनिवासिनो जना जनपदप्रधानाश्च सहर्षं प्रोचुः—

रामामिन्दीवरश्यामं सर्वशत्रुनिबर्हणम् ।
पश्यामो यौवराज्यस्थं तव राजोत्तमात्मजम् ॥ (१।२।५३)
तं देव ! देवोपममात्मजं ते सर्वस्य लोकस्य हिते निविष्टम् ।
हिताय नः क्षिप्रमुदारजुष्टं मुदाभिषेक्तुं वरद ! त्वमर्हसि ॥ (१।२।५४)

भगवान् श्रीरामस्तु प्रत्येककर्मणि जनताया मनोभावं सर्वोपरि मनुते स्म । एकस्यैव साधारणस्य जनस्य मुखाद् मिथ्यावादं निशम्य सर्वसमक्षमग्नौ परीक्षिताया आसन्नप्रसवाया प्राणप्रियाया अपि पत्न्याः परित्यागं कृतवान् । रावणेन सह युद्धविषयकेषु कार्येषु विशेषज्ञानां वानरभल्लूकानामपि परामर्शं गृहीत्वा कार्यमारभते स्म । एवं श्रीरामो जनमतस्य पोषक इच्छुकश्च राजाऽऽसीत् । एवं राजतन्त्रेऽपि गणतन्त्रस्य पर्याप्तः प्रभाव आसीत् ।

यद्यपि त्रिलोकविजयी लङ्काधिपतीः राक्षसराजो रावण आसुरप्रकृतेर्निरङ्कुशो राजाऽऽसीत्, तथापि तस्मिन् विद्वत्ता-नीतिज्ञतादिसद्गुणानामभावो नास्ति । सोऽपि महत्त्वपूर्णकार्यारम्भसमये मन्त्रिणां राज्यसभासदां मतं गृह्णाति स्म । यदा अक्षयकुमारस्य निधनानन्तरं मेघनादेन नागपाशे बध्वा रावणसभायां हनुमानानीतः, तदा तेन राक्षसराजेन हनुमतो वधायादेशः प्रदत्तः, परं सभायामुपविष्टो वार्तालापकुशलो विभीषणः स्वमतमुपस्थापितवान्—महाराज ! क्रोधं परिहाय समयोचिते कर्तव्ये ध्यानं देहि —

क्षमस्व रोषं त्यज राक्षसेन्द्र ! प्रसीद मे वाक्यमिदं शृणुष्व ।
वधं न कुर्वन्ति परावरज्ञा दूतस्य सन्तो वसुधाधिपेन्द्राः ॥ (५।५२।५)

तस्माद्धर्मविरुद्धो लोकाचारदृष्ट्या निन्दितो दूतवधो नोचितः । तदर्थमनेके दण्डाः शास्त्रेषु सन्ति निर्दिष्टाः । तेषु कश्चनान्यो दण्डो देयः, परं प्राणवधो न विधेयः । एवं तस्य समुचितं विचारमाकर्ण्य वधादेशदुराग्रहं परित्यज्य हनुमतो लाङ्गूलं दग्धुं समादिदेश—

कपीनां किल लाङ्गूलमिष्टं भवति भूषणम् ।
तदस्य दीप्यतां शीघ्रं तेन दग्धेन गच्छतु ॥ (५।५३।३)

रामायणे गायत्रीविग्दर्शनम्

आदिकाव्ये वाल्मीकीयरामायणे चतुर्विंशतिसहस्रश्लोकाः सन्ति, ये चतुर्विंशत्यक्षराया गायत्र्या अर्थं बोधयन्ति, तात्पर्यं विशदयन्ति, रहस्यं स्फोटयन्ति, वास्तविकं भावं च स्पष्टयन्ति । प्रतिसहस्रश्लोकं वेदमातुर्गायत्र्या एकैकमक्षरमुपात्तमस्ति । तद्यथा—

१. (त) तपः स्वाध्यायनिरतं तपस्वी वाग्विदां वरम् ।
नारदं परिपप्रच्छ वाल्मीकिर्मुनिपुङ्गवम् ॥ (बालकाण्डे—१।१)

२. (स) स हत्वा राक्षसान् सर्वान् यज्ञघ्नान् रघुनन्दनः ।
ऋषिभिः पूजितस्तत्र यथेन्द्रो विजये पुरा ॥ (बालकाण्डे—३०।२४)

 CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

३. (वि) विश्वामित्रस्तु धर्मात्मा श्रुत्वा जनकभाषितम् ।
वत्स राम ! धनुः पश्य इति राघवमब्रवीत् ॥ (बालकाण्डे–६७।१२)

४. (तु) तुष्टावास्य तदा वंशं प्रविश्य स विशांपतेः ।
शयनीयं नरेन्द्रस्य तदासाद्य व्यतिष्ठत ॥ (अयोध्याकाण्डे–१५।२०)

५. (व) वनवासं तु सख्याय वासांस्याभरणानि च ।
भर्तारमनुगच्छन्त्यै सीतायै श्वसुरो ददौ ॥ (अयोध्याकाण्डे–४०।१४)

६. (र) राजा सत्यं च धर्मस्य राजा कुलवतां कुलम् ।
राजा माता पिता चैव राजा हितकरो नृणाम् ॥ (अयोध्याकाण्डे–६७।३४)

७. (नि) निरीक्ष्य सुमुहूर्तं तु ददर्श भरतो गुरुम् ।
उटजे राममासीनं जटामण्डलधारिणम् ॥ (अयोध्याकाण्डे–९९।२५)

८. (य) यदि बुद्धिः कृता द्रष्टुमगस्त्यं तं महामुनिम् ।
अद्यैव गमने बुद्धिं रोचयस्व महायशः ॥ (अरण्यकाण्डे–११।४४)

९. (भ) भरतस्यार्यपुत्रस्य श्वश्रूणां मम च प्रभो ! ।
मृगरूपमिदं व्यक्तं विस्मयं जनयिष्यति ॥ (अरण्यकाण्डे–४३।१७)

१०. (ग) गच्छ शीघ्रमितो राम ! सुग्रीवं तं महाबलम् ।
वयस्यं तं कुरु क्षिप्रमितो गत्वाद्य राघव ! ॥ (अरण्यकाण्डे–७२।१७)

११. (दे) देशकालौ भजस्वाद्य क्षममाणः प्रियाप्रिये ।
सुखदुःखसहः काले सुग्रीववशगो भव ॥ (किष्किन्धाकाण्डे–२२।२०)

१२. (व) वन्द्यास्ते तु तपःसिद्धास्तपसा वीतकल्मषाः ।
प्रष्टव्या चापि सीतायाः प्रवृत्तिर्विनयान्वितैः ॥ (किष्किन्धाकाण्डे–४३।३४)

१३. (स) स निर्जित्य पुरीं श्रेष्ठां लङ्कां तां कालरूपिणीम् ।
विक्रमेण महातेजा हनूमान् कपिसत्तमः ॥ (सुन्दरकाण्डे–४।१)

१४. (ध) धन्या देवाः सगन्धर्वाः सिद्धाश्च परमर्षयः ।
मम पश्यन्ति ये नाथं रामं राजीवलोचनम् ॥ (सुन्दरकाण्डे–२०।४१)

१५. (म) मङ्गलाभिमुखी तस्य सा तदासीद् महाकपेः ।
उपतस्थे विशालाक्षी प्रयता हव्यवाहनम् ॥ (सुन्दरकाण्डे–५३।२७)

१६. (हि) हितं महार्थं मृदुहेतुसंहितं
व्यतीतकालायति सम्प्रतिक्षमम् ।
निशम्य तद्वाक्यमुपस्थितज्वरः
प्रसङ्गवानुत्तरमेतदब्रवीत् ॥ (लङ्काकाण्डे–१०।२७)

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

१७. (ध) धर्मात्मा रक्षसां श्रेष्ठः सम्प्राप्तोऽयं विभीषणः ।
लङ्कैश्वर्यं ध्रुवं श्रीमानयं प्राप्नोत्यकण्टकम् ॥ (लङ्काकाण्डे–४१।६९)

१८. (यो) यो वज्रपाताशनिसन्निपातात्
न चुक्षुभे चापि चचाल राजा ।
स रामबाणाभिहतो भृशार्त्तः
चचाल चापं च मुमोह वीरः ॥ (लङ्काकाण्डे–५९।१३९)

१९. (य) यस्य विक्रममासाद्य राक्षसा निधनं गताः ।
तं मन्ये राघवं वीरं नारायणमनामयम् ॥ (लङ्काकाण्डे–७२।११)

२०. (न) न ते ददृशिरे रामं दहन्तमरिवाहिनीम् ।
मोहिताः परमास्त्रेण गान्धर्वेण महात्मना ॥ (लङ्काकाण्डे–९४।२६)

२१. (प्र) प्रणम्य देवताभ्यश्च ब्राह्मणेभ्यश्च मैथिली ।
बद्धाञ्जलिपुटा चेदमुवाचाग्निसमीपतः ॥ (लङ्काकाण्डे–१२०।२३)

२२. (च) चालनात् पर्वतस्यैव गणा देवस्य कम्पिताः ।
चचाल पार्वती चापि तदाश्लिष्टा महेश्वरम् ॥ (उत्तरकाण्डे–१६।२७)

२३. (द) दाराः पुत्राः पुरं राष्ट्रं भोगाच्छादनभोजनम् ।
सर्वमेवाविभक्तं नौ भविष्यति हरीश्वरः ॥ (उत्तरकाण्डे–५१।२२)

२४. (या) यामेव रात्रिं शत्रुघ्नः पर्णशालामुपाविशत् ।
तामेव रात्रिं सीताऽपि प्रसूता दारकद्वयम् ॥ (उत्तरकाण्डे–६६।१)

तत्पाठफलं यथा—

इदं रामायणं कृत्स्नं गायत्रीबीजसंयुतम् ।
सकृत्पठनमात्रेण सर्वपापैः प्रमुच्यते ॥
वाल्मीकेर्मुनिसिंहस्य कवितावनचारिणः ।
शृण्वन् रामकथानादं को न याति परांगतिम् ॥
वामे भूमिसुता पुरश्च हनुमान् पश्चात्सुमित्रासुतः
शत्रुघ्नो भरतश्च पार्श्वदलयोर्वाय्वादिकोणेषु च ।
सुग्रीवश्च विभीषणश्च युवराट् तारासुतो जाम्बवान्
मध्ये नीलसरोजकोमलरुचिं रामं भजे श्यामलम् ॥

आधुनिकी कल्पना

रामचन्द्रस्य रावणेन सह युद्धम् ऋग्वेदीयप्राचीनेन्द्रवृत्रासुरस्यान्तिमं रूपं वर्तते। इत्थमनेकेषामालोचकानां मतानुसारं रामायणं कल्पनाया भूमौ जातमस्ति। वास्तविकरूपेण

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

रामायणस्यैतिहासिकतायां सन्देहलेशो न विधेयः। यतो हि बीजरूपेणैतत् स्वीकर्तुं शक्यते यद् रामोऽयोध्याया इक्ष्वाकुवंशस्यैतिहासिको महापुरुषः। तस्य रावणेन सह युद्धे मर्यादाबद्धैः शान्तिकार्यैश्च जनतासु गाढप्रभावो परिलक्ष्यते। अत्र नास्ति काचित् संशीतिर्यद् रामायणस्य कथावस्तु विविधधर्मविषयकैः काल्पनिकैः विश्वासैरोतप्रोतमस्ति। अथापि रामस्यैतिहासिकतायां सन्देहो नास्ति, अपि तु युक्तिमूलकः प्रामाणिकश्चास्ति। एतदतिरिक्तेषु जैनबौद्धसाहित्येषु रामो महापुरुषरूपेणाङ्कितोऽस्ति।

कतिपयानां पाश्चात्यविदुषां तदनुयायिनोऽनेकेषां समालोचकानां दृष्टौ रामायणमनेकव्यक्ते रचना विद्यते। तेषामनुमानमस्ति यद् वाल्मीकिरामायणाद् पूर्वमपि रामकथासम्बन्धीन्यनेकान्याख्यानानि प्रचलितान्यासन्। येषामाधारेण वाल्मीकिना स्वरामायणस्य रचना कृता, अपि च बालकाण्डस्य प्रथमतृतीययोः सर्गयोर्या विषयसूची प्रदत्ताऽस्ति, तत्रोत्तरकाण्डस्योल्लेखो नास्ति। तथाऽनेकप्रक्षेपकातिरिक्तं विभिन्नभागेषु परस्परं विसंवादस्थलमालोक्यते। परवर्तिस्थलेषु रामो विष्णोरवतारः स्वीकृतोऽस्ति। यद्यपि स पूर्ववर्तिषु काण्डेषु पुरुषोऽभिमतोऽस्ति। अशंसयं रामस्य देवत्वकल्पनायां कियानपि समयोऽपेक्षितो विद्यते।

केचित्तु अयोध्याकाण्डतो युद्धकाण्डपर्यन्तं केवलं पञ्च काण्डानि रामायणस्य मौलिकं रूपं मन्यते, यतो हि प्रथमकाण्डे प्रोक्तानां कियतां विषयाणां खण्डनमनन्तरेषु काण्डेषु जातमस्ति।[1]

लङ्काकाण्डस्यान्ते ग्रन्थान्तसूचनापि प्रतीयते। तथोत्तरकाण्डे कियतामेवंविधानामाख्यानानामुल्लेखो वर्तते। येषां सङ्केतः पूर्वकाण्डेषु न विद्यते। अतोऽस्य रचना समये समये जाता, पश्चात् संयोज्य सप्त काण्डानि जातानि। रामचरितसम्बन्धिन्योऽनेका गाथाः सूतद्वारा समये समये गीयन्ते स्म। अस्य काण्डद्वयं प्रक्षिप्तं मनुते[2]। कालान्तरे तासामेवाधारेण रामायणस्याधुनिकं रूपं निर्मितम्। जैकोबीविचारे सूतमागधवन्दिनामनेकायाः परम्पराया वास्तविकं भागमङ्गीकृत्य रामायणे बहवो भागाः सम्मेलिताः, येन तत्र विपुलं परिवर्द्धनं जातम्, किन्त्वेतद्विपरीतं वदन् पाश्चात्यः परमविवेचको विद्वान् मैकडानल उपलब्धं सम्पूर्णं रामायणं वाल्मीकिकृतमेव मन्यते। तदनुसारमेतस्य रचना पूर्वं भारते जाताऽस्ति[3]।

उपसंहारः

सकललोककल्याणकारिणा महर्षिणा वाल्मीकिना भारतीयसंस्कृतेः सार्वभौमं लौकिकं च रूपमुपस्थापयता श्रीरामचरितवर्णनद्वारा समस्तस्य विश्वस्य कृते आदर्शमयं मानवजीवनं समुपस्थापितम्, येन समेषां मानवानामिहामुत्र च सर्वविधं हितं स्यात्। रामायणद्वाराऽनुप्राणितानां कृतीनामनुशीलनेन सहसा प्रत्यक्षीभवति रामायणस्य समुज्ज्वलं वैशिष्ट्यम्। संस्कृतसाहित्यकाव्यकारैर्विद्वद्भिः स्वकृतीनां कृते रामायणस्य दायं गृहीत्वा तल्लोकप्रियतोत्कृष्टकाव्यरचनयोर्महत्त्वं संसाधितम्। महामुनेर्वाल्मीकेः कवित्वप्रतिभाया अयमासीत् सर्वोत्तमो

---

१. याकोबी—दस रामायण पृ० ८८।
२. रा० पृ० १२०–१३३।
३. हिस्ट्री आफ इन्डियन लिट्रेचर, पृ० ३११।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

गुणो यत् तदनुभूतौ तथा तदनुकरणे संस्कृतसाहित्यविश्वविख्यातमजायत। महर्षेर्वाल्मीकेरिदं रामायणं महाकाव्यमादर्शमयमानवजीवनस्य व्यवहारोपदेशस्याचार्यः, सदाचारपालनहेतुकं सरसं धर्मशास्त्रम्, प्राचीनसंस्कृतेः समुज्वलं चित्रभवनम्, नीतिशास्त्रोपदेशकम्, अध्यात्मशास्त्रस्य हृदयग्राहि कौतुकवर्द्धकं प्रेक्षागृहमस्ति, यदवलोकनेनानुशीलनेन नूनं मानवजीवनं सफलं भवति। अत एव भगवान् व्यासदेवः पूर्वं रामायणमधीत्यैव पुराणमहाभारतयोः प्रणयने प्रवृत्तः। तथा चोक्तं बृहद्धर्मपुराणे ब्रह्मव्यासवर्णनप्रसङ्गे—

पठ रामायणं व्यास! काव्यबीजं सनातनम्।
यत्र रामस्य चरितमहं तत्र च शक्तिमान्॥
रामायणं पाठितं मे प्रसन्नोऽस्मि कृतस्त्वया।
करिष्यामि पुराणानि महाभारतमेव च॥

एवञ्च भारतीयसंस्कृतेः प्रमुखसिद्धान्तानां शिक्षादायकं श्रीमताऽऽदिकविना वाल्मीकिना विरचितं कुशलवाभ्यां गीतं पावनाख्यानं रामायणं सकललोकमशोकं कुर्वाणं चिरात् समेषां सचेतसां चेतश्चमत्करोति। परिपुनाति च सर्वतोभावेन भूमण्डलवासिनां मनांसि, विकासयति च रामोपासकानां भक्तशिरोमणीनां मानवमणीनां हृदयसरोजानि निरन्तरम्---

श्रीमद्रामायणी गङ्गा पुनाति भुवनत्रयम्।
वाल्मीकिगिरिसम्भूता रामाम्भोनिधिसङ्गता॥

● ● ●

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

श्रीमद्रुद्रचन्द्रविरचिता

उषारागोदया

[नाटिका]

सम्पादकौ:

डॉ० गौरीनाथशास्त्री

श्रीजनार्दनपाण्डेयश्च

सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयः

वै० सं० २०३४

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

भूमिका

अथेयमुपस्थाप्यते विपश्चितां पुरस्ताद् **उषारागोदया** नाम नाटिका। अस्याः प्रणेता कूर्माचलाधीश्वरो राजा रुद्रचन्द्रदेव आसीदिति सरस्वतीभवनस्थ(४२००२ संख्याक)मातृकाया निम्नाङ्कितपुष्पिकातः प्रतीयते—

''इति श्री कूर्मगिरिवरेश्वर–श्रीमत्प्रतापवारितारितमोभास्कर–श्रीमद्रुद्रचन्द्रदेवविरचितोषारागोदया नाम नाटिका परिपूर्णतामगात्''।

मातृकेयम् १६३९ वैक्रमाब्दे बान्धवगढ़दुर्गे महाराजाधिराज–श्रीरामचन्द्रदेवराज्यकाले प्रतिलिपीकृतेति तस्याः प्रामाणिकत्वे नास्ति सन्देहः।

कूर्माचले चन्द्रशासनारम्भः

पुरा कूर्माचले हैहय(कार्तवीर्य)वंश्यानाम् (भाषायां कत्यूरीति प्रसिद्धानाम्) राज्ञां शासनमासीत्, कान्यकुब्जप्रदेशे चेतिहासप्रसिद्धस्य जयचन्द्रस्य वंशजेषु नरेन्द्रयशःसोमपदवीकः प्रतिष्ठानपुराधीशः श्रीयशोवर्मा सुप्रसिद्ध एवेतिहासविदाम्। यस्य सभामण्डपं महाकविर्भवभूतिरप्यलञ्चकार। तस्यैव यशोवर्मणश्चतुर्ष्वात्मजेष्वन्यतमः सोमचन्द्राख्यः ''उत्तरां दिशं प्रयातेन भवता राज्यं यशश्च लप्स्यते'' इति केनचिज्ज्योतिर्विदा निर्दिष्टः स्वगुरुणा हरिहरेण सह श्रीबदरीशयात्रार्थं प्रस्थितः, यात्रातः प्रतिनिवर्तमानः सोमचन्द्रस्तदानीन्तनस्य कूर्माचलाधीश्वरस्य कार्तवीर्यवंशजस्य श्रीवैचलदेवस्य तनयामुदूढवान्, यौतुके च महत्क्षेत्रं लब्ध्वा तत्रैवोवास। तत्र तेन चम्पकावतीनगरी (या साम्प्रतं चम्पावत इत्युच्यते) निर्मिता[1], शनैः शनैश्च

---

१. द्रष्टव्यं श्रीमनोरथशास्त्रिप्रणीतायां सीमामीयपाण्डेयवंशावल्यां निम्नाङ्कितं ताम्रपत्रोद्धरणम्—

श्रीबदरीशयात्रायै शालिवाहनवंशजः।
आगतः सोमचन्द्राख्यः प्रतिष्ठानेशदारकः॥
सप्ताङ्गसहितो विद्वद्धरीहरपुरोधसा।
यो लब्धवान्नृपात् सूर्यवंशोत्थादर्जुनात्मजाम्॥
विवाहे कमठाद्रिञ्च शाकेऽद्रि-अभ्र-अङ्ग (६०७) संज्ञके।
निर्ममौ सुदृढं दुर्गं नगरीं चम्पकावतीम्॥ इति।

एवमेव हरिहरवंशजश्च भगीरथात्मजः पद्मदेवो रघुवंशटीकायां जगच्चन्द्रचन्द्रिकाख्यायां स्ववंशवर्णनप्रसङ्गेनोल्लिखति—

स्वस्तिश्रीमन्महाराजाधिराजः शालिवाहनः।
योऽधुना शाककृत्तस्य कुले भूपो ह्यजायत॥
नरेन्द्रयशःसोमाख्यश्चत्वारस्तत्सुता बभुः।
श्रीबदरीशयात्रायां सोमेन्दुः कौर्म्यमागतः॥
सप्ताङ्गसहितो विद्वद्धरीहरपुरोधसा।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

स्वशक्त्युपचयं कुर्वता समग्रमपि कार्तवीर्यवंश्यानां क्षीयमाणानां राज्यं स्वायत्तीकृतम्। तदनन्तरं च सर्व एव तद्वंश्याश्चन्द्रान्ता प्रायशो द्विषष्टिमिता राजानः सहस्रवर्षं यावत् (७०० तः १७९० ई०) कूर्माचले शासनमकार्षुः[1] ।

राजा रुद्रचन्द्रदेवः

अस्मिन्नेव सोमचन्द्रप्रवर्तिते वंशे पञ्चचत्वारिंशत्तममपत्यं राजा रुद्रचन्द्रदेवोऽभवत्। अयं च १४९० शकाब्दे (१५६८ ई०) सिंहासनमधिरूढः, १५१९ शकाब्दे (१५९७ ई०) च दिवं प्रयात इति कूर्माचलेतिहासतो विज्ञायते[2] । एवमेकोनत्रिंशद्वर्षं यावदयं कूर्माचलप्रदेशं शशास । समग्रेऽप्येतस्मिन् चन्द्रकुले एतादृशः प्रतापी, राज्यविस्तारकः, विद्वान्, धार्मिकः, दानवीरः, राजनीतिपटुः संस्कृतानुरागी च न कोऽप्यपरो नृपोऽभवत् । भारतस्य विविधप्रान्तेभ्योऽनेन विद्वांसः कूर्माचले आमन्त्रिता इतश्च स्वकीयव्ययेन संस्कृताध्ययनार्थं काशी-कश्मीरादिषु प्रेषिताः । स्वदेशेऽपि संस्कृताध्ययनस्य व्यवस्था कृता । वृद्धकेदारेश्वर-यागेश्वरादिविविधदेवालयनिर्माणं तत्कृते च बहुशो ग्रामादिदानमनेन कृतम् । एतत्प्रदत्तदानादिविषयकाणि ताम्रपत्राणि प्रचुरमात्रायामुपलभ्यन्ते । जागेश्वरादिमन्दिरस्थशिलालेखेष्वस्य महद्यशो गीयते ।

विद्वत्प्रियोऽयं स्वयमपि संस्कृतस्य प्रख्यातः पण्डित आसीदित्येतत्प्रणीतनिम्नाङ्कितग्रन्थेभ्यः प्रतीयते—

१. **श्यैनिकशास्त्रम्**[3]—प्रायः चतुःशतश्लोकात्मके लघुकायेऽस्मिन् ग्रन्थे १. कर्मानुषञ्जनम्, २. व्यसनहेयता, ३. मृगयाविवेचनम्, ४. श्येनविवेचनम्, ५. चिकित्साधिकारः, ६. श्येनपातेतिकर्तव्यता, ७. मृगयानन्तरेतिकर्तव्यतेति सप्तसु परिच्छेदेषु मृगयागुणास्तत्प्रकारस्तत्फलं च सम्यग् विवेचितम् । मध्ये च प्रसङ्गतो व्यसनानां गणना तल्लक्षणान्यपि निगदितानि, श्येनादिखगग्रहणप्रकारः, तद्द्वारा मनोरञ्जनविधयः, तज्जातयः, तद्युद्धकला, तेषां भोज्यपदार्थाः, तदुपरि ऋतूनां प्रभावश्चेत्याद्युपवर्ण्यान्ते मृगयानन्तरेतिकर्तव्यता विवेचिता। राजनिर्मितत्वादस्य ग्रन्थस्य मृगयाविहारः स्वानुभवमाधृत्योक्तः परां प्रामाणिकतां भजते। पुष्पिकायां च—

"इति श्रीकूर्माचलाधिपति–रुद्रदेवविरचिते श्यैनिकशास्त्रे मृगयानन्तरेतिकर्तव्यताख्यः सप्तमः परिच्छेदः" इत्युट्टङ्कितम् ।

२. **त्रैवर्णिकधर्मनिर्णयः**—ग्रन्थोऽयं नास्मद्दृष्टिपथमागतः[4] ।

३. **ययातिचरितम्**—इदं च नाटकं ययातेः प्रसिद्धं पौराणिकमुपाख्यानमाधृत्य निर्मितम् ।

---

१. द्र०—"कुमांऊँ का इतिहास"—बद्रीदत्तपाण्डे ।

२. द्र०—"कुमांऊँ का इतिहास"—बदरीदत्तपाण्डे एवं 'गजेटियर आफ कुमांऊँ'—एटकिन्सन ।

३. इदं च म० म० हरप्रसादशास्त्रिभिः सम्पाद्य 'रायल एशियाटिक सोसाइटी' कलिकातातः प्रकाशितम् ।

४. द्र०—"कुमांऊँ का इतिहास"—बद्रीदत्तपाण्डेय ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

४. **उषारागोदया नाटिका**—श्रीमद्भागवतादिपुराणप्रसिद्धमुषानिरुद्धयोः प्रसिद्धं कथानकं कविना नाटिकारूपेण निबद्धम्। तत्र तावत् "नाटिकासट्टकादीनां नायिकाभिर्विशेषणम्" इति लक्षणानुसारेण नायिकामुषामाश्रित्यैवोषारागोदयेतिनामैतस्याः। अपरञ्च यथोक्तं साहित्यदर्पणे—

> नाटिका क्लृप्तवृत्ता स्यात् स्त्रीप्राया चतुरङ्किका।
> प्रख्यातो धीरललितस्तत्र स्यान्नायको नृपः॥
> स्यादन्तःपुरसंबद्धा सङ्गीतव्यापृताऽथवा।
> नवानुरागा कन्याऽत्र नायिका नृपवंशजा॥
> संप्रवर्तेत नेतास्यां देव्यास्त्रासेन शङ्कितः।
> देवी भवेत् पुनर्ज्येष्ठा प्रगल्भा नृपवंशजा॥
> पदे पदे मानवती तद्वशः सङ्गमो द्वयोः।
> वृत्तिः स्यात् कैशिकी स्वल्पविमर्शाः सन्धयः पुनः॥
>
> (सा० द० ६।२६९–२७२)

पुराणेषु प्रसिद्धं कथानकं यत् शोणितपुराधीशस्यासुरराजस्य कन्योषा नाम स्वप्ने कमपि पुरुषं दृष्ट्वा तत्रात्यन्तमनुरक्ता जागरे च तमनवलोक्योद्विग्नाऽभवत्, कोऽसौ पुरुष इति ज्ञानाभावात्तं प्राप्तुमसमर्थामत एव खिन्नां तां परिज्ञाय तत्परिचारिकया चित्रलेखया जगतः प्रायः सर्वेषां प्रमुखपुरुषाणां चित्राणि तत्पुरस्ताद् निर्मितानि, यदानिरुद्धचित्रं तयावलोकितम्, तदैवोत्फुल्लनयनाऽयमेवासावित्युवाच, चित्रलेखया च स्वयोगबलेन द्वारकायां पर्यङ्के शयानोऽनिरुद्धः सुगुप्तेऽपि तदन्तःपुरे समानीतः। तत्र तयोरनुरक्तयोश्चिरं समागमोऽभवत्, कालान्तरे च 'कन्यकान्तःपुरे प्रविश्यानिरुद्धस्तत्सुतामुपभुङ्क्त' इति ज्ञातवता बाणेनासौ बद्धः। नारदमुखात् तद्वृत्तान्तं ज्ञात्वा श्रीकृष्णेनाभियातो बाणः शिवसाहाय्येन युद्धमकरोदित्यादि।[1]

परमनेन कविना तं स्वप्नवृत्तान्तं निखिलं विहायास्या घटनाक्रमो नाटकीयं संविधानञ्च नवीकृतमिवेति स्पष्टमेवात्र क्लृप्तवृत्तात्वम्, प्रायः षण्णां स्त्रीपात्राणामत्र प्रयुक्तत्वात् स्त्रीप्रायत्वम्, चतुरङ्किकात्वं तु स्फुटमेव, नायकस्यानिरुद्धस्य देवांशत्वाद् धीरललितत्वं च प्रसिद्धमेव। नृपत्वं तु नावश्यकं विश्वनाथकृतायां प्रभावतीनाटिकायां प्रद्युम्नस्य, मथुरादासकृतायां वृषभानुजायाञ्च श्रीकृष्णस्य नायकत्वेन दर्शनात्। नायिकाया अन्तःपुरसंबद्धात्वं नवानुरागात्वं नृपवंशजात्वमित्यादि सर्वमप्यग्रं वर्णितं कविनाऽत्र यथावत् प्रदर्शितम्, निश्चयेनैतद्वक्तुं शक्यते यदेतन्निर्माणावसरे श्रीहर्षप्रणीता रत्नावलीनाटिकाऽऽदर्शत्वेन कविबुद्धौ निहितासीदिति। नायिकायां गुप्तप्रणयनिवेदनं महादेव्या ईर्ष्यालुत्वं चित्रफलकवृत्तान्तः महादेव्या नायकनायिकयोः प्रणयव्यापारे प्रत्यूहोत्पादनम्, ऋतूत्सववर्णनं, दासीविदूषकयोर्वाक्कलहः, महादेवीद्वाराऽन्ते तयोर्विवाह इत्यादिघटनाक्रमो रत्नावलीं स्मारयति।

नाटिकायाः कथावस्तु

प्रथमेऽङ्के तावदर्धनारीश्वरवन्दनानन्तरं सूत्रधारो भगवता बाणो विजित इति हर्षोल्लासमग्नपौरजनसमक्षमुषारागोदयानाटिकामञ्चनं सूचयन् ग्रीष्मर्तुं प्रस्तौति, तदानीमेव बाणेन योद्धुं

१. द्र०—श्रीमद्भागवतम्, स्क० १०, अ० ६२–६३।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

प्रयातं भगवन्तं चिन्तयन्नुद्धवः प्रविशति । अद्य नारदोऽन्तःपुरमागत्योषानिरुद्धयोः परिणयं निष्प्रत्यूहं सम्पादयिष्यतीति विदितवृत्तान्तः सोऽकालमेव वसन्तर्तुप्रवर्तनाय दत्तमुनिं प्रार्थयितुं गच्छन् गिरिवरसहायमनिरुद्धमायान्तं विलोकयति ।

प्रचण्डातपतापसन्तप्तं कुमारं गिरिवरस्तापशान्तये रक्ताशोकमण्डपं नयति । तत्र च वियति यत्र कुत्रापि जलधरखण्डानागतान् वीक्ष्योषां चिन्तयन्तं कुमारमुद्विग्नमिवालक्ष्य उषायास्तत्रागमनसन्देशं कर्णे श्रावयति । प्रसन्नश्च कुमारस्तां प्रतीक्षमाणस्तिष्ठति । तदानीमेव देव्या रुक्मवत्या प्रेषिता चेटी रूपलेखा कुमारं हिन्दोलोत्सवमुपस्थातुं प्रार्थयति । अन्यमनस्क इव कुमारस्तत्र गच्छति । तावेकस्मिन्नेव हिन्दोले स्थितौ दोलयतः । नभसि जलधराणां वेगमुदीक्ष्योषाचिन्ताव्यथितस्वान्तो मा भूत् कालातिपात इति भिया कुमारो जलदवर्णनमिषेणोत्सवं समापयितुकाम इव लक्ष्यते, देवी च ज्ञाताभिप्रायेव रुष्टान्तःपुरं प्रयाति ।

द्वितीयेऽङ्के कुमारं प्रतीक्षमाणो गिरिवरस्तिष्ठति, उषानिरुद्धयोः परिणयवृत्तान्तस्य सत्यतामवबोद्धुं देव्या रुक्मवत्या प्रेषिता रूपलेखा उद्धवान्वेषणव्याजेन विदूषकमुपेत्य तदभिप्रायमवबुद्धच कुमारमागच्छन्तं वीक्ष्य गच्छति । विदूषकश्च कुमारस्याभिलषितार्थसिद्धिं सूचयति । अकाल एव वसन्ततुं विलोक्य वैतालिकमुखाद् वसन्तोत्सवं चाकर्ण्य मदनमहोत्सवदर्शनव्याजेनोषागमनं प्रतीक्षमाणः क्रीडापर्वतकं जिगमिषति, तदानीमेव रूपलेखा प्रमदोद्यानगतेनात्रभवता सहचरीसमारब्धो वसन्तोत्सवो द्रष्टव्य इति देव्या आमन्त्रणं निवेदयति । कुमारश्च विदूषकद्वितीयस्तत्र गच्छति, किन्तूषारागरञ्जितहृदयमन्यमनस्कमिव क्लान्तमिव च तमभिवीक्ष्य देवी रुष्टेवान्तःपुरं गच्छति । देवीरोषेण चिन्ताग्रस्तमिव तिष्ठन्तं दारुकिरागत्य श्रीकृष्णेन बाणो विजित इति वर्णयति, तेनैव विजयवृत्तान्तेन देवीं प्रसादयामीति कृत्वा कुमारोऽप्यन्तःपुरं गच्छति ।

तृतीयेऽङ्के देवर्षिर्नारदः पर्वतमुनिमुषायाः प्रमदोद्यानागमनप्रयासे चिरयन्तं विलोक्य साऽऽगता न वेति वेत्तुं मुनिकुमारकौ प्रेषयति, तौ च पर्वतं वहियानादवतरन्तीमुषां चावलोक्याकालवसन्तप्रादुर्भावाय दत्तमुनेः प्रतापं वर्णयन्तौ पर्वतेन सह गतौ, चित्रलेखाद्वितीया चोषा प्रमदोद्यानमागत्य कुमारं प्रतीक्षमाणा तावच्चित्रफलके तच्चित्रं वीक्ष्य विनोदं चिकीर्षुश्चित्रदर्शनानन्तरं तत्रैव स्वाभिप्रायसूचकं पद्यद्वितयं लिखति । ततश्च प्रवृद्धमदनसन्तापां तामवलोक्य चित्रलेखा नलिनीदलैः सुखशयनं विरचयति, तत्स्पर्शेन चाधिकतप्तोषा मूर्च्छां प्रयाति ।

अत्रान्तर एवाश्वग्रासलोभादुपमन्दुरं वद्धं मेषयुगलं बन्धनं भङ्क्त्वा जनांस्त्रासयन् परिभ्रमति, तत्कोलाहलेन भग्नमूर्च्छोषा चित्रलेखया सह विटपान्तरिता भवति, तदानीमेव सङ्केतवेषाभिरामः कुमारो विदूषकेण सहायाति । तत्र चोषां नावेक्ष्य चिन्तित इव यावत्तिष्ठति तावत् सुखशयनं तत्रस्थं चित्रफलकं तत्र च तल्लिखितां गाथां पश्यति, व्याकुलं च कुमारं वीक्ष्योषाचित्रलेखे तमालविटपान्तरिते तत्पुरत आगच्छतः । चन्द्रोदयमभिवीक्ष्योषानिरुद्धावेकाकिनौ विहाय चित्रलेखाविदूषकौ व्याजेन यावन्निष्क्रान्तौ तावदेव बहिर्मालतिकाद्वितीयं कञ्चुकिनमवेक्ष्य ससंभ्रमं विदूषकः प्रविश्य तदागमनं सूचयति, सलज्जा चोषा चित्रलेखयान्तःपुरं गच्छति, कञ्चुकी चोषानिरुद्धयोः परिणयमुहूर्तं देव्या सूचितं निवेद्य प्रयाति । कुमारोऽपि रात्रिशेषं तत्रैव विरहव्यथित इव व्यतीयमानोऽसह्यां वेदनां मत्वा जलयन्त्रगृहं गच्छति ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

चतुर्थे चाङ्के समुद्रगृहस्थस्योद्विग्नस्य कुमारस्य समीपस्थो विदूषकः स्वप्नायते यत् कुमारो नागपाशेन बद्धस्ततः केनापि सहस्रबाहुना पुरुषेण मोचित इति, तदानीमेव रूपलेखा विवाहमण्डपे कुमारस्योपस्थितिं देवीकृतां प्रार्थयति कुमारश्च मण्डपं गच्छति, विदूषको नृत्यति, सर्वे च नारदागमनं प्रतीक्षन्ते। आकाशमार्गेणायातो देवर्षिर्देव्यै रुक्मवत्यै पुत्रप्राप्तिरूपमाशीर्वचनमभिधाय चित्रलेखया सहागताया उषाया अनिरुद्धेन परिणयविधिं सम्पादयति, देवाः पुष्पवृष्टिं कुर्वन्ति।

रचनानैपुण्यम्

अस्यां नाटिकायां कविना नाट्यशास्त्रोक्तं लक्षणं यथाविधि प्रतिपादितम्।

न चातिरसतो वस्तु दूरं विच्छिन्नतां नयेत्।
रसं न वा तिरोदध्याद् वस्त्वलङ्कारलक्षणैः॥

इति निर्देशं शिरसि निधाय तेन तथा वस्तूनामलङ्कारादीनां रसस्य च सन्निवेशः सम्पादितः, यथा सामाजिकानां चेतांसि भृशमावर्जितानि स्युः। रसप्रवाहः सच्छन्दां गतिं कदापि न विजहाति। संयोगविप्रलम्भात्मकस्य शृङ्गारस्य समुचितप्रयोगो नूनं कवेरस्य रचनानैपुण्यं विशेषेण प्रमाणयति। अत्रत्याः संवादाश्च नातिदीर्घाः, नोद्वेजकाः, न निःसारास्तथा नारुचिकराः। पात्राणामुच्चावचां चरित्रचित्रणमपि कविना नाल्पीयसावधानेन सम्पादितम्। अलङ्काराणां छन्दसाञ्च प्रयोगोऽपि महत् प्रावीण्यं प्रकाशयति स्मारयति च कालिदासादीनपि महाकवीन्। रुचिरा ललितपदा च रचना कं वा नानन्दयति। तत्र सहृदयानां चित्तविनोदाय कानिचनोदाहरणानि समुपह्रियन्ते। तानि यथा—

(क) **चञ्चद्बर्हिकलापपेशलतरा विद्युद्विलासाम्बरा**
संराजद्घनमालयातिसुभगा सारङ्गनावोत्करा।
सद्यो नन्दितनीलकण्ठनयना गोपीजनाह्लादिनी
सेयं मूर्तिरिवाच्युतस्य परमा प्रावृट् सुखायास्तु वः॥ (१।११)–श्लिष्टोपमा

(ख) **तप्ताङ्गारचयं नु मुञ्चति नभो धूमन्तु भूमण्डलं**
वातोद्धूतकरीषपांशुपटलं दिग्भित्तयो नु स्फुटम्।
किं चास्मिन् परिघाभिघातविषमे काले कलावानहो
मार्तण्डातपसन्निरुद्धवपुषा भूयः कदुष्णान् करान्॥ (१।५)–स्वभावोक्तिः

(ग) **सारङ्गाः परितो रटन्ति जलदानालोक्य धीरेतरम्**
उद्दण्डं करदण्डलोलितकटा धावन्ति दन्तावलाः।
अप्येते परिवर्त्य भूरिविततं वर्हाणि तारस्वनैः
श्रोत्राणि स्थगयन्ति केकितरुणा धाराकदम्बाश्रिताः॥
(१।२२)–स्वभावोक्तिः

(घ) वसन्तवर्णने यथा—

सलतिकाविटपैः परिरम्भिताः परभृताभिरुदञ्चितपञ्चमाः।
अतिशयं कुसुमासववासिताः प्रमदयन्ति जनं प्रमदाजनाः॥ (२।१०)

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

(ङ) चित्रफलके विलोक्योषां वर्णयति—

श्रृङ्गारामृतवाहिनी परिलसद्दाक्षिण्यरत्नाकरा
सौन्दर्यैकरसद्रुहेमलतिका सौभाग्यबीजोर्वरा ।
रागाम्भोरुहदीर्घिका घनमनस्सम्मोहनक्षोदभू-
र्दृश्येताद्य मनागपि प्रियतमा कर्पूरदिग्विभ्रमा ॥ (३।१९)

(च) तत्रैवमपि ब्रवीति—

लोकलोचनतुरङ्गवागुरा चित्तमत्तगणलोलश्रृङ्खला ।
सा व्यधायि वडिशं मनोभुवः कामिमीनहृतये स्वयम्भुवा ॥ (३।१८)

(छ) तथ्यमप्यभिदधाति—

तिरयति हृन्मन्दिरजं विवेकदीपाङ्कुरं सहसा ।
उत्कण्ठाभिनिवेशो यौवनमदपन्नगो विषमः ॥ (२।२)

(ज) यथा श्रृङ्गारनिरूपणे दक्षोऽयं तथैव वीररसेऽपि । यथा—

द्राक् सैन्ये तीव्रवेगे मनुजदनुजयोश्चण्डखड्गप्रहारै-
रुद्दण्डैर्बाहुदण्डैरशनिसममहाभीमकोदण्डकाण्डैः ।
अन्योऽन्याघातभग्नावरणपरिसरोद्दामवक्षःस्थलासृग्-
धारासंसिक्तधूली-परिचितसमरप्राङ्गणे रेजतुस्ते ॥ (३।२४)

(झ) विरहवर्णने यथा—

दाही शीतः सुरभिपवनः शीतरश्मिः कृशानु-
र्मर्मच्छेदी प्रभवति मुहुः कूजितं कोकिलानाम् ।
किञ्चावश्यं प्रियजनसमायोगविच्छेदकाले
निद्राच्छेदाद् विरतिविषमा कल्पकल्पा त्रियामा ॥ (३।४२)

एवं संस्कृतवाङ्मयार्णवोद्धृतमिदं नाटिका-रत्नं नूनं गुणैकपक्षपातिनां विपश्चितां प्रमोदावहमिति—

वाराणस्याम्
अक्षयतृतीया
वै० सं० २०३६
(दि० २९-४-१९७९ रवौ)

निवेदयतः—
श्रीगौरीनाथशास्त्री
जनार्दनपाण्डेयश्च

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

पात्राणां परिचयः

सूत्रधारः—

उद्धवः—भगवतः श्रीकृष्णस्यामात्यः सखा च ।

नारदः—देवर्षिः ।

पर्वतः—ऋषिः नारदस्य सुहृत् ।

दारुकिः—श्रीकृष्णसारथिः ।

मुनिकुमारौ—नारदपर्वतयोरन्तेवासिनौ ।

वैतालिकौ—स्तुतिपाठकौ ।

कुमारः—नायकोऽनिरुद्धः श्रीकृष्णस्य पौत्रः ।

गिरिवरः—विदूषकः कुमारस्य नर्मसखा ।

कञ्चुकी—वकुलः अन्तःपुररक्षकः ।

नटी—सूत्रधारसहचरी ।

देवी—विदर्भराजदुहिता, अनिरुद्धस्य पट्टमहिषी ।

रूपलेखा—देव्याः प्रधाना सहचरी ।

मालतिका—अन्तःपुरपरिचारिका ।

उषा—नायिका, वाणासुरदुहिता ।

चित्रलेखा—नायिकायाः प्रमुखसहचरी ।

ललावती—द्वारपालिका ।

● ● ●

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

॥ श्रीगणेशायनमः ॥

श्रीमद् रुद्रचन्द्रदेवविरचिता

उषारागोदया नाटिका

प्रथमोऽङ्कः

प्रणयकलहकोपात् पाटलिम्नि प्रजाते
मुखशशिनि परार्द्धे पाण्डुरत्वे च सद्यः[1] ।
प्रकटितनिजदेहद्वन्द्वसीमाविभेदं
वपुरथ शिवयोस्तद्भूतये [2]शश्वदास्ताम् ॥१॥

(नान्द्यन्ते)

सूत्र०—अलमतिप्रस्तुतेन (नेपथ्याभिमुखमवलोक्य) आर्ये ! इतस्तावद् । (उपसृत्य)

नटी—इयह्मि आणवेदु अज्जउत्तो [इयमस्मि, आज्ञापयत्वार्यपुत्रः]

सूत्र०—आर्ये ! उषारागोदयानामनाटिका नाटयितव्यास्ति, तत् त्वरस्व नेपथ्यग्रहणाय, यावदेषोऽहमपि दत्तावधानानपि सामाजिकानभ्यर्थये ।

नटी—जं अज्जउत्तो आणवेदि [यदार्यपुत्र आज्ञापयति]

(इति निष्क्रान्ता)

सूत्र०—(सर्वतोऽवलोक्य)[3]

रङ्गबहुलानुरागादभिनवबन्धप्रसङ्गाच्च ।
परिभावयन्त्ववहिताः कृतिमेतां रुद्रदेवस्य ॥२॥

(पुरोऽवलोक्य)

इह जरठातपकाले प्रागेवोद्वेजयति भगवान् मार्तण्डः ।

यथा[4]

वाणादिह परिमुक्तो लोहितमध्ये स्थितोऽतिशल्य इव ।
अयेऽनिरुद्धो गिरिणा सह सोषारागरञ्जितोऽभ्येति ॥३॥

(नेपथ्ये) साधु, भरतपुत्र साधु (वाणादिहेति पुनः पठति)

(ततः प्रविशति नटी)

(तावदाकाशे समुच्चरति नातिव्यक्तार्था भारती, सर्वे ससंभ्रममाकर्णयन्ति)

१. **नटी**—अज्ज आकण्णेहि, समुच्चरेदि दाव गअणे णाभिवुत्तात्था भारई । [आर्य ! आकर्णय, समुच्चरति तावद्गगने नाभिव्यक्तार्था भारती]

---

१. भूयः । २. सर्वदा ।
३. भगवद्गुणानुवादा० । ४. यतः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सूत्र०—(आकाशे कर्णं दत्त्वा) किमाज्ञापयति भगवती यदुत विजितं कंसारिणा तदागमनं प्रतीक्षमाणा असमयजनितवसन्तोत्सवेन पुरीमानन्दयन्तु द्वारकौकस इति। भगवदाज्ञानुसारिणी भगवती, भवतु ममानुमतमेवाह भवती। यतोऽस्याः—

अश्लथानि श्लथायन्ते पटून्यप्यपटूनि च।
भवन्त्यङ्गानि रिङ्गन्त्या रङ्गे पातङ्गतेजसा ॥४॥

अपि च

तप्ताङ्गारचयं तु मुञ्चति नभो धूमानुभूमण्डलं
वातोद्धूतकरीषपांशुपटलं दिग्भित्तयोऽनुस्फुटम्।
किञ्चास्मिन् परिघाभिघातविषमे काले कलावानहो
मार्तण्डातपसन्निरुद्धवपुषा भूयः कदुष्णान् करान् ॥५॥

अतोऽहमपि तमेवाभिनयोचितं समयं प्रतीक्षे (इति निष्क्रान्तौ)

॥ प्रस्तावना ॥

(ततः [1]प्रविशत्युद्धवः)

उद्धवः—सम्यगभिहितं भरतपुत्रेण जरठातपकालिको[2]द्वेजकं चण्डमहसो बिम्बम्, [3]यावदुत—

वाणादिह परिमुक्तो लोहितमध्ये स्थितोऽतिशल्य इव।
अयेऽनिरुद्धो गिरिणा सह सोषारागरञ्जितोऽभ्येति[4] ॥६॥

(इति पठति) तथापि नायमर्थो जनयति मे समुचितमानन्दातिशयम्। यतः—

वाणोन्मूलनमन्तरेण कियती वत्सस्य मोक्षप्रथा
मोक्षोऽप्यस्य च कीदृशो यदि न तां प्राप्नोति लोकोत्तराम्।
प्राप्ताप्यस्य विदर्भराजतनया शुद्धप्रसादादृते
कीदृक् चेति न चिन्तयेव हृदयं दोलाधिरोहायते ॥७॥

अथवा सम्पन्नप्रायमेवेदं लक्ष्यते, यथा, भगवान्नारदोत्साहितामर्षो बलिनिषूदनो गत एवास्खलितप्रतिज्ञः शोणितपुरम्, श्रुतं मया रुक्मवती-दासीमुखात् काचन चित्रलेखेति किमपि कुमारनर्मसचिवेन गिरिनाम्ना मन्त्रयमाणा कुत्रचिल्लक्षितेति, तेनापि कारणेन भवितव्यम्। भगवानपि नारदो रैवतेश्वरान्तिके कृतमाध्याह्निकक्रियः कृतार्थयिष्यत्यमोघदर्शनोऽन्तः-पुरिकाजनं स्वदर्शनप्रदानेनेति श्रुतमस्ति, तदहमपि यथा भरतपुत्रेणावगतं निर्विशङ्कमापादयामि भगवदादेशम्। यतः—

प्रभूणां नावमन्तव्यः क्ष्वेडादेशोऽपि सेवकैः।
विशेषतो नियुक्तैश्च श्रियमिच्छद्भिरुत्तमाम् ॥८॥

---

१. वाणादित्यादि पद्यं पठन्नु०। २. कालीनो०।
३. यदुत। ४. नास्ति।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

(विलोक्य) आम् ! यथाभिहितं भरतपुत्रेण तथैव मन्त्रयमाणेन गिरिणा इत एवाभ्येति कुमारः । सोऽहमप्यसमयमधूत्सवाय तावदन्वेषयामि मुनिदत्तवरम्।।

(इति निष्क्रान्तः)

।। [1]विष्कम्भकः ।।

(ततः प्रविशति यथानिर्दिष्टः कुमारः)

कुमारः—अहो प्रचण्डातपता जरठातपकालस्य, यथा—

मज्जन्महेभच्युतदानवारिबन्धूकपुष्पस्तवकाकृतीनि ।
उद्दामभूरेणुविपाण्डुराणि जलाशयाः संदधते पयांसि ।।९।।

अपि च

अभ्यर्णमेघागमदुःसहास्तथा भूयिष्ठमध्याह्ननिदाघवासराः ।
अपि व्रजेयुः क्षणदाक्षयक्षमा विभिन्नपाटीरविलेपनक्षमाः[2] ।।१०।।

विदूषकः—(स्वगतम्) दुस्सहा कहं ण जइ मणोहिलहिदं न होदि। (प्रकाशम्) पिअवअस्स गदकप्पो ज्जेव लक्खीअदि घम्मआलो, जहा लहुलहुजलहरा णअणगोअरा होन्ति, ता दिट्ठिं देउ जुअराओ ।

[दुःसहाः कथं न यदि मनोभिलषितं न भवति । प्रियवयस्य गतकल्प एव लक्ष्यते घर्म्मकालः, यथा लघुलघुजलधरा नयनगोचरा भवन्ति, तद्दृष्टिं ददातु युवराजः]

कुमारः—(विलोक्य) सखे गिरिवर ! ततो नितराम्—

प्रचण्डातपभिन्नाभ्रविमुक्तध्वनिदुःसहाः ।
अनिलोल्लासरहिता जरठग्रीष्मवासराः ।।११।।

विदूषकः—(स्वगतम्) उक्कंठिअस्स एव्वं एव्व, (प्रकाशम्) पिअवअस्स वड्ढइ जलहराणं लच्छी ता रत्तासोअमंडवं गदुअ चिट्ठाम ।

[उत्कण्ठितस्यैवमेव, प्रियवयस्य वर्धते जलधराणां लक्ष्मीः, तद्रक्ताशोकमण्डपं गत्वा तिष्ठामः ।]

कुमारः—किं तत्र ?

विदूषकः—अत्थि तत्थ किंवि अदिसइदं कज्जं ।

[अस्ति तत्र किमप्यतिशयितं कार्य्यम्]

कुमारः—तत् कथय ।

विदूषकः—(ध्यानं नाटयति) (नेपथ्ये वैतालिकौ—अस्फुटम्)

एकः—केन वा संबोधनपदेन श्लोकनीयोऽयमनिरुद्धवीर्योऽनिरुद्धः ?

---

१. शुद्ध ।
२. ०क्रियाः ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

द्वितीयः—कस्ते व्यामोहस्त्रैलोक्याधिपतेः सर्वागमोक्तचतुर्व्यूहावतारे, अथोग्रसेनादनुकंसारिणः एतदात्मनि[1] तनये वा प्रतिश्रुतराज्यासने, तदलं विचारेण। (ततः स्फुटम्) देव !

चञ्चद्बर्हिकलापपेशलतरा विद्युद्विलासाम्बरा
संराजद्वनमालयातिसुभगा सारङ्गनादोत्कटा[2]।
सद्यो [3]नृत्यति नीलकण्ठनयना गोपीजनाह्लादिनी
सेयं मूर्तिरिवाच्युतस्य परमा प्रावृट् सुखायास्तु वः ॥१२॥

अपरः—

इह हि विकचमल्लीमङ्कतोऽपि प्रमुच्य
श्रयति मधुकराणां [4]जातरागं कदम्बम्।
नवजलकणसेकादुल्लसत्केसराली
मिलितनवमरन्दैर्जातरागं कदम्बम् ॥१३॥

विदूषकः—(ध्यानं त्यक्त्वा) वण्णिदो जहा दुदीअ वैआलिएण तह अहं वि वण्णेमि—
खणप्पहा खरदहणो गज्जारअ फुडिअ घोरघोण[5]रओ।
हिंडइ कामिजणाणं वहाय घ्रणसूअरो णहो विविणे ॥१४॥

[वर्णितो यथा द्वितीयवैतालिकेन तथाहमपि वर्णयामि—
क्षणप्रभाखरदहनो गर्जनस्फुटितघोरघोणरवः।
हिण्डते कामिजनानां वधाय घनशूकरो नभोविपिने ॥]

कुमारः—धिङ्मूर्ख ! मामुद्दिश्य।

विदूषकः—पठमं वैतालियेण, तदो क्खु मए, ता सुणाहि अप्प अहिलहितं।
[प्रथमं वैतालिकेन, ततः खलु मया, तच्छृणोतु आत्माभिलषितम्]

कुमारः—कथय।

विदूषकः—(कर्णे लगित्वा) एवं णेवं [एवमेवम्]।

कुमारः—(सहर्षं विदूषकं समालिङ्ग्य) सखे !
मम तद्वाचिकदीपमालया सुतरामद्य विकाशितं त्वया।
हृदयं [6]वारिदरोधमुक्तया कुमुदस्येव सुधांशुलेखया ॥१५॥
तदुपदर्शय रक्ताशोकमण्डपमार्गम्।

विदूषकः—इदो इदो (इति दर्शयन् समुपसर्पति। उपसृत्य) एसो क्खु रत्तासोअमंडवो ता पविसदु जुअराओ।
[इत इतः। एष खलु रक्ताशोकमण्डपः, तत्प्रविशतु युवराजः]

---

१. एतदास्थान। २. ०त्करा।
३. सन्दित—। ४. यातरागं।
५. ०घोष०। ६. घन०।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

कुमारः—(प्रविश्य विदूषकेण सहोपविश्य जलदान् विलोक्य स्वानुमानेनोषामभिध्याय विदूषकं प्रति) पश्य यथा[1]—

नयनसलिलधारा वारिधाराभिरन्त-
स्तिमिरपटलपूरं नीलनीलान्धकारैः।
श्वसितमिह कदम्बामोदवातैर्वधूनां
द्विगुणयति जडात्मा सन्ततं वारिवाहः ॥१६॥

विदूषकः—कहं चिरअदे वाणराअदुहिदा।
[कथं चिरयते बाणराजदुहिता]

कुमारः—[2]मिथ्या वालपितं त्वया।

विदूषकः—सवामि पिअवअस्सेण खणाज्जेव जाणिस्सइ।
[शपामि प्रियवयस्येन, क्षणादेव ज्ञास्यते]

कुमारः—भवतु।

विदूषकः—पअसद्दो सुणीअदि ता णिरूवइस्सं (इति विलोकयति) णक्खु णक्खु इदो देवीए दुदीअहिअअभूदा[3] रूवलेहा आअदा।
[पदशब्दः श्रूयते। तन्निरूपयिष्यामि। न खलु न खलु इतो देव्या द्वितीयहृदयभूता रूपलेखा आगता]

कुमारः—केनापि कारणेन देव्या प्रेषिता भविष्यति।

(ततः प्रविशति रूपलेखा)

रूपलेखा—(स्वगतम्) जलहर पइणे वि गअणअले जक्खु चिठ्ठदि [4]बह्मणदुदीओ जुअराओ ता लक्खीअदि [5]चित्तलेखाए मंतिअं फलं परिणदं, किं भणंमि अम्हाणं भत्तुदारिअं जाए सहअरी ज्जेव किदा क्खु दुठ्ठचित्तलेहा[6]। होदु भत्तुदारिआए वअणं भट्टाणं णिवेदिह्मि। (प्रविश्य रूपलेखा) जेदु जेदु भट्टा। जुअराअ[7] अह्माणं भत्तुदारिआ जलहरभरिदगअणअलं पेक्खिअ विणिवेदि अज्ज क्खु हिंदोलोच्छओ ता जुअराएण तत्थ संनिहिदेण होदव्वं।

[जलधरप्रायेऽपि गगनतले यत् खलु तिष्ठति ब्राह्मणद्वितीयो युवराजः, तल्लक्ष्यते चित्रलेखाया मन्त्रितं फले परिणतम्। किं भणाम्यस्माकं भर्तृदारिकां यस्या सहचरी एव खलु दुष्टचित्रलेखा। भवतु, भर्तृदारिकाया वचनं भर्त्रे निवेदयामि। जयतु जयतु भर्ता। युवराज! अस्माकं भर्तृदारिका जलधरभरितगगनतलं प्रेक्ष्य विनिवेदयति—अद्य खलु हिन्दोलोत्सवः, तद् युवराजेण तत्र संनिहितेन भवितव्यम्]

---

१. पश्य पश्य।
२. मिथ्यैवा०।
३. रूपरेहा ('रूपरेखा' इति सर्वत्र पाठः)।
४. दुठ्ठबह्मण०।
५. चित्तरेहाय०।
६. चित्तरेहा (चित्ररेखा इति सर्वत्र)।
७. जुअराहो।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

कुमारः—यथा देवी आज्ञापयति (इति विदूषकं हस्तेऽवलम्ब्य परिक्रामति समासाद्य मणिवेदिकाम्), रूपलेखे ! गत्वा निवेदयास्मदागमनं देव्यै । एषोऽहमपि दोलाङ्गणमणिवेदिकायां देव्यागमनं प्रतीक्षिष्ये ।

रूपलेखा—जह भट्टा आणवेदि ।
[यथा भर्ताऽऽज्ञापयति]

(इति निष्क्रान्ता)

(ततः समुपविशति मणिवेदिकायां कुमारो विदूषकश्च)

कुमारः—(परितोऽवलोक्य) संवृत्तैव रात्रिः । यथा—

क्रन्दन्ति चक्रवाका भजन्ति निद्रां च कमलानि ।
तिरयति लोकालोकं परितो घनजृम्भितं तिमिरम् ॥१७॥

विदूषकः—पिअवअस्स इदो तक्केमि—

विसलुद्ध हंससावअ विमुक्क कलसद्द विप्फुडिअं ।
अज्ज[1] उल्लहितो सद्दो आअच्छदि ता इदो देई ॥१८॥

[प्रियवयस्य इतस्तर्कयामि—
विसलुब्धहंसशावकविमुक्तकलशब्दविस्फुटितम् ।
अद्य उल्लसितः शब्द आगच्छति तदितो देवी ॥]

कुमारः—(अवलोक्य) सम्यगवलोकितम् । आगतैव देवी—

माणिक्यकान्तिपरिदीपित[2]दीपिकाभि-
रुत्तेजिताङ्गरचना सहचारिणीभिः ।
अभ्येति पश्य वत जङ्गमकर्णिकार-
वल्लीव चम्पकलताभिरुपास्यमाना ॥१९॥

(ततः प्रविशति यथानिर्दिष्टा देवी)

देवी—(उपसृत्य) जेदु जेदु अज्जउत्तो ।
[जयतु जयत्वार्यपुत्रः]

कुमारः—देवि ! आज्ञापय ।

देवी—उपरचिअमअणपूआ इच्छेम्हि हिंदोले कीलिदुं ।
[उपरचितमदनपूजा इच्छामि हिन्दोले क्रीडितुम्]

कुमारः—अनुमतमस्माकम् ।

देवी—रूपलेहे पडिमां विधेहि जत्त मअणं अच्चेमि ।
[रूपलेखे प्रतिमां विधेहि यत्र मदनमर्चयामि]

---

१. जह । २. परिमण्डित ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

रूपलेखा—भत्तुदारिए पच्चक्खो ज्जेव कसुमाउहो ता किं दाणिं पडिमआ, भट्टा ज्जेव कहं णाच्चीअदि ?

[भर्तृदारिके ! प्रत्यक्ष एव कुसुमायुधः, तत्किं प्रतिमया ? भर्ता एव कथं नार्च्यते]

देवी—(ईषत्स्मितानना तथा करोति)

विदूषकः—पिअवअस्सस्स पूआ णिव्वत्तिदा, ता कहं ण मअणस्स सहा समच्चीअदि, महुसमअ तुट्ठिरहिदो अच्चिदो वि मअणो विअलो हुविस्सदि ।

[प्रियवयस्यस्य पूजा निर्वर्तिता तत्कथं न मदनस्य सखा समर्च्यते। मधुसमयतुष्टिरहितोऽर्चितोऽपि मदनो विकलो भविष्यति]

रूपलेखा—जत्त तुम्हारिसाणं पवेसो तत्त कहं ण होदि ।

[यत्र युष्मादृशानां प्रवेशस्तत्र कथं न भवति]

देवी—रूपलेहे ! अज्जगिरिअरस्स किदे णिम्मिअं मोदअसरावं समप्पेहि ।

[रूपलेखे ! आर्यगिरिवरस्य कृते निर्मितं मोदकशरावं समर्पय]

रूपलेखा—(कुटिलाक्षिनिक्षेपपूर्वकं समर्पयति)

विदूषकः—(गृहीत्वा) ही ही भो अहं वि अप्पणो अहिलहिदं जणं अण्णेसेम्मि (इति निष्क्रान्तः) ।

[ही ही भो अहमप्यात्मनोऽभिलषितं जनमन्वेषयामि]

(ततो देवीयुवराजौ दोलाधिरोहं नाटयतः, परिवारवनितादिकं च स्वस्वकृत्यम्)

कुमारः—(देवीं निर्वर्ण्य)

वेणीनिबद्धकुसुमैश्छुरितान्तपीठं भूयः कुचोपरि समुल्लसदंशुकानाम् ।
वक्षस्थलान्तपरिघट्टनशीर्णहारं दोलारसो विजयते तव कोऽपि मुग्धे ।।२०।।

अपि च

चञ्चन्महारजतरागलसत्पटान्ता
हिन्दोलविभ्रमरयेण विचाल्यमाना ।
विभ्राजसे किमपि मीनमनोज्ञनेत्रे
वाताहतेव कुसुमायुधवैजयन्ती ।।२१।।

देवी—(स्मितं नाटयित्वा परिवारजनानालोकयति)

कुमारः—(स्वगतम्)

चञ्चच्छिखासु पवनाहतिवेल्लितासु
किञ्चित्क्वचिज्जलदवारिकणोक्षितासु ।
यद्दीपिकासु कलुषां प्रकरोति दृष्टि
मन्ये न हन्त परिहास्यति दोललीलाम् ।।२२।।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अतोऽस्या दोलाधिरूढाशयं प्रकारान्तरेण शिथिलयामि, मा भूत् कालातिपातेन ममातिपातः। (प्रकाशम्) देवि ! पश्य[1]—

सारङ्गाः परितो रटन्ति जलदानालोक्य धीरेतरं
प्रोद्दण्डं करदण्डलोलितकटा धावन्ति दन्तावलाः।
अप्येते परिवर्त्य भूरि विततं बर्हाणि तारस्वनैः
[2]श्रोत्राणि स्थगयन्ति केकितरुणा धाराष्कदम्बाश्रिताः ॥२३॥

अपि च

नीडैराकुलयन्ति चैत्यविटपान् प्रत्याकुला वायसा
हित्वा चत्वरकेलिमाशु वलभीस्तद्वच्च पारावताः।
आलीढाः ककुभो घनाञ्जनघनैरालोक्य चोत्कन्धरा
हंसा वारिचयं विहाय निपतन्त्युच्चैस्तथोदङ्मुखम् ॥२४॥

तदेष घनागमो दोलारसविच्छेदमिव कर्तुमुद्यतः। यतः—

मन्दध्वनीनि वाद्यानि भूमयः कर्दमाविलाः।
रज्जवश्चासुखस्पर्शाः क्रियन्ते घनवारिणा ॥२५॥

अपि च

च्योतद्घनाम्बुपरिपिण्डितकेशपाशं
धाराभिभूतदरकुञ्चितपद्ममालम्।
क्लिन्नाम्बरप्रकटितावयवं कथञ्चि-
दालीजनोऽद्य सहते घनवैकृतानि ॥२६॥

देवी—ता अंतेउरं गमिस्सं आणवेदु अज्जउत्तो।
[तदन्तःपुरं गमिष्यामि, आज्ञापयत्वार्यपुत्रः]

कुमारः—(स्वगतम्) दोलारसविच्छेदकं जलदं वर्णयता मया कोपितेव, यथा लक्ष्यतेऽस्या मुखच्छविः। (प्रकाशम्) देवीसहचरोऽपि।

(ततो दोलावरोहणं नाटयतः। लीलामन्थरं च स्खलद्भूषणा समाक्रामति देवी तदनुकुमारः परिवारजनश्च)।

कुमारः—(स्वगतम्) अये सर्वत्रैव देव्या कालातिपातेन ममातिपात एव क्रियते। यतो जडीभूतोरुकाण्डद्वया गन्तुमपि न पारयति, अथवा युज्यतेऽस्याः। यतः—

सहजेन मरालगामिनी पुनरुत्तुङ्गपयोधरालसा।
अथ वर्त्मनि वारिपिच्छिले कथमेषा चरणानि यच्छतु ॥२७॥

---

१. पश्य पश्य। २. स्तोत्राणि।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अपि च

सहजगुरुनितम्बा क्षीणमध्यप्रदेशा
कनकशिखरिशृङ्गस्पर्धिवक्षोजलक्ष्मीः।
कथय कथमिदानीं पिच्छिले वर्त्मनीयं
रचयतु मदिराक्षी पादविक्षेपणानि ॥२८॥

(ततो गमनायासविगलितं कर्णकुवलयं स्थाने समादधत्)

कुमारः—देवि पश्य !

मुग्धे विलोचनविलाससहोदरेण
त्वत्कर्णपातिसरसीरुहकोरकेण।
लोकत्रयं वशयता वत हेलयैव
सार्थीकृता कुसुमसायकता स्मरस्य ॥२९॥

देवी—(सस्मितं परिक्रामति)

कुमारः—(सर्वतोऽवलोक्य) देवि ! यथा—

पश्य त्वदङ्गसुषमा मुषिता ह्रियेव
बध्नाति न स्थिरपदं गगनेऽपि विद्युत्।
मुञ्चन्ति केशनिचयेन पराजिताश्च
नीलाम्बुदा वहलवारिमिषेण चास्रम् ॥३०॥

(इति निष्क्रान्ताः सर्वे)

श्रीमद्रुद्रचन्द्रविरचितायां नाटिकायां

प्रथमोऽङ्कः।

२

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

द्वितीयोऽङ्कः

(ततः प्रविशति विदूषकः)

विदूषकः—(स्वगतम्) कहं अज्ज वि णाअच्छदि पिअवअस्सो ता कं पुच्छेम्मि, (पुरोऽवलोक्य) होदु एषा देवीए पिअसहअरी इदो ज्जेव आअच्छति ता एणं पुच्छिस्सं।

[कथमद्यापि नागच्छति प्रियवयस्यः, तत्कं पृच्छामि, भवतु, एषा देव्याः प्रियसहचरी इत एवागच्छति, तदेनां प्रच्छ्यामि]

(ततः प्रविशति रूपलेखा)

रूपलेखा—आणत्तह्मि भत्तुदारिआए जह देवेषिणो आअमणं खु सूयदे ता सच्चं णवेदि णिरूपयिदुं गच्छेह्मि अज्ज उद्धअस्स सआसं पुच्छिस्सं। कहं दाणि लद्धव्वो मए अज्ज उद्धओ, होदु जुअराअपिअवअस्सं पुच्छिस्सं (इत्युपसृत्य) अज्ज कहिं दाणि चिठ्ठदि भअवदमच्चो उद्धओ।

[आज्ञप्तास्मि भर्तृदारिकया यथा देवर्षेरागमनं खलु श्रूयते तत्सत्यं न वेति निरूपयितुं गच्छामि आर्य उद्धवस्य सकाशम्। प्रच्छ्यामि, क्व इदानीं लब्धव्यो मया आर्य उद्धवः। भवतु, युवराजप्रियवयस्यं प्रच्छ्यामि, आर्य क्व इदानीं तिष्ठति भगवदमात्य उद्धवः]

विदूषकः—होदि कज्जासत्तो णअरदुआरे चिठ्ठदित्ति सुदं मए, भोदि तुमं वि णिवेदेहि किं मंतेदि पिअवअस्सो जेण क्खु अदिआलपादो जादो।

[भवति ! कार्यासक्तो नगरद्वारि तिष्ठतीति श्रुतं मया, भवति ! त्वमपि निवेदय किं मन्त्रयति प्रियवयस्यो येन खलु अतिकालपातो जातः]

रूपलेखा—(सक्रोधम्) हदास मंतिदं तुए चित्तलेहाए, उणो वि किं मंतेदु तुअ पिअवअस्सो।

[हताश ! मन्त्रितं त्वया चित्रलेखया, पुनरपि किं मन्त्रयतु तव प्रियवयस्यः]

विदूषकः—(स्वगतम्) हद्धि जाणिदं सव्वं, (प्रकाशम्) का उण चित्तलेहा,
[हा धिग् ज्ञातं सर्वम्, का पुनश्चित्रलेखा]

रूपलेखा—जा तुम्हाणं चित्ताजं लिहति।
[या युष्माकं चित्रकं लिखति]

विदूषकः—(पादयोः पतित्वा) होदि रूअलेहे मा क्खु देवीए णिवेदेहि। अम्हाणं जीविदहरं कज्जं।

[भवति रूपलेखे ! मा खलु देव्यै निवेदय, अस्माकं जीवितहरं कार्यम्]

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

रूपलेखा—(पादावन्यत्र करोति)

विदूषकः—(दृढं परिपीड्य) शवामि बम्हसुत्तेण जइ अलद्धाभअदाणो मुंचेम्हि तुअ पादजुअलं ।

[शपामि ब्रह्मसूत्रेण यदि अलब्धाभयदानो मुञ्चामि तव पादयुगलम्]

रूपलेखा—(ईषत्स्मितसाचीकृतानना) किं सुअं मुओ वि मारिज्जदि । ता ण कहिस्सं भत्तुदारिआए उच्चिट्ठेहि ।

[किं स्वयं मृतोऽपि मार्यते, तन्न कथयिष्यामि भर्तृदारिकायै, उत्तिष्ठ]

विदूषकः—ही ही भोः मए उणो लद्धो जीअदाणो । होदि ता कहेहि पिअवअस्सवुत्तन्तं ।

[ही ही भोः मया पुनर्लब्धं जीवदानं भवति तत् कथय प्रियवयस्य-वृत्तान्तम्]

रूपलेखा—कुदो अम्हाणं तुअ सरिसी जीहा जेण क्खु लद्धरहस्सा होदि देई, ता पडिपालअ जुअराआअमणं । (निरीक्ष्य) इदोज्जेव आअच्छदि तुम्हाणं वेअ भणिती सोदुम् ।

[कुतोऽस्माकं तव सदृशी जिह्वा, येन खलु लब्धरहस्या भवति देवी, तत्प्रति-पालय युवराजागमनम्, इत एव आगच्छति युष्माकं वेगभणितिं श्रोतुम्]

विदूषकः—सोत्थि भोदीए । होदु साहअस्स कज्जं ।

[स्वस्ति भवत्यै । भवतु साहाय्यस्य कार्यम्]

रूपलेखा—(सरोषकुटिलाक्षिक्षेपं निरीक्ष्य निष्क्रान्ता)

विदूषकः—एसो क्खु आअदो कहं कहं वि पडिमोक्खिअ अप्पाणं पिअवअस्सो ता उपसप्पेमि ।

[एष खल्वागतः प्रतिमोच्य कथं कथमप्यात्मानं प्रियवयस्यः]

(इत्युपक्रान्तः)

प्रवेशकः

(ततः प्रविशत्युत्कण्ठापरवशः कुमारः)

कुमारः—(सर्वतो विलोक्य स्वगतम्) अहह !

तारुण्याभिनिवेशो लब्धप्रसरो मनागपि क्वापि ।
गन्धद्विप इव सुतरां मदप्रकर्षात्तु दुर्ग्रहो भवति ॥१॥

अपि च

तिरयति हृन्मन्दिरगं विवेकदीपाङ्कुरं सहसा ।
उत्कण्ठाविषवेगो नवयौवनपन्नगो विषमः ॥२॥

तदिदानीं बाधते बलवदुत्कण्ठाव्याधिस्तत्प्रतीघाताय धन्वन्तरिप्रतिममन्वेषयामि प्रियवयस्यमिति । (पुरोऽवलोक्य) अये समीहितैव लक्ष्यते कार्यसिद्धिः, यत्परापतित एवास्मदाकाङ्क्षितश्चातकस्येव घनागमो लघुपदैः प्रियवयस्यः ।

(तत उपसृत्य विदूषकः)

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

विदूषकः—सोत्थि समीहिदसिद्धी होदु पिअवअस्सस्स, मए पाउअकव्वं णिम्मिद-मत्थि ता सुणादु जुअराओ ।
[स्वस्ति समीहितसिद्धिर्भवतु प्रियवयस्यस्य, मया प्राकृतकाव्यं निर्मितमस्ति, तच्छृणोतु युवराजः] ।

कुमारः—विश्रब्धं पठ्यताम्

विदूषकः—

रइविरहरइअमुद्दाभिसिणीए कोहबंधणदो ।
अइ केदइअ पुण्णेहिं भसल विमुक्कोसि कुत्त मणो लहिदं ॥३॥
[रतिविरहरचितमुद्रा विसिन्याः क्रोधबन्धनतः ।
अयि कियत् पुण्यैः भसल विमुक्तोऽसि कुत्र मनोऽभिलषितम् ॥]

कुमारः—श्लेषकवेस्तव निरुपमोऽयं वाक्यार्थः, तत्फलितार्थं करिष्यसि न वा ?

विदूषकः—फलिदत्थइस्ससीति कहं। फलिदैव केअइलदा पमदुज्जाणे ता पेक्खदु पिअवअस्सो ।
[फलितार्थयिष्यसीति कथं फलितैव केतकीलता प्रमदोद्याने, तत् पश्यतु प्रियवयस्यः]

कुमारः—तदुपदर्शय मार्गम् ।

विदूषकः—(सर्वतोऽवलोक्य) ही ही भोः उअरदे रअणिकप्पे घणागमे कहं केअईलद्धी ।
[ही ही भोः उपरते रजनिकल्पे घनागमे क्व केतकीलब्धिः]

कुमारः—धिङ्मूर्ख ? कथमेवमवधारितवानसि ?

विदूषकः—जइ मं ण प्पच्चेसि ता तुअ कहिंगए लोअणे, स्सअं पेक्खस्स ।
[यदि मां न प्रत्येषि, तत् तव क्व गते लोचने स्वयं प्रेक्षस्व]

कुमारः—(सर्वतोऽवलोक्य) रागान्धेन मया नोपलक्षितम्, न पुनरन्यथाभिहितं विदूषकेण। (प्रकाशम्)

विक्षिप्तम् ऋतुनीलमेघपटलं क्वेदं नभो भास्करं
क्वालापाः शिखिनां क्व चायमभितो भृङ्गाङ्गनानां रवः ।
यातास्संप्रति वा क्व नीपमरुतः क्वामी वसन्तानिलाः
स्वप्नः किं नु किमिन्द्रजालमथवा चित्तेन निर्णीयते ॥४॥

विदूषकः—एव्वं णेवं । ता होदु पओसो ।
[एवमेवम् । तद् भवतु प्रदोषः]

(नेपथ्ये) **वैतालिकः**—

प्रकटितबहुकेसराङ्गरागा मुखरमधुव्रतकिङ्किणीकलापाः ।
नवसुरभिपलाशचञ्चदोष्ठी भवतु सुखाय चिरं वसन्तलक्ष्मीः ॥५॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अपि च—

कूजन्ति प्रतिपल्लवं परभृताः प्रत्यग्रभावोदयं
तन्वीनां प्रतिकुड्मलं हि मधुपाश्चुम्बन्ति भिन्दन्ति च ।
घूर्णन्तीह मरुद्धताश्च विटपाः पुष्पासवोद्गारिणो
धन्यं कोऽपि मनोभवस्य विजयारम्भः समुन्मीलति ॥६॥

कुमारः—अहो यथा द्वितीयश्लेषकवित्वेन पठति वैतालिकस्तथा मन्ये पुरजनैः समारब्धो मदनमहोत्सवः। तदुपदर्शय क्रीडापर्वतमार्गम्, यत्रान्तरितविग्रहोऽहमपि कौतुकविलोकनेन उत्कण्ठितचेता वाहयिष्येऽहःशेषम् ।

विदूषकः—ममज्जेव हिअआभिमतं (इत्युत्थाय मार्गं दर्शयति) इदो इदो इमिणा रअणघडिदसोपाणमार्गेण कंचनकअलीक्खंभावणसुहारोहेण उआरोहदु पिअवअस्सो।

[ममैव हृदयाभिमतम्, इत इतोऽनेन रत्नघटितसोपानमार्गेण कञ्चनकदलीस्तम्भवनसुखारोहेण उपारोहतु प्रियवयस्यः]

कुमारः—(विदूषकहस्तावलम्बितः क्रीडापर्वतारोहणं नाटयित्वा सर्वतो दत्तदृष्टिः)

अये अतिशयरमणीयो वसन्तसमयः, यतः—

हारीतहारिरुतसङ्कुलिता विभाति
रोलम्बलम्बिततमालतरूपकण्ठाः ।
भिन्नारविन्दमकरन्दरसावसिक्त-
पर्यन्तवारिनिचयांश्च जलाशयांश्च ॥७॥

अपि च—

धुतकमलपरागरागभाजा प्रकटितपटवासविभ्रमेण ।
सपदि मलयमारुतेन तेने मधुसमयसमागमोत्सवश्रीः ॥८॥

विदूषकः—अच्छरिअं अच्छरिअं पेक्खदु पिअवअस्सो। णाअरिअजणाणं भूरुहाणं समआल ज्जेव पालिसिद्धी विलसिदं।

[आश्चर्यमाश्चर्यम्, प्रेक्षतु प्रियवयस्यः, नागरिकजनानां भूरुहाणां समकाल एव····सिद्धिविलसितम्]

कुमारः—(उभयत्रावलोक्य) साधु सखे सम्यगवलोकितम् ।

पुष्पासवच्छुरितवेल्लितपल्लवाभि-
रुत्कन्धराभिरुचितप्रमदालताभिः ।
कौसुम्भरागरुचिराभिरुपास्यमानाः
कान्तारसा नु मिलिता विटपा हरन्ति ॥९॥

अपि च—

सतिलका विटपैः परिरम्भिताः परभृताभिरुदन्ति च पञ्चमाः ।
अतिशयं कुसुमासववासिताः प्रमदयन्ति जनं प्रमदालताः ॥१०॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

विदूषकः - इदो पेक्खदु पिअवअस्सो णाअरिअजणाणं अदिवैभवं ।
[इतः प्रेक्षतु प्रियवयस्यो नागरिकजनानामतिवैभवम्]

कुमारः- साधु सखे साधु

आलिप्ता इव भूमयो हि परितः काश्मीररागद्रवै-
रुत्सर्पत्पटवासचारुरजसा व्याप्तं नभोमण्डलम् ।
क्रीडद्वारवधूविमिश्रितजनैः सानन्दमद्योत्सवे
कालीयैः कलुषीकृता इव दिशः शृङ्गारितैः सर्वतः ।।११।।

अपि च—

लक्ष्यन्ते पुरवीथयो मृगमदैः प्रोद्भूतपङ्का इव
प्रासादाः श्वसिताभ्रपांशुपटलैः प्रालेयपूरा इव ।
क्रीडासक्तवधूविभूषणरुचा काश्मीरलिप्ता इव
प्रत्येकाङ्गणभूमयश्च नितरां रम्योऽयमद्योत्सवः ।।१२।।

विदूषकः—पिअवअस्स वहु वण्णेसि णाअरिअजणाणं विलसिदं, अहं उण जाणे क्खु धण्णो एक्को वैस्सवणसेट्ठी जस्स गेदाहो सअलोवि णाअरिअजणो जहभिलहितं वत्थुजादं लहइ ।

[प्रियवयस्य बहु वर्णयसि, नागरिकजनानां विलसितम् । अहं पुनर्जाने खलु धन्य एको वैश्रवणश्रेष्ठी यस्य गृहात् सकलोऽपि नागरिकजनो यथाभिलषितं वस्तुजातं लभते]

कुमारः—गिरिवर सम्यगालोचितवानसि ।

बहु भागधेयवन्तो व्यवहारे प्रगल्भाश्च ।
परिभूषयन्ति नगरं नृपविश्रम्भेण वणिजोऽपि ।।१३।।

विदूषकः—एसा दुट्ठदासी रूअलेहा कहं उणो वि इदो ज्जेव आअच्छदि ।
[एषा दुष्टदासी रूपलेखा कथं पुनरपि इत इव आगच्छति]

(ततः प्रविशति रूपलेखा मदनवशविस्खलच्चरणपल्लवा)

कुमारः—(निर्वर्ण्य)

इयं कामप्रायां प्रथमवयसः प्रौढविपदं
दुरावस्थां भूयः किमपि सुदती हन्त मधुनः ।
मुहुर्वेल्लद्वेणी तदिह वदतीव प्रतिपदं
स्खलत्पादन्यासादतिमुखरमञ्जीरनिनदैः ।।१४।।

रूपलेखा—(उपसृत्य) जेदु जेदु भट्टा । अम्हाणं भत्तुदारिआ विणिवेदि, अज्ज क्खु मअणमहुस्सवे सहअरीजणेणारद्धवसंताभिणओ पमदुज्जाणं गदेण सणाहो कादव्वो ता पमाणं जुअराओ ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

[जयतु जयतु भर्ता, अस्माकं भर्तृदारिका विनिवेदयति, अद्य खलु मदन-महोत्सवे सहचरीजनेनारब्धो वसन्ताभिनयो प्रमदोद्यानं गतेन सनाथी-कर्तव्यः, ततः प्रमाणं युवराजः]

कुमारः—वयमप्युत्कण्ठिता एव स्मः, तदुत्तिष्ठ गच्छामः।

विदूषकः—सच्चमुक्कंठिओ मे पिअवअस्सो।
[सत्यमुत्कण्ठितो मे प्रियवयस्यः]

रूपलेखा—(स्मृतिमभिनीयाङ्गुल्या तर्जयति)

कुमारः—रूपलेखे त्वमग्रे गत्वा निवेदय देव्यै वयमप्यागता एव।

रूपलेखा—जं भट्टा आणवेदि।
[यद्भर्त्ता आज्ञापयति]

(इति निष्क्रान्ता)

कुमारः—वयस्याङ्गुल्या तर्जनं न साधु इवोपलक्षये। ननु प्रकाशितोऽयं रहस्यनिक्षेपः।

विदूषकः—साअरसरिच्छहिअआणं अम्हाणं कण्णनिहिदो रहस्सो कहं पआसी होइ ता लं क्खु चिन्दाए।
[सागरसदृशहृदयाणामस्माकं कर्णनिहितो रहस्यः कथं प्रकाशीभवति, तदलं खलु चिन्तया]

कुमार—तदग्रे भूत्वा दर्शय मार्गम्। देवीरञ्जनाय तत्र गच्छावः।

विदूषकः—इदो इदो (परिक्रम्य) एसो क्खु पमदोज्जाणो ता पविसदु पिअवअस्सो।
[इत इतः, एष खलु प्रमदोद्यानस्तत्प्रविशतु प्रियवयस्यः]

(विदूषकहस्तमवलम्ब्य प्रविश्य)

कुमारः—(सर्वतोऽवलोक्य)

एतेऽपि वन्यतरवो विलसत्परागै-
रारब्धकोकिलकलस्वनहेलमुच्चैः।
कामोत्सवोऽयमिति संपरिबोध्यमाना
मन्दानिलेन पटवासमिवोत्सृजन्ति ॥१५॥

विदूषकः—एसा वीणाणिबद्धपंचमराअमुच्छाणुसारेण गीअमाणा सहीजणेण इदो ज्जेव आअच्छदि ता सुणाउ कुमारो गीअं।
[एषा वीणानिबद्धपञ्चमरागमूर्च्छानुसारेण गीयमाना सखीजनेन इत एव आगच्छति। तत् शृणोतु कुमारो गीतम्]

(ततः प्रविशति रुक्मवती, गृहीतपटवासकुङ्कुमताम्बूलादिगर्वितहस्तकिसलयो लयप्रपञ्चितपञ्चमो विभवतः परिवारजनं च) गायति।

पठमं माणिणि माणो विअलइतो कुन्दवणलच्छी।
उक्कूलिआ जण हिअए दीसइ पसाउए रअणलतिआणं ॥१६॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

[प्रथमं मानिनि मानं विगलयितं कुन्दवनलक्ष्म्या ।
उत्कूलिता जनहृदये दृश्यते पश्चाद् रत्नलतिकानाम् ।।]

कुमारः—अये कथं निरतिशयोऽयमासां गीतरसातिशयः, यथा—

आविःकरोति तृषमाचुषितोऽपि शश्व-
दाशीलितोऽपि किल जाड्यमपाकरोति ।
स्वर्वाहिनीविशदवारिविलासकान्ति-
रासां पुनर्मधुरगीतरसोपचारः ।।१७।।

विदूषकः—एवं णेवं ।
[एवमेवम्]
(तत उपसृत्य)

रुक्मवती—हला रूपलेहे कहिं दाणिं अज्जउत्तो । ता दंसेहि ।
[हला रूपलेखे क्वेदानीमार्यपुत्रः, तद्दर्शय]

रूपलेखा—अज्जगिरिअरदुदीओ इदो ज्जेव आगच्छदि भट्टा, ता उपसव्वदु भत्तुदारिआ।
[आर्यगिरिवरद्वितीय इत एव आगच्छति भर्त्ता, तदुपसर्पतु भर्तृदारिका]

(ततः परस्परेण संगतं नाटयतो देवीयुवराजौ)

विदूषकः—सोत्थि होदु देवीए ।
[स्वस्ति भवतु देव्यै]

देवी—(पटवासकुङ्कुमादिना समभ्यर्च्य) अज्ज पणमामि [आर्य प्रणमामि]

विदूषकः—अच्चिदोहं बह्मणो समीहिदसिद्धी होदु देवीए । इदो सणाही करीअदु पिअवअस्सेण समं मअणमहुस्सओ ।
[अर्चितोऽहं ब्राह्मणः समीहितसिद्धिर्भवतु देव्याः ।
इतः सनाथीक्रियतां प्रियवयस्येन मदनमहोत्सवः ।।]

(देवी तथा करोति, परिवारजनोऽथ गायति)

मउलइ रत्तासोओ विअसइ पमदाजणे सोओ ।
घोल्लइ पअणो सिअरो तंमइ ताणं उणो णिअरो ।।१८।।
[मुकुलयति रक्ताशोको विकसति प्रमदाजने शोकः ।
प्रचलति पवनः शिशिरस्ताम्यति तेषां पुनर्निकरः ।।]

कुमारः—(स्मृतिमभिनीय बाणदुहितरं सान्तर्मनस्कः स्वगतम्)

मधुसमये वनितानां स्वभाववैषम्यमायाति ।
किमुतेष्टजनवियोगे समाधिपरिविक्लवं चेतः ।।१९।।

(देवी परिजनकरोपनीतं चन्दनकुङ्कुमादिना कुमारमभिषिञ्चति कुमारश्च शिथिलतरं देवीम्)

देवी—(स्वगतम्) कहं मुहितो ज्जेव लक्खीअदि (प्रकाशम्) अज्जउत कीलाभरेण समओ वड्ढिस्सदि ता अंतेउरं गमिस्सं ।
[कथं मुषित इव लक्ष्यते, आर्यपुत्र क्रीडाभरेण समयो वर्द्धिष्यति, तदन्तःपुरं गमिष्यामि]

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

कुमारः—

सुधांशुस्पर्द्धिवदने क्व क्लमस्तव सन्निधौ ।
जायते जातु जरतां किं सुधास्वादिनामपि ॥२०॥

देवी—मुहसिरी ज्जेव णिवेदेदि ता गिरिअरपडिलावेण अप्पाणं विणोदेदु अज्जउत्तो । अहं उण अन्तेउरं ज्जेव गमिस्सं ।

[मुखश्रीरेव निवेदयति तद् गिरिवरप्रतिलापेनात्मानं विनोदयतु आर्यपुत्रः अहं पुनरन्तःपुरमेव गमिष्यामि] (इति गन्तुमिच्छति)

कुमारः—

अकाण्डे कोपकाण्डेन मे प्राणान् चण्डि पीडय ।
प्रसन्नेन्दौ न कालुष्यं भजते जातु शर्वरी ॥२१॥

देवी—ण क्खु कुविदाम्हि, उप्पण्णकीलाशमवाहा ण शक्कोमि इह ट्ठातुं ।
[न खलु कुपितास्मि, उत्पन्नक्रीडाश्रमभारा न शक्नोमीह स्थातुम्]

(इति सपरिवारा देवी निष्क्रान्ता)

विदूषक—ही ही भो उवकिदं क्खु देवीए ।

[ही ही भोः उपकृतं खलु देव्या]

कुमारः—धिङ्मूर्ख !

स्फुरदधरोष्ठपुटान्तं कुञ्चितपक्ष्मेक्षितं मुखं देव्याः ।
रोषारुणितकपोलं भावयतो मे विदीर्यते हृदयम् ॥२२॥

विदूषकः—तदो किं करीअदि, तहिंज्जेव कहं ण गस्सेम्ह देवीपसा अणाय ।

[ततः किं क्रियते, तत्रैव किं न गम्यते देवीप्रसादनाय]

कुमारः—

वैलक्षेणैव कथितो भावोऽन्तःस्थः पुरैव नः ।
प्रणिपातेन सुतरां नात्र ग्राह्योत्तरं पुनः ॥२३॥

तदत्र कमप्युपायं रचयित्वा गमिष्यावः (इत्युभावुपविशतः)

(ततः प्रविशति बद्धासिधेनुका लतावती नाम प्रतीहारी, सविनयमुपसृत्याभिवाद्य)

लतावती—जुअराअ भअदो पिदामहेण भअवदा महुसूअणेण पेसिदो जअसंसी दारुइ दुआरि चिट्ठदि ।

[युवराज ! भवतः पितामहेन भगवता मधुसूदनेन प्रेषितो जयशंसी दारुकिर्द्वारि तिष्ठति]

कुमारः—(सहर्षम्) शोभनमुखि त्वरितं प्रवेशय ।

लतावती—जं भट्टा आणवेदि ।

[यद्भर्ता आज्ञापयति]

(ततः प्रविशति दारुकिः)

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

दारुकिः—जयतु जयतु युवराजः। कुमार! दिष्ट्याभिवर्धसे लोहितपुरात् प्रत्यावृत्तो भगवान् गरुडध्वजः, तेनाहमग्रतः प्रेषितो भवते विजयघोषणायेति।

कुमारः—(सहर्षम्) आयुष्मन्! विस्तरेण श्रोतुमिच्छामि समरवृत्तान्तम्।

दारुकिः—देव इतो यथा नातिपरिकरानुयातेनैव भगवता निरुद्धं लोहितपुरम्। पुररोधामर्षितेन च वहलद्विरदपदातिस्यन्दनप्रस्यन्दमानया चतुरङ्ग्यानुगतेन बाणनिकरान् विकिरता निवारितमग्रसैन्यम्।

कुमारः—ततस्ततः।

दारुकिः—

द्राक् सैन्ये तीव्रवेगे यदुजदनुजयोश्चण्डखड्गप्रहारैः-
रुद्दण्डैर्बाहुदण्डैरशनिसममहाभीमकोदण्डकाण्डैः।
अन्योन्याघातभग्नावरणपरिसरोद्दामवक्षस्थलासृक्
धारासंसिक्तधूलीपरिचितसमरप्राङ्गणे रेजतुस्ते ॥२४॥

कुमारः—ततस्ततः।

दारुकिः—

खड्गाग्रैर्दलितकरीन्द्रकुम्भपीठं
बाणौघैः परिखचिताश्वसादिवृन्दम्।
विक्षिप्तं क्वचन पदातियूथमीषद्
भग्नाशं तदुभययोधसैन्यमासीत् ॥२५॥

कुमारः—(स्वगतम्) अहो संशयितो जयः। (प्रकाशम्) ततस्ततः।

दारुकिः—

अनन्तरं कोऽपि हुताशनाभो विदार्य चाग्रेसरसैन्यमुग्रम्।
अस्माकमप्यायतबाणपातैर्विकम्पयन् मानसमाविरासीत् ॥२६॥

विदूषकः—ण णवरि तुम्हाणं अम्हाणमवि। सोम्म तदो तदो।
[न केवलं युष्माकमस्माकमपि। सौम्य! ततस्ततः]

दारुकिः—

सोऽपि शार्ङ्गपरिमुक्तमार्गणैः कृत्तबाहुनिचयो भवान्तिके।
संरराज गिरिराजसन्निधौ वातभग्नविटपो नु पादपः ॥२७॥

अपि च—

वीक्ष्यबाणमथ शङ्करान्तिके तच्च किञ्चिदुपवर्तितेक्षणम्।
शोणितं पुरममुञ्चदञ्जसा प्रश्रयेण नतकन्धरो हरिः ॥२८॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

विदूषकः—जिदं अम्हेहिं ता कहं ण णच्चेम्हि ।
[जितमस्माभिः, तत्कथं न नृत्यामि]
(इत्युत्थाय नृत्यति)

कुमारः—(अपवार्य) अथ तस्य खरप्रहारभिन्नविग्रहस्य किं वृत्तम् ?

दारुकिः—देव ! कथयामि यथावृत्तम् ।

प्रध्वस्तावयवोऽपि सायकशतैरल्पासुरप्यायतै-
राज्याच्च्यावितविग्रहोऽपि नितरां कृष्णेन बाणः कृशः ।

विदूषकः—जुज्जइ दुट्ठस्स ।
[युज्यते दुष्टस्य]

कुमारः—(हर्षमभिनीय) ततस्ततः ।

दारुकिः—सद्यस्त्रोक्षणताम्········ ।

कुमारः—(सविस्मयम्) किमेतत् ?

विदूषकः—सोम किं भणासि । तदो तदो ।
[सोम किं भणसि ? ततस्ततः]

दारुकिः—

················गले गरलतां देहेऽर्द्धनारीशतां
राजद्राजवतंसतां परिदधौ··················

विदूषकः—अछरिअं अछरिअं ।
[आश्चर्यमाश्चर्यम्]

कुमारः—महदाश्चर्यास्पदम् । ततस्ततः ।

दारुकिः—देव !················चन्द्रार्धचूडेक्षितः ॥२९॥

कुमारः—किं वाश्चर्यं भगवति पिनाकपाणौ ।

विदूषकः—एव्वं णेवं ।
[एवमेवम्]
(कुमारः स्वाङ्गादवतार्य भूषणानि प्रसादचिह्नं समर्पयति । सविनयमभिवाद्य सादरं परिगृह्य भूषणानि निष्क्रान्तः)

कुमारः—

बाणप्रध्वंससंश्रावाज्जनितानन्दशर्वरी ।
ईहते मृगशावाक्ष्याः प्रसादेन्दुमहोदयम् ॥३०॥

विदूषकः—जइ एव्वं ता इमिणा ज्जेव वुत्तंतकहणमिहेण कहं ण पसादीअदि देवी
[यद्येवं तदनेनैव वृत्तान्तकथनमिषेण कथं न प्रसाद्यते देवी] ।

कुमारः—सम्यगालोचितवानसि । तदुत्तिष्ठ । एह्येहि गच्छावः ।

(इति निष्क्रान्तौ)

श्रीमद्रुद्रचन्द्रविरचितायां नाटिकायां

द्वितीयोऽङ्कः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तृतीयोऽङ्कः

(ततः प्रविशतो निपुणं निरूपयमाणौ मुनिकुमारकौ)

मुनिकुमारकौ—प्रेषितौ स्वः यथा चिरयति पर्वते देवर्षिणा वाणात्मजागमननिरूपणाय।

(इति परिक्रम्य)

एकः—सफलो जादो अह्माणं इहागमणपरिस्समो ।

[सफलो जातोऽस्माकमिहागमनपरिश्रमः]

अपरः—कथमनालोक्यैवोषामेवं व्याहरसि ।

प्रथमः—इदो पेक्खस्स जहा यइएसा असुलहबर्हियाणा उअतरदि पमदुज्जाणे चित्तलेहा दुदीआ बाणदुहिदा। ता पुच्छेम्ह रूप्पवेइ घरप्पवेहविहरं विणिवेदइदुं देवरिसिं।

[इतः प्रेक्षस्व यथा यैषा असुलभबर्हियानादवतरति प्रमदोद्याने चित्रलेखा-द्वितीया बाणदुहिता। तत्पृच्छावः रुक्मवत्यै गृहप्रवेशद्वारं विनिवेदयितुं देवर्षिम्]

उत्तरः—(विलोक्य) वयस्य पश्य उषानिरुद्धसंगमघटनाय देवर्षेरपि स्थाने प्रयत्नः, यथा—

निरस्य रजनीध्वान्तं प्रसाद्य दिशमुज्ज्वलाम् ।
प्रयत्नश्चण्डमहसश्चक्रयोरिव सङ्गमे ।।१।।

तदेहि त्वरितं भगवते नारदाय निवेदयावः, उत्साहयति च कृतकार्यता, यतः—

सम्पाद्य च प्रभूद्दिष्टं कार्यमण्वपि सेवकम् ।
उत्कण्ठा बाधते भूयः प्रभूणामवलोकने ।।२।।

(इति गन्तुमिच्छतः)

एकः—कथमत्रैवाभ्येति सखा मुनेः कृतकालातिपातेन दुर्मनायमानः। तदेहि निवेद-यावो निर्दिष्टार्थसिद्धिमस्मै ।

(ततः प्रविशति यथोद्दिष्टः पर्वतः)

पर्वतः—अये कथमतिकौतुकाकृष्टचेतोभिः प्रणयिजनादेशोऽपि लङ्घितोऽस्माभिः ।

(तत उपसृत्याभिवाद्य)

मुनिकुमारौ—भगवन् ! विषादेनालम्, संपादितार्थौ स्वः ।

पर्वतः—नूनं प्रेषितौ युवां चिरयति मयि तदर्थसाधनायेति ।

मु० कु०—(सप्रश्रयम्) बाढम् ।

पर्वतः—साधु विहितं भवद्भ्याम्, न पुनर्मया कौतुकाविष्टचेतसा ।

मु० कु०—कथमिव ।

पर्वत :—महदिदमाश्चर्यम् ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

मु० कु०—(सप्रश्रयम्) यदि श्रोतव्यमस्माभिरादिशतु भगवानिदं वृत्तम्, न खल्वल्पीयसा भाव्यम्, यत्र भवादृशा अपि सज्जन्ते ।

पर्वत :—पुत्रकौ कथयामि यथा भगवदादेशेनाद्योद्धवेनाहूय भद्रनलोऽभिहितः । प्रवर्तय तावदाकालिकं मधुसमयमिति । तेन च किञ्चिदिव स्मित्वाभिहितम्—देव ! कस्यास्ति प्रजापतेस्समयभेदिनी शक्तिः ।

मु० कु०—यथा विलोक्यते तथा भवितुमर्हति ।

पर्वतः—तदेवोच्यते, स पुनर्बहुमानपूर्वकमनुबद्ध्यमानोऽभिहितः-

आवर्तयेयमवनिं विनिवर्तयेयमम्भोधिरागरसिकाममरापगाञ्च ।
मन्त्रप्रभावविभवेन ममाद्य सर्वं किं नाम भूमिवलये न विधेयमस्ति ॥३॥

मु० कु०—(स्वगतम्) अकालिकमधुसमयं प्रति गतो व्यामोहः ।

पर्वतः—तदाभिहितं भगवन्मन्त्रिणा—त्वरस्व मधुसमयायेति, तेन च निमीलिताक्षेण क्षणमभिध्याय तथा व्यधायि, यथा—

उद्भिन्नाञ्जनवारिदौघमलिनप्रान्तैः प्रकामायतैः
माद्यच्चातकपङ्क्तिरावमुखरैः प्रौढातपाद् दुस्सहैः ।
प्रत्यग्रोदितशक्रचापसुभगैश्चञ्चत्कदम्बानिलै—
र्घर्मान्तागमनिर्व्यलीकपिशुनैः स्वप्नायितं वासरैः ॥४॥

अपि च

मन्दानिलान्दोलितकर्णिकारं नूतनप्रसूनोद्गमम् लुब्धभृङ्गम् ।
मधुः समासाद्य समं पिकौघैः कामाभिसारं समयं चकाशे ॥५॥

मु० कु०—प्रत्यक्षीकृता मन्त्रप्रभावता ।

पर्वतः—किमाश्चर्यं मुनिदत्तवरे, तदागच्छतं निवेदयामः समीहितार्थं महर्षये ।

(इति निष्क्रान्ताः)

प्रवेशकः

(ततो बर्हियानादवरुह्य चित्रलेखाहस्तार्पितकरकिसलया प्रविशति प्रमदोद्यान उषा । उभे प्रवेशं नाटयित्वा)

उषा—हला अआरणं ज्जेव सुहअजणकिदे बलव उक्कंठाए वेवदीव मे हिअअं ।
[हला अकारणमेव सुभगजनकृते बलवदुत्कण्ठया वेपतीव मे हृदयम्]

चित्रलेखा—पिअसहि अआरणं ज्जेव कहं ।
[प्रियसखि अकारणमेव कथम्]

उषा—हला ता किं आरणेण होदव्वं ।
[हला तत्किकारणेन भवितव्यम्]

चित्र०—रइविण्णाण्णं वड्ढइ घडइ सिरिए तह क्खु तणुलदिआ ।
पिअसहि छइल्लसत्थे कुसुमाअरसंगदेव्व वणराई ॥६॥
[रतिविज्ञानं वर्धते घटति श्रिया तथा खलु तनुलतिका ।
प्रियसखि नायकसार्थं कुसुमाकरसंगतेव वनराजिः ॥]

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

(उषा किञ्चित्स्मितमुखी भूत्वा तिष्ठति । तत उभे परिक्रम्य सङ्केतकेतकतरोरधस्तिष्ठतः)

उषा—हला परिदावो मे वड्ढइ ता दंसेहि चित्तफलअगदं कदुअ पिअलक्खणअं, जेण संकेदक्खणं पडिवालअंती अप्पाणं खणमत्तं विणोदइस्से ।

[हला परितापो मे वर्धते, तद्दर्शय चित्रफलकगतं कृत्वा प्रियलक्षणम्, येन सङ्केतक्षणं प्रतिपालयन्ती आत्मानं क्षणमात्रं विनोदयिष्ये]

चित्रलेखा—(ध्यानं नाटयित्वा तथाकृत्वा) णमो दे उवहसिदकुसुमाउहविग्गहसुह दंसणो होइ पिअसहीए ।

[नमस्ते उपहसितकुसुमायुधविग्रहसुखदर्शनो भव प्रियसख्याः] (इति चित्रफलकं दर्शयति) ।

उषा—(विनिर्वर्ण्य स्वगतम्) सो क्खु अअं जणो जस्स लावण्णमोहिदा—

लिहिदेव सव्वआलं भूदगहीदेव्व णठ्ठविण्णाणा ।
चिठ्ठामि विअदलज्जा गुरुअण दिठ्ठावि हंत मुहिदेव ॥ ७ ॥

[स खल्वयं जनो यस्य लावण्यमोहिता—
लिखितेव सर्वकालं भूतगृहीतेव नष्टविज्ञाना ।
तिष्ठामि विगतलज्जा गुरुजनदृष्टापि मोहितेव ॥]

(प्रकाशम्) हला चित्तलेहे उवणय वण्णवत्तिआं इदो किं वि लेहिस्सं ।

[हला चित्रलेखे उपनय वर्णवर्तिकाम् इतः किमपि लेखिष्यामि]

चित्रलेखा—(वर्णवर्तिकां कर्पूरक्षोदपाटलालक्तकरसाक्तामर्पयति ।)

उषा—(चित्रफलकलिखितस्य कुमारस्याग्रे लिखति गाथाम्)

महुसमओ लहु पवणो मिअंकपरिमंडिआ रअणी ।
छयल्लजणविछोहो कहं कदुअ जीअणं होदु ॥ ८ ॥

[मधुसमयो लघुपवनो मृगांकपरिमण्डिता रजनी ।
नायकजनवियोगः कथं कृत्वा जीवनं भवतु ॥]

अवरं अ

माणसगअ चिंत्ताए मुक्कणु पाणिअं सब्बं ।
तमलहमाणा हंसी कहं कदुअ सावि ओससदु ॥ ९ ॥

[अपरं च—

मानसगतचिन्ताया मुक्तं नु पानीयं सर्वम् ।
तमलभमाना हंसी कथं कृत्वा सापि आश्वसतु ॥]

चित्रलेखा—(वाचयति) हलोसे जहा तुमं इमिणं जुअराअं पडि सराआ असि, तहा ममावि हिअअं समुल्लहदि जोग्गघडणेत्ति जाणंदाए । ता जुज्जइ हंसीए माणसराओ अलिणीएण बंधो ।

[हला-उषे यथा त्वमेनं युवराजं प्रति सरागासि, तथा ममापि हृदयं समुल्लसति योग्यघटनेति जानन्त्याः तद् । युज्यते हंस्याः मानसरागो नलिन्या बद्धः]

उषा—हला चित्तलेहे चित्तफलअगदस्स पिअजणस्स दंसणप्पहुदि वठ्ठइ सहस्सगुणिदो मे दावो ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

[हला चित्रलेखे चित्रफलकगतस्य प्रियजनस्य दर्शनात् प्रभृति वर्धते सहस्रगुणितो मे तापः]

चित्र०—सहि खणं समस्सस, उआसण्ण पओसो ता क्खु भिसिणीपत्तेहिं परिकरेमि तुअ सुहाय सयणं।
[सखि क्षणं समाश्वसिहि, उपासन्नः प्रदोषः; तत् खलु विसिनीपत्रैः परिकरोमि तव सुखाय शयनम्]

(इति नलिनीपत्रैः शयनं रचयित्वा तत्रोपवेशयति)

उषा०—(पलाशस्पर्शमभिनीय) पिअसहि ! अप्पाणं ण वारयामि धारेदुं।
[प्रियसखि ! आत्मानं न पारयामि धारयितुम्]

(इति मूर्च्छां नाटयति)

चित्रलेखा—हा पिअसहि महाराअबाणदुहिदे देहि मे पडिवअणं।
[हा प्रियसखि महाराजबाणदुहितः ! देहि मे प्रतिवचनम्]

(नेपथ्ये कलकलः)

अश्वग्रासाभिलोभादनुसृतमभितो दामबन्धं च भङ्क्त्वा
तत्रान्ते वाविपालैर्दृढमभिनिहतं दीपितालातदण्डैः।
पङ्ग्वन्धानां करस्थं द्रुतमशनमथो जग्धुमिच्छन्मदान्धं
मेषद्वन्द्वं निपात्य प्रविशति च पुरःप्राङ्गणे द्वारपालान् ॥ १० ॥

चित्रलेखा—(आकर्ण्य ससंभ्रमम्) पिअसहि ! उच्चिट्ठ कदावि अलद्धभोअणं मेहजुअं इदो पच्चाणं किदे आअद अम्हाणं भअं जणेदु।
[प्रियसखि ! उत्तिष्ठ कदापि अलब्धभोजनं मेषयुगलम् इतः पत्राणां कृते आगतमस्माकं भयं जनयतु]

उषा—किं दाणिं करिस्सं।
[किमिदानीं करिष्यामि]

चित्रलेखा—इदो भविअ चिट्ठाम।
[इतो भूत्वा तिष्ठावः]

(इति परिक्रम्य स्थलान्तरे स्थिते)

उषा—कहिं दाणिं गदं मेहजुगअं।
[क्वेदानीं गतं मेषयुगलम्]

चित्र०—दिट्ठिआ अण्णट्ठाणे ज्जेव गअं।
[दिष्ट्या अन्यस्थान एव गतम्]

(इत्युभे उपविशतः)

उषा—किंवि सद्दो सुणीअदि माक्खु मेहजुअं होदु।
[किञ्चित् शब्दः श्रूयते मा खलु मेषयुगलं भवतु]

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

चित्र०—सहि ! समास्सस ण क्खु मेहजुअं माणुअस्स पअसद्धो लक्खीअदि ता णिरूवइस्सं। [सखि ! समाश्वसिहि, न खलु मेषयुगलं मानुषस्य पदशब्दो लक्ष्यते, तन्निरूपयिष्यामि]

(इति निरूपयति)

(ततः प्रविशति संकेतवेशाभिरामो विदूषकेणानुगम्यमानः कुमारः)

कुमारः—

प्राग् यः पराभवपदं गमितो हि देव्याः
पद्मानिलैर्धितविरागमहाग्निदृष्ट्या ।
भूयः प्रसादसुलभाश्रुपरम्पराभिः
सिक्तः समुल्लसति मे स मनोरथद्रुः ॥११॥

(परितो विलोक्य विदूषकं प्रति)

पश्चिमदिगङ्गनायाः सङ्गमलोभादिवातिरक्ताङ्गः ।
समयेऽस्ताचलशिखरे पतति पतङ्गेऽनुरागीव ॥१२

विदूषकः—तुमए वि इदोज्जेव सिक्खिदव्वो सव्वो अहिसारपवेसोत्ति । [त्वयापि इत एव शिक्षितव्यः सर्वोऽभिसारप्रवेश इति]

(नेपथ्ये वैतालिकः)

सुखसन्ध्या भवतु देवस्य

उत्सर्पन्तीह जालैरगरुविरचिताः केशसंस्कारधूमाः
सम्पूर्यन्ते कुटीषु प्रमदतरविधौ वासताम्बूलगन्धाः ।
धार्यन्ते पुष्पभाराः पथि पथि च तथाऽभ्यन्तरे मन्दिराणां
संध्यारागेण रागाकुल इव नितरां लक्ष्यते सर्वलोकः ॥१३॥

अपि च—

वासराधिपवियोगविदूनं चक्रवाकमिथुनं हृदयं नु ।
यत्पपाट परितो हि नलिन्यास्तेन लोहितवती किल सन्ध्या ॥१४॥

कुमारः—यथेयमुपनतैव शर्वरी, तन्न युक्तमतः परं विलम्बेन, उपदर्शय मे मार्गं प्रमदोद्यानस्य ।

विदू०—जं भट्टा आणवेदि ।
[यद् भर्त्ता आज्ञापयति]

(इति दर्शयन् गच्छति कुमारस्तमनुसरति)

विदू०—जावज्जेव संझालोएण सुहालोओ मग्गो तुरिदं गच्छेम्ह, मा क्खु गदा होदु कालादिपादेण संकेदमंडवादो अदिकोहणा बाणराअदुहिदा ।

[यावदेव सन्ध्यालोकेन सुखालोको मार्गस्त्वरितं गच्छावः, मा खलु गता भवतु कालातिपातेन सङ्केतमण्डपाद् अतिकोपना बाणराजदुहिता] ।

(कुमारस्तथा करोति, इति रक्ताशोकमण्डपं परिक्रामतः)

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

चित्रलेखा—(पदशब्दं निरूप्य) पिअसहि ! समाअदो जुअराओ त्ति तक्केमि ।
[प्रियसखि ! समागतो युवराज इति तर्कयामि]

उषा—ता इह ठ्ठिदाज्जेव संभावेह्म ।
[तदिह स्थिते एव संभावयाव:]

(इति सन्निहिते संभावयतः)

कुमारः—(लतामण्डपं विलोक्य) अये मम मानसेन समं शून्यमिवाभाति लतामण्डपम् ।
यथा—

राजन्त्यशोकलतिकास्तवकनताः पल्लवोल्लसिताः ।
मत्तद्विरेफमिलितास्सापत्न्योद्वेगनिर्मुक्ताः ॥१५॥

अपि चाशोकमन्तरान्तरा

एता लताः स्फुरितकेसरराजिरम्याः
स्वामोदमन्दुरमदे परिलब्धमानाः ।
निष्पीय सारमिति लोभवशादनल्पं
भूयस्तदङ्गपरिवासमिवोद्गिरन्ति ॥१६॥

भवतु यावत्पश्यामः (इति निपुणमन्विष्य विषादं नाटयित्वा स्थितो विदूषकं प्रति) सखे गिरिवर ! पश्य—

संस्यूतेव नयनयोर्हृत्फलके हन्त लिखितेव ।
घटितेव दिग्विभागे विभाति कोऽयमद्भुतावेशः ॥१७॥

(ध्यानं नाटयित्वा विदूषकं प्रति) सखे तामवेहि—

लोकलोचनकुरङ्गवागुरा चित्तमत्तगजलोहशृङ्खला ।
सा व्यधायि वडिशं मनोभुवः कामिमीनहतये स्वयंभुवा ॥१८॥

अपि च—

शृङ्गारामृतवाहिनी परिलसद्दाक्षिण्यरत्नाकरा
सौन्दर्यैकसुरद्रुहेमलतिका सौभाग्यबीजोर्वरा ।
रागाम्भोरुहदीर्घिका जनमनःसंमोहनक्षोदभू-
र्दृश्येताद्य मनागपि प्रियतमा कर्पूरदृग्विभ्रमा ॥१९॥

उषा—(स्वगतम्) एसो वि मम मंदभाइणीए किदे बहु मम्महावत्थामणुहोदीति ।
[एषोऽपि मम मन्दभागिन्याः कृते बहु मन्मथावस्थामनुभवति]

चित्रलेखा—पिअसहि ! सुदं तुए ।
[प्रियसखि ! श्रुतं त्वया]

उषा—धीरा होइ अवरमवि सुणेम्ह ।
[धीरा भव पुनरपि शृणुवः]

(इति पुनः संभावयतः)

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

कुमारः—गिरिवर ! विप्रलब्धोऽस्मि भवता ।

विदू०—धीरो होइ एसो ह्मण्णेसेमि (इति परिक्रम्य) इदो किं विलक्खीअदि ।
[धीरो भव एषोऽह्मन्वेषयामि, इतः किमपि लक्ष्यते]

(इति तत्रानुसरति कुमारोऽपि ससंभ्रमं तमेवानुसरति)

उषा—हद्धि जाणिदेह्म ।
[हा धिग् ज्ञाते स्वः]

चित्रलेखा—ण क्खु ण क्खु भिसिणीपत्तसअणदत्तदिट्ठिणा दुट्ठ वट्ठुणा जप्पिदं ।
[न खलु न खलु विसिनीपत्रशयनदत्तदृष्टिना दुष्टवटुना जल्पितम्]

विदूषकः—ण क्खु सा एसो पत्तपअरो होदि ।
[न खलु सा, एष पत्रप्रकरो भवति]

कुमारः—धिङ्मूर्ख ! पत्रप्रकरः कथम्—

इदं हि तस्याः शयनं नलिनीपत्रैः परिस्तीर्णम् ।
स्मरतापसाभिदग्धैर्मृणालवलयैः समाकीर्णम् ॥२०॥

अपि च

इदमचिरोज्झिततल्पं मन्ये स्मरतापतप्तायाः ।
करगलितघर्मसलिलैर्भवति शिमशिमाघ्वनिर्यदिह ॥२१॥

विदूषकः—उवलद्धं उवलद्धं ।
[उपलब्धमुपलब्धम्]

कुमारः—किं किम् (विदूषको दर्शयति)

कुमारः—

एतत् तच्चित्रफलकं यत्र सा कमलेक्षणा ।
प्रतिक्षणं वर्णयित्वा मदङ्गानि शुचं जहौ ॥२२॥

अपि च

संसूचयति ममोपरि तस्या भावातिपिच्छिलं हृदयम् ।
गलदञ्जनाश्रुसेकाद्विचित्रितं फलकं तु ॥२३॥

विदूषकः—इदो किं वि लिहिदमत्थि ता वाचेदु पिअवअस्सो ।
[इतः किमपि लिखितमस्ति तद् वाचयतु प्रियवयस्यः]

चित्र०—पिअसहि ! चित्तफलओ लद्धो ।
[प्रियसखि ! चित्रफलको लब्धः]

उषा—ण णवरं चित्तफलओ हिअअमवि । ता लज्जाए वेवदि मे हिअअं । ण सक्कणोमि अप्पाणं दंसेदुं ।
[न केवलं चित्रफलको हृदयमपि । तल्लज्जया वेपते मे हृदयम्, न शक्नोमि आत्मानं दर्शयितुम्]

(इति तत्रान्तरितैव स्थिता सह चित्रलेखया)

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

कुमारः—सखे किं ब्रवीमि। मम हि।

क्लृप्ताक्षरार्थलिखितोऽयमनङ्गलेख-
स्तस्याः करामबुजसमागमलब्धगन्धः।
जन्मान्तरोपचितपुण्यतरोः फलानि
तद्गूढभावपिशुनः प्रकटीकरोति ॥२४॥

हा प्रिये! कथं न ददासि दर्शनम्। सहस्रकरखरकिरणसन्तापतापितानीव विशीर्यन्तेऽङ्गानि। कामचाण्डालकाण्डत्रिदीर्णवक्षःस्थलविवरलब्धमार्गा इव निःसरन्तीह मे प्राणाः। तत् कमुपायं करिष्ये। (विचिन्त्य) क्षणेन नीरुगपि भवेयम्।

शैवालद्युतिहारिकेशनिचया नाभिभ्रमोद्भासिनी
राजद्वक्त्रसरोरुहा परिमिलद्वक्षोजवक्त्रोदया।
मञ्जीरध्वनिहंसरावमुखरा दृष्टिभ्रमोर्मिच्छटा
सा श्रृङ्गारसुधारसैकतटिनी स्यादग्रतो मे यदि ॥२५॥

विदूषकः—(उच्चैः) अए, हदो मे पिअवअस्सो पावए बाणदुहिदाए।
[अये, हतो मे प्रियवयस्यः पापया बाणदुहितया]

चित्रलेखा—पिअसहि! अज्जवि किं एत्थ विलंबेण त्वरिदा होइ कुमारं उपसप्पेह्म।
[प्रियसखि! अद्यापि किमत्र विलम्बेन, त्वरिता भूत्वा कुमारमुपसर्पावः]

उषा—जहा भणासि।
[यथा भणसि] (इत्युभे उपसर्पतः)

चित्रलेखा—(उपसृत्य) जअदु जअदु पिअवअस्सो।
[जयतु जयतु प्रियवयस्यः]

(उषा लज्जां नाटयित्वा चित्रलेखाकरावलम्बिनी भूत्वा पुरस्तिष्ठति)

कुमारः—(स्वगतम्) कथं भाग्योदयेनावलोकिते। (प्रकाशम्) स्वागतम् समुपविशताम्।

विदू०—सोत्थि होदु दे महाराअबाणदुहिआए चित्तलेहे तुम्हाणं वि।
[स्वस्ति भवतु ते महाराजबाणदुहिते, चित्रलेखे तवापि]

युवराजः—(स्वगतम्) अये चिरविरहेण क्लेदितेयम्। यथा—

अन्तःस्मरानलोत्थामविषह्यां तीव्रतापार्तिम्।
परिदेवयतीवास्या विभातचन्द्रोपमं वदनम् ॥२६॥

इदानीं प्रकृतिमापद्यते,
मेघागमेनेव धरातलानि पुष्पाकरेणेव च काननानि।
प्रत्यग्रभावोदयपेशलायाः प्रत्युन्मिषन्तीह तथाङ्गकानि ॥२७॥

उषा—(तिर्यगवेक्ष्यानिरुद्धं स्वगतम्) सो क्खु अयं जणो (लिहिदेव्वेति पुनः पठति)
[स खल्वयं जनः, लिखितेवेति०]

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

कुमारः—(तिर्यङ्निरीक्षमाणां निर्वर्ण्य)

नीलाश्मभासुरतरेण सुधामयेन प्रान्तारुणेन सितवारिजसोदरेण ।
दत्ताञ्जनेन तव चण्डि विलोचनेन लोकत्रयं विजयते सुकृती मनोभूः ॥२८॥

अपि च

लावण्यनिर्माणविधौ विधातर्मन्ये तवाक्षीणविधानशिल्पता ।
नारायणोरःस्थलवासयोग्यामुत्पाद्य लक्ष्मीं परमामथासृजः ॥२९॥

विदूषकः—ही ही भोः, भुत्तियोगो दहिभत्तपिण्डो विअ किंचि आअदो एसो ।
[ही ही भोः, भुक्तियोग्यो दधिभक्तपिण्ड इव किञ्चिदागत एषः]

कुमारः—(विलोक्य) धिङ्मूर्ख ! प्रत्यग्रोदितचन्द्रमपि नावधारयसि ।

यतः—

पाटीरैः परिलिम्पतीव गगनं कर्पूरखण्डोत्करै-
र्दिग्भित्तीः किरतीव भूमिवलयं कन्दैरिवावर्षति ।
सद्यः पारदधारया कुलगिरीनासिञ्चतीव स्फुटं
जीवं जीवकुलेक्षणानि सुखयन् चन्द्रोऽयमुन्मीलति ॥३०॥

अपि च

वृद्धिं परां नयति वारिधिना समं हि
रागाकुलं च विदधाति चकोरनेत्रैः ॥
सद्यो विकाशयति कैरवचक्रवालै-
स्त्वत्सङ्गमे सुदति मे हृदयं हिमांशुः ॥३१॥

चित्रलेखा—जुज्जइ जुअराअ पिअवअस्सस्स छुधावहरो ।
[युज्यते युवराजप्रियवयस्यस्य क्षुधापहरः] (इति सर्वे हसन्ति)

विदूषकः—किं दाणिं कारिस्सं अवमाणितो ह्मि ता न चिठ्ठेमि ।
[किमिदानीं करिष्यामि, अवमानितोऽस्मि तन्न तिष्ठामि]

(इति निष्क्रान्तः)

चित्रलेखा—अम्मो सच्चं गदो अदिकोअणो वम्मणो ता पिअवअस्सस्स हिअभूदं पडिवत्तेमि गिरिवरम् ।
[अहो सत्यं गतोऽतिकोपनो ब्राह्मणः, तत्प्रियवयस्यस्य हृदयभूतं परिवर्तयामि गिरिवरम्]

(इति निष्क्रान्ता)

कुमारः—(सरागाभिनिवेशपूर्वकं नायिकामवलोक्य)

पीयूषसेकादपि सुन्दराणि स्वीयाङ्गसंस्पर्शसुखानि तन्वि ।
एह्येहि सन्धेहि समं नतांसे कामोपतप्तेषु ममाङ्गकेषु ॥३२॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

(ततः ससंभ्रमं पुनः प्रविशति सह चित्रलेखया विदूषकः)

विदू॰—अये अअंडे ज्जेव पड्दो कुउण्डो ।

[अये अकाण्ड एव पतितः कूष्माण्डः]

कुमारः—किमेतत् ?

विदू॰—किं ण जाणीअदि वउलकंचुई देवीए दासी मालइआ सहिदो इदोज्जेव आअच्छदि ।

[किं न ज्ञायते वकुलकञ्चुकी देव्या दास्या मालविकया सहित इत एव आगच्छति]

कुमारः—सत्यम्, अकाण्डकूष्माण्डपात इति ।

(इति सर्वे यथास्थानमुपविशन्ति । नायिकानायकौ ससंभ्रमं नाटयतः । ततः प्रविशति मालतिकयानुगम्यमानः कञ्चुकी)

कञ्चुकी—

चित्रस्थैरिव च स्थितं सुशनकैर्यातं प्रभूणां पुरः
साशंकैरिव वीक्षितं प्रतिपदं यष्टिस्तथालम्बिता ।
इत्याश्चर्यवयोऽन्वितेऽपि विहिते वार्द्धक्यकालेऽधुना
जीर्णाङ्गेन परं द्विरुक्तमिव तत्सर्वं मयाभ्यस्यते ॥३३॥

आज्ञप्तोऽस्मि यथा भगवतो नारदाद् विदितवृत्तान्तया देव्या बाणासुरदुहितृ-परिणयसामग्रीव्यग्रया विज्ञापयितुं कुमारम् । तद्भवतु यावदुपसर्पयामि । मालतिके प्रमदोद्यानमार्गे न तथा विशदं विलोकयामि कृतोद्योतायामपि रजन्यां शशिना । यतः—

प्रतिपालयन्ति तिमिरं हिमांशुकिरणैरपि ध्वस्तम् ।
अतितन्वातपमपि च स्वच्छायायां हि सज्जनास्तरवः ॥३४॥

अपि च

अस्पृष्टानि मयूखैश्चन्द्रमसो मेदुराणि तिमिराणि ।
समविषममेकभावं प्रमदवने हन्त जनयन्ति ॥३५॥

तन्मम पुरोयायिनी भव । (मालतिका तथाकरोति । इत्युभावुपसर्पतः)

मालतिका—(विलोक्य स्वगतम्) अए किद परिणओ ज्जेव लक्खीअदि जुअराओ । एसा अह्माणं देवीए सवत्तीए (इति सामर्षं पश्यति) अहवा जुज्जइ चओरिआए सावत्तणं कुमुईए ।

[अये कृतपरिणय एव लक्ष्यते युवराजः । एषा अस्माकं देव्याः सपत्नी । अथवा युज्यते चकोरिकायाः सापत्न्यं कुमुदिन्यै] ।

कञ्चुकी—(विलोक्य स्वगतम्)

द्युमणाविवातपश्रीर्जलधर इव निश्चला विद्युत् ।
शशिनीव कौमुदीयं भाति कुमारेण सङ्गमिता ॥३६॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तदेष स्पृहणीयोऽयमनयोः सङ्गमः, भवतु विज्ञापयामि (उपसृत्य) विजयतां कुमारः ।

मालतिका—जेदु जेदु भट्टा ।

[जयतु जयतु भर्ता]

कुमारः—वकुल कञ्चुकिन् ! किमागमनकारणम् ?

कञ्चुकी—देव ! यथागृहीतनारदाज्ञया देव्या विज्ञाप्यसे बाणदुहिता भगिनीत्वेन संभावनीया मया नारदवचनेन सुतरां युवराजानुरोधेन च । तदेनामन्तःपुरगतां समुपचितोपचारैरुपचरितुमिच्छामि । मौहूर्तिकैः कृतपरिणयमुहूर्ते परिणतोषारागे सहोषया कृतार्थयित्वात्मानं युवराजदर्शनेन । अतः परं युवराजाज्ञैव प्रमाणम् (इत्युदञ्चिताञ्जलिः पुरस्तिष्ठति) ।

कुमारः—(मालतिकामभिवीक्ष्य) भवती किमाह ?

मालतिका—(किञ्चित् स्मितमभिनीय) देव ! णिवेदिदं कंचुइणेव्व सव्वं । रअणी खीणा ज्जेव लक्खीअदि ता करीअदि कहं ण देवीए मणोहिलहिदं ।
[देव ! निवेदितं कञ्चुकिनैव सर्वम्, रजनी क्षीणा एव लक्ष्यते क्रियते कथं न देव्या मनोभिलषितम्]

विदूषकः—(स्वगतम्) परिणदं तुम्हाणं देवीए मनोहिलहिदं ।
[परिणतं युष्माकं देव्या मनोभिलषितम्] (प्रकाशम्)
जुअराअ ! उहाए पाणिग्गहणेण करीअदि कहं ण देवीए मणोहिलहिदं ।
[युवराज ! उषायाः पाणिग्रहणेन क्रियते कथं न देव्या मनोभिलषितम्]

मालतिका—(सरोषं निरीक्ष्य) हदास कहं ण विही खंडइ तुह जीहां सहस्सधा ?
[हताश ! कथं न विधिः खण्डयति तव जिह्वां सहस्रधा]

विदूषकः—अण्णस्सावराहे जुज्जुइ वहो अण्णस्स ।
[अन्यस्यापराधे युज्यते वधोऽन्यस्य]

मालतिका—(मुखं परिवर्त्य) उवरम ण क्खु जापिस्सं तुमए ।
[उपरम न खलु जल्पिष्ये त्वया]

(मालतीकञ्चुकिनौ कुमारमुखमवलोकयतः)

कुमारः—वकुल ! परवशोऽयं जनो देव्या यथारुचिः । (चित्रलेखामभिवीक्ष्य) चित्रलेखे ! यथाह कञ्चुकी तथा सहोषया विश्रब्धं गम्यताम् ।

चित्रलेखा—जं जुअराओ आणवेदि (इति सहोषयोत्तिष्ठति) ।
[यद्युवराज आज्ञापयति]

कुमारः—वकुल ! मालत्या सह मार्गं दर्शयन् व्रजैनामभिनीय ।

कञ्चुकी—यथा देव आज्ञापययति (इति निष्क्रान्तः कञ्चुकी मालतिकया सहोषया)

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

कुमारः—(ध्यानं नाटयित्वा)

प्रत्युप्तहीरकमणेरिव मुद्रिकाया विश्लेषदुःखमनुभावयता तदीयम् ।
कान्तावियोगपरिणामपराङ्मुखेन हा दुर्विदग्धविधिना शकलीकृतोऽस्मि ॥३७॥

विदूषकः—पिअवअस्स ! पहरमत्तावसेसा रअणी, ता समस्सस समस्सस ।
[प्रियवयस्य ! प्रहरमात्रावशेषा रजनी, तत् समाश्वसिहि समाश्वसिहि]

कुमारः—

क्षणमपि यस्या विरहे कतिपयदिवसायते सपदि ।
त्रपसे वदन्न तस्याः क्षमस्वेति यामं नु यामिन्याः ॥३८॥

विदूषकः—ता किं करेम्हि ?
[तत्किं करोमि]

कुमारः—सखे ! समानय सवर्णवर्तिकां यावच्चित्रफलकागतां प्रियतमां प्रकल्प्यात्मानं विनोदयामि ।

विदूषकः—जं भवं आणवेदि ।
[यद् भवानाज्ञापयति]

(इति लघुपदैर्निष्क्रान्तः)

कुमारः—(निश्वस्य)

सर्वेन्द्रियाणि परिरुध्य वियुक्तचित्त-
मेकान्ततः सपदि निर्विषयीकरोति ॥
कामं प्रिया मदनसायकसारभूता
कर्णीव निःसरति नो हृदये विलग्ना ॥३९॥

(ततः प्रविशति सवर्णवर्त्तिहस्तो विपूषकः)

विदूषकः—(विलोक्य) कहं दयिअजणविओअं अणुभोदि पिअवअस्सो । ता उपसप्पेमि (इत्युपसृत्य) । पिअवअस्स ! जावज्जेव विविदे ससिअरोज्जोअसुहालोअं ताव क्खु होइ दइआ सणाहो ।

[कथं दयितजनवियोगमनुभवति प्रियवयस्यः, तदुपसर्पामि प्रियवयस्य ! यावदेव विद्यते शशिकरोद्योतसुखालोकं तावत् खलु भव दयितासनाथः]

कमारः—(सहर्षं हस्तौ प्रसार्य) एह्येहि प्रिये !

त्वद्विप्रयोगाधिदवाग्निदग्धमुच्छ्वासमात्राङ्कुरसारशेषम् ।
स्वीयाङ्गपीयूषरसावसेकैर्विधेहि मां भूतमिवातिशक्तम् ॥४०॥

विदूषकः—(स्वगतम्) कहं मोहिदोणुराएण पिअवअस्सो, (प्रकाशम्) णं भणामि चित्तफलएण ।

[कथं मोहितोनुरागेण प्रियवयस्यः, ननु भणामि चित्रफलकेन]

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

कुमारः—हा कथं दयितानामसंकीर्तनेन व्यामोहितोऽस्मि, तदानय वर्णवर्तिकां चित्रफलके व्यालिखामि ।

विदूषकः—(तथा करोति)

कुमारः—(वर्णवर्तिकां समादाय चित्रफलकं च, ध्यानं नाटयित्वा स्थितः)

विदूषकः—कहं न झत्ति विलिहदि पिअवअस्सो ।
[कथं न झटिति विलिखति प्रियवयस्यः]

कुमारः—सखे कथयामि

यामेकभावेन विधिर्विधाय चिरायुषः स्फीतफलं प्रपेदे ।
तद्भावबोधोदयविक्लवात्मा तामुत्पलाक्षीं कथमालिखामि ॥४१॥

(इति वर्णवर्तिकां चित्रफलकं च परित्यजति)

विदूषकः—कहं बलबदीए उक्कंठाए पडिगहीतो पिअवअस्सो ?
[कथं बलवत्या उत्कण्ठया प्रतिगृहीतो प्रियवयस्यः]

कुमारः—तया सहाध्यासिते लतामण्डपे स्थातुं न पारयामि, अतो दर्शय जलयन्त्रगृहमार्गम्, यत्र क्षणमतिवाहयिष्ये ।

विदूषकः—एवं करीअदु [एवं क्रियताम्]

(इत्युत्थाय मार्गं दर्शयति कुमारस्तत्करावलम्बितः शिथिलगतिः परिक्रामन् सर्वतोऽवलोक्य) अहह !

दाही शीतः सुरभिपवनः शीतरश्मिः कृशानुः
मर्मच्छेदी प्रभवति पुनः कूजितं कोकिलानाम् ।
किञ्चावश्यं प्रियजनसमायोगविच्छेदकाले
निद्राच्छेदाद्विरतिविषमा कल्पकल्पा त्रियामा ॥४२॥

(इति निष्क्रान्ते)

श्रीमद्रुद्रचन्द्रविरचितायां नाटिकायां

तृतीयोऽङ्कः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

चतुर्थोऽङ्कः

(ततः प्रविशतो मालतिकारूपलेखे)

उभे—अणिअंदे देवीए आसण्ण परिणअ मुहुत्तं जुअराअसआसं णिवेदिदुं (इत्युपसर्पतः)
[आज्ञप्ते देव्या आसन्नपरिणयमुहूर्तं युवराजसकाशं निवेदयितुम्]

रूपलेखा—सहि कहिं दाणिं जुअराओ हुविस्सदि ।
[सखि क्वेदानीं युवराजो भविष्यति]

मालतिका—जहा बम्हमुहुत्तक्खणणिग्गदस्स एसिणो मग्गदेसणत्थं णिग्गदाए मए जलअंतघरं पविसंतो लक्खिदो गिरिअरदुदीओ ता तक्केमि तहिं हुविस्सदीति ।

[यथा ब्राह्ममुहूर्तक्षणनिर्गतस्य ऋषेः मार्गदर्शनार्थं निर्गतया मया जलयन्त्रगृहं प्रविशन् लक्षितः, गिरिवरद्वितीयो युवराजः, तत्तर्कयामि तत्र भविष्यतीति]

रूपलेखा—सच्चं उक्कंठिदो सिसिरोपआरणित्तं गदो हुविस्सदि ता तहिं गच्छेम्ह ।
[सत्यमुत्कण्ठितः शिशिरोपचारनिमित्तं गतो भविष्यति, तत्तत्र गच्छावः ।

(इत्युभे उपसर्पतः)

मालतिका—(पुरोऽवलोक्य) एद जलअंतघरं ।

[इदं जलयन्त्रगृहम्]

रूपलेखा—(अव्यक्तमभिनीय) सहि किं वि दुठ्ठबम्हणो जप्पदि ता सुणेम्ह ।
[सखि किमपि दुष्टब्राह्मणो जल्पति तच्छृणुवः]

मालतिका—तहा होदु ।
[तथा भवतु] (इत्युभे निभृतं निरूपयतः)
(ततो जलयन्त्रगृहकपाटावलम्बितविग्रहो निमील्यनयने नातिव्यक्तम्) ।

विदूषकः—हद्धी हद्धी कहं नाअपासेहिं णिअलिदे ।
[हा धिग् हा धिक् कथं नागपाशैर्निगडिते] ।

कुमारः—(आकर्ण्य स्वगतम्) अहो देव्या नागपाशैर्निगडिते उषा-चित्रलेखे ।
देव्यास्तदेतत् परिवेष्टितं हि न श्रद्धधे चन्द्रमसोऽग्निपातः ।
भवतु पुनराकर्णयामि ।

विदू०—गाढं णिअलिदे ।
[गाढं निगडिते]

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

कुमारः—सापत्न्यविद्वेषवशादवश्यं भवेदहो किं न चरन्ति नार्यः ॥१॥

रूपलेखा—किं भणादि दुठ्ठो ।
[किं भणति दुष्टः]

मालतिका—जाणेसि विअअं पेक्खिअ जप्पदि ।
[जानासि विगतं प्रेक्ष्य जल्पति]

रूपलेखा—अछरिअं अछरिअं अवरं ।
[आश्चर्यमाश्चर्यम् अपरम्]

कुमारः—हा कथं केन वा (अदत्तोत्तरवचन एव)

विदूषकः—हा हा किं करोदु पिअवअस्सो ।
[हा हा किं करोतु प्रियवयस्यः]

कुमारः—आं ज्ञातं नागपाशैर्निगडिते उषाचित्रलेखे । यदुत व्यक्तीकृतमेवानेन किं करोतु प्रियवयस्य इति प्रवदता । हा प्रिये बाणराजदुहितः ! कथं संप्रत्यनुचितां दशां प्राप्तासि ।

मत्कण्ठपाशोचितबाहुवल्लि हा नागपाशैर्निगडीकृतासि ।
त्वद्विप्रयुक्तो यदि धारयेयं प्राणाञ्जगतिं न कलङ्कयेयम् ॥२॥

भवतु पुनरस्य तत्त्वतो निरूपयामि वचनम् ।

विदूषकः—अछरिअं अछरिअं । मुक्को मुक्को कुमारः ।
[आश्चर्यमाश्चर्यं मुक्तो मुक्तः कुमारः]

कुमारः—ननु किमाहैष दुर्मेधाः पूर्वं निगडिते पश्चान्मुक्तो मुक्त इति । भवतु समीपे गत्वा पृच्छामि (इत्युत्थाय यावद् गच्छति)

विदूषकः—(नृत्यति) मुक्को मुक्को भाअधेएण कुमारः ।
[मुक्तो मुक्तो भागधेयेन कुमारः]

कुमारः—(उपसृत्य) किं जल्पसि निगडिते पुनर्मुक्त इति ।

विदू०—अह किं ।
[अथ किम्]

कुमारः—असम्बद्धप्रलापिन् ! व्यक्तं वद ।

विदू०—वेवथुणा ण सक्कणोमि कहिदुं खणं चिठ्ठ ।
[वेपथुना न शक्नोमि कथयितुम् क्षणं तिष्ठ]

कुमारः—(स्वगतम्) हा सर्वथा चित्रलेखया सह संगृहीता प्रियतमा, कथमितरथास्य वेपथुः प्रवर्द्धेत । नूनमभिभवमसहमाना मृतेव प्रियतमा । (प्रकाशम्) हा बाणराजदुहितः ! मत्तगजगामिनि ! विलम्बितेन किं प्राणास्तामनुगच्छत ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

विदू०—अण्णजेव भणिदं मए अण्णजेव सुदं तुए ।
[अन्यदेव भणितं मया अन्यदेव श्रुतं त्वया]

कुमारः—तत्कथय कथम् ।

विदू०—जाणे क्खु णाअपाशेहिं णिअलिदे तुअ भुअलदे ।
[जाने खलु नागपाशैर्निगडिते तव भुजलते]

कुमारः—तत्प्रेमबन्धेन भुजङ्गपाशैर्भुजावबन्धो मम नास्ति बन्ध्यः ।
पीयूषलोभाद्धि विधुन्तुदस्य कण्ठापहारोऽपि महत्त्वकृन्नः ॥३॥
आः कथमहमनिरुद्धोऽपि बद्धोऽस्मि (निर्वर्ण्यात्मानम्) धिङ् मूर्ख ! मिथ्याप्रलापिन् ! कुतो मे भुजावबन्धः ?

विदू०—(सभयम्) सिविण्णकं भणामि, मा अण्णहा संभावेइ सोवि दे समीहिदसंसी लक्खीअदि ।
[स्वप्नकं भणामि, मान्यथा संभावय सोऽपि ते समीहितशंसी लक्ष्यते]

कुमारः—तत्कथय ?

विदू०—इदो सिविणे केणावि दिव्वरूवधारिणा सहस्सबाहुणा अलक्खिदं ज्जेव भवदो णाअपासेहिं णिअलिदे भुअलदे तदो मए रुण्णं ।
[इतः स्वप्ने केनापि दिव्यरूपधारिणा सहस्रबाहुना अलक्षितमेव भवतो नागपाशैर्निगडिते भुजलते, ततो मया रुदितम्]

कुमारः—ततस्ततः ।

विदू०—तदो मज्झे ? वरुणेण अणदसत्तिणा धवलविग्गहसहाएण मेहसरिच्छेण मोइए तुअ भुअलदे । तदो मए हरिसभरिएण णच्चिदं । ता जाणे एसो सिविणओ तुअ समीहिदसंसी ।
[ततो मध्ये वरुणेन अनन्तशक्तिना धवलविग्रहसहायेन मेघसदृशेन मोचिते तव भुजलते, ततो मया हर्षभरितेन नर्तितम् । तज्जाने एष स्वप्नकस्तव समीहितशंसी]

कुमारः—यदि प्रियासङ्गमोऽपि घटते, तदा किमितराभिमतसिद्ध्या ?

विदू०—एवं संवुत्तकप्पं । ताए खणं समस्सस जावदुहाराओ होदि ।
[एवं संवृत्तकल्पम् । तत्क्षणं समाश्वसिहि यावदुषारागो भवति ।

कुमारः—
सत्येवोषारागे का वोषारागसङ्गमापेक्षा ।
शुद्धेऽन्तरात्मनि पुनः कियती तीर्थादिना शुद्धिः ॥४॥

रूपलेखा—एसो अवसरो जुअराअं पेक्खिदुं ।
[एषोऽवसरो युवराजं प्रेक्षितुम्]

मालतिका—सुट्ठु भणासि । [सुष्ठु भणसि] (इत्युभे उपसृत्य)
जेदु जेदु जुअराओ ।
[जयतु जयतु युवराजः]

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

कुमारः—स्वागतं भवत्योः ।

विदू०—रूअलेहे किं आअमणकारणं ?
[रूपलेखे किमागमनकारणम्]

रूपलेखा—आसण्ण परिणअमुहुत्ते ज्जेव पेक्खीअदि अह्माणं पिअवअस्सो देवीए। जत्तुम्हारिसाणं साइव्वं तत्तए व्वंणेवं ।
[आसन्नपरिणयमुहूर्त्ते एव प्रेक्ष्यते अस्माकं प्रियवयस्यो देव्या यत् भवादृशानां साचिव्यं तत् तस्यै वर्णयावः]

विदू०—अह्मे पिअवअस्सस्स मंतिणो ।
[अस्माकं प्रियवयस्यस्य मन्त्रिणः]

रूपलेखा—हतास चिट्ठ ण जप्पिस्सं तुए । (कुमाराभिमुखमवलोक्य) जुअराअ उआसण्णो परिणअमुहुत्तो ता भअदो बिलंबेनालं ।
[हताश तिष्ठ, न जल्पिष्यामि त्वया । युवराज ! उपासन्नः परिणयमुहूर्तः, तर्हि भवतो विलम्बेनालम्]

कुमारः—अननुल्लङ्घनीयाज्ञा देव्यास्तद्वदतां भवत्यौ, एषोऽहमप्यागत एवेति ।

उभे—जहा भट्टा आणवेदि (इति निष्क्रान्ते)
[यथा भर्त्ता आज्ञापयति]

प्रवेशकः

—:०:—

(तत उत्थाय विदूषकेण सह शिथिलं परिक्रामति कुमारः)

विदूषकः—कहं हरिसट्ठाणे विसण्णो ज्जेव सिठिलं परिक्कामसि ?
[कथं हर्षस्थाने विषण्ण एव शिथिलं परिक्रामसि]

कुमारः—किं करोमि ?

तस्याः स्मिताननविलोकनजोऽनुरागो
देव्यास्तथा प्रणयभङ्गजसाध्वसं तु ।
आविर्भविष्यति पुरः कतमो न पूर्व-
मित्याकुलेन हृदयेन खिलीकृतोऽस्मि ॥५॥

अपि च—

स्खलयति पदे पदे मां देव्या विहितापराधजोऽनुशयः ।
अवलम्बनमिव पुरतो ददाति तस्यां च दर्शनोत्सुकता ॥६॥

विदू०—अज्ज वि देवीए कोवसंभावणा करीअदि ?
[अद्यापि देव्याः कोपसंभावना क्रियते]

कुमारः—

उत्कलिकाशतविषमं हृदयं सहते न वनितानाम् ।
दीपप्रभेव नितरां मनागपि स्नेहविच्छित्तिम् ॥७॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

विदू०—ण क्खु अहं संभावेमि जहा बाणदुहिदाए पाणिग्गहणकज्जसत्ता ।
[न खलु अहं संभावयामि यथा बाणदुहिताया पाणिग्रहणकार्यसत्ता]

कुमार—धिङ्मूर्ख ! कुलजनानां कथं जानातु भवादृशः ?
नो वापि रूक्षरचना न च संभ्रमोऽपि कार्येषु नार्यचरितेषु विमूढता च ।
किन्तु प्रकामशिथिलैकदृशानुमेयः कोपक्रमोऽपि सुदृशां विरलैकवेद्यः ॥८॥

विदूषकः—(स्वगतम्) अवहृदं एदस्स धीरत्तणं देवीए कोहाणलेण । ता शिठिलेमि एदस्स अवत्थावैसम्मं विहाण त्रण्णणेण । (प्रकाशम्)
वअस्स पेक्खस्स जहा रअणीओ आसण्ण विहाण समओ ।
[अपहृतमेतस्य धीरत्वं देव्याः क्रोधानलेन, तच्छिथिलयामि एतस्यावस्था-वैषम्यं विभातवर्णनेन । वयस्य ! प्रेक्ष्यस्व यथा रजन्या आसन्न-विभात-समयः]

सिठिलअ घणांधआरो मिलणास्सुअं चक्कवाअ मुहरो ।
दरदलिअ मुउलभारो गलिअ मिअंक पहापसारो ॥९॥
[शिथिलकघनान्धकारो मिलनोत्सुकचक्रवाकमुखरः ।
दरदलितमुकुलभारो गलितमृगाङ्कप्रभाप्रसरः ॥]

अपि च—
छेक्का मम्महवाणा दरकंविअणु दलनिवहा ।
उक्कंठअंति हिअअं कमलफरिस सीअला पवणा ॥१०॥
[छेकाः मन्मथबाणाः दरकम्पितदलनिवहाः ।
उत्कण्ठयन्ति हृदयं कमलस्पर्शशीतलाः पवनाः ॥]

कुमारः—वयस्य सम्यगवलोकितम्, अये तस्याः सारूप्यनिरूपणेन त्वरयतीव मां विभातकालः । यथा—
तस्या रदच्छविरिवोन्मिषतेऽम्बरश्री-
स्तत्पाणिकान्तिरुचिराणि च पल्लवानि ।
तस्या मुखानिलसनाभिरथाम्बुजाना-
मुद्गारगन्धललितो हि विभातवायुः ॥११॥

अपि च—
परस्परसमागमोत्सुकमिदं मम प्रेयसी-
कुचद्वयसमोदयं स्फुरति चक्रवाकद्वयम् ।
इदं च मदिरेक्षणातनुतरोदराध्यासितं
कृशत्वमवलम्बते रजनिरागरूढं तमः ॥१२॥

विदू०—(स्वगतम्) वाउलो वि विहाणं दंसयदा मए पिअवअस्सो णिसग्ग सहावे ठाविदो । (विलोक्य प्रकाशम्) जाणे क्खु अदि आसण्णो परिणअमुहुत्तो जेण वाउलो कंचुई त्वरिदो इदो आअच्छदि ।
[व्याकुलोऽपि प्रभातं दर्शयता मया प्रियवयस्यो निसर्गस्वभावे स्थापितः । जाने खलु अत्यासन्नः परिणयमुहूर्तः येन व्याकुलः कञ्चुकी त्वरित आगच्छति]

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

कुमारः—एवमेव। यथा—

पदे पदे हि स्तनयन् जरासङ्गेन मन्थरः।
आनन्दयति मामद्य सारङ्गमिव वारिदः ॥१३॥

(तत उपसृत्य)

कञ्चुकी—विजयतां कुमारः। देव ! आसन्नपरिणयमुहूर्त्तः तथाहि देवी—

सम्पाद्य मण्डनविधिं दनुजेन्द्रपुत्र्या माङ्गल्यगर्भितकरेण सखीजनेन।
सार्द्धं तया च भवतो द्युमणेरिवास्ते मार्गोन्मुखी रुचिरपद्मपरम्परेव ॥१४॥

कुमारः—(स्वगतम्)

विनयः सत्यपि क्रोधे सत्यपि प्रेम्णि धीरता।
चरितं सर्वथा धन्यं मन्ये कुलनतभ्रुवाम् ॥१५॥

(प्रकाशम्)

तदुपदर्शय मार्गम्।

कञ्चुकी—देव य एष परितो दत्तपट्टः।

एषा पाटलपङ्क्तिरत्र पुरतो लीलासरः प्रान्तिके
रक्ताशोकसमन्वितो मणिगिरिर्या तस्य चोत्सङ्गभूः।
तत्रान्ते परिभुक्तमौक्तिकलताजालैः समाकल्पितं
रम्यं कौतुकमण्डपं लघुपदैर्देवोऽद्य संगम्यताम् ॥१६॥

कुमारः—वकुल ! त्वमग्रे गत्वा निवेदय देव्यै—अहमप्यनुपदमागत एव।

कञ्चुकी—यदाज्ञापयति देवः (इति निष्क्रान्तः)।

कुमारः—गिरिवराग्रे भव।

विदू०—जद्देवो आणवेदि (पुरतः परिक्रम्य) गीअरओ सुणीज्जइ।
[यद्देव आज्ञापयति। गीतरवः श्रूयते]

कुमारः—परिणयमङ्गलगीतध्वनिरेष देव्याः परिवारवनितानाम्।

विदू०—(स्वगतम्) जुज्जइ सा तुम्हाणं माउलपुत्ती होइ। (प्रकाशम्) जइ देवीए परिअणो गायदि ता अम्हाणं णच्चणावहरो (इति नृत्यन्निव कतिचित् पदानि गत्वा) ही ही भोः एषो क्खु मोत्तादामघडिदोअअरधूवधूविदो दीविआलोअ कविसो तुअ परिणअ मंडव सरिसो मंडवो ता पविसदु पिअवअस्सो।

[युज्यते सा युष्माकं मातुलपुत्रीभवति। यदि देव्याः परिजनो गायति तदस्माकं नर्तनावसरः। ही ही भोः एष खलु मुक्तादामघटितोऽगरधूपधूपितो दीपिकालोककपिशस्तव परिणयमण्डपसदृशो मण्डपः। तत् प्रविशतु प्रियवयस्यः]

(ततः पटमपनीय विदूषकं हस्ते धृत्वा प्रविशति कुमारः, परिजनसहिता देवी ससंभ्रममुत्थानं नाटयति)

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

कुमारः—

तनुमध्यां स्तनभारसंहतांसे कथमायासयसे नु देहयष्टिम् ।
रथचक्राभनितम्बविम्बसारामलमुत्थानसपर्यया तदास्ताम् ॥१७॥

विदू०—(स्वगतम्) जुज्जइ अप्पणो उआलंहो देवीए ज्जेव सीसे—(प्रकाशम्) सोत्थि होदु विदब्भराअपुत्तीए।
[युज्यते आत्मन उपालम्भो देव्या एव शीर्षे, स्वस्ति भवतु विदर्भराजपुत्र्यै]

देवी—(सस्मितम्) जेदु अज्जउत्तो ।
[जयत्वार्यपुत्रः ।]
(ततः कुमारः सविनयं तामुपवेशयति, स्वयं च तदनु, यथास्थानं सर्व उपविशन्ति)

विदू०—देवीए अम्हाणं सोत्थि वअनं कथं न गिहीदं ?
[देव्याऽस्माकं स्वस्तिवचनं कथं न गृहीतम्]

देवी—अज्ज मए पठममेव वंदिदं तुअ पदजुअं ।
[आर्य ! मया प्रथममेव वन्दितं तव पादयुगलम्]

विदू०—ता वढ्ढस्स ईरिसेहिं उच्छअ सहस्सेहिं ।
[तद्वर्धस्व ईदृशैरुत्सवसहस्रैः]
(इत्युपविशति)

कुमारः—(देवीं निर्वर्ण्य स्वगतम्) अहो सहजविनयभूषणवत्या अपि देव्याः—

शंसतीव मुखज्योत्स्ना हृदि कोपानलस्थितिम् ।
मीनसंचाररहिता महाह्रेरिव निम्नगा ॥१८॥

विदू०—कहं ण आणीअदि जलकलसो जेन उवावत्तिदाग्गिकज्जो पिअवअस्सस्स उहाए पाणिगहणं कारइस्से ।
[कथं नानीयते जलकलशो येन उपावर्तिताग्निकार्यो प्रियवयस्यस्य उषा-पाणिग्रहणं कारयिष्ये]

देवी—चिट्ठ णक्खु एसो अअसरो तुम्हाणं, भअवदो णारअस्स आअमणं पडिपालीअदि ।
[तिष्ठ, न खलु एषोऽवसरो युष्माकम् । भगवतो नारदस्यागमनं प्रतिपाल्यते]

विदू०—एवं होदु । [एवं भवतु]
(ततः सर्वे भगवतो देवर्षेः प्रत्यागमनं प्रतीक्षमाणास्तिष्ठन्ति । ततोऽवतरत्याकाशयानेन भगवान् नारदः । सर्वे ससंभ्रमं पश्यन्ति)

कुमारः—(निरूप्य) आगत एव वत्सलः । सकलसुरासुरप्रणतपादारविन्दो भगवान्-नारदः, यथा—

वीणां वामकराम्बुजेन कलयन् द्वीपित्वचं स्कन्धयो-
र्विभ्रत्क्लृप्तनमेरुराजिरुचिरां मालां परेणामृशन् ।
विद्युद्दामजटाकलापरुचिरो भूत्या कृतोद्धूलने
भूभागे समुपैति देवसदनात् प्रत्यक्षशान्तो रसः ॥१९॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

(देवीमुखमवलोक्य) अर्घासने अर्घासने (देवी तथा करोति)

(ततः प्रविशति नारदः, तत उत्थाय कुमारः प्रणतिपुरस्सरः सपर्याभिरनुनीय महार्हरत्नासने समुपवेशयति। स्वयं च देवी विदूषकपुरस्सरं परिवारजनश्च प्रणामं नाटयति, नारदश्च तान् सर्वान् आशीर्भिरभिनन्द्य सर्वतो निशम्य स्वगतम्)

अहो द्वारकौकसां वैभवं दिवौकसामपि अभिभवति, यथा—

आबाल्यादुपशीलिता सुरवरैः प्राप्ता सुरेशादिभि-
श्चञ्चन्मौलिभिरुद्गताश्रुपुलकैः सानन्दमानन्दिता।
सा वीणानयचातुरी मम पुनर्दासीजनैरप्यहो
हेलासंचरदङ्गुलीनखपदैर्लज्जास्पदं प्रापिता ॥२०॥

अथवा किं न सम्भाव्यतेऽत्र यत्र सकलकलानिलयो विदितवैकुण्ठनिवास-त्रिरहव्यथो भगवान् श्रीपतिः स्वयं निवसति। (रुक्मवतीं विलोक्य प्रकाशम्) वत्से विदर्भराजनन्दिनि सहजदुर्विषह्यं, सापत्न्यमत्सरमपहाय मदाज्ञामुपपादयन्त्या भवत्या किं किं न सम्पादितम्। शीलेन कुलद्वयम्, पतिव्रतात्वेन चात्मसन्तोषणेन च ममानन्दातिशयः, इतरजने चाश्चर्यम्।

रुक्मवती—(लज्जावनतमुखी स्मित्वा) भअवं जेण तुम्हाणं हिअए आणंदादिशओ भत्तुणो समीहिदं ता कहं ण करेइ अम्हारिसी।

[भगवन्! येन युष्माकं हृदये आनन्दातिशयो भर्त्तुरपि समीहितं तत् कथं न करोतु अस्मादृशी।]

नारदः—आयुष्मति! न दुष्करं नाम भवादृशीनाम्। तेन राज्यधुरन्धरं पुत्रं प्रसूयेथाः।

(नेपथ्ये वैतालिकाः)

सुखप्रभातं भवतु देवस्य।

अरुणकिरणग्रस्ता प्राची विमुञ्चति तैमिरीं
द्युतिमथ च तां स्वान्तागारे दधाति कुमुद्वती।
अयमपि घनागमस्सद्यस्तथा हि नभःश्रियं
भगणखचितां पुष्यत्यात्मप्रसूननवोदयैः ॥२१॥

अपि च—

इन्दुविद्वेषिनलिनीमुखमुल्लासयन् शनैः।
पूर्वामकलुषां कुर्वन् कामीवोदयते रविः ॥२२॥

नारदः—(स्वगतम्) अहो वैतालिकस्य वाग्विलासः? प्रथमेन परिणयमुहूर्त्तासन्नतां व्यञ्जयति—द्वितीयेनानिरुद्धाशयं च! (प्रकाशम्) वत्से विदर्भराजनन्दिनि क्वेदानीं दनुजेन्द्रतनुजा? इच्छामि तस्याः कुमारेण पाणिग्रहणकौतुकं द्रष्टुम्, तदानीय संपादय।

(रुक्मवती रूपलेखामुखमवलोकयति)

रूपलेखा—जं भत्तुदारिआ आणवेदि।

[यद् भर्तृदारिका आज्ञापयति]

(उत्थाय पटमपनीय तामानयति)

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

कुमारः—(विलोक्य स्वगतम्) सैषा प्रेयसी ।

आनीयमानापि सखीजनेन मुहुर्मुहुर्वर्तितकन्धरैव ।
पदे पदे विस्खलितं व्रजन्ती त्रैलोक्यसौन्दर्यमपाकरोति ॥२३॥

अपि च—

सद्यो विधूयेह रसान्तराणि गृह्णाति नो कस्य मनःप्रवृत्तिम् ।
विमोहयन्ती सकलेन्द्रियाणि निद्रेव नेत्रातिथितां गतेयम् ॥२४॥

(ततः प्रविशति यथानिर्दिष्टा उषा)

(समुपसृत्य) चित्रलेखा—(विभाव्य) पिअसहि ! देवोसिणो पडिवंदस्स चरणौ ।
[प्रियसखि ! देवर्षेः प्रतिवन्दस्व चरणौ]

(उषा ससंभ्रमं चरणौ स्पृशति ।)

नारदः—वत्से भजस्व मनोभिलषितां सिद्धिम् ।

(रूक्मवती सविनयं समुत्थाय पार्श्वे समुपवेशयति)
(सर्वे नारदमुखमवलोकयन्ति)
भअवं अग्गिकज्जे को विणिजुञ्जीअदु ।
[भगवन् ! अग्निकार्ये को विनियोज्यताम्]

नारदः—परस्परराानलसाक्षिपूर्वकः परिणयोऽभिहित एव क्षत्रियाणाम्, स संवृत्तप्राय एवासित । तथाप्यस्याः करं कुमारकरे समर्पय, तौ च दृढबद्धाञ्चलग्रन्थी कनककदलीस्तम्भानभितः त्रिःप्रदक्षिणमुपावर्तेताम् ।

देवी—(उषाकरं सविनयमादाय कुमारकरे समर्पयति)
अज्जउत्त जहा स्वअणं ण समरेइ तहा वत्तितव्यं ।
[आर्यपुत्र ! यथा स्वजनं न स्मरति तथा वर्तितव्यम्]

कुमारः—देवि यथा विज्ञापयसि (इति विनयपूर्वकं करं गृहीत्वा) स्पर्शसुखमनुभूय (स्वगतम्)

चिरप्ररूढं परिभूय तापं रोमाञ्चजालं सहसा तनोति ।
कराग्रलग्नोऽपि ममाङ्गकेषु स्पर्शोऽयमस्या हरिचन्दनाभः ॥२५॥

विदू०—पिअवअस्सस्स अंचलगंढी एसो क्खु अहं दिढतरं कडुअ णिबद्धेमि ।
[प्रियवयस्यस्याञ्चलग्रन्थिम् एष खल्वहं दृढतरं कृत्वा निबद्धामि]

ही ही भोः सोत्थिवाअणं किं वि कहं ण दिब्बइ ।
[ही ही भोः स्वस्तिवाचनकं किमपि कथं न दीयते]

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

देवी—सुवर्णकलशं समर्पयति ।

विदू०—(गृहीत्वा) सोत्थि होदु ।

[स्वस्ति भवतु]

(इति नृत्यति, तौ च दम्पती कनककदलीस्तम्भमभितः परिक्रामतः ।)

नारदः—(विलोक्य)

रागानलोदयालीढावध्वरे सम्यर्गाचतौ ।
विराजेते समासक्ताविमौ स्वाहानलाविव ॥२६॥

[ततस्तौ त्रिः परिक्रम्य नारदाग्रे स्थितौ]

नारदः—वत्सानिरुद्ध ! वधूसहायस्य ते किमभिलषितार्थमपरं सम्पादयामि ।

अनिरुद्धः—उन्मीलितं हृदयतो मम बाणशल्यं कृष्णेन वैरिगहनं च भवन्मतेन ।
देवीप्रसादसुलभैव मया तथेयं प्राप्ता प्रिया च किमतः परमर्थितव्यम् ॥२७॥
तथापीदमस्तु (भरतवाक्यम्)

पृथ्वी समस्तरससस्यवती सदास्तु यान्तु क्षयं रिपुगणाः किल सज्जनानाम् ।
लक्ष्मीविलासमतुलं लभतां हि लोकः काव्यप्रबन्धरचनाचतुरो जनोऽस्तु ॥२८॥

(इति निष्क्रान्ताः सर्वे)

चतुर्थोऽङ्कः समाप्तः

इति श्रीकूर्मगिरिवरेश्वर-श्रीमत्प्रतापवारितारितमोभास्कर-श्रीमद्रुद्रचन्द्रदेवविरचितोषारागोदयानाम नाटिका परिपूर्णतामगात् ।

[श्रीसंवत् १६३९ समये ज्येष्ठसुदि ५ शनिवासरे बांधवगढ़विषमदुर्गे महाराजाधिराजश्रीरामचन्द्रदेवराज्ये तस्मिन्काले वर्तमाने पुस्तकं लिखितं श्रीहिरामनि]

शिवमस्तु

॥ उषारागोदयानाम्नाटिका समाप्ता ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

श्लोकानुक्रमणी

	अङ्कः पद्यम्
अकाण्डे कोपकाण्डेन	२।२१
अनन्तरं कोऽपि हुताशनाभो	२।२६
अन्तः स्मरानलोत्थां	३।२६
अभ्यर्णमेघागमदुःसहाः	१।१०
अरुणकिरणग्रस्ता	४।२१
अश्लथानि श्लथायन्ते	१।४
अश्वग्रासाभिलोभात्	३।१०
अस्पृष्टानि मयूखैः	३।३५
आनीयमानापि सखी०	४।२३
आबाल्यादुपशीलिता	४।२०
आलिप्ता इव भूमयो	२।११
आवर्तयेयमवनिं	३।३
आविष्करोति तृषमा०	२।१७
इदमचिरोज्झिततल्पं	३।२१
इदं हि तस्याः शयनं	३।२०
इन्दुविद्वेषि नलिनी	४।२२
इयं कामप्रायां	२।१४
इह हि विकचमल्ली	१।१३
उत्कलिकाशतविषमं	४।७
उत्सर्पन्तीह जालैः	३।१३
उद्दण्डैर्बाहुदण्डै–	२।२४
उद्भिन्नाञ्जनवारिदौघ–	३।४
उन्मीलितं हृदयतो	४।२६
एतत्तच्चित्रफलकं	३।२२
एता लताः स्फुरित–	३।१६
एतेऽपि वन्यतरवो	२।१५
एषा पाटलपङ्क्तिरत्र	४।१६
कूजन्ति प्रतिपल्लवं	२।६
क्रन्दन्ति चक्रवाकाः	१।१७
क्लृप्ताक्षरार्थलिखितो	३।२४
क्षणोऽपि यस्या विरहे	३।३८
खड्गाग्रैर्दलितकरीन्द्र–	१।२५

	अङ्कः पद्यम्
खणप्पहा खरदहणो	१।१४
चञ्चच्छिखासु पवनाहति	१।२२
चञ्चद्बर्हिकलाप–	१।१२
चञ्चन्महारजत–	१।२१
चित्रस्थैरिव च स्थितं	३।३३
चिरप्ररूढं परिभूय तापं	४।२५
च्योतद्घनाम्बुपरि–	१।२६
छेक्का मम्महवाणा	४।१०
तत्प्रेमबन्धेन भुजङ्गपाशैः	४।३
तनुमध्यां स्तनभार–	४।१७
तप्ताङ्गारचयं तु	१।५
तस्या रदच्छवि–	४।११
तस्याः स्मितानन–	४।५
तारुण्याभिनिवेशो	२।१
तिमिरपटलपूरं	१।१५
तिरयति हृन्मन्दिरगं	२।२
त्वद्विप्रयोगाधिदवा–	३।४०
दाही शीतः सुरभिपवनः	३।४२
देव्यास्तदेतत्परिचेष्टितं	४।१
द्युमणाविवातपश्रीः	३।३६
द्राक् सैन्ये तीव्रवेगे	२।२४
धुतकमलपरागरागभाजा	२।८
नयनसलिलधारा वारि–	१।१६
निरस्य रजनीध्वान्तं	३।१
नीडैराकुलयन्ति चैत्य–	१।२४
नीलाश्मभासुरतरेण	३।२८
नो वापि रूक्षरचना	४।८
न्यञ्चच्छिखासु पवना–	१।२१
पढमं माणिणि माणो	२।१६
पदे पदे हि स्तनयन्	४।१३
परस्परसमागमोत्सुक–	४।१२
परिसीमितेव च दृशोः	३।१७

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

	अङ्कः पद्यम्		अङ्कः पद्यम्
पश्चिमदिगङ्गनाया	३।१२	रङ्गबहुलानुरागाद–	१।२
पश्य त्वदङ्गसुषमा	१।३०	रागानलोदयालीढा–	४।२६
पाटीरैः परिलिम्पतीव	३।३०	राजन्त्यशोकलतिकाः	३।१५
पीयूषसेकादपि सुन्दराणि	३।३२	लक्ष्यन्ते पुरवीथयो	२।१२
पुष्पासवच्छुरित–	२।९	लावण्यनिर्माणविधौ	३।२९
पृथ्वी समस्तरससस्यवती	४।२८	लिहिदेव्व सव्वआलं	३।७
प्रकटितवहुकेसराङ्गरागा	२।५	लोकलोचनकुरङ्गवागुरा	३।१८
प्रचण्डातपभिन्नाभ्र–	१।११	वासराधिपवियोगविद्रूनं	३।१४
प्रणयकलहकोपात्	१।१	विक्षिप्तं ऋतु	२।४
प्रत्युप्तहीरकमणेरिव	३।३७	विनयः सत्यपि क्रोधे	४।१५
प्रतिपालयन्ति तिमिरं	३।३४	वीक्ष्य बाणमथ शङ्करा–	२।२८
प्रध्वस्तावयवोऽपि	२।२९	वीणां वामकराम्बुजेन	४।१९
प्रभूणां नावमन्तव्यः	१।८	वृद्धिं परां नयति	३।३१
प्राग् यः पराभवपदं	३।११	वेणीनिबद्धकुसुमैः	१।२०
बहुभागधेयवन्तो	२।१३	वैलक्ष्येणैव कथितो	२।२३
बाणप्रध्वंससंश्रावात्	२।३०	शंसतीव मुखज्योत्स्ना	४।१८
बाणादिह परिमुक्तो	१।३	शृङ्गारामृतवाहिनी	३।१९
बाणोन्मूलनमन्तरेण	१।७	शैवालद्युतिहारि	३।२५
बिसलुद्धहंसशाअअ	१।१८	श्च्योतन् घनाम्बुपरि	१।२५
भगवद्गुणानुवादाद्	१।२	सतिलका विटपैः परि–	२।१०
भूयिष्ठमध्याह्ननिदाघ	१।९	सत्येवोषारागे	४।४
मउलइ रत्तासोओ	२।१८	सद्यो विधूयेह रसान्तराणि	४।२४
मज्जन्महेभच्युत–	१।९	सम्पाद्य च प्रभूद्दिष्टं	३।२
मत्कण्ठपाशोचितबाहु	४।२	सम्पाद्य मण्डनविधिं	४।१४
मधुसमये वनितानां	२।१९	सर्वेन्द्रियाणि परिरुध्य	३।३९
मन्दध्वनीनि वाद्यानि	१।२५	सहजगुरुनितम्बा	१।२८
मंन्दानिलान्दोलित–	३।५	सहजेन मरालगामिनी	१।२७
मम तद्वाचिकदीपमालया	१।१५	संसूचयति ममोपरि	३।२३
महु समओ लहुपअणो	३।८	संस्यूतेव नयनयोः	३।१७
माणसगअ चिंताए	३।९	सारङ्गाः परितो रटन्ति	१।२३
माणिक्यकान्तिपरिमण्डित	१।१९	सिढिलिअ घणांधआरो	४।९
मुग्धे विलोचनविलास–	१।२९	सुधांशुस्पर्धिवदने	२।२०
मेघागमेनैव धरातलानि	३।२७	सोऽपि शार्ङ्गपरिमुक्तमार्गणैः	२।२७
यामेकभावेन विधिः	३।४१	स्खलयति पदे पदे मां	४।६
रइविण्णाणं वड्ढइ	३।६	स्फुरदधरोष्ठपुटान्तं	२।२२
रइविरह रइअ	२।३	हारीतहारिरुतसङ्कुलिता	२।७
		हिन्दोलविभ्रमरयेण	२।२०

—: ० :—

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

लघुग्रन्थमाला–३२

प० रघुनाथशर्मविरचिता

स्तोत्रावलिः

सम्पादकः

प० श्री रघुनाथशर्मा

वेदान्तविभागाध्यक्षचरः

सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य

सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः

वै० सं० २०३४

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

श्रीरघुनाथशर्मविरचिता

स्तोत्रावलिः

• • •

सूर्यस्तवः

•

शनिस्तवः

•

निर्वेदनिवेदनम्

•

अनुभूतिप्रकाशः

•

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अथ सूर्यस्तवः

यस्योद्याने कनकशिखरी प्रोन्नमद्भिः शिरोभि-
र्धत्ते पादान् गगनझरिणीपातसंधौतरेणून् ।
चन्द्राभ्यन्तःपतनजनितं जाड्यमासाद्य शीतान्
भूमौ भूभृद्वरशिखरिणो यत्पदो धारयन्ति ॥१॥

क्रीडां कृत्वा सुमेरौ विहितजलविधिर्मानसे मानसाङ्के
ध्रौवे पादे प्रधावन् ऋषिभिरभिनुतः सप्तभिर्बृंहितौजाः ।
वायोराशां विकाश्य प्रतिहततुरगः पूर्वदिग्भालबिन्दुः
प्राचीमभ्युज्जिहीते श्रुतिशिखरगतः कोऽप्यसौ नादबिन्दुः ॥२॥

एकं चक्रं भुजग-यमितं त्र्यक्षकं यत्त्रिणाभि,
वाहा वेदा गगनपथगा यत्स्वरा ह्रेषितानि ।
तस्मिन् पश्यन् सकलभुवनं याति यः स्यन्दने स्वे
तं देवेशं सुरमुनिनुतं प्राञ्जलिः प्राणतोऽस्मि ॥३॥

हंसः स्वः सिन्धुकाया गगनकमलिनीवीथिकोल्लासहेतुः
सेतुर्वर्णाश्रमाणां कविविबुधनृपोत्थानविज्ञानकेतुः ।
कोकीनां शोकतोकीकरणविधिविदो भ्रामयन् विश्वचक्र-
मुद्यन् रक्तांशुरक्तः शिखरिवरगतो भ्राजते भास्करोऽयम् ॥४॥

सूर्यः संसरणाद् रविश्च रवणाद् मित्रो जगत्सौहृदाद्,
मार्तण्डोऽमृतहैमकाण्डजननात् सूरो जगत्सर्जनात् ।
भर्गो भर्जनतश्च भक्तहृदये संवर्धमानैनसां,
देवस्तुष्यतु तुष्टतैषितगणैः प्राप्तश्च तुष्टिं पराम् ॥५॥

रुन्धाना यस्य मार्गं प्रतिहतगतयो मन्त्रदत्तैः पयोभि-
र्मन्देहा मन्दवीर्या असुरवरभटा दूरतः संपतन्ति ।
विश्वेषामर्घ्यमुच्चैर्गिरिशिखरगतः स्वैः करैराददानो
देवोऽसौ सम्प्रदेयात् कुशलमुभयतः सादिताशेषशत्रुः ॥६॥

चञ्चत्का मेरुमूर्धस्वविरतगतयो देवलोकप्रवेके
प्रोत्सिक्ता दक्षिणस्यामसुरवरपुरे पङ्कजान्यामृशन्तः ।
कूर्दन्तः केलिकारैर्वरुणवरवधूलोचनान्याश्रयन्तो
धावन्तश्चोत्तराशां रविकरनिकराः पान्तु मां प्रक्रमेण ॥७॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

हैमे पादे हिमाद्रेस्तुहिनरुचिरुचो मानसे संप्लवन्तः
क्रीडन्तोऽम्भोधिवीचीचयचपलमरुत्सारिताः संसरन्तः ।
वृक्षाग्रेषु प्रसूनावलिवलिततराः श्वेतिमानं वहन्तः
शाखा उद्भासयन्तस्तिमिरततिमुषो भानवो भान्ति भानोः ॥८॥

कर्षन्तो जगतीजलं तरुलतागुल्मानि सस्यव्रजं
तापैः पाकमुपानयन्त इह ये भ्राम्यन्ति भूमण्डले ।
तेजीभूतकदम्बकेषु मरुतां नाडीशतैः सञ्चिता-
न्यम्भांसि कथितानि बिभ्रत इमे मां पातु भास्वत्कराः ॥९॥

नाडीनां त्रिशतैर्निपीय सलिलं पायोदकं संहरन्
बिम्बे स्वे कथयँश्च ताभिरभितस्तावद्विधाभिः पुनः ।
देवोऽसौ श्रुतिसम्मितैरिषुशतैरम्भोभिरापूरयन्
सर्वं वारिदवृन्दकं विजयते पूर्वाद्रिचूडामणिः ॥१०॥

मन्देहदेहविगलद्रुधिराम्बुधारा
स्रोतस्विनीप्लवनरागमुपार्जयन्तः ।
धावद्हरिव्रजविचूर्णितगैरिकाम्भः
संरञ्जिता जगति भानुकरा जयन्ति ॥११॥

चञ्चत्काश्चन्द्रलोके प्रवहसरणिगा येऽन्तरिक्षे बृहत्का
अम्भोधौ ये पतन्तोऽलघुलहरिगताः संप्लवन्तस्तरन्ति ।
धावन्तो बाधमाना गिरिगहनगतं ये तमस्कन्दरेषु
प्रोच्छेत्तुं संसरन्तोऽप्रतिहतगतयस्ते कराः पान्तु भानोः ॥१२॥

कालः सर्गविसर्गसंस्थितिकरः कर्त्ता क्रियाणां क्रतु-
र्मार्गश्चोत्तरदक्षिणायनभिदा भिन्नो जगद्धारकः ।
मासर्तुक्षणवत्सरादिविविधैर्भेदैः प्रतिष्ठामितः
शुक्लाशुक्लवपुः सदा विजयते देवो ग्रहाधीश्वरः ॥१३॥

यन्मण्डले भगवतः परमस्य पुंसो
रूपं गदाऽरिदरिमत् सततं स्मरन्ति ।
संसारसागरमपारमसारयन्तस्तं
काश्यपेयममितौजसमाश्रयामि ॥१४॥

चक्षुर्दक्षिणमीश्वरस्य गगनेऽदभ्रां तनुं बिभ्रतो
वारां संग्रहणं प्रकाशनिलयो विश्वेशितुः पूज्यते ।
कोकद्वन्द्वमुपानयन् विधुरयन् युग्मानि युक्तान्यथो
कर्माणि प्रविधापयन् विजयते देवो जगद्भास्करः ॥१५॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

दण्डानां षष्टिकाभिर्गगनपरिसरं दैवमानैर्मिताभि-
रेकेनाह्ना प्रयाताः पितृपथमपरं ये सरन्तश्चरन्ति ।
दण्डैः षष्ट्या पितृणां तमप्यतिगता भूमिभागे पतन्त
उद्यन्तश्चास्तमेता रविकरनिकराः पालयन्त्वक्रमेण ॥१६।

यः सर्गादावण्डकात् संप्रभूतो योऽण्डं भित्त्वा खं गतः प्राणवेगाद् ।
यस्मिन् देवाः शक्तयश्चाऽपि तेषां ब्रह्मा विष्णुः शङ्करो यत्र सन्ति ॥१७।

तं देवानां देवमीड्यं वरेण्यं सूर्यं चक्षुर्जगतस्तस्थुषश्च ।
सीदन् मोहे प्रोह्यमानो महोर्मौ मुक्तिं वाञ्छन् शरणं संप्रपद्ये ॥१८।

यं विश्वकर्मा प्रतिरोप्य शाणं चकर्त तेजो महतो महीयः ।
स्वप्रेयसीप्रेय उपाकरिष्णुं तं भास्करं भानुमहं नतोऽस्मि ॥१९।

तेजः सुदुर्धर्षमसह्यवेगं न यस्य सेहे मृदु सर्वगात्री ।
संज्ञा तपोऽतप्यत दीर्घदीर्घं हयी हयं भानुमुपेतुकामा ॥२०।

तां वीक्ष्य यस्याश्वकविग्रहस्य पपात शुक्रं शुचिकर्णकोष्ट्यो-
स्तमाश्विनेयप्रसवैकहेतुं केतुं दिवो भास्करमानतोऽस्मि ॥२१।

संज्ञा प्रासूद् यस्मात् ग्रहगणगुणिनं निग्रहानुग्रहेशं
शम्भौ विश्वैकवन्द्योऽप्यतिचपलतया दृष्टवीर्यप्रभावम् ।
स्रष्टारं शङ्करीणां शनिममलमपां पीतये भानवानां
देवेशं देववन्द्यं सुरमुनिविनुतं भास्करं तं नतोऽस्मि ॥२२।

य आत्मनः शक्तिमुदारसत्त्वो निशासु वह्नौ प्रणिसंदधाति ।
सूर्यो जगच्चक्षुरथौषधीषु ज्वलत्प्रभाभासुरविग्रहासु ॥२३।

अमां तिथिं प्राप्य जगत्प्रविष्टो यश्चेतनं स्थाणुमथाश्रयँश्च ।
पुष्टिं परां वर्धयते हिमांशोः सांनिध्यतस्तं रविमानतोऽस्मि ॥२४।

मातृशापपरितापपीडितः पादपातभयभीतमानसः ।
येन निर्मित इहाशनिः शनिर्भास्करो मम रुजः स कर्षतु ॥२५।

भिन्दन् धावदमन्दतामसततीरक्तांशुभी रञ्जयन्
आशाः कोककदम्बकस्य सकला आशाः समापूरयन् ।
रक्षःसंघमपानयन् करशतैर्घूकान् समुत्सारयन्
मौनं वृन्दमुपांशु साधु रणयन् मासाम्पतिर्भ्राजते ॥२६।

नित्योद्युक्तरथेन येन गगने रात्रिन्दिवं धावता
संज्ञा रूपवती न काऽपि विविदे तस्याः सवर्णाङ्गना ।
तस्यां यो जनयाम्बभूव तनयान् कालं यमीं चानुजां
भूषं भूतलमण्डलस्य च मनुं धर्मोपदेशव्रतम् ॥२७।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तं देवानां देवमीड्यं वरेण्यं तेजस्तेजोधारिणामादिशन्तम् ।
ब्राह्मं वर्चो ब्राह्मणेष्वादधानं सीदद्गात्रः शरणं संप्रयामि ॥२८॥

महामकरमूर्धगो दिवि निलायिनीनामपां
प्रवाहमनुतापयन् वियति विस्तृतैः स्वैः करैः ।
कृपाकणगणाञ्चितो जगति गोव्रजस्याञ्जसा
हिमार्तिमुपयापयन् जयति भास्करस्तिग्मगुः ॥२९॥

गगनार्णवमुत्तरितुं कलशं प्रविधाय तरिं प्लवमान इतः
गजवाजिहिमार्तिभयं प्रणुदन् धनदाध्युषितां दिशमाशु सरन् ।
यतिवर्णिगणान् यत आजपुरं प्रदिशन् सरणिं भवबन्धभिदे
गृहिणः शुभकर्मसुसंयमयन् जयताद् यमिनामपवर्गकृते ॥३०॥

मीनं कृत्वा वाहनं मीनकेतुं कान्त्या कुर्वन् धिक्कृतं ज्योतिरीशः ।
दूरीकुर्वन् पक्षिणां शीतभीतिं व्याधेर्भीतिभिरवत्वञ्जसा नः ॥३१॥

गत्वा पारे य उदीचीं पयोधेर्मेषं लब्ध्वा वाहनं दीप्ततेजाः ।
काङ्क्षत्यम्भः सक्तुकांश्चापि दत्तानध्वश्रान्तः क्षुत्तृषा संपरीतः ॥३२॥

यः शीतबाधां नरवानराणां व्यपोहयन् भाति शुभैः कराग्रैः ।
वसन्तपुष्पप्रकरैकहेतुं केतुं दिवो भास्करमानतोऽस्मि ॥३३॥

यस्तु गोवृषमवाप्य वाहनं ग्रीष्ममुद्धतमुपाहरन् भुवि ।
शोषयत्यवनिसंस्थितं रसं भास्करो मम रुजः स कर्षतु ॥३४॥

तपत्तपनमण्डलं त्रिजगतीं गतैः स्वैः करै-
र्लतागहनवीरुधो विरसयन् विभाभासुरैः ।
कदम्बवनमुच्चकैर्विकचयन् मृगाध्यासितं
महामहिषवृन्दकं प्रतिनिवेशयन् पल्वले ॥३५॥

सरःसरिदुदन्वतां सलिलमाशु संशोषयन्
महोत्पलवनीमथोस्थलसरोजिनीं भासयन् ।
कृषीवलकदम्बकं तरुतलेषु विश्रामयन्
विराजति विभाकरो विरहिणीर्विसैर्भूषयन् ॥३६॥

मिथुनं समवाप्य तु वाहनकं बहुवार्षिकयुग्मकुलं सृजतः ।
बहुवर्षमुदीरयितुं तपतस्तपनस्य जयन्ति कराः परितः ॥३७॥

एवमुत्तरपथानुगश्चरन्नण्डकान्तमुपगम्य विश्रमः ।
योऽयनं श्रयति दक्षिणं पुनर्भास्करो भवतु मे सदा गतिः ॥३८॥

कर्कटं बहुपदं समाश्रितो ब्रह्मलोकतटिनीतटोद्भवम् ।
यः करैर्दशशतैः क्षिपत्यहो जीवलोकजननाय जीवनम् ॥३९॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

आसारैरवनिं वितततनुकामाश्वासयन् संततै-
र्घूकान् संमदमानयन् क्षितिगतान् भेकान् बहिःसारयन् ।
केकामत्तमयूरकेषु जनयन् मत्तावकीर्गर्भयन्
हंसान् मानसमाहरन् विजयते सोऽयं प्रभुर्भास्करः ॥४०॥

सिंहाकृतिं गोलमवाप्य गुह्यं निधाय तस्मिन्निजमुग्रतेजः ।
दिशन् जनानामशुभं शुभञ्च प्रचारतो भ्राजति भास्करोऽयम् ॥४१॥

कमलदृशमुदारां नीलपद्मालिमालात्
क्कृतकवरनिवेषां कालवेगात्समेताम् ।
पुलिनजघनवेषां हंसभाषाविशेषां
शरदमुपसमेतः कन्यकां चारुवेषाम् ॥४२॥

प्रतिहतबहुतेजा दक्षिणाशां प्रसर्पन्
मुनिभिरुपहृतार्घोऽप्याधिना बाध्यमानः ।
दुरिततरणकामोऽयस्तुलां धान्यपूर्णा-
मधिभजति विभाभिर्भासयन् दिग्विभागान् ॥४३॥

जयत्ति जयति देवो भास्करो भाभिरुग्रो
जयति कलशिकायाः सूनुना सत्कृतोऽर्कः ।
जयति निजमुदग्रं तेज आदाय विश्वं
कृतिषु नियमयन्तो यत्कराः संसरन्ति ॥४४॥

वृश्चिकाकृतिमवाप्यगोलकं शीतभीतिमथ वर्धयन् शनैः ।
यस्तु संजनयते मुहुर्व्यथां वृश्चिकस्य स हि भास्करोऽवतु ॥४५॥

मीनान् कुर्वन् दीनदीनान् जलान्तःस्वच्छं पाथः प्रापयन् हैमभावम् ।
अङ्के कृत्वा प्रेयसीः संहसन्तीः पार्श्वे कृत्वा संहसन्तीर्हसन्तीः ॥४६॥

एवं जीवान् स्वापयन् गर्भगेहे सिंहान् व्याघ्रान् निद्रयन् कन्दरेषु ।
मृगानन्यान् गुल्मकुञ्जान्तरस्थान् हेमन्तर्तौ भ्राजते भास्करोऽयम् ॥४७॥

धनुराकृतिमाप्य तु गोलवरं हिमपातनिपातविभासिकरम् ।
तुहिनोत्करकीर्णतरुच्छदिषां परिशोषविदं विनतोऽस्मि रविम् ॥४८॥

एवं गत्वा दक्षिणस्यायनस्य पारं प्राप्तश्चाण्डकान्तान्निवृत्तः ।
अध्वानं द्रागुत्तरं संश्रयन् यो धत्ते तेजो बलवत्तं नतोऽस्मि ॥४९॥

मीने वसन्तञ्च वसन्तकर्तुं निर्माय मायाविनमप्रसह्यम् ।
विलासिनीविभ्रमदानदक्षं त्र्यक्षाङ्गरागं परिवर्धयन्तम् ॥५०॥

गुरूनुपेतुं कृतमानसानां विनेयकानां मुदमावहन्तम् ।
विद्याव्रतस्नानविशुद्धिभाजां कृतोद्वहानां परिनोदयन्तम् ॥५१॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

हविर्भुजाधानविधौ नितान्तं स्वान्तं हिमानीं परिकर्शयन्तम् ।
भास्वन्तमुद्यन्तमुपेयुषां स्वं शंसं दिशन्तं रविमानतोऽस्मि ।।५२।

ज्वलज्ज्वलनसंनिभा दश दिशः समापादयन्
महामहिषवृन्दकं सरसिकासु संसादयन् ।
विशुष्कतृणवीरुधां दवथुभिर्देवं संवहन्
विराजति विभाकरो वृषमिथुनगस्तापयन् ।।५३।

वर्षैः कदम्बान् सह संपतन्तो यतीन् नृपांश्चाथ निवेशयन्तः ।
अध्यूषुषोऽध्वानमधिक्षिपन्तो रवेः करा भान्ति न संतपन्तः ।।५४।

केकामयूरकुलकेषु विहापयन् गां
भेकान् निवेश्य शरदं शरदोऽवसाने ।
हंसावलिक्कणितकाञ्चिनिषेवमाणो
भास्वान् विभुर्विजयते शुचिकासहासाम् ।।५५।

हेमन्ततौं पाथसं हैमभावं नायं नायं दीर्घिकाद्राघयन्तम् ।
अङ्के सुप्ताः प्रेयसीर्बोधयन्तमुद्यन्तं भास्करं प्राणतोऽस्मि ।।५६।

तुषारवृतमण्डलं तिमिरततिमुदस्यत्तमं
तमुद्यदुदयाद्रिगं गणकगीतभावाध्वगम् ।
विकाशि कुसुमोत्करं विदधतं रविं शैशिरं
शिरोधृतकराञ्जलिः शरणमेत्य याचेऽन्वहम् ।।५७।

विपद् विपदतां श्रयत्ववनिमण्डलं मोदतां
स्वगोत्रमुपवर्धयद्गृहिकदम्बकं वर्धताम् ।
धनादिभिरहर्निशं विवदतां बुधानां कुलं
विचित्य विषयं मुदा विधिषु शश्वदातिष्ठताम् ।।५८।

निशाचरकुलं दिवा समपसारयन् सर्वतः
कृषीवलकदम्बकं विगतशोकयन् वर्षतः ।
निशाक्षणदिनर्तुभिर्विविधधर्मकर्मव्रजैः
प्रजाः प्रमुदयन् सदा विजयते नृपो भास्करः ।।५९।

पुंस्त्वं यस्य स्वस्वरूपं प्रतिष्ठं बाहूपादावस्त्रयो यस्य वेदाः ।
मध्याह्ने तं सन्तपन्तं त्रिलोकीं ग्रहाधीशं भास्करं संनतोऽस्मि ।।६०।

प्राचीं दिशं परिमृशन्नरुणैः करैः स्वैः
सौवर्णभारकृतमण्डनमण्डिताङ्गीम् ।
संबोधयन् कमलिनीं कृतपद्महासां
मासां पतिर्विजयते परदेशवृत्तैः ।।६१।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सर्वान् देवचतुष्पदो नियमयन्नुग्रैः कराग्रैः भृशं
सत्त्वस्थः स्थिरचित्तवृत्तिरनघश्चान्द्रं निपीयामृतम्।
तिक्तं पित्तपरो बुभुक्षुरनिशं गोगोष्ठके संचरन्
रक्तश्वेतवपुः सदा विजयते धान्याधिपः खेचरः ॥६२।

यो जन्माश्रयमाश्रितो जनयते गात्रं स्ववंशोन्नतम्
पुंसां भोच्चगतः करोति विपुलं सौख्यं नरीणाञ्च यः।
कोशं चोपगतस्तनोति बहुलं भाग्यं चतुष्पात्सुखं
श्लाघ्यं सद्व्ययमादधद् विजयते भानुः स भासाधिकः ॥६३।

यः शम्भुदृग्भावगतः प्रतापं पराक्रमं चाद्भुतमातनोति।
रिपुक्षयं संयति शं नरेशात् तं विश्ववन्द्यं द्युमणिं नतोऽस्मि ॥६४।

ऋषिभवनगतो यः कामिनीदृग्विलोभं
वितरति वररूपं जन्मकाले नराय।
मृगदृशमवनीपप्रेयसीं सौख्यसारां
सुमनसमधिकुर्वन् कस्य भानुर्न वन्द्यः ॥६५।

तनयनिवसतस्थो यः कुशाग्रोपमानां
प्रदिशति मतिमग्र्यां मानवाय प्रबोधाम्।
स्वं भवनमुपेतः प्रोन्नते वर्तमानः
धनसुतसमुपेतां यः करोत्याशु रामाम् ॥६३।

तमहमतिवदान्यं भास्करं भाभिरुग्रं प्रणतजनकदम्बस्यार्तिमारात् क्षिपन्तम्।
भुवनभवनदीपं दीपयन्तं दशाशाः करुणवरुणगेहं कामधाम प्रपद्ये ॥६७।

रिपुगृहमुपयातो यो वियातो न बिभ्यदरिकुलविनिपातं संततं संतनोति।
प्रणति परमतुष्टे मातृतो मित्रतो वा द्रविणमुपनिधत्ते भास्करं तं प्रपद्ये ॥६८।

यस्मिन् प्रसीदति जनः परमप्रसादे यज्वामतिस्थ उदयं नयते कुटुम्बम्।
व्याधिव्यथाविरहितो दृढचारुगात्रः पात्रं दृशां तमनिशं रविमानतोऽस्मि ॥६९।

यः सप्तमं पदमुपांशु चरन् प्रजानां शास्ता सदा भवति पापपरायणानाम्।
मूर्त्यन्तरे च विदधत् शमनं मनुञ्च तं धर्मशासनधरं रविमानतोऽस्मि ॥७०।

दशमपदमुपेतो यो गुणोपेतमुच्चैर्नृपतिपतिमुदारं सारहारं करोति।
मृदुशुचिसमचित्तं नृत्यगीतानुरक्तं तमहमनिशमीड्यं देवदेवं प्रपद्ये ॥७१।

रुद्रसंमितनिवासमाश्रितो यः करोति धनदोपमं नरम्।
धान्यधामधरणीधरं वरं तं वराककरुणं सदा भजे ॥७२।

यस्य स्थानं प्राप्य सर्वेऽपि खेटा अस्तं यान्तः षण्डवत्संभवन्ति।
तं देवानां देवमीड्यं वरेण्यं प्रभास्वन्तं प्राञ्जलिः प्राणतोऽस्मि ॥७३।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

यस्मिन् प्रसीदति जनो भवति प्रसादी खेदं समावहति खिन्नदृशाऽवलोके ।
लोकस्य चक्षुरथ कोककुलस्य बन्धुर्भास्वान् सदा विजयते सुकृतैकसिन्धुः ॥७४॥

सदा द्वादशं भावमञ्चन्नराणां पुराकर्मभिस्तप्यमानाशयानाम् ।
कृपा संपदा देहदुःखं विधुन्वन् विधत्ते जयं भास्करं तं नतोऽस्मि ॥७५॥

गलत्पूयपूतेतरः श्वेतको वा महाव्याधिभिः पीड्यमानाङ्गको वा ।
जराजीर्णदेहस्खलत् पादको वा विमुच्येत रोगात् स्तुवँस्तं नतोऽस्मि ॥७६॥

हंसः कंसारिचक्षुः कृतकपटवपुः कुन्तिकाकामपूरः
सूरः पूर्वोदयाद्रेः शिखरमणिरसौ व्योमवीथीप्लवङ्गः ।
सारङ्गाङ्काङ्कपादो निशि भुवनभरं भ्राजयन् भाभिराशाः
सौवर्णे स्यन्दने वो रविरवतु सदा काञ्चने संनिषण्णः ॥७७॥

अदितिरखिलभर्तुः प्राणभूताऽत्ति याऽसौ
चरमचरमुपान्ते स्वात्मना याऽद्वितीया ।
सकलभुवनकोशव्यापिनां दैवतानां
जननधरणिराद्या यस्य धात्री श्रुताऽस्ति ॥७८॥

किरणसरणिमाप्तं जीवजातं विसर्पत्,
सततमसुवियोगे याति लोकान्तराणि ।
तमहमनिशमीशं स्वोदयैर्दिग्विभागान्
विदधतमविनीतान् शासतं संनतोऽस्मि ॥७९॥

मनोवातवेगं क्षिपन् संभ्रमेण प्रधावन् दिशो भासयन्नश्रमेण ।
मरुद्वृन्दमासारयन् वेगजातैर्मरुद्भिः सदा भास्करो भाति भूत्यै ॥८०॥

मेघैर्मेदुरमम्बरं निजकरैर्वर्णैर्युतं सप्तभिः
कुर्वन् शक्रधनुःप्रकाशमभितः श्वेताश्च सर्वा दिशः ।
हेमाद्रिं प्रविधाय हैमनमथो शृङ्गाणि नानामणि-
प्रद्योतैः प्रविभासयन् विजयते देवो जगद्भास्करः ॥८१॥

लाभे करोति धनधान्यहिरण्यलाभं रूपं तथैव तरुणीगणचित्तचोरम् ।
सर्वाः कला विदधते विनयञ्च रूपं तं भास्करं भयहरं सततं नमामि ॥८२॥

यस्य संतपति मण्डले परःपूरुषो वसति योगिभिर्नुतः ।
यस्य भूरिति शिरः श्रुतं श्रुतौ यो भुवं वहति बाहुयुग्मकम् ॥८३॥

पादद्वन्द्वं स्वः समाहुर्यदीयं यस्याहर्वै नाम सन्तो गृणन्ति ।
यं ध्यायन्तः पाप्मनो विप्रमुक्ताः चित्रं चित्रं पूरुषं तं नतोऽस्मि ॥८४॥

यो वर्षवासरकलादिविभागजातैर्जन्तून् नियच्छति विधौ विधिबोधिते स्वे ।
यं देवता अमृतमायुरुपासते तं भास्वन्तमन्तकमथामृतमाश्रयामः ॥८५॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

संपद्यामो वामनीर्भामनीश्च ब्रह्माद्वैतं योऽमृतं चाभयञ्च।
नेत्रेऽवामे संवसन् संनिबद्धः प्राणैः सर्वैर्भास्करं तं नतोऽस्मि ॥८६।

वायुं देवं यस्य संवर्गमाहुरस्तं गच्छन्नप्ययं यत्र याति।
काये प्राणो यस्य संवर्गभूमिर्नेत्रस्थानं भास्करं तं नतोऽस्मि ॥८७।

यैषा सृतिः श्रुतिषु गीतगुणोत्तराख्या यां वर्णिनो यतिवराः सुभटाः श्रयन्ति।
तां भासयन् विधिपुरं व्रजतां वचोभिः, संस्तूयमानविभवो रविरस्तु भूत्यै॥८८।

यस्त्वं पूषन् यमयन्नात्मजेन सर्वान् लोकान् प्रचरस्येक एव।
रश्मीन् स त्वं व्यूहतेजः समूहप्राजापत्यं त्वां वयं द्रष्टुकामाः ॥८९।

सत्यं रूपं मण्डले यत्तवान्तर्यस्यामत्रं काञ्चनञ्चापिधानम्।
यस्मिन् दृष्टे नैव रोगो न मृत्युः पात्रं पूषन् अपनय तस्य दृष्ट्यै ॥९०।

यस्योदयं ब्रह्मणः प्राहुरार्या यस्यास्तमायं तत्र वेदा वदन्ति।
तं देवानामालयात् सम्प्रजातं वन्द्यं वृन्दैर्ब्राह्मणानां नतोऽस्मि ॥९१।

योऽयं देवः सर्वलोकस्य चक्षुर्न लिप्यते चाक्षुषैर्बाह्यदोषैः।
तं ब्रह्मणः साम्यमधिश्रयन्तं देवाधिदेवं भास्करं सन्नतोऽस्मि ॥९२।

योऽयं देवः प्राणभूतो जगत्या सर्वे प्राणा यस्य रश्मीनवाप्ताः।
रयिं चन्द्रं यस्य वेदा वदन्ति सर्वौषधी रश्मिभिः संनिविष्टम् ॥९३।

वैश्वानरं विश्वरूपं प्रजानां प्राणं रविं शतधा वर्तमानम्।
सहस्रांशुं हरिणं हव्यवाहं परायणं ज्योतिरेकं तपन्तम् ॥९४।

प्रजापतिं वत्सरं यं वदन्ति यस्यायने दक्षिणञ्चोत्तरञ्च।
यस्यायनं दक्षिणं संप्रयाता गतागतं कामकामा लभन्ते ॥९५।

यस्योत्तरं तपसा पूतचित्ताः श्रद्धामृतो ब्रह्मचर्येण शुद्धाः।
मार्गं याता यतयश्चैव भूयो नेमं लोकं गर्हितं संविशन्ति ॥९६।

यं पञ्चाङ्घ्रि पितरं सप्तचक्रे प्राहू रथे षडरेऽर्पितस्त्वम्।
अर्धे दिवः परकेसं वसन्तं पुरीषिणं पुरुषं तं नतोऽस्मि ॥९७।

शुक्लं रूपं यस्य ऋग्रूपमाहुर्नीलं कृष्णं सामवेदा वदन्ति।
हिरण्मयः पुरुषो यत्र दृश्य उन्नामा तं भानुमन्तं नमामि ॥९८।

छन्दोगा यं सामसप्तस्वरूपं ध्येयं प्राहुः साम्यतो वर्तमानम्।
यस्योदयात् पूर्वतो रूपमेते हिंकाराख्यं पशवः संवदन्ति ॥९९।

यस्योदितं प्रथमं रूपमेते प्रस्तावं यं स्तुतिकामा भजन्ति।
यत्संगवेरूपमादिं तमाहुर्वयांस्ये तद्रूपमत्राश्रयन्ते ॥१००।

माध्यन्दिनं रूपमुद्गीथसंज्ञं देवा यत्ते सत्तमाः संभजन्ते।
यद्रूपं ते दिनमध्यादथोर्ध्वं प्रतीहारं यद्धि गर्भाः श्रयन्ते ॥१०१।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तस्मादेते देश उच्चैर्वसन्तो नैवाकाले स्रंसनं संलभन्ते।
तं देवं त्वां व्याधिभिर्वध्यमानाः प्रधावन्तः शरणं संप्रयामः ॥१०२॥

उपद्रवं यत्तवाग्र्यं हि रूपं वन्याः सर्वे पशवः संश्रयन्ते।
उपद्रुता दर्शनान्मानवानां श्वभ्रे गुल्मे संविशन्तो भवन्ति ॥१०३॥

यत्तेऽस्तपातौ प्रथमं रूपमास्ते वेदा यत्तन्निधनं संवदन्ते।
यद्रूपं ते पितरः संश्रयन्ते तद्रूपं ते शरणं संप्रपद्ये ॥१०४॥

एतद् गायन् भास्करस्यावदानं पापो जीवो जायते पूतचेताः।
चञ्चद्गात्रश्चारुचन्द्राभवक्त्रो विद्वान् वाग्मी व्याधिभिर्विप्रमुक्तः ॥१०५॥

इति श्रीब्रह्मीभूतकाशीनाथतनय-

सौभद्रेयरघुनाथशर्मकृतौ

सूर्यस्तवः समाप्तः ॥

—:o:—

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

[२]

अथ शनिस्तवः

वैश्वकर्मणिकाक्रोडक्रीडमानाय शैशवे ।
नमस्तेऽसितवर्णाय स्मितशुभ्रमुखाय ते ॥१॥

अरिदारणदक्षाय हरिसंश्रयसूनवे ।
भानुभानुप्रभाभारसितवर्णाय ते नमः ॥२॥

नीलोत्पलदलश्याम श्यामाशतसमाश्रित ।
उपमातुरमर्षेण पादखञ्जाय ते नमः ॥३॥

प्रतर्षकप्रहर्षाय प्रहृष्टवदनाय ते ।
नमो नमस्ते देवाय महादेवप्रसादिने ॥४॥

सम्प्रहृष्टमहादेव परीक्षितपराक्रम ।
करुणाकणपातेन मम दुःखं विदूरय ॥५॥

मन्दामन्दग्रहायोगवियोगफलदाय ते ।
नमो नमस्ते देवेश गजराजविहारिणे ॥६॥

पितृप्रसादसम्प्राप्तवरजङ्घालजानवे ।
महादेवपदासक्तमानसे करुणाकृते ॥७॥

पद्मिनीपतिपुत्राय पद्मिनीशतशालिने ।
यामिनीकामिनीकान्तितिरस्काराय ते नमः ॥८॥

पादप्रहारपातेन परीक्षितविमातृक ।
करुणाकणपातेन मम दुःखं विदूरय ॥९॥

भानवाय नमस्तुभ्यं मानवाग्रज ते नमः ।
करुणाकणपातेन मम दुःखं विदूरय ॥१०॥

चन्द्राच्चतुर्थगे यस्मिन् कुपिते जायतेऽत्यरम् ।
प्राणार्थबन्धुतानाशः स शनिर्मे प्रसीदतु ॥११॥

चन्द्राद् द्वितीयगो यश्च मातुः कष्टकरः परः ।
शिशूनामजिकाक्षीरपायकः स प्रसीदतु ॥१२॥

चन्द्रात् सहजगो यश्च बहुकन्याजनुष्करः ।
अपत्यप्राणहरणः तस्मै देवाय ते नमः ॥१३॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

चन्द्राच्चतुर्थगो यश्च महापौरुषकृद् भवेत् ।
शत्रुमर्दनदक्षश्च तस्मै देवाय ते नमः ॥१४॥

यस्मिन् पञ्चमगे भार्या श्यामा स्यात् प्रियवादिनी ।
तस्मै देवाय शनये कल्मषाशनये नमः ॥१५॥

चन्द्रात् षष्ठं समासाद्य स्थानं यो रविनन्दनः ।
महाक्लेशं महाकष्टमायुर्हानिं प्रयच्छति ॥१६॥

तस्मै देवाय शनये देवतानां प्रियाकृते ।
नमो वचांसि भूयांसि अर्थवन्ति प्रयुञ्ज्महे ॥१७॥

चन्द्रात् सप्तमगे यस्मिन् प्रसन्ने रविनन्दने ।
महाधर्मी महादाता बहुस्त्रीणां करग्रही ॥१८॥

तं देवं दुष्टदमनं दैतेयपरिपन्थिनम् ।
बहूपसर्गभीतोऽहं शरणं समुपागतः ॥१९॥

चन्द्रादष्टमगे यस्मिन् पितुः कष्टं प्रजायते ।
बहुदानाच्छुभकरश्शनिर्देवः प्रसीदतु ॥२०॥

चन्द्रान्नवमगे यस्मिन् कुपिते सूरसम्भवे ।
मोहमापद्यते जन्तुर्धनहानिश्च जायते ॥२१॥

तस्मै देवाय महते भक्तकारुण्यकारिणे ।
अदभ्रभयभीतोऽहं नमस्कुर्वे निरन्तरम् ॥२२॥

चन्द्राद् दशमगे यस्मिन् प्रसन्ने सूरसम्भवे ।
नृपतुल्यो भवेद् देही कृपणो धनपूरितः ॥२३॥

चन्द्रादेकादशं स्थानं गतो यो रविनन्दनः ।
देहक्लेशं महाकष्टमधर्मञ्च करोत्यलम् ॥२४॥

तस्मै देवाय शनये शरणागतसाधवे ।
बन्धवे देववर्गस्य नमस्कुर्मो निरन्तरम् ॥२५॥

चन्द्राद् द्वादशगे यस्मिन् कुपिते ऋतुधामजे ।
निर्धनो भिक्षुकश्चैव धर्मशून्यो भवेन्नरः ॥२६॥

तस्मै द्वादशदेहस्य परमोदप्रदायिने ।
शनैश्चराय देवाय नमस्कुर्मो निरन्तरम् ॥२७॥

यस्मिन् तपनजे देही तनुगे मदपीडितः ।
मन्दो मन्दगतिश्चैव जायते स प्रसीदतु ॥२८॥

तन्वीं तनुं कुर्वते ते तनुगाय नमो नमः ।
हीनकेशकरायाऽस्तु नमस्ते सूरसूनवे ॥२९॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

शत्रुगेहगते यस्मिन् मानवो बहुमित्रकः ।
तस्मै मित्रमनोहर्षवर्धनाय नमो नमः ॥३०॥

वस्वावासगते यस्मिन् मानवो वाक्यसाहकः ।
वस्वन्वितश्च भवति तस्मै देवाय ते नमः ॥३१॥

चपले लोचने कुर्वन् चौरवर्गपरस्सदा ।
यस्मिन् वसुगते मर्त्यस्तस्मै देवाय ते नमः ॥३२॥

सहजस्थानगे यस्मिन् तपनस्यात्मसम्भवे ।
अभ्रातृको नृपसमः पुत्रपौत्रकलत्रवान् ॥३३॥

मर्त्यः सञ्जायतेऽमर्त्यसमः श्रीकरुणेक्षितः ।
तस्मै देवाय महसाम्पत्युः पुत्राय ते नमः ॥३४॥

यस्मिन् तापनिकेऽत्यर्थं कुपिते बन्धुभावगे ।
स्त्रीपुत्रभृत्यबन्धूनां लोपकेऽनिष्टकारके ॥३५॥

ग्रामान्तरगतो मर्त्यो यस्मिन् वक्रिणि दुःखभाक् ।
दैत्यदर्पहरं देवं तमस्मि शरणं गतः ॥३६॥

भावे तु पञ्चमे भानुनन्दनः शत्रुगेहगः ।
पुत्रार्थहानिं दुःखञ्च यो विधत्ते शनैश्चरः ॥३७॥

निजे तुङ्गे मित्रगृहे तोकं स्तोकं ददाति यः ।
तस्मै देवाय शनये नमोऽस्त्वद्भुतकर्मणे ॥३८॥

नीचे षष्ठे शत्रुगेहे यः कुलक्षयकारकः ।
अन्यत्र शत्रुहन्ता च तुङ्गे पूर्णार्थकामदः ॥३९॥

व्याधिस्तोमं सप्तमगः कुर्वन् दारान् निहन्ति यः ।
धत्ते दम्भधरानङ्गान् सुहृद्भिः सह शत्रुताम् ॥४०॥

यस्मिन्नष्टमगे मर्त्यो दुःखभागी विदेशगः ।
चौर्यापराधतो नीचहस्तान्मृत्युञ्च विन्दति ॥४१॥

नेत्ररोगवशाद् दीनो हीनो द्रविणराशितः ।
स देवो दुष्टदमनो मनोमोदाय कल्पताम् ॥४२॥

यस्मिन् देवे नवमगे धर्मार्थरहितो नरः ।
बहुदम्भकरः पितृवञ्चकश्च प्रजायते ॥४३॥

मदानुरक्तो निधनी रोगी पापकलत्रवान् ।
तस्मै देवाय शनये नमोऽस्त्वद्भुतकर्मणे ॥४४॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

दशमस्थानगे यस्मिन् प्रवासे नृपसङ्गगः ।
महाधनः शत्रुवर्गाद् भयं नैति कदाचन ॥४५॥

मानी नृत्यपरासक्तोऽनुरक्तस्तेषु सर्वदा
नीलनीरजनीलाय तस्मै देवाय ते नमः ॥४६॥

यस्मिन्नायगते सूर्यसम्भवे मानवो भवेत् ।
धनी विमृश्यकारी च तस्मै देवाय ते नमः ॥४७॥

बहुभोग्यसमायुक्तो मुदितः शीलवान् भवेत् ।
शीतानुरागी शैशवके केवलं व्याधिकर्शितः ॥४८॥

तस्मै श्यामाभिरामाय मनोमदनचारवे ।
कारवे सर्वकामानां नमोऽस्तु रविसूनवे ॥४९॥

यस्मिन् व्ययगते पञ्चगणस्याधिपतिर्भवेत् ।
गदान्वितो हीनवपुः पूर्वजन्माद्ययोगतः ॥५०॥

जङ्घाव्रणी सुदुःखी च क्रूरबुद्धिः कृशाङ्गकः ।
बधे बन्धे चाण्डजानां रतः पापपरायणः ॥५१॥

तं देवं दुष्टदमनं निजभक्तार्तिनाशनम् ।
त्रासनं दुष्टवर्गस्य नतोऽस्मि रविनन्दनम् ॥५२॥

सूर्येण सङ्गते यस्मिन् धातुज्ञो वृद्धचेष्टितः ।
विद्वानपि क्रियानिष्ठो नष्टदारसुतो भवेत् ॥५३॥

तमहं सर्वजन्तूनां पुण्यापुण्यैकसाक्षिणम् ।
स्वर्धुनीधारिदृक्सूतं शरणं समुपागतः ॥५४॥

यस्मिन् रविशशाङ्काभ्यामेकस्थाभ्यां समन्विते ।
धार्मिको धनहीनश्च गजाश्वपरिपालकः ॥५५॥

सुकर्मनिरतः शीलवर्जितो जायते नरः ।
तमहं शरणं यामि तरणेरात्मसम्भवम् ॥५६॥

पित्रा कुजेनापि युते यस्मिन् सञ्जायते नरः ।
मूर्खो गोधनहीनश्च रोगार्तः स्वजनोज्झितः ॥५७॥

विकलः कलहार्तश्च बहुचिन्तातुरो भृशम् ।
तमहं शरणं यामि सञ्ज्ञाया आत्मसम्भवम् ॥५८॥

पित्रा बुधेनापि युते यस्मिन् सञ्जायते नरः ।
दुराचारो बन्धुभिश्च परित्यक्तः पराजितः ॥५९॥

विद्वेषी सर्वलोकस्य गर्हितः स्वेन कर्मणा ।
तमहं शरणं यामि शनैश्चरमहर्निशम् ॥६०॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

यस्मिन् जीवार्कसंयुक्ते पुत्रमित्रकलत्रवान् ।
निर्भयो नृपतिद्वेष्टा स्वेष्टबन्धुर्भवेन्नरः ॥६१॥

तमहं दोषसङ्घस्य हानये करुणाकरम् ।
शनिं शरणमायामि तरणेरात्मसम्भवम् ॥६२॥

चन्द्रमङ्गलसंयुक्ते यस्मिन् बाल्ये मृताम्बिकः ।
क्षुद्रावलोकविद्विष्टो विषमो जायते नरः ॥६३॥

तं देवं सर्वदेवानां मानरक्षाकरं वरम् ।
प्रयामि शरणं मूर्ध्ना भास्करस्यात्मसम्भवम् ॥६४॥

यस्मिन् बुधेन्दुसंयुक्ते प्राज्ञो भूपतिपूजितः ।
अत्युच्चो विपुलाङ्गश्च वाग्मी भवति मानवः ॥६५॥

तं देवं ब्रह्मदेवस्य मनोनयनबन्धनम् ।
वन्दमानो विमानोऽहं शरणं समुपागतः ॥६६॥

यस्मिन् जीवेन्दुसंयुक्ते नीरोगः स्त्रीगतो नरः ।
शास्त्रार्थविज्ञः सर्वज्ञो ग्रामपत्तनपालकः ॥६७॥

तमहस्करवंशस्य वर्धनं मित्रवर्धनम् ।
कृशानुशीतभानूग्रभानुतेजसमाश्रये ॥६८॥

यस्मिन् शुक्रेन्दुसंयुक्ते लिपिकर्ता च वेदवित् ।
पुरोहितकुलोत्पन्नो भवेत् पुस्तकवाचकः ॥६९॥

वैभाकरिं देवमहं तं विभाकरतेजसम् ।
पूनाया पापपूगस्य शरणं समुपागतः ॥७०॥

बुधभौमयुते यस्मिन् प्रवासी नेत्ररोगवान् ।
प्रेष्यो वदनकव्याधिर्हास्यलुब्धो भवेन्नरः ॥७१॥

तं देवं सर्वदेवानामभिष्टुत्यपराक्रमम् ।
शरणं समुपेतोऽहं शरणागतवत्सलम् ॥७२॥

यस्य जीवकुजासङ्गे कुष्ठी राजसु पूजितः ।
नीचाचारो निर्धनश्च भवेन्मित्रैर्विगर्हितः ॥७३॥

तं मार्तण्डसुतं देवं संज्ञासंहर्षकारकम् ।
वासुदेवद्रुमाराध्यं शरणं यामि सत्वरम् ॥७४॥

भृगुमङ्गलसंयोगे यस्य सञ्जायते नरः ।
प्रवासशीलो दुःखी च दुष्टशालकलत्रवान् ॥७५॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तं सर्वदमनं देवं सीदत्सु करुणाकरम् ।
विविधव्याधिभीतोऽहं शरणं यामि सत्त्वरम् ॥७६॥

बुधजीवसमायोगे यस्य सञ्जायते नरः ।
सुदारो बहुभाग्यश्च धनैश्वर्ययुतः सदा ॥७७॥

सुखधैर्ययुतः प्राज्ञः शास्त्रदृष्टिविवेकवान् ।
तमर्कतनयं देवं शरणं यामि सत्त्वरम् ॥७८॥

बुधशुक्रसमायोगे यस्य सञ्जायते नरः ।
दुस्संगतिः कलाऽभिज्ञः स्वदेशनिरतस्सदा ॥७९॥

मुखरः परदारेषु प्रसक्तः पापकृत्तमः ।
तमहं शरणं यामि भास्करस्यात्मसम्भवम् ॥८०॥

शुक्रेज्यसङ्गमे यस्य राजा भवति कीर्तिमान् ।
नीचवंशेऽपि सम्भूतः शीलयुक्तो नृपो भवेत् ॥८१॥

तं सर्वदमनं देवं ग्रहवीथीप्लवङ्गमम् ।
विविधव्याधिभीतोऽहं शरणं समुपागतः ॥८२॥

यस्य शुक्रार्कसंयोगे कलामानविवर्जितः ।
कुष्ठी शत्रुभयोद्विग्नो दुराचारो नरो भवेत् ॥८३॥

तमाधिव्याधिपूगानां प्रसन्नं वारणं परम् ।
वारणास्यपितुर्नेत्रसम्भवं समुपास्महे ॥८३॥

यस्यार्कशशिभौमानां योगे मूर्खश्च निर्धनः ।
ह्रस्वो विषमदेहश्च भिक्षावृत्तिर्भवेन्नरः ॥८४॥

तमहं ग्रहराजस्य दयितं ग्रहसत्कृतम् ।
दुर्ग्रहग्रहणाद भीतः शरणं यामि सत्त्वरम् ॥८५॥

यस्यार्कबुधचन्द्राणां योगे भिक्षाशनो नरः ।
नियुक्तो जनकाभ्याञ्च विकलाक्षश्च निर्धनः ॥८६॥

यस्य प्रसादे पद्माऽऽस्ते सर्वसौख्यविवर्धिनी ।
प्रसादसुमुखं देवं तमहं शरणं गतः ॥८७॥

यस्य सूर्येन्दुजीवानां संयोगे वनिताप्रियः ।
बहुवित्तसुतः क्षीणः समाक्षश्च प्रजायते ॥८८॥

मान्यश्च सर्वलोकानां सम्मान्यश्चैव भूभुजाम् ।
तमहं शरणं यामि शरण्यं शनिमातुरः ॥८९॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

येन शुक्ररवीन्दूनां संयोगे चातिदुर्बलः।
वनितासदृशाचारी भीरुरग्रेसरो नरः ॥९०॥

तमहं ग्रहमुख्यस्य भास्करस्यात्मजं प्रभुम्।
शनिं शरणमायामि ग्रहबाधाभिरर्दितः ॥९१॥

येनार्कबुधभौमानां योगे योद्धा कविर्जनः।
मन्त्री च भूपतिस्तीक्ष्णो नीचाचारोऽपि जायते ॥९२॥

तमहं करुणाकाङ्क्षी शरणागतवत्सलम्।
शनिं शरणमायामि प्राश्विनेयद्वयाग्रजम् ॥९३॥

जीवमङ्गलभानूनां येन योगे गणाधिपः।
सोन्मादो नृपमान्यश्च सिद्धार्थो जायते नरः ॥९४॥

तमहं तमसां हन्तुः पितुर्हृदयनन्दनम्।
दुर्भाग्यदावदहनं शनिं शरणमागतः ॥९५॥

मार्तण्डशुक्रभौमानां योगे येन प्रजायते।
लोकद्विष्टः समाख्यातो नीचाचारो जडाकृतिः ॥९६॥

तं सर्वपापशमनं शमनस्याग्रजं प्रभुम्।
शनिं शरणमायामि कान्दिशीकोहमाकुलः ॥९७॥

येनार्कचान्द्रिगुरुभिरेकराशिस्थितैर्नरः।
भ्रातृमान् कलही मानी क्लीबाचारो निरुद्यमः ॥९८॥

निर्धनो वनिताभिश्च गर्हितो दुःखसंकुलः।
मार्तण्डतनयं देवं तमहं शरणं गतः ॥९९॥

येन शुक्रबुधार्काणां योगे मित्रयुतश्शुचिः।
मुखरः सुभगः प्राज्ञो जायते च सुखी नरः ॥१००॥

नीलोत्पलनवाम्भोदतमालश्यामलं महः।
प्रसादयामि संयामि शरणं सौख्यगर्धिकः ॥१०१॥

पद्मजः पद्मनाभश्च पद्मा येन प्रसादिता।
प्रसादयामि तमहं शरण्यं शनिमातुरः ॥१०२॥

एतं स्तवमधीयाने शन्नो देवीरभीष्टये।
तनोतु सततं देवः प्रवर्तयतु चार्कजः ॥१०३॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

शनिप्रसादात् सततमापो नस्सन्तु पीतये।
शंयोर्मित्रादभिगता नः स्रवन्तु सदा सुधाः ॥१०४॥

शनिप्रसादान्नस्सर्वे ग्रहास्सन्तु शुभावहाः।
गृहाश्च प्रजयाऽऽकीर्णा धनधान्यसमेधिताः ॥१०५॥

इति श्रीब्रह्मीभूतकाशीनाथतनय-
सौभद्रेयरघुनाथशर्मकृतौ
शनिस्तवः समाप्तः ॥२॥

—:०:—

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अथ निर्वेदनिवेदनम्

चलन्मीनद्वन्द्वं दलदमलनीलाब्जयुगलं
परिप्रेङ्खत्खञ्जद्द्विजयुगलमुत्त्रासतरलम् ।
पराकुर्वत्कृष्णं सितमरुणमुद्दामकरुणं
विधत्तां नः क्षेमं तव नयनमेनोऽपनयनम् ॥१।

सुधाब्धावुत्तुङ्गे विविधमणिभङ्गीविरचिते
महासौधे सौधे नवनलिनविन्यस्तचरणाम् ।
महातल्पेऽकल्पे युवतिजननिर्देशनिपुणां
नमामः कल्याणीं परमशिवसौभाग्यलतिकाम् ॥२।

स्मितज्योत्स्नोद्द्योतं मणिगणिनिकम्बौ समुदितं
सुधाधारासारं त्रिजगति अपारं विदधतम् ।
शशाङ्कं सर्पन्त्या जयदमलया कान्तिसरिता
हसन्तं श्रीमातुर्वदनविधुकं यामि शरणम् ॥३।

तव पादसंश्रितनखेन्दुगौरवं परिलब्धुमिन्दुरकरोन्महत्तपः ।
द्विजराजतामुपगतोऽपि नालभत् सकलङ्क उग्रतरशोकसंप्लुतः ॥४।

जनजीवनाय जलरूपधारिणी जनभारधारणपरापराऽवनिः ।
अतिशीतभीतजनभीतिहारिणी जयतादशेषमहसां निधिः शिवा ॥५।

ग्रहधारिणी गगनमण्डलेऽखिले ग्रहधारणाय सततं विहारिणी ।
मरुतामनीकमभिधावतां मुहुः समवेतशक्तिरवतात् सदाऽम्बिका ॥६।

कामान् कपर्दभृतिका परिपूरयन्ती जीवान् जनुर्भृत उदारतया सृजन्ती ।
कारुण्यपूर्णहृदया मम कांतरस्य श्रीमातृका दिशतु सा परलोकमार्गम् ॥७

दासीशतैः परिवृता महनीयरूपैर्दासैश्च दर्शननिदेशकरैः परीता ।
कामान् दृशैव ददती दिशतान्मुहुः सा कामेशपट्टमहिषी मम वातबाटम् ॥८।

सिंहासनेश्वरि महेश्वरि मन्दहासे मीनाक्षि माक्षिकपरीतवचोविभूते ।
श्रीवामदेववदनेन्दुचकोरिके त्वं वेषं विलोकय शिवे मयि दीनदीने ॥९।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

चिद्वह्निकुण्डजनुरुज्ज्वलराजसं यत् संसारसंहृतिविधौ तमसाऽऽकुलं यत् ।
सत्त्वाश्रयं निजजनस्य हृदि श्रितं यत् सत्त्वं समाविशतु मे महसां महो यत् ॥१०॥

रक्तबीजवधभीषितासुरा चण्डमुण्डपरिखण्डनोद्धुरा ।
देवकार्यकरणाय सोद्यमा मानसं विशतु सा बृहत्तमा ॥११॥

समुदीयमानरविभासहस्रभा जगतः शिवं दिशति या स्थिरस्य च ।
सवितुर्वरेण्यमहसोऽपकर्षिका मम हर्षिका भवतु तर्षिका शिवे ॥१२॥

अतिपीतविद्युदतिशायिविग्रहा ग्रहराजभासुरविभाविभासुरा ।
नवचम्पकप्रसवसोदरप्रभा मम मानसं श्रयतु काऽपि चित्कला ॥१३॥

अतिशोणशोणितकरालकालदृक्कलुषीकृतस्य करुणाकणाञ्चितैः ।
मुखमुद्विभासि कुरु कान्दिशीकतामपनीय नीलककटाक्षवीक्षितैः ॥१४॥

सिन्दूरकेसरसहोदरकेसरार्यमत्तेभकुम्भतटपाटनलब्धकीर्ते ।
सद्यो द्विषो जहि जयञ्च विधेहि मह्यं भ्रातस्त्वमेव विनिवेदय मातृपादे ॥१५॥

कारुण्यकातरजगज्जननीपदाब्जशोणांशुसंसरणपावितपृष्ठपीठ ।
स्नेहार्द्रया ननु दृशा सुतनिर्विशेषं दृष्टस्त्वमेव विनिवेदय मातृपादे ॥१६॥

विस्रम्भनिर्भरदृशामयकाशु दृष्टः पुच्छेषदुत्पवनसूचितहार्दसारः ।
धावत्सरोषदितिजालिविनाशदक्ष त्र्यक्षासवे मम निवेदय वृत्तजातम् ॥१७॥

निजभर्तृवृत्तमनुवर्तनं वरं पतिदेवताजननितान्तसत्कृतम् ।
विदधासि या विधुकरोटिनर्तनैर्जहि काममन्धभवनीकृतालयम् ॥१८॥

तव तापसीं सरणिमागतं वपुः प्रसमीक्ष्य दीनमनसो महागिरेः ।
सुविचिन्त्य दैन्यमथ मामकीं रुजं हर सत्वरं हरशरीरसंश्रिते ॥१९॥

विधुभालविष्णुविधिगर्वशातनो नरकेषु नारककदम्बपातनः ।
मम मातृपादपतितस्य मानसादपयातु सत्वरमनङ्गदुर्गजः ॥२०॥

सौधाब्धिमध्यगमहामणिसौधमूर्च्छत्संगीतनीतदिवसे त्रिदशेश्वरि त्वम् ।
क्रन्दन्तमन्तकभयादभयार्पणेन मार्तविलोकय विलोकनकौतुकेन ॥२१॥

अभिधावदन्तकसरीसृपाहतिप्रतिवीक्षमाणजनभीतिहारिणी ।
भवभङ्गहेतुवृषकेतुसंमदे प्रतिसृज्यमानजगदम्बिकाऽवतु ॥२२॥

यममुक्तपाशपरिबन्धशङ्कया तनुधावदाशु वशगस्य यस्य मे ।
सहसाऽपनेष्यति भयं विराविणो ददती मुदं जननिका तु साऽवतु ॥२३॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

मम कर्मशेषपरिपूर्तिभूतये करुणापरामपरविग्रहग्रहाम् ।
जननीमुपैमि सहसासुनिर्मले मम मानसे कृतपदां गिरीन्द्रजाम् ॥२४।

अयि भक्तमानसनिवासलालसे वस मानसे मम नितान्ततामसे ।
कृतकारितां न खलु पिष्टपेषणं द्युतिमद्द्युतिं समवयन्ति साधवः ॥२५।

अयि जीवजीवनविधानदीक्षिते मम भिक्षिते कुरु कटाक्षधोरणीम् ।
मम शिक्षिते न खलु सार्थकं वचो जननि त्वदीयगुणकीर्तनादृते ॥२६।

अयि धाव धावति यमो जिघृक्षया मम मानसं भयमुपैति शङ्कया ।
विगतासुके सरुजि बान्धवैर्हृते समुपागते भिषजि किं प्रयोजनम् ॥२७।

अयि दृप्तदैत्यदलनाय दीक्षिते वरबाहुसंभृतगदाऽसिचक्रिके ।
धृतशार्ङ्गिके गरुडवाहने शिवे समुपागतं समवजीवयाम्बिके ॥२८।

विरुवन्तमन्तकवशंगतं शिवे परिपालयाशु तव दिग्विदर्शकम् ।
ननु विस्मरात्मजपुराकृतिं मुहुः स्मरमातृगौरवमुदारमानसे ॥२९।

या त्वमञ्चसि जगत्त्रयोपरि या त्वमञ्चसि जगत्त्रयादधः ।
या च तिष्ठसि जगत्त्रयेऽम्बिके तेन ते वपुरमेयतामितम् ॥३०।

सत्त्वमम्ब तव भासकं वपुः स्याद् रजो विविधकर्मकारणम् ।
यत्तमस्तव विभाविवर्जितं सर्वसर्जनपरं महद्वपुः ॥३१।

येन भान्ति तव तेजसेरिताः सूर्यकोटिमतिवृत्तशक्तिना ।
सोमसूर्यदहनादयः समे तेन पातय हिमं निपातुकम् ॥३२।

यत्र भाति सुविभाति भास्करो यत्र वह्निरवभाति भासते ।
तद्दृगन्तकरुणाभृतं महस्त्वं समुद्धर पतन्तमम्बिके ॥३३।

वाञ्छया विहितसर्वसर्जना लीलया विहितसर्वसंस्थितिः ।
पाहि मां पतितमम्ब ते पदे पाणिना विनतलोकपालिना ॥३४।

त्वन्मुखाम्बुजनिरीक्षिणं भिया वेपमानमगतिं कृतागसम् ।
मातराह्वय मृदुस्मितान्वितप्रेमगद्गदगभीरया गिरा ॥३५।

तावदम्ब भवति प्रियाकरी देहगेहवनितादिसंस्मृतिः ।
यावदीश्वरि न ते हताशुभा पादपंकजपरागसंस्तुतिः ॥३६।

या श्रुता हरति हृद्गतं तमो या स्मृता हरति सर्वकल्मषम् ।
या स्तुता हरति सर्ववेदनास्तां गतोऽस्मि शरणं महेश्वरीम् ॥३७।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

कामलोभदृढरस्मिसंयतं क्रोधयोधविकृताकृतीकृतम् ।
पात्यमानमिह दारुणेऽवटे मातरुद्धर कृपावलोकनैः ॥३८॥

मातरस्ति तव विग्रहः श्रुतिस्तस्य कान्तिरपि वर्तते स्मृतिः ।
व्याकृतिस्तव मुखं शुभं शुभे कल्प एव तव पादयुग्मकम् ॥३९॥

शब्दविग्रहधरा परावपुस्त्वं विमृश्य सकलार्थजालकम् ।
बोधरूपिणि परात्परे शिवे संनयस्यपि तवाङ्कमागतम् ॥४०॥

चित्तमस्ति तव साकृतिस्तनुर्या चितिः खलु निराकृतिस्तु सा ।
एवमद्भुतविकल्पयोगतो हानतश्च तव भिद्यते वपुः ॥४१॥

मज्जतो मम भवाब्धिसंप्लवे नास्ति संतरणसंक्रमः शिवे ।
तत्र संस्मृतिसृतिंगता मुहुर्मातरेहि तरणीकृताकृतिः ॥४२॥

नखतुण्डखण्डितमहाहिमुण्डकप्रथितप्रभावविहगेन्द्रसंस्थिता ।
वरबाहुसंभृतगदासिचक्रिका धृतशार्ङ्गिका हरतु मे भयं शिवा ॥४३॥

दृढरागरश्मिकृतपाशबन्धना भवपाशभेदनिपुणाऽभवाय मे ।
भवतादशेषविपदोघहारिणी हितकारिणी सकलकामदा शिवा ॥४४॥

दितिजेशवारणवराङ्कुशाकृतिः कृतकोपदीप्तिपरिदीप्तविग्रहा ।
ग्रहदोषवारणपरा पराङ्मुखैरनवाप्तपादयुगला शिवाऽवतु ॥४५॥

मधुमाधवीमधुररूपभृन्मनःप्रथितेक्षुदण्डकृतचापचापला ।
चलताम्न चित्तविवराच्चतुर्भुजा चलचित्तकानधिगताशया शिवा ॥४६॥

तव शब्दरूपरसगन्धनामभिर्जगदम्ब [1]पावनगुणेन पञ्चभिः ।
इषुतामुपेत्य वरबाणसंश्रितैर्विनिहंस्यनार्यमनसां चयांशितैः ॥४७॥

निजदेहसर्पदरुणप्रभापयः परिपूरमज्जदखिलाण्डमण्डला ।
प्रकरोतु शंततमशंततं मुहुर्विनिवार्य वारितविपद्गणा शिवा ॥४८॥

अतिरक्तशोकहरसूनसञ्चयैर्ग्रथितालकाऽ[2]लकजनाभिवन्दिता ।
वरदा सतां नयतु दासदासिकाशतसंवृतावृतशिवा शिवावृता ॥४९॥

पुंनागपुष्पकृतशेखररम्यरूपा रूपाधिका मतिमतां हृतसर्गरूपा ।
सौगन्धिकोत्पलकुलाकुलकुन्तला मे कामान् समादिशतु कामरिपोःकलत्रम् ॥५०॥

---

१. पवनस्य गुणेन स्पर्शेनेत्यर्थः ।
२. अलकायां पुरि निवसन्ति ये ते शेषेऽण् ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

कुरुविन्दविद्धकनकाङ्गदक्कणप्रतिबुद्धवीक्षणवृषाङ्कविक्षिता ।
मम मिक्षिता दिशतु बोधमद्भुतं भवदावलावनकुठारिका शिवा ॥५१॥

अतिवृत्तचन्द्रांसमभागभासुरालिकशोभया रुचिरवक्त्रमण्डला ।
मुखचन्द्रलक्ष्मनिभमार्गनाभिकप्रतिवीक्ष्यमाणतिलका शिवाऽवतु ॥५२॥

स्मरमङ्गलायतनचित्रतोरणे विनिवेशितेन्दुनिभवक्त्रमण्डला ।
मम मानसं श्रयतु वासनाशना भवबन्धभेदनिपुणा पराम्बिका ॥५३॥

पुरुवक्त्रकान्तिपरिपूरसंचलन्नवमीनगोयुगनिभाब्जलोचना ।
मम मानसं श्रयतु काऽपि कालिका कुलकन्यकाजननुता कुलाङ्गना ॥५४॥

नवचम्पकप्रसवसोदरप्रभाधरनासिकाविवरिवंशराजिता ।
मम मानसे वसतु तारकालिकाद्युतिहारकाभरणभासुरा शिवा ॥५५॥

नवबिम्बविद्रुमजपारुणप्रभा परिभावि कोकनदरक्तदच्छदा ।
मम मानसे वसतु वासवाङ्गनागणगीतिनोनुतिमुदाऽन्विता शिवा ॥५६॥

अयि कदम्बकदम्बविकाशिकाऽभिनवमञ्जरिकाकृतकर्णिके ।
तपनशीतकराकृतिकुण्डले वस मदम्ब सदा मम मानसे ॥५७॥

विमलबोधनवाङ्कुरसोदराङ्कुतरदावलिवक्त्रविराजिता ।
कमलरागशिलामणिदर्पणाकृतिनिरादरिगण्डयुगा शिवा ॥५८॥

वीटीकृतात्तुहिनशुभ्रदलाभिरामात् कर्पूरखण्डयुगलादभिनिस्सृतेन ।
गन्धेन कर्षितदिगन्तरजीवजाता जायेत भूतिभवनाय ममाद्रिजाता ॥५९॥

कच्छपीकठिनपीठतन्त्रिका माधुरीमधरयद् वचःक्रमा ।
काऽपि तिष्ठतु मदन्तरम्बिका स्मितमग्नमानसमहेशवीक्षिता ॥६०॥

अतुलचैबुककान्तिविराजिता कनकभूषणभूषितदोर्द्वया ।
गिरिशबद्धसुमङ्गलतन्तुका मम तनोतु शिवं शिववल्लभा ॥६१॥

कलिकल्मषप्रहतिहेतिभूतये निजभक्तमानसमरालमूर्तये[1] ।
मम मानसं भवतु सूतिसूतये स्मृतिभूतिपूतिपरिभूतिमूर्तये ॥६२॥

अनवद्यनिर्मलनिरञ्जनाभिधाऽभिहिता गुणत्रयविवर्जिता यतः ।
शुचिरागसंभवविरागसंभृतं परिपालयाम्ब तव दिग्विदर्शकम् ॥६३॥

---

१. अनुकूलयितुं मम मानसं भवतु इति तादर्थ्ये चतुर्थी । अत्र चतुर्थ्यन्तं चतुष्कं मातृ-बोधिकम् ।

CC-0. Agamnigam Digital Preseyation Foundation, Chandigarh

भवभाविनीभवनिवृत्तिभाविनी भवभावनाय बहुवेषधारिणी ।
भवसंक्रमे विविधनृत्तकारिणी परिपातु पालनपरा पराम्बिका ॥६४॥

धावत्खरनद्धरथजातबहुवेगवातपातिततरुमूलमूलसूचितनिजवाटा,
कल्यपङ्क्तिबद्धलोकनोनुवदशोकतोककोकनदकान्तिकरतालिकालिनाटा ।
वीटीकृतपूगपृक्तपर्णदत्तगन्धवस्तुसंसरदमन्दगन्धकृष्टजीवजाता
जातीयूथिकालिचम्पकासितपद्मकादिकृतशेखरविभासिचित्रमूर्धज-
विभाता ॥६५॥

मातास्वरविन्दमाल्यविगलन्मकरन्दबिन्दुपावितपादपतितमूर्धभावित-
निजभावा,
पातु पालनाभिलाषविनतभक्तजातजातभक्तिनूतिसूक्तिसंस्मृताद्भुता-
नुभावा ।
विधमतु विपदोघवारिवर्तमानदुरावर्तपतितजीवपूगतारणोद्यतभुजनावा
संसृतिपयोधिपारपारितकुजातिवारवारकृतकौतुकनुति दृष्टहर्षहावा ॥६६॥

योगिनीशतसमूहसंवृता राकिणीगणविलासविस्मिता ।
हाकिनीकृतहवामदन्तरं काऽपि संविशतु वित्तपूरिता ॥६७॥

काकिनीकृतरवाकृतार्थतां शाकिनी शिवसमृद्धिमुत्तमाम् ।
लाकिनीलयसमाधिमद्भुतं काऽपि सं दिशतु संसर्दाहिता ॥६८॥

प्रकृतिः परिणामवत्सला ननु मायालयकारनिष्ठुरा ।
अवनाय वैष्णवविभूतिरद्भुता मम मानसं श्रयतु काऽपि चित्कला ॥६९॥

कलनादकोकिलकुहूरुतस्तुता कुलकन्यका जनसुहूतिगोचरा ।
करुणाकटाक्षपरिवीक्षितातुरा मम सत्वरं भवतु रक्षणक्षमा ॥७०॥

शीलनिर्जितजगत्त्रयाऽम्बिका तत्त्वविद्बहुलगर्वसंस्तुता ।
लास्यतत्परनरीभिरर्चिता शीतला मम करोतु मङ्गलम् ॥७१॥

प्रकृते प्रकृते करोषि किं ननु सीदत्यवनी तव प्रजा ।
करुणारससागराभिधा तव मातर्विफलत्वमेष्यति ॥७२॥

दृप्यद्वरबाहुशालिदुराधर्षदुष्टदैत्यदानवसमाजलाजशोभाहुतिकोपे
कुप्यत्प्रमथेशभालनिःसरदमन्दकालकीलावृतवह्निजालसंहृतजनजीवे ।
जीवय जराधिजीर्णमम्ब ते पदावकीर्णधूलिधूसरालकमनङ्गरिपुहासे
दासे करुणाकटाक्षमर्पय योदभारवैद्युतविकारहारिकायकान्तिकाशे ॥७३॥

भीषणमहेषु जालकालितसुरारिबालसेवितविशालसालकृत्तरिपुवाहे
वाहाजितदैत्यवर्गशातितसमस्तगर्वपर्वशर्वरीशकान्तिकान्तकीर्तिपूरे ।
पूरय ममाभिलाषमीश्वरि पदावकाशशाश्वतनिवासदासकर्मकोटिशूरे
दूरे कुरु पापमम्ब दुष्टजापतापपुञ्जमुञ्जदावदाहककृशानुरोषदोषे ॥७४॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

गलहस्तकरी विपदामबला भवभीतिहरी भवसौख्यकरी ।
मणिसौधचरी मम चित्तचरी भवतादगराजसुताऽभयदा ॥७५।

मोहाब्धिबम्भ्रदसंख्यवियातयादोरूपैः सुहृद्भिरभितः परिमोह्यमानम् ।
शोकोर्मिमानसमहाब्धिमहातरङ्गैराघूर्णमानवपुषं परिपालयाम्ब ॥७६।

पित्रा त्यक्तं ब्रह्मभूयंगतेन मात्रा त्यक्तं स्थूलदेहं सृजन्त्या ।
सूक्ष्मं देहं या सृजस्यादिसर्गे सा त्वं मातः पाहि मां दीनदीनम् ॥७७।

भवसम्भव आधिरुपाधिरहो विनिवर्तत आशु विनाशि तमः ।
यदुपासनतो न नतो नमति प्रतिषेधतु विघ्नगणं सगणम् ॥७८।

मणिनूपुरनादतिरोहितनादकलश्रुतिविस्मृतिबुद्धशिवे ।
विनिवेशितसस्मितचारुदृशा दिशताच्छिवमद्भुतमाशु शिवा ॥७९।

धावतो मम जगत्त्रयेऽम्बिके भीतितो युगमनन्तमुद्गतम् ।
प्राप्य सम्प्रति पदाम्बुजं शिवे तावकं मम मनः प्रसीदति ॥८०।

अवनी परिपालनाद्धरा धरणी धारणयाहता शुभा ।
क्षितिरस्यसुभृन्निवासतः प्रथनात्त्वं पृथिवीति विश्रुता ॥८१।

मधुकैटभमेदसाक्तता ननु मेदिन्यभिधानमाश्रिता ।
भवती भव शक्तिसंपदा विधिसर्गप्रभवाय संस्थिता ॥८२।

जलरूपतामुपगताऽसुधारणे बहिरन्तरे च परिपाककारिणी ।
ग्रहगोलधारणपरायणाम्बिका परिरक्षतादखिलनादसंभृता ॥८३।

इन्द्रनीलमणिरम्यसानुके नीलभूभृतिकृतास्पदे शिवे ।
सूनुयुग्ममयि सूनुकस्य मे मातरुद्दिश दयाविलोकनैः ॥८४।

शशिसुरभितमालां मञ्जुमन्दारमालां
शिखिनयनविशालामासुरौघे करालाम् ।
करकलितकपालां सौनकोत्तानबालां
शरणमुपगतोऽहं सत्वरं शैलबालाम् ॥८५।

प्रणतजनदयालापार्तिहृद्दहस्ततालां
गतिविजितमरालाङ्किङ्करीभूतकालाम् ।
करुणवरुणशालां विश्वतर्वालिवालां
शरणमुपगतोऽहं सत्वरं शैलबालाम् ॥८६।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

मुदितमधुपमाला सेविताम्भोजजालाऽ-
वृतचरणरसाला कल्मषौघे कराला ।
कलितकठिनकाला चन्द्रमश्चारुभाला
वसतु मम विशाला मानसे शैलबाला ॥८७॥

विमलगगननीला कल्पिताशेषलीला
दनुजदमनशीला दुर्ग्रहद्वारकीला ।
सुकृतकृषिकरीला दीनभक्तार्तिकीला
प्रशमनजलशीला पातु मां भद्रशीला ॥८८॥

जननीचरणारविन्दयोर्भ्रमरीभूतसुरासुरेन्द्रयो- ।
र्विगलद्रसवत्पुमर्थयोर्भ्रम मे मानसदोषशोषयोः ॥८९॥

वेगतः स्वर्गतः सम्पतज्जाह्नवी वारिपूतेहिमाद्रेः सुधामाजिरे ।
धावदव्यक्तलीलास्मितोद्योततः पावयत्संमुखीनं जनं यन्महः ॥९०॥

तत्सुधासागरोन्मज्जदिन्दुप्रभं क्षीरकैलासशर्वादृहासाधिकम् ।
सन्निधत्तां सदा मामके मानसे धुन्वदन्धं तमस्स्तोमकं सोमकम् ॥९१॥

कल्पपादपतलावकल्पिताऽनल्पतल्पकृतसंस्थितिं शिवाम् ।
संश्रयामि शरणं पदापतद् धूलिधूसरसुरेन्द्रवन्दिताम् ॥९२॥

गरिमाऽगुरूकृतहिमाद्रिविग्रहां लघिमाऽलघूकृतसमस्तलाघवाम् ।
अणिमाऽनणूकृतपराणुपुद्गलां शरणं श्रयामि हिमशैलबालिकाम् ॥९३॥

जगतीजनमूर्धविभूषणभूतपदाब्जरजा विदिता भवती ।
श्रुतिकामिनिका गणगीतगुणा गणनासमतीतगुणा भवती ॥९४॥

श्रुतिसम्मतमार्गगतैः सुलभा श्रुतिसम्मतमार्गगता भवती ।
श्रुतिसम्मतमार्गविधायिनिका श्रुतिसम्मतमार्गऋषिर्भवती ॥९५॥

गिरिराजवधूसंगे क्रीडदानन्दविग्रहम् ।
उमाख्यं परमं धाम मनोदाम श्रयामहे ॥९६॥

या चितिर्याचितिप्राप्तपादापरा या हिमाद्रेस्तनूजा तनूजन्मने ।
या परञ्चापरं ब्रह्म विद्योतते याऽसमानासमाना समानाश्रये ॥९७॥

भवभामिनिका विदिता भवती भवभाविनिका विदिता भवती ।
अयि रक्तपटाभिहिता भवती अयि रक्तपदाऽभिहिता भवती ॥९८॥

कृतमुग्धवपुश्चितिका भवती कृतसूर्मि बहूर्मि सरिद् भवती ।
कृतकाञ्चनलोष्टमतिर्भवती भवतारिणिकोपनिषद् भवती ॥९९॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

वसुमत्युपमातृपदा भवती भववार्धिविहारिणिका भवती।
भववार्धिनिवारिणिका भवती भववारिधितारिणिका भवती ॥१००।

कृतनामनवश्रुतिका भवती हतकामकदम्बनुता भवती।
प्रणतालिमुखाब्जविलोकिनिका विपदोघनिवारिणिका भवती ॥१०१।

अयि वंशविवर्धिनिका भवती अयि वंशभवा नदिका भवती
वरवंशजकंसनिषूदिनिका अयि विन्ध्यनिवासिनिका भवती ॥१०२।

दैत्याधीशाऽवलोके दलदरुणकराक्रान्तशोणाब्जशोभा
देवाधीशे च दृष्टे तरुणरविकरोद्भिन्नपद्मप्रभासा।
दीनान् संप्रेक्षमाणा निजनुतिनिरतान् अश्रुभिन्नप्रवाहा
हैमं हैमन्तपद्मं कुरुचि विदधती पातु मां मातृदृष्टिः ॥१०३।

मातः क्षमाङ्गभवित्रके मम संख्यकाती-
तान्येनसां परिसरत्पटलानि दृष्ट्वा।
तातः क्षमिष्यति न जातु बन्धमारी
मारीचरावणवधप्रथितानुभावः ॥१०४।

सोऽहं व्रजामि भवतीं जननीं जगत्याः
पादान्तिके उपरताखिलकर्मजालः।
मातर्निधेहि घनमण्डलि दृष्टिवृष्टि-
मस्मिन्नकिञ्चनविहङ्गशिशौ विषण्णे ॥१०५।

या शक्तिरात्मन उदारदयानुविद्धा
सर्गस्थितिप्रलयहेतुरहेतुराद्या।
दृष्टा विमोचयति संसृतिपाशबन्धाद्
दृग् गोचरी भवतु सा सहसा सहासा ॥१०६।

दुर्गे दुस्तरसंसारपारावारविलङ्घने।
पोतायमानचरणे शरणं भव सर्वदा ॥१०७।

चरणप्रणतार्तिहरा भवती नयनैःपरिपालिनिका भवती।
करपाशगदाङ्कुशचापधराऽभयबाणविधारिणिका भवती ॥१०८।

माणिक्यमौक्तिकमसारसुशारहारहारावलीवलयितो भुविभूरिवित्तः।
नाऽहं बुभूषुरनघे तव पादपद्मप्रभ्रश्यदच्छरजसा परितः सुपूतः ॥१०९।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सुदूरगुणकर्षणोच्चलितबद्धपीनस्तनी
नवीनतमवल्लवीगणविगापितस्वस्तवम् ।
अनन्तसुरसुन्दरीव्रजविगीतविद्यागुणं
महेश्वरकृपाकणं तव विलोकयामो वयम् ॥११०॥

जगत्त्रयविधावनव्यथितमानसे प्रोद्भवत्
पदाम्बुरुहदर्शितं सकललोकविस्मापकम् ।
सुरासुरकदम्बकोपनमितोपदा संभृतं
महेश्वर कृपाकणं तव विलोकयामो वयम् ॥१११॥

॥ इति निर्वेदनिवेदनम् ॥३॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अनुभूतिप्रकाशः

अनुभूतिस्वरूपेण स्थिता या विदुषां हृदि ।
जगत्कल्याणकामानां सा स्फुरत्वनिशं हृदि ॥१।

कार्याकार्यव्यवस्थायामशक्तान् वीक्ष्य मानवान् ।
स्वानुभूतिचयं वच्मि जगत्कुशलकाम्यया ॥२।

अथ साधारण उपदेशः

'कलौ चण्डीविनायकौ' इत्यभियुक्तोक्तिमनुसरद्भिः प्रत्यहं दुर्गासप्तशत्याश्चरित-त्रयात्मिकायाः पाठः कीलकवचार्गलाशापोद्धारोत्कीलनादिरहितोऽङ्गन्यासकर-न्यासादिवर्जितश्च लाघवेन कर्तव्यः। तत्रादौ सङ्कल्पः, तदुत्तरमष्टोत्तरशतमादावन्ते च नवार्णजपः, ततो ध्यानम्—ऋषिच्छन्दोविनियोगाः, ततः पाठः। अध्यायान्ते च इतिबधाध्यायशब्दानां त्रयाणां पाठो न कार्यः।

गृहस्थवृत्तम्

न्यायेनार्था अर्जनीयाः, धर्मविनिर्णयाय तत्त्वविनिर्णयाय च सद्भिः सह सङ्गो विधेयः, अतिथिप्राप्तौ मनसः प्रहर्षो विधेयः। काले काले च तीर्थे च महालये च श्राद्धं कर्तव्यम्। सदाचारशिक्षायां सल्लोकव्यवहार एवोपाध्यायः।

शङ्कायां द्वे न कर्तव्ये द्वे च कुर्यादसंशयम्।
कुर्यान्मूत्रपुरीषे द्वे न कुर्याद् गमनाशने॥
आत्मानं सततं रक्षेत् दारैरपि धनैरपि।
'जीवन्नरो भद्रशतानि पश्यति'।

हितं वाच्यम्, मितं वाच्यम्, सत्यं वाच्यम्, मधुरं वाच्यमित्येष वाक्संयमः।

श्रेयान् स्वधर्मो विगुणः परधर्मात् स्वनुष्ठितात्।
स्वधर्मे निधनं श्रेयः परधर्मो भयावहः॥
न जातुकामान्न भयान्न लोभाद्
धर्मं त्यजेज्जीवितस्यापि हेतोः।
धर्मो नित्यः सुखदुःखे त्वनित्ये
जीवो नित्यो हेतुरस्य त्वनित्यः॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

चत्वारः पुरुषार्थाः—अर्थः, धर्मः, कामः मोक्षश्चेति। तत्राद्यौ द्वौ समुदितावुत्तरयोर्द्वयोरेकैकस्य साधनम्। तत्राप्याद्यं प्रति साक्षात्साधनम्, द्वितीयं प्रति तु परम्परया साधनम्। 'धर्मार्थकामाः सममेव सेव्या यस्त्वेकसक्तः स नरो जघन्यः इति कामन्दकः।

भार्या त्वर्धं शरीरस्य पुत्रः स्वात्मैव केवलम्।
आश्रितो भृत्यवर्गस्तु दुहिता कृपणं परम्॥
तस्मादेतैरधिक्षिप्तः सहेता संज्वरः सदा। इति मनुः।

गृहस्थो जानपदिकदुःखोद्दिधीर्षया बालकैषणावित्तैषणाभ्यां वा राजनीतौ न विषज्जेत, समूलविनाशभयात्। राजनीतेरध्ययनाध्यापनयोस्तु न कोऽपि दोषः। यदि तु राजनीतौ सक्रियं विषज्जेतैव, तदा पुत्रदारादितो गृहाश्रमाच्च बहिर्भवेत्। ब्रह्मचारी यदि राजनीतौ षज्जेत, तदा विवाहं न कुर्यात्। कन्याविवाहार्थं द्वादशाब्दादेव प्रयत्नो विधेयः। 'कन्या गुणवते देया' इति च न विस्मार्यम्। यत्नात् परीक्षितः पुंस्त्वे युवा 'धीमान् जनप्रियः' इति च वरगुणा अन्वेष्याः। पुंस्त्वपरीक्षणं च मूत्रपुरीषाभ्यां भवति। तत्र मूत्रपरीक्षा यथा यस्य मूत्रं फेनिलं यस्य मूत्रं सशब्दं निपतति, यस्य च मूत्रस्य निपाते भूमौ गर्तो भवति गभीरः, स पुमानिति। यस्य पुरीषं जले उपरि प्लवते स पुमान्। यस्य पुरीषं जले निमज्जति स नपुंसक इति। सन्तोषात् सर्वोत्तमसुखलाभः। सर्वधनेषु विद्यैव विशिष्टं धनम्। विद्यातः प्रज्ञा, प्रज्ञातः समुत्साह इति कौटिल्यः। कृषिविद्ये उभे अपि वृत्ती शक्तस्य, उभयत्र अशक्तस्य तु विद्यैव वृत्तिः, तदुक्तम्—

वेदः कृषिविनाशाय कृषिर्वेदविनाशिनी।
शक्तश्चेदुभयं कुर्यादशक्तश्च कृषिं त्यजेत्॥ इति।

कन्यां विवोढुमिच्छता कन्याकुण्डली पूर्वं द्रष्टव्या। सौशील्यम्, पातिव्रत्यम्, दीर्घायुः, पुंसन्तानयोगः, कन्याया नैरुज्यम्, वाचि अपारुष्यम्, अक्रोधनत्वमिति कन्यागुणाः। विवाहोत्तरं पुत्राभावे पञ्च षड् वा वर्षाणि प्रतीक्ष्याणि। तत्र पुत्राभावे तदुत्तरमेते दृष्टा अदृष्टाश्चोपायाः कर्तव्याः। गयाश्राद्धम्, पितॄणां तिथिषु श्राद्धम्। नानाभिधान्यौषधानि, हरिवंशपाठः। तत्प्रकारः हरिवंशपाठ आदावन्ते च हरिवंशस्यैव पुष्करप्रादुर्भावाध्यायेन संपुटितो नवभिरहोभिः कार्यः। शालग्रामं पुरस्कृत्य संपूज्य च श्रूयाद् बन्ध्यादशावृत्तीः। सप्तावृत्तीर्मृतापत्या, कन्याप्रसूः पञ्चावृत्तीः श्रूयात्। हवनादिस्थाने पञ्चमांशः पाठः। तदनन्तरं शक्त्या होमः।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

कुर्यादहरहः श्राद्धं पितॄणां तृप्तिमावहन् इति। पुत्रप्राप्तये एकलक्षमारभ्य चतुर्विंशतिलक्षं यावद् गायत्रीजपः। लक्षजपस्यैकैकस्यान्ते चरुणा होमः। हुतशेषश्चरुः सूर्याय निवेद्य पुत्रार्थिन्यै देयः पुत्रप्राप्तिर्भवति।

स्थाने हृषीकेष तव प्रकीर्त्या, जगत्प्रहृष्यत्यनुरज्यते च।
रक्षांसि भीतानि दिशो द्रवन्ति सर्वे नमस्यन्ति च सिद्धसंघाः॥

अयं मन्त्रः पत्रादौ विलिख्य भूतप्रेतग्रस्तानां करकण्ठादौ बन्धनीयः। तेन भूतप्रेतानां विद्रावणं भवति। राज्यभ्रंशे कुलक्षये आयुषो नाश आगते वृद्धिक्रमेण शतचण्डीपाठः कार्यः। एक आचार्यो विघ्नविघाताय गणपतिमन्त्रजपं कुर्यात्। दशब्राह्मणाश्च पाठकर्तारः। तत्र प्रथमदिने एकैकपाठः। द्वितीयदिने द्वौ। तृतीयदिने त्रयस्त्रयः पाठाः। चतुर्थदिने चत्वारश्चत्वारः पाठाः। पञ्चमदिने हवनादिस्थाने द्वौ द्वौ पाठौ। सहस्रावर्तनात् त्ववश्यं स्थिरलक्ष्मीप्राप्तिः। तत्रापि हवनादिस्थाने पञ्चमांशः पाठः। सर्वेषु कार्येष्वपि सहस्रावर्तनादवश्यं कार्यसिद्धिः। तेष्वपि हवनादिस्थाने पञ्चमांशपाठः।

घृतकुम्भसमा नारी तप्ताङ्गारसमः पुमान्।
तस्माद् घृतञ्च वह्निञ्च नैकत्र स्थापयेद् वुधः॥

मात्रा स्वस्रा दुहित्रा वा न विविक्तासनो भवेत्।
बलवानिन्द्रियग्रामो विद्वांसमपि कर्षति॥

यो यमर्थं कामयते यदर्थं यततेऽपि च।
स तमर्थमवाप्नोति न चेत् श्रान्तो निवर्तते॥

उत्साहसम्पन्नमदीर्घसूत्रं क्रियाविधिज्ञं व्यसनेष्वसक्तम्।
शूरं कृतज्ञं दृढसौहृदञ्च लक्ष्मीः स्वयं याति निवासहेतोः॥

सुवर्णपुष्पां पृथिवीं चिन्वन्ति पुरुषास्त्रयः।
शूरश्च कृतविद्यश्च यश्च जानाति सेवितुम्॥

सुहृदि निरन्तरचित्ते गुणवति भृत्येऽनुवर्तिनि कलत्रे।
स्वामिनि सौहृदयुक्ते निवेद्य दुःखं सुखी भवति॥

इति श्रीब्रह्मीभूतकाशीनाथतनयसौभद्रेयरघुनाथशर्मकृतो

अनुभूतिप्रकाशः समाप्तः ॥४॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

शिवसायुज्यमाप्ताः पण्डितराजाः श्रीकालीप्रसादमिश्रमहोदयाः !

सर्वतन्त्रापरतन्त्रा महीयांसो विद्वांसः सदाचारपूताः परोपकारनिरताः शासनाध्यापनकलाकुशलाः समेषां शिक्षकाणामादर्शभूता दिगन्तविश्रान्तकीर्तयः तत्त्वावधारणप्रखरमतयः परःशतशिष्याणां हृदयाधिदेवताः पारेवाक्पथवर्त्तिगुणगणाः संस्कृतसंख्यावतां सर्वथा निदर्शनभूताः प्राच्यसंस्कृतेः प्रतीका यद्यपीदानीं भगवतः शिवस्य सायुज्यमवाप्याशोच्यतां गताः, तथाऽपि तेषां सौम्यां मूर्ति सस्मितमाननं निर्मलं मनः सहजं स्नेहं समुज्ज्वलं चरितं विलक्षणं विद्याव्यसनं महनीयं सौजन्यं गरीयो ज्ञानगाम्भीर्यं सदाचारं निरभिमानितां मनस्वितां यशस्वितां वाग्मितां गुणग्राहितां परोपकारितां लोकप्रियतां च स्मारं स्मारमपूरणीयां क्षतिमनुभवन्ती विद्वन्मण्डली नितरां खेदमावहति ।

एते विभारतस्य भारतस्य सर्वोत्तरे उत्तरप्रदेशे गोरक्षपुरमण्डलान्तरवर्त्तिनि टिकरियाभिधे ग्रामे विद्याविनयविवेकसदाचारादिगुणगणाऽलङ्कृते महाकुलीने सारवावारीणब्राह्मणवंशे षट्चत्वारिंशदुत्तरैकोनविंशतिशततमे (१९४६ तमे) वैक्रमेऽब्देऽजनिषत ।

एतेषां जनकाः शारभार्चातन्त्रसाधनाप्रसिद्धयः शब्दशास्त्रनिष्णाताः पण्डितप्रवराः **श्रीजयजयरामशर्माणो मिश्रा** जनन्यश्च पतिव्रतापरम्परायामग्रगण्याः श्रीसुखदादेव्य आसन् ।

इमे स्वग्रामपार्श्वस्थप्रारम्भिकपाठशालायां प्रारम्भिकशिक्षामवाप्य स्वतातपादेभ्य एव व्याकरणशास्त्रमधीयाना विशेषज्ञानार्थं तैरादिष्टा **अयोध्यायां वैष्णवधर्मप्रवर्धिनीसंस्कृतपाठशालायां** प्रविष्टाः श्रमेणाधीत्य यथाविधि निर्धारितग्रन्थान् षडधिकैकोनविंशतिशततमे ख्रिस्ताब्देऽष्टादशवर्षदेशीया व्याकरणविषयमाश्रित्य सम्पूर्णमध्यमपरीक्षामुदतारिषुः । ततो द्वितीये वत्सरे काशिस्थराजकीयसंस्कृतमहाविद्यालये आचार्यकक्षायां प्रविश्य वैयाकरणकेसरिश्रीदामोदरशास्त्रिपादेभ्योऽध्यैषत । परं वर्षद्वयानन्तरं गृहीतावकाशेषु शिवसायुज्यतामाप्तेषु च शास्त्रिपादेषु तत्पदे नियुक्तानां प्रखरप्रतिभावतां श्रौतस्मार्तक्रियाजुषां पण्डितप्रवराणां **श्रीरामभवनशर्मोपाध्यायानामन्तेवासित्वमाप्तास्तेभ्योऽधीत्य** षड्भिर्वर्षैः षट्खण्डात्मिकामाचार्यपरीक्षमुत्तीर्याचार्यतामवापुः ।

ततो न्यायकाननपञ्चाननेभ्यः श्रीजीवनाथमिश्रमहोदयेभ्यो न्यायवैदुषीमवाप्य साहित्यादिशास्त्राण्यधीत्य च श्रीविश्वम्भरनाथब्रह्मचारिभिर्बहुधा प्रार्थितस्तदीये प्रयागस्थश्रीधर्मज्ञानोपदेशसंस्कृतविद्यालये प्रधानाध्यापकपदं विभूषयन्तो व्याकरणसाहित्यविषययोराचार्यपरीक्षां यावदध्येतॄणां प्रतिभावतां छात्राणां स्वान्तः समावर्जयन्तस्तेषां परप्रेमास्पदान्यभूवन् । ततः स्वप्रखरप्रतिभया विविधान् ग्रन्थानधीत्य स्वात्मनि ज्ञानराशिमर्जयन्तोऽध्यापनकलाकौशलेन छात्रेषु ज्ञानसङ्क्रान्ति च विदधानाः सफलाध्यापकवर्गाग्रेसरतां गताः ।

शिष्टा क्रिया कस्यचिदात्मसंस्था सङ्क्रान्तिरन्यस्य विशेषयुक्ता ।
यस्योभयं साधु स शिक्षकाणां धुरि प्रतिष्ठापयितव्य एव ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

इति कविकुलगुरोः कालिदासस्योक्तेर्निदर्शनभूता यशोराशिमातन्वानाः पञ्चभिर्वर्षैरनेकशश्छात्रान् लब्धाचार्यपदवीकान् सम्पादयन्तः कदाचित् महामनसो मदनमोहनमालवीयमहोदयनां कर्णशष्कुलीं स्वयशोराशिभिः पूरयन्तस्तदन्तःकरणहरणमकार्षुः ।

एतद्दूष्यवैदूष्यपीयूषसुहितानां श्रीरामावतारशर्मणामनुरोधेन महामनसो मालवीयमहोदयाः स्वकीये काशिकहिन्दूविश्वविद्यालये पण्डितप्रवराणां श्रीदेवनारायणत्रिपाठिमहोदयनां राजकीयविश्वविद्यालये नियुक्त्या रिक्ते व्याकरणाध्यापकपदे एकोनविंशत्युत्तरैकोनविंशतिशततमे खीस्ताब्दीये सितम्बरमासे सादरमेनान् प्रत्यतिष्ठपन् । तदैव संस्कृतच्छात्रावासस्य संरक्षकपदमप्यलमकार्षुः । ततः शतशश्छात्रानध्यापयतां शिष्टाचारपूते सनातने पथि व्यवस्थापयतामलंकर्मीणानामेषां सौजन्यवैदुष्याभ्यां परां प्रीतिमनुभवन्ती समितिः षड्विंशत्यधिकैकोनविंशतितमे वर्षे महामहोपाध्यायानां श्रीजयदेवमिश्रमहोदयानां शिवसायुज्यावाप्त्या रिक्ते व्याकरणविभागाध्यक्षपदे सबहुमानमेनानभ्यषिञ्चत् । एतेषामाध्यक्ष्ये नैके स्नातका विद्यावित्ता अभूवन् । ते च भारतस्यास्य प्रतिप्रान्तं तेषु तेषु विश्वविद्यालयेषु महाविद्यालयेषु तत्तत् पदं विभूषयन्त एषां कीर्तिचन्द्रिकया जगन्ति धवलयन्तो विभान्ति । ततो महाविद्यालयस्य बहुमुखीं समुन्नतिं कामयमाना समितिः सप्तत्रिंशदधिकैकोनविंशतितमे खिस्ताब्देऽभिनवं महाविद्यालयस्योपाध्यक्षपदं निर्माय्यैनान् तत्पदे प्रत्यतिष्ठपत् । पुनश्च त्रयश्चत्वारिंशदधिकैकोनविंशतितमे खिस्ताब्दे दिगन्तविश्रान्तकीर्तयो डॉ० राधाकृष्णमहोदयाः कुलपतयो महामहोपाध्यायश्रीप्रमथनाथतर्कभूषणश्रीबालकृष्णमिश्रप्रभृतिभिः प्रसाधिते पण्डितप्रवरश्रीशङ्करभट्टाचार्यप्रभृतिभिः समर्थिते महाविद्यालयाध्यक्षपदे एनान् न्ययोजयन् ।

ततोऽध्यापकसंख्यासु छात्रसंख्यासु चोत्तरोत्तरं वृद्धया संस्कृतमहाविद्यालयः समेधितोऽभूत् । एतेषामाध्यक्ष्ये परःशताश्छात्रा आचार्यतामवाप्ताः । तेषां एम्० ए० परीक्षायां प्रवेशे समापतितो विघ्नव्यूहानपहायेमे तेषां जीविकापथान् प्रशस्तान् सम्पादयामासुः । द्वात्रिंशद्वर्षाणि यावद् महाविद्यालयं सेवमानाः १९५२ तमेखैस्ताब्दे लब्धावकाशा अभूवन् । ततो श्रीगोविन्दमालवीयस्यानुरोधेन वर्षं यावद् तत्रैव स्थिता निर्वेतनं निर्व्याजं सुरभारतीवरिवस्यामकार्षुः ।

ततो विश्वेश्वरमुपासितुमुत्कास्तत्सविधे सुरम्यं हर्म्यं कल्पयित्वा तत्रैव निवसन्तोऽनेकशः शास्त्रीयशङ्कापङ्काकुलितचेतसो विदुषः सततमध्यापयन्तः शास्त्रीयगूढग्रन्थाशयान् प्रकाश्यापगतशङ्कान् सम्पादयन्तः 'सरस्वतीफाटक' इति स्थानाभिधामन्वर्थतां निन्युः । एते सर्वदा सुतनिर्विशेषान् छात्रानपश्यन् । चरित्रचारुतयाऽनवद्यविद्यया सौजन्येन शीलेन नयेन विनयेनाध्यापनकौशलेन परोपकारितादिगुणगणेन सदुपदेशव्यसनेन सत्यनिष्ठया निर्भीकतया च विश्वेषामादर्शभूता आसन् । वेषेण वपुषा वाचा विद्यया विनयेन च युक्ता स्वसविधे समुपेतान् कान् सहृदयान् न प्रभावितान् विदधुः ? इमेऽधिपाणि पाणिनिं हृदि वररुचिं पादयोः सतां पतदञ्जलीन् दधाना एकाकिनोऽपि त्रिमुनीयन्त आसन् ।

अपि च पण्डितराजस्येयं सूक्तिस्तेष्वक्षरशः सङ्घटते—

अन्या जगद्धितमयी मनसः प्रवृत्तिरन्यैव कापि रचनावचनावलीनाम् ।
लोकोत्तरा च कृतिराकृतिरार्यहृद्या विद्यावतां सकलमेव गिरां दवीयः ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

इत्थमिमे समेषां विदुषां वन्दनीया आसन् । यतो हि—

वदनं प्रसादसदनं सदयं हृदयं सुधामुचोवाचः ।
करणं परोपकरणं येषां केषां न ते वन्द्याः ॥

इति सूक्तिर्मन्ये एतादृशानेवाभिलक्ष्य निर्मिताऽऽसीत् ।

एतेषां विद्याव्यसनमतिप्रथितमासीत् । ग्रीष्मर्तौ वृषस्थेऽपि सूर्ये इमे दिवास्वापं कदापि नाकार्षुः । ये तद्दिने मध्याह्नेऽपि तेषां सविधे गतास्ते पुस्तकावलोकनं कुर्वाणान् तानपश्यन् । नित्यनैमित्तिककर्मानुष्ठानपरायणास्ते 'अयं निजः परो वेति' अगणयित्वैव सदा परोपकारे रता आसन् । सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य यावज्जीवं सम्मानितप्राध्यपका आसन् ।

एतेषां शिष्याणां सङ्कलनं दुःशकमेव । तथा हि—श्रीसरस्वतीप्रसादचतुर्वेदी, श्रीगोविन्दमालवीयः, डा० वी० रा० वेङ्कटाचलमूर्तिः, श्रीकरुणापतित्रिपाठिनः तत्तद्विश्वविद्यालयेषु कुलपतयोऽभूवन् । प० कमलाकान्तमिश्राः शास्त्रार्थमहारथाः, श्रीमुनिवरमिश्रमहोदयाः, संस्कृतमहाविद्यालये प्रधानाचार्या आसन् । कवितार्किकचक्रवर्त्तिनः श्रीमहादेवशास्त्रिणः काशीहिन्दूविश्वविद्यालयस्य संस्कृतमहाविद्यालये प्रधानाचार्या आसन् । सेवानिवृत्ताश्च काशीसुमेरुपीठाधीश्वरा जगद्गुरवः शङ्कराचार्या अभूवन् । प० श्रीनिरीक्षणपतिमिश्राः, श्रीरामकुबेरमालवीयाः, श्रीमधुसूदनशास्त्रिणः का० हि० वि० वि० तत्तद्विभागाध्यक्षा आसन् । प० श्रीरामचन्द्रमालवीयः सं० सं० वि० वि० परीक्षाधिकारिणः प्रस्तोतारश्चासन् । प० श्रीरामप्रसादत्रिपाठिनः, डा० देवस्वरूपमिश्राः सम्पूर्णानन्दसंस्कृतविश्वविद्यालये सङ्कायाध्यक्षपदं विभूषयन्ति । अन्ये श्रीगोमतीप्रसादत्रिपाठिनः, श्रीवायुनन्दनपाण्डेयाः, श्रीलालविहारीशास्त्रिणोऽन्ये चानेकशः शिष्यास्तत्तत्पदे प्रतिष्ठिताः सन्ति ।

महामनसां मदनमोहनमालवीयमहोदयानामिमे श्रद्धाभाज आसन् । मालवीयमहोदया कमपि गभीरं विषयं विचारयितुमेनान् सर्वदा समस्मार्षुः । सनातनधर्मस्य रक्षायै सततमिमे प्रयतमाना आसन् ।

एतेषामनेकशो महनीया निबन्धा प्रकाशिताः सन्ति । पाणिनीयशिक्षायाः सारगर्भां टीकां कृतवन्तः ।

एतेषां ज्येष्ठपुत्रः श्रीचन्द्रचारुमिश्रः विक्रीकरविभागेऽधिकारी आसीत् । साम्प्रतं लब्धावकाशो गृहे निवसति । कनिष्ठपुत्रः श्रीचन्द्रमौलिमिश्रः भू० पू० एम्० एल्० ए० विहार प्रान्ते एडवोकेट अस्ति । तेषां चतस्रः कन्यकाः सन्ति । सर्वाश्चाधीतविद्याः सौभाग्यवत्यः सुपुत्रवत्यः सुखेन निवसन्ति । जामातारश्च सर्वे महनीये पदे विराजन्ते । तेषु श्रीहरिश्चन्द्रपतित्रिपाठी उच्चन्यायालयस्य न्यायाधीश आसीत् । अपरः गोरक्षपुरे जुडिशियलमजिष्ट्रेटपदेऽस्ति । पौत्रद्वये प्रथमः विक्रीकरविभागे अधिकारी अस्ति । प्रपौत्रश्च बालोऽस्ति ।

एभ्यः २०२६ वैक्रमेऽब्दे प्रयागस्थभारतीपरिषद् महामहिमोपाध्यायेति पदवीं प्रादात् । अखिलभारतीयपण्डितपरिषदा १९७४ तमे खैस्ताब्दे व्याकरणसार्वभौमेत्युपाधिनाऽलङ्कृता ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

एतेऽखिलभारतीयसंस्कृतपरिषद्दिल्लीद्वारा भारतप्रधानमन्त्रिणा श्रीलालबहादुरशास्त्रिणा सम्मानितविद्यावाचस्पत्युपाधिना विभूषिता अभूवन्। सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः १९७६ तमे खैस्ताब्दे सम्मानितवाचस्पत्युपाधिमेभ्यः सादरं सत्कृत्य प्रादात्। तस्मिन्नेवाब्दे उत्तरप्रदेश-शासन एतेषां वैदुष्यप्रभावितः १५००० पञ्चदशसहस्त्रमुद्रायाः सर्वोत्तमसम्मानितपुरस्कारमेभ्यः प्रार्पिपत्।

एवं यावज्जीवमध्यापयन्तोऽधिकाशि श्रीविश्वेश्वरसविधिपाञ्चभौतिकं शरीरं विहाय ६ अगस्त १९७७ दिनाङ्के शिवसायुज्यमापुः, येन भारत्या भारतस्य चापूरणीया क्षतिर्जाता, तथेदानीं साक्षात् सुरभारती एव स्वप्रियपुत्रविरहदुःखदुःखिता परिदुर्बला लक्ष्यते।

सम्पादकः

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सारस्वती सुषमा

सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयानुसन्धानपत्रिका

१. एषा देशे विदेशे च लब्धप्रसरा त्रैमासिकी संस्कृतपत्रिका ।

२. अस्याः प्रकाशनं प्रतिवर्षं ज्येष्ठ-भाद्रपद-मार्गशीर्ष-फाल्गुनपूर्णिमासु भवति ।

३. अस्याः प्रधानमुद्देश्यं संस्कृतज्ञेषु स्वोपज्ञानुसन्धानप्रवृत्तेः समालोचनाप्रवृत्तेश्चोद्बोधनं प्रोत्साहनं चास्ति ।

४. अस्यां सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्थानामन्येषां च विदुषां स्वोपज्ञविचारपूर्णा अनुसन्धानप्रधाना निबन्धाः प्रकाश्यन्ते ।

५. प्रकाशितनिबन्धस्य प्रतिमुद्रणानां पञ्चविंशतिः, पत्रिकायाश्च सोऽङ्को दीयते, यस्मिंस्तदीयो निबन्धः प्रकाशितो भवति ।

६. अस्यां पत्रिकायां विशिष्टानां हिन्दीसंस्कृताङ्गलग्रन्थानां समालोचनाः प्रकाश्यन्ते । तदर्थं ग्रन्थकृद्भिर्ग्रन्थस्य द्वे प्रतिकृती प्रेषयितव्ये ।

७. 'कुलसचिव, सम्पूर्णानन्दसंस्कृतविश्वविद्यालय, वाराणसी-२२१००२ (उ०प्र०) इति सङ्केतेन ('बैंकड्राफ्ट' अथवा 'पोस्टल आर्डर' इत्येतेनैव) मूल्यं प्रेषणीयम् ।

८. पत्रिकासम्बन्धी सर्वविधः पत्रव्यवहारः "सम्पादक, सारस्वती सुषमा, सम्पूर्णानन्द-संस्कृत-विश्वविद्यालय, वाराणसी–२२१००२ (उ० प्र०) इति सङ्केतेन विधेयः ।

प्रकाशकः–सञ्चालकः, अनुसन्धानसंस्थानम्, सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयः, वाराणसी-२२१००२ (उ० प्र०) ।

मुद्रकः–तारा प्रिंटिंगवर्क्स, कमच्छा, वाराणसी ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

रजिस्टर्ड न्यूजपेपर्स एक्ट के अन्तर्गत

विज्ञप्ति

१.	प्रकाशन का नाम	सारस्वती सुषमा
२.	प्रकाशन की तिथि	त्रैमासिक
३.	प्रकाशक का नाम	भागीरथ प्रसाद त्रिपाठी
	राष्ट्रियता	भारतीय
	पता	सम्पूर्णानन्द संस्कृत विश्वविद्यालय,
४.	सम्पादक का नाम	भागीरथ प्रसाद त्रिपाठी
	राष्ट्रियता	भारतीय
	पता	सम्पूर्णानन्द संस्कृत विश्वविद्यालय, वाराणसी
५.	मुद्रक का नाम	श्री रमाशंकर पंड्या
	राष्ट्रियता	भारतीय
	पता	तारा प्रिंटिंग वर्क्स, कमच्छा, वाराणसी
६.	स्वामित्व	सम्पूर्णानन्द संस्कृत विश्वविद्यालय वाराणसी

मैं भागीरथ प्रसाद त्रिपाठी घोषित करता हूँ कि उल्लिखित विज्ञप्ति मेरी जानकारी के अनुसार बिलकुल ठीक है।

हस्ताक्षर
भागीरथ प्रसाद त्रिपाठी
गवेषणालय-संचालक
सं० सं० वि० वि०, वाराणसी—२२१००२.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सुसङ्ग्राह्याः केचन शोधप्रबन्धाः

ग्रन्थनाम		मूल्यम्
१. अथर्ववेदे शान्तिपुष्टिकर्माणि	—श्रीमत्या मायामालवीयया वैदिकवाङ्मयस्यानुशीलनं कृत्वा विरचितो विविधैरानुसन्धानिकनिष्कर्षैः समेधितोऽयं प्रबन्ध —	८-००
२. पाणिनीयधातुपाठसमीक्षा	—डॉ० भागीरथप्रसादत्रिपाठिना विरचिता। लेखकेन प्रायः समस्तसंस्कृतधातुपाठा उपजीव्यत्वेनोरीकृत्य समीक्षिताः। आधुनिकगवेषणापूर्णैर्निर्णयैः प्रबन्धोऽयं समुल्लसति। प्रबन्धस्यास्य महत्त्वमङ्गीकृत्यैवोत्तरप्रदेशीयशासनेनेयं पुरस्कृता—	१८-५०
३. पाणिनीयव्याकरणे प्रमाणसमीक्षा	— प्राचीनव्याकरणविभागाध्यक्षेण श्रीमता रामप्रसादत्रिपाठिना विरचिता। इयं गवेषणाप्रधानैस्तात्त्विकैः, अथ च शास्त्रीयगभीरानुशीलनतथ्यैः समेधिता, उत्तरप्रदेशीयराज्यशासनेन पुरस्कृता च—	२६-२५
४. प्रक्रियाकौमुदीविमर्शः	—डॉ० आद्याप्रसादमिश्रेण लिखितः। श्रीरामचन्द्राचार्यविरचिताम् 'प्रक्रियाकौमुदीम्' उपजीव्यत्वेनाधारीकृत्य लेखकेन गवेषणापूर्णबहुविधानुसन्धानिकनिष्कर्षा इह सन्निवेशिताः—	८-००
५. ग्रहगणितमीमांसा	— डॉ० मुरारिलालशर्मणा विरचिता। इह भारतीयग्रहगणितस्य पाश्चात्यग्रहगणितस्य च तुलाबोधकमनुशीलनं कृतं वर्तते। अस्यास्तात्त्विकं महत्त्वमङ्गीकृत्यैव राज्यशासनेन पुरस्कृता—	५-५०
६. सूर्यग्रहणम्	— डॉ० कृष्णचन्द्रद्विवेदिना विरचितम्। इह सूर्यग्रहणस्यार्वाचीनां पद्धतिमनुसृत्यानुसन्धानिकाः सिद्धान्ता समुपन्यस्ता लेखकेन। अस्य वैज्ञानिकं महत्त्वमूरीकृत्यैव उत्तरप्रदेशीयशासनेनेदं पुरस्कृतम् —	१२-००
७. प्राच्यभारतीयम् ऋतुविज्ञानम्	—श्रीधुनीरामत्रिपाठिना संरचितम्। इह लेखकेनानुसन्धानिकं पर्यवेक्षणं कृतम् ऋतुविज्ञानस्य। अस्याभिनवं मूल्यमाकलय्यैव राज्यशासनेन पुरस्कृतम्—	१८-००

प्रकाशकः—निदेशकः, अनुसन्धानसंस्थानम्, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी-२

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

पञ्जीकरणसंख्या–६९८१/५७

अभिनवप्रकाशनानि सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य

क्रमसं०	ग्रन्थनाम		मूल्यम्
१.	शुक्लयजुर्वेदकाण्वसंहिता	[उत्तरविंशतिः] संहितेयं सायणभाष्यसहिता प्रकाशिता विविधैः खलु गवेषणाप्रधानैः भूमिका-टिप्पण-परिशिष्टैः समलङ्कृता	२२-००
२.	वाक्यपदीयम्	[वृत्तिसमुद्देशात्मकम्] ग्रन्थरत्नमिदं हेलाराजप्रणीतया प्रकाशव्याख्यया तथा च प० रघुनाथशर्मविरचितया अम्बाकर्त्रीटीकया विभूषितम्	६५-५०
३.	वैयाकरणसिद्धान्तमञ्जूषा	[नागेशभट्टविरचिता] ग्रन्थोऽयं सर्वतः प्रथमं सम्पादककृतविविधैः सारभूतैः टिप्पणभूमिका-परिशिष्टैः समलङ्कृत्य प्रकाशितः	३६-००
४.	प्रक्रियाकौमुदी	[भागद्वयात्मिका] रामचन्द्राचार्यप्रणीतेयं प्रक्रियाकौमुदी सर्वतः प्रथमं शेषश्रीकृष्णपण्डितप्रणीतया प्रकाशव्याख्यया विभूष्य प्रकाशिता। तृतीयो भागोऽप्यचिरादेव प्राकाश्यमेष्यति । प्रथमभागस्य	५२-००
		द्वितीयभागस्य	६७-००
५.	सरलत्रिकोणमितिः	[ज्योतिषम्] म० म० श्रीबापूदेवशास्त्रिविरचितोऽयं ग्रन्थो गवेषणापूर्णैः उपोद्घातपरिशिष्टैः सम्भूष्य प्रकाशितः	२९-००
६.	प्रशस्तपादभाष्यम्	[प्रशस्तपादाचार्यप्रणीतम्] न्यायदर्शनस्य प्राणभूतमिदं ग्रन्थरत्नं श्रीधरभट्टकृतन्यायकन्दलीव्याख्यया, श्रीदुर्गाधरझाकृतहिन्दीभाषानुवादेन च समलङ्कृतं पुनः प्रकाशितम्	६८-००
७.	रसगङ्गाधरः	[पण्डितराजजगन्नाथविरचितः] साहित्यशास्त्रग्रन्थोऽयं प० केदारनाथओझाप्रणीतया रसचन्द्रिकाख्यया व्याख्यया विभूष्य प्रकाशितः। द्वितीयभागोऽपि किलाचिरादेव प्राकाश्यमेष्यति–	२२-००
८.	नानकचन्द्रोदयमहाकाव्यम्	[श्रीदेवराजशर्मविरचितम्] गुरुनानकचरितमुपजीव्यत्वेनाङ्गीकृत्य प्रतिभावता देवराजशर्मणा महाकविना विरचितमिदं महाकाव्यं कामं संस्कृतवाङ्मयस्य श्रियं समेधयति	७४-६०
९.	रसिकजीवनम्	[पण्डितश्रीरामानन्दपतित्रिपाठिविरचितम्] नायिकाभेदनिरूपणपरमिदं काव्यं सर्वतः प्रथमं विस्तृतगवेषणात्मिकया प्रस्तावनया समलङ्कृत्य प्रकाशितम्	७-००

प्रकाशकः-निदेशकः, अनुसन्धानसंस्थानम्, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी-२२१००२